उत्तररामचरितम् ।

[महाकवि-भवभूतिप्रणीतम्]

(सर्व्वाश्रसंवादिन्या उत्तरदीपिकाख्यया टीकया कविकाव्यसमालोचन-
हिन्दिभाषा-वङ्गभाषानुवादान्वयसमर्पणमीयट्-परिकल्पीत
परीक्षाप्रश्नावलीप्रभृतिभिश्च
समलङ्कृतम्)

श्रीमद्-गुरुनाथ-विद्यानिधि-भट्टाचार्य्येण
सम्पादितम्

काव्य-व्याकरण-तर्कतीर्थ—
श्रीकालीपदतर्काचार्य्येण
संशोधितम्

कलिकाता— वाग्‌वाजार निवेदिता-लेनस्थित-
संस्कृतविद्यालयात्
श्रीजानकीनाथ-काव्यतीर्थेन
प्रकाशितम् ।

१३२८ बङ्गाब्दे मुद्राङ्कितः

मूल्यं—[illegible]

প্রাপ্তিস্থান—

ছাত্রপুস্তকালয়।

নিবেদিতা লেন, পোঃ বাগবাজার, কলিকাতা।

শাখা—

সংস্কৃত বুক্‌ডিপো,

১৭২ নং কর্ণওয়ালিস ষ্ট্রীট, কলিকাতা।

PRINTED BY GOBARDHAN PAN
AT THE GOBARDHAN PRESS,
209, Cornwallis Street, Calcutta

पातनिका।

अस्ति हि शास्त्रवचनं "काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कान्तासम्मिततया उपदेशयुजे" इति, अस्ति च "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते" इति। एतैः शास्त्रोपदेशैः काव्यस्य परमेष्टसाधकतामवगम्य काव्यमेवनं कर्त्तव्यमिति पण्डिता निर्द्धारयन्ति, यतः सर्वं एव संसारेषु फलमिच्छन्तः कार्य्येषु प्रवर्त्तन्ते, फलञ्च धर्म्मार्थकाममोक्षाणामन्यतममेव, तत् काव्यस्य चतुर्वर्गसाधकतया कथं नास्तु तत्र प्रवृत्तिर्विवेकवताम्? तच्च काव्यं द्विविधं सदसद्भेदेन, सत्काव्यं हि सद्विषयोपदेशेन सतामसतां वा विपुलं पुण्यं समुत्पाद्य मोक्षादिविधौ प्रवर्त्तकं भवति। असत्काव्यञ्च असद्विषयविज्ञापनेन असत्पथेषु मानसं परिचालयत् परिणामे नरकादिभीषणोत्पातानुपजनयति, सत्काव्येन पठितेन श्रावितेन प्रबोधिता बुद्धिः सुतरां निर्वाणकालोपनतामिव विमलतामुपलभमाना संसारसारभूतं पुण्यमुपार्जयति, तत्प्रणायकानाञ्च कविमुख्यानामनन्ता कीर्त्तिसन्ततिस्तथा दिगन्तेषु विस्तीर्य्यते; यथा शैलसागरादिसमवरोधेनापि न प्रतिनिवृत्तिः सम्भवतीति। तथाच—समुपलभ्यते भूयान् मानससन्तोषः, यथा साधारणजनानामनुभूते मन्दारमन्दिरेऽपि न सम्भवतीति निश्चयः। तथाचालङ्कारिकास्तत्तदनुभवेन विज्ञातनिखिलतत्त्वा गायन्ति "धर्म्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्" मित्यादि। सन्ति च "संसारविषवृक्षस्ये"त्यादिकानि बहून्येव प्रमाणानि काव्यप्रकर्षे, तदलम्प्रस्तुतविषयस्यातितरामनुकूलं विषयं दूरे स्थापयितुमप्रस्तुतविषयाणामतिमात्रपर्य्यालोचनेन। सत्स्वपि बहुलेषु काव्येषु, सत्स्वपि च

तत्प्रणायकेषु बहुलेष्वेव कविमुख्येषु. यद्य समालोचनीयतामध्यास्ते दृश्यकाव्यानां नानारसमयानां कविचित्ताह्लादकानामेकतमम् उत्तररामचरितं नाम काव्यम्, तत्प्रणेता च कविकुलगौरवरविः कविजनकाम्यगुणो भवभूतिः श्रीकण्ठो वा। यस्य काव्यरसेनाप्लुतमानसा मनीषिणः सहसा कमपि भावभेदमाप्नुवन्तः कठोरदुःखेष्वपि चित्तप्रान्तिमुपगच्छन्तो देव्याः सरस्वत्या नवीनमिव भावं प्रत्यक्षीकुर्वन्तः स्वकर्त्तव्येषु रसाभिभवेन प्रमाद्यन्ति, जागरिता अपि जगदिदं स्वप्नसंवेद्यमानमिव जानन्ति, मुहूर्त्तमात्रेण च जीवलोकात् निर्वास्यमाना: कुत्रचिदलौकिके लोके समुपतिष्ठमाना: काव्यवर्णितमलौकिकं भावजातं चक्षुषेव वीक्षन्ते। यस्य शृङ्गाररसतरङ्गसंसङ्गेन परुषमपि ब्रह्मचारिजनहृदयं शृङ्गारैकतानं प्रियवस्तुप्रवणतामवलम्बते, वीररसप्रयोगनैपुण्येन मुहूर्त्तमपि जन्मावधि वीरभावमविजानतां दुर्बलमन्तःकरणं वीररसोन्मादेन माद्यति, निरुपमकरुणादिरसविलसितेनापि दानवादीनां नीरसं मानसं तत्तद्रसमयतामिव क्षणेन प्रपद्यते। तदयमतिनिपुणो महाकविरिति सुवच एव सन्दर्भः। अस्य हि महाकवेः कवित्ववैचित्र्यविशेषेणैव महावीरचरितोत्तररामचरितमालतीमाधवेति दृश्यकाव्यत्रयीमिव विरचयतो महाकविसंज्ञेति श्रूयते। यदि चास्ति काव्यमपरं किमपि तत्प्रणीतं तदतितरामेव प्रच्छन्नपदवीमध्यारूढमस्मास्विति तिष्ठन्त्वेव वयं तत्कृतिषु विश्वस्ताः। अनेन तत्कृतनाटकादिपर्यालोचनद्वाराप्रकर्षनिरूपणं विनापि साधारण्येन सुज्ञेयस्तावदस्य कवेः प्रकर्षः। न ख्यातिमात्रामुल्लमतामृते कथमपि तेन रूपकत्रयप्रणयनेन महाकविख्यातिः सुलभा स्यात्। सति च काव्यपर्यालोचने स एव महाकवेरस्य प्रकर्षनिश्चयो दृढ़तामवलम्बते हृदयेषु, यथा कालान्तरेऽपि नास्य हृदयादपगममसम्भावयन्ति। न हि तं प्रकर्ष भिन्नाः केऽपि मिथ्या इति सम्भावयन्तो महाकविममुं दोष

मुद्दघोषयन्ति। महाकवेरस्य पाण्डित्यालोकसमालोकिता कविता मधुरशब्दालङ्कारसम्वलिता गम्भीरार्था च वनितेव भूयस्तोरयति कवितारसचोराणां सुधीराणामन्तःकरणानि। प्राकृतभाववर्णनेषु प्रकृतिरेव मूर्त्तिमती समुपैति रसमुग्धानां रसिकानामन्तिकदेशम्। स्वल्पपरिसरेण वा विस्तृतवाक्यस्तोमेन वा सवथैव प्रतिपादयितुं प्रयाक्त कविरसौ साधारणाधारणावहिर्भूतं भावनिवहम्। उच्यते तत्समर्थनार्थमेव क्रमेण कतिपयानि रसमयभाषितानि, तथाच – प्रथमत एव शृङ्गारे स्वल्पवचनेनापि लौकिकसाधारणभावपरिहारेण विन्यासो यथा"यकिञ्चिदपि कुर्वाण सौख्यं दुःखान्यपोहति। तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥" इति। वस्तुत एवानिरूपणीयं किमप्यसाधारणं वस्तु प्रियो जनः प्रणयप्रवाह-प्रक्षालितमानसतलस्य जीवस्य। कथमन्यथा प्रियवियोगे नितान्त-काम्यं जीवनमपि तृणाय मन्यमानाः प्रेमिकजनाः कुत्रचिदगाधे जलराशौ कुत्रचिदतिप्रज्ज्वलिते हुताशने देहमर्पयन्ति, कुत्रचिद् वा समुन्नतशैलशिखरादात्मानं पातयित्वा प्रियवियोगवेदनां उपशमय-यन्ति। प्रेम सर्वस्यैवास्य जगतो मूलभूतम्। तपस्विनः परमेश्वरे प्रेमवन्तस्तपस्याविधिमाचरन्ति, भिक्षुमुख्या जीविकाहरणकामुकाः प्रतिद्वारं वर्षातपक्लेशसहिष्णवो भिक्षन्ते, धनिकाः सुखे प्रणयिनो मुहुरजस्रं धनव्ययं कुर्वन्ति, शृङ्गारभावसम्भावितात्मानो निजप्रिय-प्रणयिनस्तदर्थं सुखं वा दुःखं वा न गणयन्ति, इत्येवं गवेषणाभिः सुनिश्चितमेव सर्वत्र कर्मणि प्रेममूलकत्वमभ्युपगम्यते, तथाभूतस्य जगतः प्रधानतमं निदानम् अलौकिकमिति नास्ति विस्मयावसरः। तस्य यथैव युज्यते गभीरभावेन निर्देशः, यथा च प्रकृतमनिर्वचनीयत्वं तथा तथैव दिशा कविरतिनिपुणं व्यवस्थापयामास "यकिञ्चि दपी"ति। तत्र "किमपी"ति पदेन गरीयार्थोऽप्ययं पण्डितेषु गभीरतरतामिव समालम्बते। अस्मिन्नेव विषये पद्यान्तरं यथा

"अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया । स हि स्नेहात्मक-स्तन्तुरन्तर्मर्माणि सीव्यति" । इत्थं पद्यद्वयं समीक्षमाणाः केचित् पर्य्यालोचयन्ति प्रेमिककुलशिरोमणयः, यत् यदि केवल-मनेनैव श्लोकद्वयेन निर्मितेन कविरेकस्य पुस्तकस्य समाप्तिं विधाय जगति महाकविसंज्ञा लब्धकामः समभविष्यत्, तदापि स स्वं कामनाफलमलप्स्यत इति । इत्थं प्रेमपर्य्यालोचनं नास्ति साधारणकवीनामसाधारणानां वा आपाततो दृष्टचराणामिति समान विषयलाभाभावेन तैः साकमिदमादाय प्रकर्षापकर्षविचारो नाव-काशं लभताम् । वयञ्च वस्तुतो नूतनविधया प्रेमपर्य्यालोचनमीक्ष-माणाः, परमुत्कृष्टमेव तत्कवयितारं सम्भावयन्तः कविजगत्सु प्रख्यापयामः । अपिच अत्र कविना प्रस्तुतविषयस्य न कापि व्यक्तिः सन्निवेशितेति सम्भवति साधारणजनैरेवास्य प्रियजनसन्निधौ प्रणयविज्ञापनादिप्रस्तावे प्रयोगयोग्यत्वम्, अतएवातिमात्रा रतिरत्र साधारणानां, स्वगतमेव विषयं जनाः समधिकमाद्रियन्ते, पर-कीयञ्च समुपेक्षन्ते इति । अथ वीररसेऽपि महाकवेरस्य चरमोत्-कर्षः सम्भाव्यते, तथाच—महावीरे कौमारमनतिक्रामतोऽपि यौवन-पदवीमनुसरतो विश्वामित्रेणानीतस्य श्रीरामचन्द्रस्य ताटकावधं, ततः एव पाशुपतधनुर्भङ्गम्, अप्रतिरथस्यापि राक्षसकुलभास्करस्य रावणस्य समूलमुन्मूलनम्, उत्तररामचरिते च रघुकुलाङ्कुराणां कुश-लवचन्द्रकेतूनां परस्परं संग्रामं सन्निवेश्य दर्शितो वीररसप्रकर्षाति-रेकः । विस्मयकरः संग्रामो हि संभाव्यते परिपुष्टकायैर्बहुतिथं कालं सुशिक्षितैः वीरमुख्यैरेव सुनिपुणं, तथात्वेन च गगन-चारिणोऽपि विस्मयन्ते परस्परमस्त्रसम्प्रहारपर्य्यालोकनेन । अत्र च कविः स्वभावतो रघुकुलसन्तानसुलभा वीर्य्यकीर्त्ति न: संग्रामविधिना विद्याधरादीन् शून्यचारिणो दृष्टा लो अ-भावनिवहानपि विस्मापयमानान् रघुकुलबालकानुपस्था पि

वर्त्तितवान् लोकानामलौकधारणाम्। तदत्वं बालकवीर्य्यवार्त्तामात्रं शृण्वन्तो यदि युद्धकारिणां, शैशवं न केनचित् विज्ञाप्यन्ते, तदा नूनं ते बालकानिमान् प्रौढ़ानतिशूरानेव सम्भावयन्ति। अस्ति चाभिज्ञानशकुन्तले महमाङ्के वीरबालकस्य सर्वदमनस्य महाबलेन सिंहेनापि समं सपराक्रमविकाशं शैशवक्रीडा, श्रयते तच्छायामवलम्ब्यैव महाकविर्भवभूति: स्वीयकाव्ये चित्रमिदं वस्तु निपुणं सन्निवेशयामासेति तस्य विवेकस्तु परतो विस्तृता भविष्यति। अभिज्ञानशकुन्तलीयं सर्वदमनस्य वीरत्वं यथा सातिशयशशवोपयोगि,नाव तथा; यत: सर्वदमनो नाम कुशाद्यपेक्षया वयसा परं कनिष्ठ:, येन विवेकपरिशून्य इव हिंस्रप्रधानं सिंहमुपलभ्य क्रीड़ाप्रवृत्ति:, परिरक्षणार्थंञ्चास्य सर्वत: स्थिता तापसोति। कुशलवौ च द्वादशवर्षवयस्कौ चन्द्रकेतुरपि वयसा ताभ्याम ईषन्न्यून:, तदुपयोगिनी च ब्रह्मक्षात्रवेदविद्या इति कवि: सम्भावितनच्छायावलम्बनं कुर्वन्नपि भावपरिवृत्तिं कुर्वाणा महर्षिरिव प्रकृतदर्शी सम्पूज्यते पूज्यतमै: कविवरैरिति।

अपि च महावीरे वीर्य्यमदोद्धतस्य ब्रह्मकुलप्रोज्ज्वलमणेरपि पशुपतिशिष्यपरशुरामस्य गुरुधनुर्भङ्गप्रज्वलितक्रोधज्वलनस्य विवाहमहोत्सवावसर एव युद्धनिवर्त्तनार्थं कठोरं रामामन्त्रणं, नेपथ्ये युद्धवृत्तान्तविज्ञापनं, ततश्च तस्यैव श्रीरामचन्द्रेण विनीतभावेन विजयं, नितान्तं विनयञ्च परिदृश्य श्रीरामस्य कोऽपि वीर्य्यप्रकर्षच्छाया हृदयगोचरीक्रियते, यथा सहस्रवीर्य्यप्रतिपादकप्रबन्धेनापि नालमुपपादयितुम्। उत्तररामचरिते सीतावियोगविमनायितस्य दैवनिर्देशेनेव राजकार्य्यापातेन दण्डकायाम् उपगतस्य धीरोदात्तस्यापि श्रीरामचन्द्रस्य प्रकर्षगतेन करुणप्रवाहेण सामाजिकहृदयं परिप्लुतं सत् समस्तमेव जगत् करुणरसमयमुत्प्रेक्षते। मुहुर्मूर्च्छा, मुहुश्छाया भूतां सीतां करादौ लभमानस्य पुनर्व्वीडापगम:, पुनरपहृते विघात:,

सीताकरे गभीरवेदनामर्दनात् मूर्च्छाप्रत्यापत्तिरित्येवम्। ...वती दण्डकावनदेवता मानुषं भावं सर्वथा परित्यजन्तो अपि ...वासपरिचिताया: प्रियतमाया: सीताया रामेण कानन निर्वासनं श्रुतवती विस्मृतदैवतभावा चक्रन्द सर्व्वं काननं मुखरयन्ती ... श्रीरामचन्द्रेण, कति च दु:खवेगादेव रामहृदयस्पर्शिवचनानि ...भाषयामास। अपि च नानारसकुशलो महाकवि: समाज-शिक्षाव्यवस्थाभिलाषेण रामं नायकतया दिव्यादिव्यमेव समा-श्रितवान्, यथाच—दिव्यता विना नालौकिकभावं कवि: प्रतिपाद-यितुं शक्नोति, दर्शयमानश्च लोकातिशायित्वसमर्दिव्यनायकेन ...मत्त एव साधुजनाग्टहीतवचनो लोकशिक्षासु वासनावैफल्य-मधिगच्छति, यतो लोका: समोचिनेन सजातीयजनस्य आ-चरितेन साधुषु असाधुषु वा विषयेषु सहसैव प्रवर्त्तन्ते, दिव्यमात्र-समाचरितेषु स्वसाध्यत्वबोधपरिहीनतया कथं तत्र प्रवृत्ति: स्यात्, प्रवृत्तिर्हि कृतिसाध्यत्वज्ञानजन्येति दार्शनिका वदन्ति। अपि च महाजनवचनं "रामादिवत् प्रवर्त्तितव्यं न रावणादिव" इत्यादि तथाभूतं वाक्यादिकमवलम्बमान एव कवि: समाजशिक्षासाधनार्थी काव्यप्रणयने प्रवृत्ते, सफलाशश्च स्वकृतौ जात:।

...नाकौशलमनुररीकुर्वन् कवि सर्वकविविलक्षणं चित्रदर्शनं ...यामास। तथाच रामाभिषेकमहोत्सवमङ्गलमनुभवितुं ...षु मिलिता बान्धवा राजन्यवर्गा:, अपरे च कौशल्यमहोत्सव-...का: प्लवङ्गराक्षसा आञ्जनेयविभीषणप्रमुखा:। क्रमेणावसितो ...त्सव:, कतिपयदिवसान् प्रवृत्तं नृत्यगीतादिमहोत्सवोपचार-...मनुभूय प्रस्थितास्ते निजप्रदेशान्, जानकीजनको जनक: ...प्रतिरोधेन परमकाम्यमपि सीतासहितं रामचन्द्रं ...लेव ... मिलितां प्राप्त इति विमनायमाना सीता सर्वं ... शीतला न कामयते जातु, नापि प्रवर्त्तते न

शयने शयितुं, न चोपयुज्यते राजयोग्येषु भोजनाद्युपादेयोपकरणेषु, तदानीं राम प्राणेभ्योऽपि प्रियतमाम् अतिमात्रविक्लवां सीतां कथं नाम सान्त्वयेदिति गवेषणया प्रियवस्तुविरहसञ्जातामार्त्तिं प्रियवस्तुनैव निराकर्त्तुकामः, सीतादुःखप्रमार्जनकुशलं लक्ष्मणमेव निपुणचित्र-करलेखितं सीतायै अतिप्रियतमं श्रीरामलक्ष्मणाभ्यां सह वन-वासादिपूर्ववृत्तं परिदर्शयितुं प्रवर्त्तयामास, लक्ष्मणोऽपि तथैव कृतवान्। तत्र च कौशलेन कवि श्रीरामचन्द्रस्य महावीरचरित विनिवेशितानि पूर्ववृत्तानि सामाजिकगोचरीकृत्य प्रस्तुतकाव्य वृत्ताशस्यापातपरिपतनतो विभाव्यमानं सामाजिकमोहं निरा करोति। अपि च चित्रदर्शनादियत्किञ्चित्प्रस्तावेनासूचिते श्रीराम सुतयोर्जृम्भकास्त्रलाभे पश्चाद्धि तथाभूतमलौकिकजृम्भकास्त्रसामर्थ्य-वर्णनमपि कुशलवयोर्जृम्भकास्त्रलाभकारणान्वेषणतो मोहविजृम्भकं स्यादिति काव्यरसिकाः। अपि च चित्रदर्शनं भूयसा सीताया दण्डकारण्यनिर्वासने परामनुकूलतामेव समाधत्ते, तथा च—नूतना राजा श्रीरामचन्द्रः नातिदूर एव निर्वर्त्तितराज्याभिषेकमहोत्सवः सर्वथा पालनीयानां प्रजानां स्वविषयकं मतोऽभिमतं परिज्ञातुं दुर्मुखं नाम प्रियमनुचरं प्रेषयामास, स चापि विश्वस्तः कर्त्तव्य-परायणो विज्ञातसर्व्वप्रजामनोभावः सविषादमागत्य श्रीरामं सीताया अपवादकलुषितं प्रजामानसं वेदयामास। ज्ञाततत्त्ववार्त्तो प्रजावत्सलो रघुकुलभास्करः सीतायाः परिहारं विना नान्यं पन्थानमुपलेभे प्रजारञ्जनाय, कर्त्तव्यञ्च विशेषेण रघुकुलानां प्रजा रञ्जनमिति किं कुर्य्यात्? इतःपूर्वमेव च चित्रेषु वनवासपूर्व-परिचितान् शैलवनादिशोभासन्तानानवलोक्य प्रोच्छलन्तीनाञ्च गिरि-नदीनां सुमधुरं सन्धानं प्रत्यक्षीकुर्वत्याः सीतायाः सातिशयमभ्यारूढा वासना पुनरपि तद्वनपर्य्यालोकनेषु। इमामेव सीतानिर्वासनसूत्रभूतां सीताया वनवासवासनामुपगत्य खेदोदयेनैव ज्वरपरिभ्रंशं श्रीरामचन्द्रः सम्प्राप कठोरचिन्तोपरमं, अन्यथा प्राणप्रियतमाया केवलं प्रिय-

वचनयोस्थाया एव सीताया अलीकपौरजनापवादकलुषनिर्देशेन कथं कानने निर्वासनं श्रीरामचन्द्रेण सुकरं स्यादिति। इदञ्च नूतनमिव भासमानं चित्रपरिदर्शनं वस्तुतो न श्रीकण्ठादेव प्रथमोत्पत्तिमुपलेभे; तथाहि—कालिदासस्य सर्वस्वभूते शाकुन्तले विरहविधुरो दुष्मन्तः शकुन्तलायाश्चित्रदर्शनेन कथञ्चिन्मानसशान्तिमुपपादयामास। तच्च नातिविस्तृतमिति साधारणाना तत्र श्रीकण्ठकल्पिते चित्रदर्शने इव सापाततो विशेषेण दृष्टिः सन्निबद्धा स्यात्। तथापि कवेरस्य कल्पनाकुशलता सातिशयं प्रशंसनीया स्वल्पमात्रं कालिदासेन संसूचितामपि विशेषेण मानसाकर्षणविरतामपि कल्पनां यथास्थानं रसातिशयसम्पादिकया दिशा परिकल्पयन् प्रकृतविषयं परिपुष्णन् प्रकृतवृत्तोपकारञ्च सम्पादयन् नवीनकल्पनाकारीव महाकविरसौ संस्तूयते रसिकमण्डलीनामतिमात्रमक्लान्तैरन्तरैरिति। श्रीकण्ठो हि यथा यथावृत्तं यथारसञ्च भाषाविन्यासकौशलं समाकलयति, यथा च हृदयस्पर्शिभावजातं भाषासौष्ठवेन सातिशयचमत्कारयुक्तं सम्पादयति, नैव लभ्यते तथा साधारणेषु। न केवलं रसोत्कर्षो न वा प्रकर्षातिरेकमादधाति काव्ये भाषामात्रसमुत्कर्ष इति। श्रीकण्ठस्य तु यत्र यादृशो रसस्तत्र तादृशा एव शब्दाः परिदृश्यन्ते, तथाहि शृङ्गारे कोमलरसोपयोगिनः कोमलशब्दा एव समुपयुज्यन्ते इति कविः शृङ्गारेषु मधुरशब्दविन्यासेन गीतवान्—"जीवयन्निव ससाध्वसश्रमस्वेदविन्दुरधिकण्ठमर्प्यताम्। बाहुरैन्दवमयूखचुम्बित-स्यन्दिचन्द्रमणिहारविभ्रमः॥" अपि च "प्रश्च्योतनं नु हरिचन्दन-पल्लवाना"मित्यादौ सीतास्पर्शस्य नितरामतिशान्तिकरत्वमलौकिक भावावेशजनकताञ्च परिवर्णयतो रामस्य यथैवालौकिकभावविकाशो युज्यते तथैव भाषाविन्यासेन सामाजिकहृदयेषु समुद्रेकः प्रकृष्ट-रसस्य। करुणेषु स्वाभाविकसरलपदादिसम्पत्तिरेव युक्ता, तत् शोकस्पर्शादभिरतिमात्रम् अन्तःकरणविकारं समुपस्थितं

मपि प्रतीन चेष्टाभिरन्तःकरणं सविकारं सहजवचोभिरुपपादयति ।तद्यथा "दलति हृदयं गाढोद्वेगो द्विधा न तु भिद्यते" इत्यादिषु, "हा हा देवि स्फुटति हृदयं स्रंसते देहबन्ध" इत्यादिषु च सन्दर्भेषु । वीररसे च योग्यो भवति शब्दाडम्बरवानोजोगुणैकनिश्रन्द इति, यत्रास्थानं वध्यवाव: कवे: तथाशब्दप्रवृत्तिर्वीररसोद्दमनवसुके —"ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र"मित्यादिषु । परतस्च कनिष्ठेन भवेन राजसैन्यानां महायुद्धसंवादमधिगम्य सातिशयं सम्भ्रान्तो वीररसहृष्टोऽपि लवाग्रजो रघुकुलाङ्कुरः कुशो नाम वीररसहृष्टमपि सहजभावयेव दूरादुपामन्त्रयते "भाण्डायन भाण्डायन ! श्रायुष्मतः किल लवस्य नरेन्द्रसैन्यैरायोधनम्" इत्यादिना ।

अपि च पात्राणां ये यथा ज्ञानवन्त', ये च यं भावमवलम्बमानाः परिचरन्ति,तेषां भाषाप्रचयेभ्य एव तथा तथा भावाधिगम. सम्पद्यते । जनकभाषासु राजर्षिजनोचितार्थप्रतिपादकत्वम, भरुन्धत्या भाषां अपि सम्मानज्ञानप्रतिष्ठाया गभीरवचोविन्यासः, वासन्त्यादीनां प्रेमप्रवणहृदयानां कोमलार्थपूर्णवचनाभिव्यक्तिः, श्रीरामस्य महाप्राणस्य सहृदयसुलभप्रेमप्रकाशिनो वचनविस्तृति', प्रजारञ्जनैक-व्रतधारिणश्च तस्य "यदि वा जानकीमपी"त्यादिमहात्यागसंसूचिका वचनावली, क्रिया च तदनुकूला इत्यादि, विशेषतो हि •नालोच्यते ग्रन्थगौरवभयात्, सहृदयसमालोचनेन विज्ञानसम्भावनाच्च । तदयमेव संक्षेपार्थ: यत्—कविरयं प्रकर्षी रसविकाशोपयोगिनीषु भाषासु भावप्रकरसन्निवेशनेषु चेति । अपरमेकं नूतनं विषयं सन्निवेशयामास काव्यतत्त्वेषु सामाजिकादितत्त्वपर्य्यालोचनेषु लब्धप्रतिष्ठो विशेषेण कविमुख्यः श्रीकण्ठः, स च नाटकान्तरे नाटकान्तरसन्निवेश:'। तत्त्वथास्य जनकनन्दिनी साध्वीकुलशिरोमणि: सीतादेवी राक्षसभवने लङ्कापुर्य्यां रावणेनापहृता सुचिरं वासमकल्पयत्, बहुकालात् परञ्च श्रीरामचन्द्रेण राक्षसकुलं समूलमेव समुत्पाट्य· सीतां

पुनरयोध्यामानीतवान्, अयोध्यावासिनस्तु निभृतेषु स्वीयनिकेतनेषु
रघुकुलप्रेम्णा वा सीताया विशुद्धचारित्रमनुस्मृत्य वा स्वजनैरति-
मन्दं सीतायाः स्वभावेषु सन्दिग्धाः, ज्ञाततद्भावश्च रामचन्द्रो लङ्काया-
मग्निपरिशुद्धिवशाद् गृहीतशुद्धचारित्रामपि तां प्रजारञ्जनानुरोधाद्
गभीरे कानने निर्वासितवान्। राज्यस्य सर्वत्रैव प्रदेशे प्रचरितो
जनकसुताया अपवादवृत्तान्तः स च तथा विनोदनीयः यथा
अविज्ञातलङ्कापरिशुद्धयाऽपि राज्यवासिनः सीतामतिमात्रविशुद्धां
निःसन्देहं सम्मानयेयुः पूजयेयुश्च देवीमिव पुनर्लब्धाम्, इत्यादिकं
परिचिन्तयन् सीताया वनवासशरणीभूतो रघुकुलमङ्गलार्थी गूढ़-
सर्वार्थदर्शी प्राचेतसः सर्वजनवेदितव्यं नाटकविधिमुपक्रम्य सीतायाः
पवित्रता जगत्सु प्रचारयामास, फलिता च तस्य कामना, मङ्गल-
मयञ्च समपद्यत समस्तं जगत् श्रीरामसीतासमागमेन। अयञ्च
निबन्धः कवेरतिशयितां गूढ़ार्थदर्शितामिव सामाजिकभावेषु सञ्च-
यते। नैव सम्पादयितुमर्हति योग्यभावानभिज्ञः सुयोग्यं वृत्त-
जातमिति बहुलमेव वाच्यम्। अस्य च कविमुख्यस्य वेदान्तादि-
दर्शनार्थतत्त्वेष्वपि दृष्टमव्याहतं पाण्डित्यं तत्प्रणीत एव, तथाच --
"विद्याकल्पेन मरुता मेघानां भूयसामपि। ब्रह्मणीव विवर्त्तानां
क्वापि विप्रलयः कृतः" इति। तथाचायं कवित्वेन पाण्डित्येन च
भूयसामेव कवीनामूर्द्धतनं पदमधिकुर्वाणो विजयते काव्यकलासु
श्रीमान्। दुर्लभं हि प्रथमतो मानुषजन्म, ततोऽपि विद्याविद्योतः,
ततश्च कवित्वप्रतिभा, ततोऽपि च शक्तिः काव्यनिर्माणेष्विति प्राज्ञ-
प्रवरा गायन्ति। तथाच श्रूयते—"नरत्वं दुर्लभं लोके विद्या तत्र
सुदुर्लभा कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभे"ति। अयन्तु
एक एव सर्वं प्रकृष्टं वस्तु लभमानः कथमिव महाकविप्रकर्षं सर्व-
समतिक्रमिव न लभताम्।

सर्वेषु रसप्रकर्षेषु करुण एव परं प्रकर्षमादधाति २

तत्र प्रस्तुतनाटकादेव सहृदया विदन्ति. किमन्यत्, अस्मिन् सुनिपुणं पर्य्यालोच्यमाने नवीनाः पाठार्थिनोऽपि नालं भवन्ति नेत्राम्बुभि र्बहुलचेष्टयापि प्रतिरोद्धुं, किं पुनरेकान्ततो भावगाम्भीर्य्यमस्य हृदयङ्गमं जानवन्तः सम्यग्भाववन्तः सहृदया इति । अस्य निपुणं श्रीराममुखेन सीतावियोगजातकरुणविकाशेन वनतरवो मुह्यन्ति, वनदेवता वासन्ती विस्रस्तहृदयं रोदनेन दिशो मुखरयति, ग्रावा अपि प्रबलसंक्षोभसञ्जनक्षमाः पर्य्युदस्ता भवन्ति । तथाच प्रमाणमपि "भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति । एतत् कृतकारुण्ये किमन्यथा रोदिति ग्रावा" ॥ इति । एवं सकलकला कुशलस्य भवभूतेः प्रथमतो नान्दीश्लोकेन पूर्वकवीनां महामहनीय भावानां वाल्मीकिप्रभृतीनां प्रणतिपर्य्यायेण यथैव निरभिमानता प्रतीयते, तथैव स्वपरिचयवर्णनाप्रस्तावे "यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्त्तते" इत्यादि महाभिमानविजृम्भितेन वचनजातेन स्वाभिमानप्रदर्शनात्महाजनाचरणविगर्हितमनुष्ठानं किञ्चित् सन्दृश्यते । महाजना हि विमुखाः स्वाभिमानमात्ममुखेनैव प्रविकाशयितुमिति भूयसां सतां वादः । तथाच माघादिषु - "वदिता न लघीयसोऽपरः स्वगुणं तेन वदत्यसौ स्वय"मित्यादिभिरात्मगौरवं कवीयांस एव प्रतिपादयन्तीति कवयो निर्द्धारयन्ति, तथापि कविरयं सूत्रधारमुखेनैव स्वीयगौरवं सामाजिकानां गोचरीकृतवानित्यनेन परितोषणीयं सहृदयैरिति, नातितराञ्चास्य कवेरपकर्षावसरः । अस्य कवेः परिचयस्तु स्वीयकाव्यादेव कथञ्चिदुपलभ्यते, तथाच—'अस्ति विदर्भेषु पद्मपुरं नाम नगरम् । तत्र केचित्तैत्तिरीयिणः काश्यपाः चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो ब्राह्मणा ब्रह्मवादिनः प्रतिवसन्ति स्म । तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवो भट्टश्रीकण्ठपदलाञ्छनो भवभूतिर्नाम। जातू-

कर्णीपुत्रः" इति। स चायं कविः स्वजन्मना कस्मिन् काले पद्मपुरं नाम नगरमलञ्चकारेति विप्रतिपत्ता बहूनामेव युक्तीनामनुशीलनेनालोच्यते यथामति भीतभीतं प्रत्नतत्त्वानुशीलनाकुशलैरप्यनुसृतवर्त्तमानपाठनियमाना नवीनविद्यार्थिना नासिकाकुञ्चनवारणार्थम् किञ्चित्। यथा—अत्र राजतरङ्गिणी कथयति,—कान्यकुब्जस्य महीपालो यशोवर्मा एव भवभूतिं सादरमात्मनः सभालङ्कारभूतं विधाय तस्य साहाय्यकमाचचार, तञ्च काश्मीरधराधीश्वरो ललितादित्यः चतुर्विंशत्युत्तरसप्तशततमखृष्टाब्दे एकत्रिंशदुत्तरसप्तशततमखृष्टाब्दे वा पराजिग्ये, तदयं यशोवर्म्मणः सभालङ्कारभूतो भवभूतिस्तत्काल एव काव्यजगत्सु प्रादुरासीदिति निःसन्दिग्धम्। प्रमाणानि यशोवर्म्मणः सभायां श्रीकण्ठस्य वर्त्तमानतायां यथा—"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः। जितो ययौ यशोवर्मा तद्‌गुणस्तुतिवन्दिताम्" इति।

प्रबन्धकोषकर्त्ता राजशेखर प्रस्तौति, यत्—जैनधर्म्मासी वप्पभट्टिः यशोवर्म्मणः पुत्रं नवानं राजानम् आमराजं त्रिपञ्चाशदुत्तरसप्तशततमखृष्टाब्दे जैनधर्म्मे दीक्षितमकरोत, अतस्तदानीं यशोवर्म्मणो मरणव्यतिरेकेण तत्पुत्रस्य राज्याभिषेको नोपपन्न इति जीवनावसानमेव तस्य प्रतीयते, तत्पूर्वञ्च तत् समकालिकतया भवभूतेरामराजपूर्वकालीनत्वं तद्राज्याभिषेकसमकालवर्त्तित्वं वा शक्यते स्वीकर्त्तुं, तत एव अष्टमशताब्द्यामेव श्रीकण्ठ आसीदिति समवधारयितुम् शक्यते।

वाणो नाम कविमुख्यो जगति सप्तमशताब्द्यामेव जातः सुप्रसिद्धस्य च महाराजपदभाजा हर्षवर्द्धनस्य प्रियबन्धुरासीत्। स च हर्षचरिते बहूनामेव कवीना नामानि निर्दिशन्नपि भवभूतेर्नाम न निबद्धवान्, तत एवानुमीयते सप्तमशताब्द्याः परत एव जातो जगति श्रीकण्ठ इति।

एकादशशताब्द्यां निबद्धे काव्यप्रकाशे अभिनवगुप्तग्रन्थे च यत्र वामनस्य नाम लभ्यते, तत्रैव वामनस्य कृती दृश्यते भवभूतेर्नाम्ना निर्देशः, ततोऽपि शक्यते निर्देष्टुं

शताब्द्यां भवभूतिरिति, विशुद्धमस्यापि विशेषणापुराणस्य श्लोय-गभीरार्थपूर्णग्रन्थादौ नाम्नो सन्निवेशादर्शनात ।

त्रिनवत्युत्तराष्टशततमाब्दे महेन्द्रपाल: कान्यकुब्जे राजसिंहासन-मलङ्कार, तस्य सभाकवे राजशेखरस्य ग्रन्थे भवभूतिर्नाम समुप-लभ्यते, ततोऽपि अष्टमशताब्द्यामसौ श्रीकण्ठो बभूव काव्यजगति लोलाकर इति शक्यं निर्वक्तुमिति ।

सपञ्चाशदुत्तरनवशततमाब्दे विरचिते सोमदेवीययशस्तिलके चतु:सप्तत्युत्तरनवशततमाब्दम् प्रभृनवत्युत्तरनवशततमाब्दस्यान्तरा स्थितस्य मालवराजमुञ्जसभापण्डितस्य दशरूपककारस्य धनञ्जयसोदर-धनिककवेर्दशरूपकालोके च दृश्यते भवभूतिर्नाम, ततस्तत्कालात् प्रागेवास्य सत्तावश्यकतया अष्टमशताब्द्यामसौ बभूवेति शक्यं वक्तुम् ।

बहव एव भवभूतिं प्रसिद्धमीमांसकस्य कुमारिलभट्टस्य शिष्य-पदमध्यासीन ब्रुवते, यतो भवभूतेर्मीमांसादर्शनेषु भूयसा पाण्डित्य-मासीदिति विशेषेण कुत्रापि नोपलभ्येऽपि, यज्ञविधिषु तस्य गाढानुरक्तिम अश्वमेधादिनियमविज्ञतां स्वस्यापि पञ्चाग्निकुल-सम्भूतत्वादिकं निर्णीय, नासौ मीमांसाम अधिगतवान्, नापि कुमारिलभट्टशिष्यताम अधिष्ठितवानित्यादि दृढतया कथं नाम विज्ञाप्यतामस्माभि: । अथ यत्ते वीरचरिते "यस्य ज्ञाननिधिर्गुरु"-रिति अत्र केचित् श्रीकण्ठगुरोर्नाम ज्ञाननिधिरिति, अपरे च ज्ञान-निधिरिति तदाख्गुरुविशेषणमेवेति वदन्ति ।

केचित्तु ज्ञाननिधिं नाम गुरुं समुपगम्य श्रीकण्ठो वेदान्त-दर्शनम् अधीतवान्, तस्य च वेदान्ताध्ययनस्य उत्तररामचरिते दृश्यते भूयसा निदर्शनम् ।

अस्य च श्लोयवाचा एव साङ्ख्येषु योगेषु उपनिषत्सु वेदेषु च ज्ञानवत्ताविज्ञापा मालतीमाधवे "यद्वेदाध्ययनं तथोपनिषदां साङ्ख्यस्य योगस्य च ज्ञानं तत्कथनेन किमि" त्यादौ यथा समुपलभ्यते,

न तथा मीमांसादिदर्शनास्त्रेष्विति कथं तत्र तस्य प्रवर्त्तं पाण्डित्य मनुमोयतामिति वदन्तः श्रीकण्ठस्य कुमारिलभट्टशिष्यतां निराकुर्वन्तः परितुष्यन्ति, तदपि पूर्वदिशा समाधातुं शक्यते।

महाकवेः श्रीकण्ठस्य गभीरसौन्दर्य्ये, अरण्यानां नदीनां पर्वतादिकानां प्राकृतिकवस्तुसम्प्रदायानाञ्च गभीरनिर्जनतायाः, गभीरमानुषचरित्रस्य करुणभावस्य च निबन्धे, सातिशयं महत्त्वमुन्नीयते। प्रणये वा शोके वा वीर्य्यप्रकर्षे वा हृदयस्य सदृश्मानामपि भावनिवहानां विश्लेषणे पाण्डित्यं भवभूतेरनुपममेव। भाषासु भवभूतेरतिमात्रमाधिपत्यं समवर्त्तत, तच्च पूर्वमितः समालोचितं यथारसं यथास्थानञ्च शब्दविन्यासचातुर्य्यवर्णनावसरेषु।

नाटकीयवस्तूनां सुहृसंस्थापनेषु यथा कालिदासस्य महत्त्वमुपलभ्यते, विभिन्नभावमयानां नाटकीयचरित्राणां सन्निवेशेषु यथा चातुर्य्यं परिलक्ष्यते, न तथा श्रीकण्ठस्येति सहृदयहृदयमेवात्र प्रमाणम्, श्रीकण्ठस्य सर्वत्र कापि गभीरता समुपतिष्ठमाना प्रस्तुतरसान्तराणां प्रतिरोधमेव संसाधयति, कालिदासस्तु यत्र यादृशा रसाः यत्र यादृशाः भावनिवहाः, तत्र तत्र तादृशतादृशविन्यासेन भावसारस्य सन्निवेशेन च प्रकृतरसप्रकर्षमेव संसाध्य सहृदयहृदयाह्लादमपूर्वमेव समुत्पादयति वर्णनीयविषयञ्च प्रत्यक्षदृष्टमिव सामाजिकसविधे समुपस्थापयति। किं बहुना, संक्षेपतस्त्विदमेव कथयितुं शक्यते, यत् प्राकृतिकादिगभीरवर्णनासु सुदृसमहृदयभावादिषु च गभीरभावसङ्कलने श्रीकण्ठस्य बहुपरिभावी प्रकर्षः, तस्य च काव्यं स्वल्पविधयैव लोकमनोहारि, कालिदासस्य तु कवित्वं नाटकादिवस्तुनिर्माणेषु यथारसं यथास्थानञ्च सरलभावपरिपोषणादिभिः, प्रकृष्टोपमादिवैचित्र्यादिभिः, दृश्यवस्तुविन्यासपाटवेन च परं प्रकृष्टम्। कालिदासस्य यत्र रमणीयवस्तूनां दिग्दर्शनमात्रेण सामाजिकमनोऽभिव्यक्तिस्तत्र एव श्रीकण्ठः विस्तृतगभीरपर्य्यालोचनया

जिज्ञानां सर्वेन्द्रिय-संस्थापनमिव प्रतीयते, ततश्च भवभूतिः कालिदास-सृष्टभावानां स्वीयकृतिषु तथा सन्निवेशनेन तदपि पूर्वैर्मितः संक्षेपेण परिदर्शितम्। अनुभूयते च अभिज्ञानशकुन्तलस्य अवस्था-पेक्षया मनोरमत्वम् अभिनयदर्शने, उत्तररामचरितस्य अभिनया-पेक्षया श्रवणे इति। कालिदासकल्पितविषयाणां बहूनामिव अनु-वर्त्तनं चकार श्रीकण्ठः तेषाञ्च पूर्वमालोचनं कृतं बहुधा, अत्रापि किञ्चित् अर्प्यते, यथा—दुष्मन्तशकुन्तलयोः प्रणयस्य उर्वशीपुरू-रवसोः प्रणयस्य च वार्त्ता मालतीमाधवे मित्रदूतप्रदर्शिते मेघदूतमादर्शीकृत्य माधवेन मेघं दूतीकृत्य प्रियासमीपे तस्य प्रेषण-मिव च श्रीकण्ठस्य। एतेन यद्भवभूतिः कालिदासस्य काव्यं प्रकृष्टं मेने इति सुव्यक्तम्।

भवभूतिर्नाम कविरतिनिपुणस्यापि श्रीरामचन्द्रस्य दोषं गुणञ्च निबध्नन्नेषु दोषगुणयोरुभयोरेव निदर्शको विभाति, न तु केवलम् अपरेषां केषाञ्चित् कवीनामिव नायकनायिकादीनां गुणाभिधायी, तथा च—'हृद्यास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते" इत्यादि, अपि च—'अयि कठोर यशः किल ते प्रिय"मित्यादि-वचनेन रामस्य यशोमात्राभिप्रायकत्वं निर्वर्ण्य कथञ्चिदाचार्यैः तिरोधापितम्। अत्र श्लोके कालिदासमेव अनुकरोतीति "अपि स्वदेहात् किमुतेन्द्रियार्थात्, यशोधनानां हि यशो गरीय" इत्यादि-श्लोकदर्शनादनुमीयते।

उत्तरचरितनिबद्धस्य नाटकान्तर नाटकान्तरारम्भस्य कालिदास-वर्णितं मालविकाग्निमित्रस्थं मालविकाया रङ्गस्थले नृत्यकला-दिकमिव आदर्शीभूतमिति कथञ्चित् शक्यते निर्धारयितुम्। अतो नेदमिकान्ततो नूतनतया शक्यं निर्वक्तुमिति केऽपि रसानुशीलन-परा भाषन्ते।

चित्रदर्शनोपस्थापनं श्रीकण्ठस्य कालिदासप्रतीत "[illegible]

प्रार्थितमिन्द्रियार्थानामदुर्लभं मनस्तु चित्रवत्तस्य। प्राप्तानि दुःखा
न्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन् इति रघुवंशीय
श्लोक उपजीव्य इत्यपि केचिद्वर्णयन्ति, तत् सहृदयानामपि मनोहारि।
वाल्मीकिपरिचर्य्यानिपुणस्यापि महाकवे श्रीकण्ठस्य स्वीयकाव्य
नाटकीयवस्तूपयोगितादिसम्पादनाय रामायणादिविरोधः सन्दृश्यते,
यथा—रामायणे श्रीरामो नपृष्ठ न गुप्तमवस्थाय वालिवधं चकार,
महावीरे सम्मुखसङ्ग्राममाचरतैव तेन तद्वध सम्पादित इति तत
उत्तररामचरिते तस्यैव रामायणविरोधस्य कृष्णाय सम्भाष्य पुनर्लव
मुखेन "वृद्धास्ते न विचारणीयचरिता इत्यादिपद्य कीर्त्तनेन वालि
निधनव्यवस्थापनम्।

रामायणे सीताया स्वयमश्वमेधयज्ञस्थले उपतिष्ठमानाया
स्वीयशुद्धता प्रकाशयन्त्या पुनः श्रीरामेण प्रत्याख्याताया भूमि
प्रवेशेन वियोगविधिनैव वर्त्तमानम् उत्तरचरिते च नाटकान्तर
नाटकं प्रकाश्य सङ्गमेन श्रीरामेण सीतायाः सम्मेलनेन निर्वाहः।
तत्कल्पना च पद्मपुराणस्याचमनुकरोतीति धारणास्माकम्। तथाच
"सुवर्णपत्नीं धिक् कृत्वा रामभद्रं धर्मचारिणो मित्यादिपद्मपुराण
दर्शनात्।

रामायणे अश्वमेधीयाश्वरक्षकाभ्या शत्रुघ्नभरतपुत्रपुष्कलाभ्यां
कुशलवयोर्युद्धं, तत्र च कुशलवाभ्यां तयोः तत्पक्षीयाणामपरेषाञ्च
पराजयः, हनूमतो बन्धनं, उत्तरचरिते न तथेति पाठकमहोदया
सर्व एव विज्ञास्सन्ति ज्ञातवन्तो जानन्ति वा।

रामायणे अश्वमेधयज्ञस्थले एव कुशलवाभ्यां सह रामादीनां
सङ्गमः, सीता तत्रैव स्वीयां शुद्धतां स्वमुखेन विज्ञापयन्ती भूगर्भ
माश्रितवती, किन्तु न तथोत्तररामचरिते। रामायणे निर्वासिता
वस्थायामपरिणतगर्भा जानकीति विज्ञायते यत् निखिला सर्वा सीता
वाल्मीकितपोवने मुनिबालिकाभिः बहुकालं विहितवसत्या

मुखे, उत्तररामचरिते च लक्ष्मणेन गभीरारण्यभूमौ निर्वासनात् परमेव गङ्गायामात्मविसर्जनं कुर्वती कृततनयप्रसवा इति ।

तत्र नाटकीयवस्तूनां विन्याससौष्ठवसम्पादनार्थं निबध्नन् कविः साहित्यनियमावधिभूतो नापकर्षलेशमपि संस्पृशति, तथाच दर्पणे—

यत् स्यादनुचितं वस्तु नायकस्य रसस्य वा
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत् ॥ इति

कविवरस्य भवभूतेस्त्रीण्येव रूपकाणि काव्यजगत्सु प्रथितानि समुपलभ्यन्ते, यथा "महावीरचरितम्" "मालतीमाधवम्" "उत्तररामचरितं"चेति । ततोऽपरं किमपि रूपकं महाकाव्यादिकं वा रसास्वादनाय सहृदया न लभन्ते इति कष्टेऽपि उत्तररामचरितादिकमेव लभमानाः प्रायेण परितृप्यन्ति । इमान्येव त्रीणि रूपकाणि समुपलभ्य यन्महाकविपदभाजमिमं वर्णयन्ति सहृदया इति न भवभूतौ निरङ्कुशः पक्षपातः, नापि बान्धवजनोचितं बान्धवं ; यतः कवेरस्य पाण्डित्यप्रगल्भतया कवित्वप्रकर्षपर्य्यालोचनया च एवम्प्रवृत्तिरुपजायते रसास्वादचतुराणां कविमुख्यानां श्रीकण्ठं महाकविपदभाजमाशंसितुम् । वयन्तु मन्यामहे, यत यदि केवलमुत्तररामचरितमेव निर्माय महाकविरसौ कवितानिर्म्माणविधेर्विरतिमलप्स्यत, तदापि रससारास्वादिनः कविमुख्यमसुं ससन्तोषं महाकविपदेनाभ्यर्थितमकरिष्यन् । उत्तरचरिते मालतीमाधवे च यथा शब्दप्रयोगनैपुण्यं समुपलभ्यते, मानवचरित्राभिज्ञता च प्रकाशतां गच्छति, न तथा महावीरचरिते इति महावीरचरितमेवास्य प्रथमा कृतिरिति सम्भाव्यते । द्वितीया कृतिर्मालतीमाधवम्, तृतीया च कृतिरुत्तररामचरितम् । उत्तररामचरितमेवास्य रूपकनिर्माणसीमा, अवधिश्च सकलरसप्रकर्षस्य । तथाच अस्यैव कवेः स्वलिखिते "शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमा"मित्यंशे कवेः परिणतप्रज्ञत्वसंख्यापनेन अस्यापि तत्कालिकतया पर्य्यन्तरचनात् प्रतीयते,

यत् तदानीं कविवरस्य प्रज्ञा परिणामाभवत् शास्त्रादिमार्गे, बुद्धि परिणतिश्च नाट्यविषयेषु तत्तद्विषयाणामत्यर्थं मननशीलनव्युत्पत्तिरेकेणा-सम्भवा, न दृश्यते च तत्कृतिरन्या महावीरचरितमालतीमाधवाभ्यां उत्तररामचरितादुत्कृष्टा च, तत्कथं नाम तयोरुत्तररामचरितात् पूर्व-निर्मितत्वं नानुमीयतामिति। अपि च श्रूयते भवभूतिर्नाम महाकविः कालिदासस्य कवितानुभावेण सकलसाम्राज्यमधिष्ठितस्य यशोधाराभि समावृते सहृदयहृदये स्वीयमहावीरचरितं वस्तु कथमपि अप्रतिष्ठितं समीक्ष्य काव्यान्तरनिर्माणेन कालिदासयशस्तिरोधानकामुको मालती माधवे स्वीयं भावं लेशतो निवेदयामास—

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ इति

अनेन कवेरतिमात्रो गर्वितभावश्च विलसति। तत्र मालतीमाधवे प्रकर्ष लभमानोऽपि कामनासदृशं प्रकर्षमलभमानः पुनः काव्या-न्तरम् उत्तररामचरितं निर्माय्यैव अतिशयेन प्रकर्षवान् जातः। वस्तुत एवोत्तररामचरिते तस्य यथा रसप्रकर्षः, यथा शब्दविन्यासचातुर्यं, यथा वस्तुना सफलः सन्निवेशः, न तथा समुपलभ्यते कुत्रचिदपरत्र, तदयमेव कल्पो निर्विवादः, यत् भवभूतेरुत्तररामचरितं प्रकृष्टं शेषभूतश्च काव्यानाम्। तथाच श्रूयते "उत्तरे रामचरिते भवभूति-र्विशिष्यते"। इति। तदलमनल्पजल्पनेन यत् भवभूतेरभ्युदयकाल एव साकल्येन सञ्जातमिति मार्गोऽपि च प्राय एव सहृदया स्यैव नितरामालोचनेष्विति

एतन्नाटकीयरसनायकादिकं संक्षेपतो निरूप्यते, यथा- एत दुत्तररामचरितं नाम रूपकं 'नाटकं ख्यातवृत्तं स्या"दित्यादिनाटक-लक्षणयोगान्नाटकाख्य एव रूपकभेदे अन्तर्भवति। तथाच एत न्नाटकीयवृत्तस्य रामायणाख्यप्रसिद्धवस्तुख्यातत्वम्। यथाऽन्यत्र सभिव्यक्ताः पञ्च सन्धयः, विनासहायादिगुणानां समावेशनं, ए

दशानधिकमसाङ्गमविसदृत्वं इत्यादि बहुलं नाटकत्वव्यवस्थापकम् । "अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः" इति धीरोदात्तगुणसमन्वितो दिव्यादिव्यो नाम नायको रघुकुलचन्द्रः श्रीरामचन्द्रः "अनुकूल एकनिरतः" इति अनुकूलभेदलक्षणलक्ष्यो ह्यनुकूलो नाम नायकभेदः, तस्य एकसीतामात्रानुरक्तत्वात्

नायिका च सीता स्वीयाख्यनायिकाभेदस्य प्ररूढस्मरयौवना मध्यमव्रीडिता वेति लक्षणलक्ष्या तथाच -

'[illegible] प्रथमा [illegible] । इति

मध्या विचित्रसुरता प्ररूढस्मरयौवना ।

ईषत्प्रगल्भवचना मध्यमव्रीडिता मता' । इति च

दर्पणे तल्लक्षणस्य च प्रत्येकविशेषणमात्रसम्पादितभेदात्

सा च प्रथमतो रामसङ्गतदशायां स्वाधीनभर्तृका, विरहे च प्रोषितभर्तृकेति । क्रमेण लक्षणद्वयी यथा—

'कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।

विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥' इति

'नानाकार्यवशाद् यस्याः दूरदेशं गतः पतिः ।

सा मनोभवदुःखार्ता भवेत् प्रोषितभर्तृका ॥' इति च

दूरदेशं गतः दूरदेशे स्थित इत्यर्थः, तथात्वञ्च श्रीरामस्यानपायमेव, सीताया निर्वासिततया स्वस्य च राजधानीवास्तव्यतया उभयोरेकान्तमन्तरे स्थितत्वात् ।

[illegible] दृश्यते इति

दर्पणकारवचनेन माधुर्यस्य सम्भाव्यत्वव्यवस्थापनया एकत्र उभयविधनायिकालक्षणलक्ष्यत्वेऽपि दोषाभावकीर्त्तनाच्च दोषशङ्कापि ।

अत्र करुणविप्रलम्भाख्य एव रसः प्रधानं, सीतायाः शरीरपरि-

[illegible]स्य हृदं सम्भावनया विक्रमाभ्रमस्य श्रीरामचन्द्रस्य दैवादिककथा वशात् पुनर्मङ्गलसम्भवान [illegible]

[illegible]

[illegible]

अत्र अभियुक्ता [illegible] नायकस्य नायिकाया वा [illegible] प्रवासाख्यो विप्रलम्भभेद [illegible] नायिकाया वा [illegible] करुण-विप्रलम्भ इति वदन्ति [illegible] सर्वासामेव [illegible] यथास्थान सन्निवेशे सत्यपि

[illegible]

[illegible] ॥

[illegible]

[illegible]

इति [illegible] एव [illegible] केचित्तु केवला [illegible] प्रमाणयन्ति [illegible] एव [illegible] ।

[illegible]

[illegible]

इति [illegible] माधुर्य [illegible] एव गुण [illegible] प्रस्तुत [illegible] पर्यालोचनेन [illegible] व्याख्याते [illegible] स्वल्पमाना [illegible] । अस्य हि नाटकस्य [illegible] टीका [illegible]दीपिकाख्या [illegible] एव [illegible]पुस्तकेभ्य [illegible] । किं बहुना [illegible] केचिदंशा यथास्थि[illegible] परमप्रवीणो [illegible] धुरीणो [illegible]भट्ट [illegible] वैदग्ध्ययोरिति [illegible] स्यात् ।

* * * * * * *

अवश्यं केषाञ्चिदापातदर्शिनामेवं प्रश्नः सहसा एव चित्त-भूमिम् अधिरोक्ष्यति, यत् सतोष्वपि बह्वीष्वेव उत्तररामचरित टीकासु कथमयमसाम परिश्रमो भवतः, कथं वा निरर्थको न अविज्ञवतामतिमात्र क्लेशस्वीकार इति, तत्र वयमेवं ब्रुवाणास्तान् बोधयामः, यत् पर्य्यालोचयन्तु भवन्तो व्याख्यान्तरादस्या व्याख्यायाः वैशिष्ट्य. विवेका जाग्रतामस्याः प्रतिपाद्यविषयावधारणेषु, सदयमनुशीलयन्तु विस्तृतटीकाप्रकारं, तत एव प्रतिनिवर्त्तिष्यते मानसादयं प्रश्नः. ममोपि च मतिमानित्र समुपस्थास्यते सत्स्वपि टीकाविस्तरेषु टीकाया अस्याः प्रक्रमार्थः।

अस्मिन् वारं वर्षिष्यम् -संशोधने यथोचितदृष्टिपात अलङ्कारसङ्गमने प्रयत्नबाहुल्यम अनुवादविधौ किञ्चित्परिवर्त्तनम्, पण्डितप्रवर-आयुक्तश्वरीप्रसादशास्त्रिणा छन्दोभाषायितसंचित्रविवरणोऽन्यासेन परिवडनञ्च। प्रश्नमालाया प्रश्नप्राचुर्य्यम्। मुद्रणोपकरणानां महार्घत्वात् मुद्रणव्ययाधिक्याच्च किञ्चिन्मूल्य वृद्धिरपि तद्वयथापूर्वम। सदयां दृष्टिं स्थापयन्तु सन्त इति निवेदनम्

३२८ बहुबाजार } भाश्रव प्रकाशकानाम्।

उत्तररामचरिते व्यवहृतानां नदीशैलदेशप्रभृतिकानां प्राचीननामभिराधुनिकनामभेदा निर्द्दिश्यन्ते तत्तत्स्थानानाम् ।



गोदावरी — सह्यपर्व्वतादुद्भूता नदी, अस्या नामान्तरं पूर्वगङ्गेति ।

चित्रकूट — विन्ध्यपर्व्वतस्य पूर्व्वभागः, अधुना बुन्देलखण्डवासिनस्तमेव "चित्रकोट" इत्याचक्षते । विलासपुरात् क्रोशत्रयेऽसौ वर्त्तमानः ।

तमसा — गयोयान्तर्देशप्रवाहिणी ऋक्षपर्व्वतादुद्भूता नदी, अस्या वर्त्तमानं नाम "तोनस" इति ।

दण्डकारण्यम् — गोदावर्य्या दक्षिणतीरवर्त्तिनी दाक्षिणात्यप्रदेशीया विस्तृता वनभूमिः ।

पञ्चवटी — मुम्बयीप्रदेशान्तर्गतगोदावरीतीरवर्त्तिनी । अस्या वर्त्तमानं नाम 'नासिक'ेति । तैलङ्गदेशे इन्द्रस्य स्वर्गोद्यानानि इति प्रसिद्धानि अमरारामः, कमलारामः, क्षीरारामः, भीमारामः, द्राक्षारामेत्यभिधानानि पञ्च उद्यानानि सन्ति, पञ्चवटी च तत् पञ्चवनात्मिका इति यौगिकं नाम ।

पम्पा — ऋष्यमूकपर्वतप्रभवं सरः ।

मन्दाकिनी — त्रिकूटपर्व्वतप्रभवा पूतजला नदी स्वर्गगङ्गा वा ।

।मायल — अस्या आधुनिकं नाम "त्रिहुत" इति। मिथ नामानुसारेण तज्जनपदस्य मिथिलेति नाम।

मरल — करलदेशीया नदी। केरलस्य वर्त्तमानं नाम "मालावार" 'कानारार्' इति वा।

→ थम्ब, ।म्रम — भागलपुरप्रदेशान्तर्गतमाधिपुरस्थानाधोमे सिंहेश्वर पदे वर्त्तमान।

३ इवरपुरम — 'चुणार"स्य दुर्गनिम्नवर्त्ति स्थानम।

५ बनमाश्रम — कानपुरात् माद्रपञ्चक्रोशे "विठुर" नामकस्थाने वर्त्तमान।

सिंहल इति कश्चित्। अपर च सिंहलवासिभि श्रीरामरावणयो सत्तामात्रमपि प्रायेणाविद्वद्भि स्वाधिष्ठानभूमे प्राचीनलङ्कात्व न प्रमाणीक्रियत इति. पुरातनी लङ्का सागरगर्भ लीनेत्येव प्रततत्त्वानुशीलनेन निर्द्धारयन्ति।

ग्रन्थस्थश्लोकानां सूची ।

नाट्योल्लिखितव्यक्तिगणाः ।

पुरुषाः ।

रामः

लक्ष्मणः

सूत्रधारः—नाटकीयकथासूचकः ।

नटः—तत्सहकारी ।

अष्टावक्रः—मुनिविशेषः ।

दुर्मुखः—गुप्तचरः ।

शम्बूकः—शूद्रतापसः ।

भाण्डायनः
सौधातकिः } —वाल्मीकिशिष्यौ

जनकः

लवः

कुशः

सुमन्त्रः—अयोध्याधिपतिसारथिः ।

चन्द्रकेतुः—लक्ष्मणात्मजः ।

वाल्मीकिः—रामायणकविः ।

विद्याधर-प्रतिहारौ मुनिबालकप्रभृतयः ।

स्त्री

सीता

कौशल्या

अरुन्धती—वशिष्ठपत्नी ।

आत्रेयी—काचित् विद्यार्थिनी ।

वासन्ती—वनदेवता (सीतायाः सखी) ।

तमसा
मुरला } —नदीद्वयम् ।

विद्याधरीभागीरथीपृथ्वीप्रभृतयः ।

ग्रन्थसमर्पणम् ।



श्रीकण्ठस्य कवेरपेतकलुषा गाम्भीर्य्यसंसर्पिणी
सौम्यालङ्कृतिरीतिभावमधुरा नानागुणग्राहिणी ।
व्यक्तार्था कविता नवेव वनिता सल्लक्षणोल्लासिनी
केषाञ्चित् सुखबोधमाकलयितुं व्याख्यायते तोषिणी ॥१॥

सर्वार्थविज्ञापनशक्तिशालिनी
स्नेहं समालम्बवती विपश्चिताम् ।
दशां प्रशस्तामधिगत्य नित्यश
स्तमोविनाशं विदधातु दीपिका ॥२॥

राज्ञा श्यामलवर्म्मणा क्रतुकृते यः कान्यकुब्जस्थला-
दानीतः शुनको यशोधर इति ख्यातो यथार्थाभिधः ।
विप्रो वेदविदाम्वरो बहुतपाः सम्मानसम्पद्युतं
वङ्गान्तर्गतसिद्धविक्रमपुरं संस्थापितश्चादरात् ॥ ३ ॥

तत्पवित्रकुलोत्पन्नः सद्विद्याचारभूषितः ।
जनको जयचन्द्रो मे उमा माता तपस्विनी ॥ ४ ॥

शाकाग्निवसुचन्द्राङ्के शाके श्रीपञ्चमीदिने ।
तयोः स्वर्गतयोः पादपद्मे ह्येषा समर्पिता ॥ ५ ॥

पद्मोत्तरतटख्यात धलञ्जुरा-निवासिना ।
धर्म्मेण गुरुनाथेन गङ्गातीरप्रवासिना ॥ ६ ॥



उत्तररामचरितम्।

प्रथमोऽङ्कः।

इदं कविभ्यः * पूर्वेभ्यो † नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम्॥ १॥

[१। पूर्वेभ्य कविभ्य नमोवाकम् इद प्रशास्महे, (यत्) आत्मनः कलाम् अमृतां वाचं देवतां विन्देम, इत्यन्वय]।

१। अथ कविचक्रचूडामणिभूतस्तत्रभवान् भवभावनलब्धभूतिर्भवभूतिः "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवती"त्यादि श्रुतवचनविज्ञापितं परिनिष्ठितशब्दप्रयोगविज्ञानयोः काव्यफलप्रसवकारित्वमवगच्छन् "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये" इत्यादिनियमाविदितच काव्यरूपेण्यावतीर्णस्य तस्य प्रयोजनं विदित्वा "प्रबन्धानां प्रबन्धृणामपि कीर्तिप्रतिष्ठयोः। मूलं विषयभूतस्य नेतुर्गुणनिरूपण"मिति शास्त्रनिर्देशेन नायकगुणनिरूपणस्य कीर्तिप्रतिष्ठासाधकत्वावगमेन "यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरित" मिति रामचरितस्यापरिच्छेद्यत्वविज्ञापनेन रामरूपेणावतीर्णस्य प्रस्तुतकथानायकभूतस्य भगवतो गुणानेव प्रतिपिपादयिषुः दृश्यश्रव्यभेदेन द्विप्रकारस्य काव्यस्य "देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्" इत्याद्युक्तिभिः प्रतिपादितप्रकर्षात् प्रकरणादीनां यथायथं रसवस्तुनायकाद्यपकर्षात् नाटकस्य च प्रख्यातदेवादिजनप्रधानतया प्रकर्षात् नाटकमेव निर्मातुमभिलषन् पूर्वभागस्य महावीरचरितनाम्नि प्रख्याते नाटके वर्णिततया उत्तरं चरितं वर्णयितुं चिकीर्षितार्थपरिपन्थिप्रत्यूहव्यूहविध्वंसद्वारा आभिमतग्रन्थसमाप्तिमभीप्सन् प्रेक्षावत्प्रवृत्तिविषयत्वेन च नमस्कारादि श्रेयःसाधनतां परिपश्यन् पूर्वरङ्गप्रधानाङ्गभूतं नमस्कारमेव नान्दीस्वरूपनिर्वाहकं प्रणीति—इदमिति। पूर्वेभ्य अतपूर्ववर्तिभ्यः कविभ्यः प्राचेतसवाल्मीकिप्रभृतिभ्यः, तेषामेव आदिकवित्वात्। नमोवाकं नम इति शब्दस्य स्वापकर्षबोधानुकूलव्यापारबोधकस्य नम इत्यानुपूर्वीमत इत्यर्थः। वाकः उक्तिः उच्चारणम् इत्यर्थः, यस्मिन् अर्थेपि तद्यथा स्यात् तथा नमःशब्दोच्चारणेन वाल्मीकिप्रभृति-पूर्व-कविवराम् प्रणमाम इत्यर्थः। अथवा नम उक्त्वा नमःशब्दोच्चारणेन तदपेक्षया स्वापकर्षबोधकव्यापारविशेषविषयज्ञानमुत्पाद्य इत्यर्थः। अथवा बहुकालममर्चितस्य कवेः प्रबन्धादौ को वा विचारणान् भवेत्।

* गुरुभ्य इति विद्यासागर। † पूर्वेभ्य इति पाठभेदः।

इदम् अव्यवहितोत्तरं वक्ष्यमाणं वस्तु विषयं प्रतिपाद्यमित्यर्थः । विन्देम इत्यादिवाक्यार्थमित्यर्थः । प्रशास्महे प्रार्थयामहे, "आङः शासु इच्छायाम्" इत्यस्य रूपमिदम्, यत्तु आदादिकस्य शासुधातोराङ्पूर्वकस्यैव व्यवहारो भाषायां निर्दोष इति तन्न "आङ्योग प्रायश लक्ष्यते" इत्यस्य दुर्घटवृत्ती, आङ्कारोपादानादर्थविशेष एव उपसर्गः इत्यस्य च कस्यचिन्मते दृष्टत्वात्, प्रपूर्वकोऽपि शासुरिच्छावाचक इति न च, तस्य स्मारकतायाः स शयोऽपि । ततः उत्तरवाक्यार्थस्य कर्त्तव्यताप्रतिपत्तये यदित्यध्याहार्यम् । आत्मनः परमात्मनः शब्दमूर्त्तिधरस्य विष्णोरित्यर्थः । कलाम् अंशभूतां, तथाच दर्पणे—"काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च । शब्दमूर्त्ति-धरस्यैते विष्णोरंशा महात्मनः" इति । अमृतां च सरस्वतीं पूजते नित्यामित्यर्थः । मीमांसकमते शब्दरूपायाः सरस्वत्याः नित्यत्वाङ्गीकारात् वागदेवतायाः नित्यत्वमव्याहतम् । वेदान्तिकमते तु "सर्वं खल्विदं ब्रह्मे"ति श्रुत्यावेदितस्य सरस्वत्यापि ब्रह्मतादात्म्यस्य लाभेन 'अहं देवोऽस्य-महात्मोऽय'मित्यादिश्रुत्यर्थसमाहितं नित्यत्वमिति । अथवा मृङ् मृत भावे क्त, न विद्यते मृतं तिरोभावो यस्याः तां, कवीनां कीर्त्तिकायस्य रक्षणेन सर्वदैव कविजनमानसस्थिरतया काव्यात्मकेन वाक्यज्ञानेनैव तेषां जगतस्तिरोधानाभावः । अपि च रामयुधिष्ठिरादीनां पार्थिवशरीरविलयेऽपि यस्याः वाङ्मयेन कविप्रबन्धेन एव जगति सजीवमिवावस्थानं तस्याऽमृतत्वमक्षतमिति । यद्वा अमृतां रसवतीम् । वाचं वाङ्मयीं शब्दस्वरूपामित्यर्थः । देवतां देवीभूतां भारतीमित्यर्थः । विन्देम लभेमहि समाश्रयत्वेन स्वीकुर्म्म, तदाश्रयेणैव अस्मदीयकाव्यसमाप्तिसम्भवादित्यर्थः । अथवा पूर्वेभ्यः कविभ्यो नमः, ततः परं वाचं वाक्यात्मकं सगुणं ब्रह्म विन्दामित्यर्थः । इदं वक्ष्यमाणं विन्देमेत्यादिवाक्यार्थमित्यर्थः । पूर्ववत्, शास्महे प्रार्थनार्थकस्य शासोर्द्विकर्मकत्वात् कर्म्मद्वयी । शब्दात्मककाव्यादिषु प्रतिष्ठामापन्नान् ब्रह्मवाल्मीकिप्रभृतीन् कविमुख्यान् प्रणम्य शब्दात्मकस्य विष्णोरेव समाश्रय प्रपद्यामहे, स च परितुष्टो नः काव्यकलासु तथा वैलक्षण्यमुपपादयतु यथा प्रस्तुतकाव्यं महाकवीनामतिमात्रं मनोगतं स्यादिति भावः ।

यथा इदंपदेन प्रारिप्सितग्रन्थादौ विधित्सितं पुष्कलं मङ्गलं सम्बध्यते, तत्र प्रकृते उद्देश्यतयाभिप्रेतं, नमोवाकमिति च विधेयत्वेन, तथाच ग्रन्थादौ कर्त्तव्यम् इदं मङ्गलं नमोवाकनिर्द्दिष्टमिति ध्वन्यर्थः । अर्थात् मङ्गलस्य नमोवाक इति संज्ञा ज्ञाप्यते इति भावः । अत्र उद्देश्यविधेयभावाव्युत्पत्तिमत्त्वेन इदमिति पदस्य मङ्गलाभिप्रायेण व्यवहारात् क्लीवतावश्यं ऽपि नमोवाकलिङ्गत्व पुंलिङ्गत्वं बाधकं नास्ति । किंवा पूर्वेभ्यः कविभ्यो नमोवाकं नमस्कारवचनात्मकम् इदं मङ्गलम् इच्छामि इत्यर्थसमाश्रयणेन उद्देश्यविधेयभावपरिहारेण पक्षान्तरम् । अत्र यथाम्नायानुवर्त्तनपूर्वं राजदर्शनमिति नियमेन कविनमस्कारानन्तरं वाणीनमस्कारत्वेऽपि न प्रधानापकर्षकपदीपसम्भावना इत्यादीनां मदीयानां सर्वं न सम्भवति च परिवारकादिष्व सर्वैव राजादर्शनसम्भवादिति । अपि च "भगवद्वन्दनं स्यात् गुरुवन्दनपूर्वक"मिति शास्त्रानुमोदनेन भगवद्वन्दनात् पूर्वं गुरुनमस्कारस्य कर्त्तव्यतया "मधुमयभणितीनां मार्गदर्शी महर्षि" "[illegible]" इत्यादिवाक्यादर्शेन वाल्मीकिप्रभृतीनां कविमुख्यानामधिगतगुरुत्वात् भगवत्याः सरस्वत्याः प्रणामविधेः पूर्वमेव वाल्मीकिप्रभृतीनां नमस्कारः कृतो महाकविनेति ।

अत्र वीरराघवाद्यः "विन्देम देवतां वाच"मित्यत्र "वन्दे भक्त्या च तां वाणी"मिति पाठं समीचीनं तया स्वीकुर्वन्ति, तत्र नाटकत्वात् दृष्टविषयत्वम्, तथापि पदार्थपर्यालोचनायां तदेवोपपन्नानाम् । केचित्तु प्रकारान्तरेण तु व्याख्याताः समीचीनं तथाच—इदं कविभ्य इत्यत्रापीदं कलह पदं,

नमः वाकम् इति पदद्वयो, तेनायमर्थः पर्यवस्यति यथा—पूर्वेभ्यः पुरातनेभ्यः प्राचीनेभ्य इत्यर्थः। पूर्वकविभ्यः यस्य बुद्धिस्थीकृत रामवृत्तान्तस्य अनेनापि कविना समालम्बनीयत्वमित्यर्थः, कविभ्यः रचयितृभ्यः रामवृत्तान्तमेवोपजीव्य काव्यनिर्माणृभ्यो वाल्मीकिव्यासादिभ्यः; व्यासस्य वाल्मीकेश्च रामायणमहाभारतादेः रचयितृत्वात्। बुद्धिस्थत्वञ्च रामवृत्तस्य अस्य काव्यस्य तद्वृत्तमयत्वात्, प्रकृते बुद्धिस्थत्वाभावेन तन्निर्माणृत्वस्य चाप्रसक्तात् "पाप्मभ्यश्च पुनातु वर्धयतु च श्रेयांसि सेयं कथे"ति निर्वाहे वक्तव्येन च सूचितत्वात्।

पूर्वेषामेव कवीनां पुरातनवृत्तान्तवेदितया रामायणादिपूर्ववृत्तविज्ञानजननसामर्थ्यं सम्भवतीति पूर्वेभ्य इत्युक्तम्। रामायणवृत्तस्यैवोपजीव्यतया तत्र एव नैपुण्यलाभ इष्ट इति कथान्तरकवीनां नमस्कारः प्रकृते न अनुकूल इति इदं कविभ्य इत्युक्तम्। उच्यते अनेनेति वाकं वचनसाधनीभूत करणे घञ्। वक्तव्योऽपि कविमुखस्य स्वाभिलषितवस्तुनः साक्षात्सम्पत्तये ऐश्वर्यप्राप्तिपूर्वककविनमस्कार इति नानुपपन्नम्। तस्य च उपदेशप्रवृत्ती इत्यत्रैव वाकुलकत्वम् अन्यथा स्फुटा भाष्यम्। "संज्ञायामिति च प्रायिक" मित्युक्तत्वान्न दोषः। अथवा उच्यते यत् तत् वाकं कर्मणि घञ्, "अकर्तरि च कारके" इत्यनुशासनात्, वाचिकमित्यर्थः। नमः नमस्कारं प्रशास्महे इच्छामः निर्दिशाम इत्यर्थः, नमस्कारस्य कायिकवाचिकमानसिकभेदेन त्रैविध्यात्। तां पूर्वोपास्थितां बुद्धिस्थाम इत्यर्थः। काव्यनिर्माणे प्रवृत्तिनिवृत्तिविषयीभूताया कवित्वं न उपतिष्ठते। अमृतां प्रवाहरूपमिव नित्याम्, यद्वा अमृतम् अपवर्गः तत्सम्पत्तिरस्तीत्यमृता मत्वर्थीयोऽच्प्रत्ययः। तेन श्रोतृत्वं समञ्जसं, प्रयोजकतासम्बन्धेन मोक्षवतीं मुक्तिसाधिकामित्यर्थः। तथात्वञ्च महापातकादिनाशनद्वारा। तथाच—"एकैकमक्षरं प्रोक्तं महापातकनाशनम्" मित्यागमः। तत्र कारणमाह—आत्मनः परमात्मनः कलां विद्यां परमात्मप्रतिपादिकां विद्यामित्यर्थः। तत्त्वञ्च "वेदवेद्ये परे पुंसि" इत्यादौ व्यक्तम्। वाल्मीकिवाणीस्वरूपरामायणात्मिकां वन्देमहि प्रणमाम, "विश्वमङ्गलवयसं यशो विजयते" इति वाक्यराजस्य स्फुटम्। अस्यां योजनायामपि पूर्ववत् काव्यार्थप्रसजनमवधेयम्। केचित्तु—इदमिति भिन्नं पदं, नमः वा कम् इति च पदत्रयं, कविभ्य इदं नमः प्रशास्महे इत्यन्वयः। वाशब्दः समुच्चये। कं ब्रह्माणमित्यर्थः। एवञ्च वाणीं सरस्वतीं कं ब्रह्माणं वा वन्देमहि इत्याहुः, तत्र व्यवहितान्वयीनोक्तार्थस्य बहुधः समनुसन्धानगम्यत्वात्, "अष्टाभिर्द्वादशभिरष्टादशभिरेव वा। चन्द्रिकता पदैर्वापि सा नान्दीति प्रकीर्त्तिता" इत्यत्र चतुर्दशपदात्मक च इति।

अथवा रूपकनिर्माणेऽस्त्वेव नियमो यत् नान्दीश्लोकादावेव नाटकीयवस्तूनि बहूनि निपुणं सन्निवेशयन्तीति, अत्रापि महाकवि श्रीकण्ठो निपुणं तत्सन्निवेशकृतवानिति विज्ञाः पर्यालोचयन्तु, यथा—अत्र प्रथमाङ्के पूर्वेभ्यः कविभ्यः नमः इत्यनेन पुरातनेभ्यः प्रसिद्धमार्गेभ्यो नमः इत्यर्थकेन पूर्वकालप्रसिद्धा सर्वलोकनमस्याः केऽपि प्राज्ञा अत्र नाटके वर्णयिष्यन्ते इति सूचितम्, तथाच—प्राज्ञा वाल्मीकिवसिष्ठजनकहनूमदादयः, तेषां पाण्डित्यप्रसिद्धिरपि प्रायविदा, वाल्मीकिवसिष्ठयोः रामायणादिनिबन्धृत्वात्, जनकस्य धनुर्वेदेषु शस्त्रेषु च शास्त्रेषु विज्ञत्वश्रवणात्, हनूमदादेर्महानाटकादिसारभूतवस्तुप्रणायकत्वात्। सर्वलोकनमस्कार्यत्वोक्तिनिर्देशेन धूर्तवञ्चकस्य भावादेर्व्यावृत्तिः। पूर्वकालप्रसिद्धा इत्यनेन अधुनास्तितवचनकालिकप्रसारणादिनिराकरणम्।

कविभ्य इत्यत्र बहुवचनेनानवगतौ लक्ष्यते, यथा—सत्स्वपि पूर्वेषु अनेकेषु कविषु यथा

(नान्द्यन्ते) सूत्रधारः (क)। अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्रान् विज्ञापयामि, —एवमत्रभवन्तो

तेषु वाल्मीकेरेव प्राधान्यं, तथा रामलक्ष्मणभरतशत्रुघ्नादिषु बहुष्वपि नायकेषु रामचन्द्रस्यैव प्राधान्येन वर्णनम् इति नानेकनायकतादोषेण नाटकीयस्वरूपव्याघातः। अनेनैव श्रीरामचन्द्रस्य प्राधान्यख्यापनेन लक्ष्मणभरतशत्रुघ्नयोरप्रधानत्वावगमनेन सीताया वनप्राप्तौ लक्ष्मणनियोगः, लवणवधे च शत्रुघ्नप्रेषणं बुद्धिस्थीक्रियते, अप्रधानस्यैव प्रधाननियोज्यत्वव्यवस्थितेः। उत्तरार्द्धेन काचिदलौकिकगुणा स्त्री वर्णयितव्येति सूच्यते। आत्मनः कलाम् अमृतस्वरूपामिवार्थेन च अस्य नाटकस्य नायिकाया दैवीसम्भवत्वं कस्यचिदृष्यंपवीत्वञ्च इति अयोनिजाया भगवत्या वसुन्धरायाः जातायाः श्रीरामप्रणयिन्याः सीतायाः सूचनम्। "अर्द्धो वा एष आत्मनो यत् पत्नी"ति शास्त्रनिर्देशेन पत्न्या अर्द्धशरीरत्वश्रवणात् नायिकाया दैवतासम्भवत्वसूचनान्नायकस्यापि दैवांशसम्भूतत्वं मन्ये, तेन भगवदंशभूतस्य श्रीरामस्य नायकत्वात्मसन, तथाभूता दैवतासम्भवा नायिका प्रति दैवतासम्भूतस्य एव नायकवरस्य विशेषेणोपयोगात्। अमृतामिति पदेन मरणनिषेधस्य वाच्यत्वात्, निषेधस्य च प्रसक्तिपूर्वकत्वव्यवस्थितेः गङ्गागर्भे देहविसर्जनसम्भावितस्य सीतायाः मरणस्य गङ्गया पृथिव्या च समं तदागमनेन भावनिषेधरूपेण द्वितीयाङ्कात् प्रभृति समाप्तिपर्यन्तार्थः संसूच्यते इति समासः।

(क) नान्द्यन्त इति। नाटकप्रभृतीनामादौ मङ्गलार्थं आशीर्वचनादिना युक्ता देवद्विजादिप्रशंसिरूपा प्रवृत्तिर्नान्दीति। तथाच—"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥" नन्दयति अनेन देवतादीन् आशीर्वादेन नमस्कारेण वा परितोषात् आत्मानञ्च प्रसादयति या इति टुनदि समृद्धौ धातोः कर्त्तरि अच्, ततः ङीप्। तथाच नाट्यप्रदीपे—"नन्दन्ति काव्यानि कवीन्द्रवर्गाः, कुशीलवाः पारिषदाश्च सन्तः। यस्मादलं सज्जनसिन्धुहंसी, तस्मादियं सा कथितेह नान्दी॥" अपि च "देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्ति देवता यस्मात् तस्मान्नान्दीति कीर्त्तिता"॥ इति भरतकृतनाट्यशास्त्रे। इदं कविना ग्रन्थस्य द्वादशभिः पदैः निबद्धत्वात् नान्दीश्लोकप्रयोगः। तथाच मुनिः—"सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः। नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम्॥" अत्र पदशब्दस्य श्लोकपाद-सुप्तिङन्त-श्लोकान्तर्गतवाक्यं तदन्यतमरूपतया, अत्र तिङन्तपदद्वयस्य सुबन्तपदद्वयकस्य च सत्त्वेन द्वादशपदैरेव नान्दी, तथाच नाट्यप्रदीपे—"श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे। परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे॥" इति। "पदैर्युक्ता द्वादशभि"रित्यादिवर्णितसूत्रधाराख्यानावसरे तर्कवागीशपादाः व्याचक्षते—"पदैः सुबन्ततिङन्तावान्तरैः, विशेषणपदैर्वा श्लोकचतुर्थभाग उच्यते" इति। नान्द्यन्ते नान्द्याः श्लोकरूपायाः अन्ते अवसाने तस्याः नान्दीश्लोकपाठानन्तरमित्यर्थः, सूत्रधारः सूत्रं नाटकीयकथायाः प्रथमं धारयति विन्यासयति च इति स नाटकीयकथाप्रस्तावकः प्रधाननटः। तथाचाहुर्भरतः "नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते" अपरे च "वर्णनीयतया सूत्रं काव्यार्थे येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते।" इति।

विदांकुर्वन्तु—अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणतत्त्वज्ञो भवभूतिर्नाम जातुकर्णीपुत्रः । [ख]

(ख) अलमतीति । अतिविस्तरेण अप्रस्तुतकथानाम् अतिप्रसारेण अलमित्यर्थः, अलं निष्प्रयोजनं विस्तृतनान्दीप्रवर्त्तनं निष्फलमित्यर्थः । तथाच "विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तर" इत्यमरः । "अलं भूषणपर्याप्तिशक्तिवारणवाचक" मिति कोषाप्रमाणात् वारणार्थ-शब्दस्य योगेन अतिविस्तरेणेत्यत्र तृतीया । मतान्तरे तु करणे । प्ररोचनां प्रवर्त्तयितुं सामाजिकावधानाय प्रस्तौति—अद्येत्यादि । अद्य अस्मिन्दिने नाटकप्रवर्त्तनदिने इत्यर्थः । खलु इत्यनुनयार्थकमव्ययं, तथाचामरः—"निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इति । भगवतः षडैश्वर्य-शालिनः सर्वविषयकशक्तिमत इत्यर्थः, कालप्रियनाथस्य उज्जयिनीमधिष्ठितस्य तन्नामकशिव-मूर्त्तिभेदस्य महाकालापरनामकस्य यात्रायां महोत्सवे तत्रैव पूजादिमहोत्सवावसरे इत्यर्थः, "यात्रा तु यापनेऽपि स्यात् गमनोत्सवयोः पुमान्" इति मेदिनी । आर्य्यमिश्रान् आर्य्याः पूज्या मिश्राः मान्यवन्तः तथाविधान्, अथवा आर्य्येषु ये मिश्राः प्रधानभूताः तान् सम्ब-न्धमानित्यर्थः । तथाचार्य्यलक्षणं "कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् । तिष्ठति प्रकृता-चारे यः स आर्य्य इति स्मृतः ॥" इति । "स्यादुत्तरपदे मिश्रश्चेष्ठार्थवाचक" इति पूज्यतमत्वम् । सभासमागतान् माननीयान् एतच्छब्दशक्त्याकृष्टानित्यर्थः । विज्ञापयति विदितार्थान् करोति । वेदितव्यमेवार्थं वेदयितुमुपक्रमते—एवमित्यादि । एवं वक्ष्यमाण-रूपेण अत्रभवन्तः माननीया भवन्त इत्यर्थः, तथाच—"अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ" इति, अथवा अत्र अस्यां परिषदि भवन्तः स्थं तिष्ठन्तो वा एतत्सभायां नाटकदर्शनार्थ-मुपागता इत्यर्थः, विदांकुर्वन्तु जानन्तु वक्ष्यमाणमिति शेषः । "विदांकुर्वन्तु इत्यन्यतरस्या"-मिति सूत्रानुशासनात् पदसिद्धिः । पक्षे विदन्तु इति । यात्रायामिति कालसूचनम्, अस्तीति देशकथनं, "निर्देशो देशकालयो"रिति भाष्यादेशात् । वेदितव्यविषयमेवाह—अस्तीत्यादि । काश्यपः कश्यपवंशोद्भवः । पश्यतीति कश्यपः आद्यपृषोदरादित्वात् साधुः । "पश्यकः कश्यपो भवती"ति सर्वज्ञतया श्रुतिविश्रुतकश्यपवंशजः । पदवाक्यप्रमाणतत्त्वज्ञः पदस्य वाक्यस्य तयोः प्रमाणानि प्रामाण्यप्रतिपादकसन्दर्भाः तेषां तत्त्वं स्वरूपं प्रकृतत्वं वा जानातीति इति "आतोऽनुपसर्गे कः" इति । अथवा पदस्य "वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" इत्युक्तलक्षण, वाक्यं सुप्तिङन्तचयात्मकं "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" इत्युक्तरूपं वा, प्रमाणं प्रमायाः जनकं तेषां तत्त्वं गूढार्थं जानातीति । तत्तद्विषयेषु व्युत्पन्न-चित्त इत्यर्थः । श्रीकण्ठपदलाञ्छन: श्रीः सरस्वती अथवा "वचो यजूंषि सामानि तथा हि श्रीरस्मृता सती" त्युक्तरूपा वाक् कण्ठे यस्य तदर्थबोधकमित्यर्थः, पदं शब्दः लाञ्छनं चिह्नम् उपाधिस्वरूपतया परिचायकं यस्य तथाभूतः । श्रीकण्ठेत्युपाधिभूषित इत्यर्थः । जातुकर्णी-पुत्रः जातुकर्णी तन्नाम्न्याः जातुकर्णगोत्रप्रसूताया वा स्त्रियाः पुत्रः आत्मजः भवभूति-र्नाम नाम्ना भवभूतिः "साम्बा पुनातु भवभूतिपवित्रमूर्त्ति"रिति श्लोकश्रवणेन सन्तुष्टान्तः-करणो राजा श्रीकण्ठं भवभूतिरिति नाम्ना निर्दिष्टवानिति केचित् । अपरे च भूतिभस्मनो भव एव शिवरूपेण समुपस्थितो महाकवेरस्य भूतिसुपकारेति कवेरस्य भवभूतिरिति संज्ञां विनिर्दिशन्ति । तथाच भवात् भूतिर्यस्य इति तदर्थं ग्रन्थकृत् । अस्तु नाकाण्डताण्डवम् ।

यं ब्रह्माणमियं देवी वागवश्येवानुवर्त्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते * ॥ २ ॥

[२। इयं देवी वाक् यं ब्रह्माणं वश्या इव अनुवर्त्तते, तत्प्रणीतम् उत्तरं रामचरितं प्रयोक्ष्यते. इत्यन्वय]।

एषोऽहं कार्य्यवशादायोध्यिकस्तदानीन्तनश्च संवृत्तः। (समन्तादवलोक्य)
भो! भो! यदि तावदत्रभवतः पौलस्त्यकुलधूमकेतोर्महाराज-रामस्यायमभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकः, तत् किमिति † विश्रान्तचारणानि चत्वरस्थानानि ?। [ग]

२। अथात्मन एव भाषाप्रकर्षातिशयं विज्ञाप्य तत्प्रणीतनाटकप्रयोगविज्ञापनेन सामाजिकानामवधानं रचयति—यमित्यादिना। इयम् इतः पूर्वमेव वर्णितस्वरूपा परमोत्कर्षवती सुप्रसिद्धेत्यर्थः। देवी दीव्यति प्रकाशते सत्स्वभूतसत्वात् प्रकाशयति विशिष्टधियम इति विज्ञानदायिनीत्यर्थः। अथवा दीव्यति कामयते विज्ञं च रमते इति विज्ञं कवयन्वदा' दिवु क्रीडा-विजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु'' इति गणनिर्दिष्टधातोर्पञ्चम्या ईपि रूपम्। वाक् सरस्वती, यं ब्रह्माणं "यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहा" इति षट्कर्मशालिनं विप्रोत्तमं वश्या वशंगता अधीनेत्यर्थः, प्रवर्त्तननिवर्त्तनयोरेकान्तभाज्ञापालिकेति भाव। इव ताहशी सतीव अनुवर्त्तते अनुगच्छति, यस्याशयेन नोदिता भारती स्वलक्षितेषु अर्थोन्मेषान् प्रति-नीयमानेति भावः। अथवा इयं वाग्देवी यं भवभूतिनामानं महाकविं ब्रह्माणं पितामहं वेदादिनिखिलशास्त्रपारगतं स्वभर्त्तारं चतुर्मुखमिवेत्यर्थं। वश्या सती अनुवर्त्तते। तथाच यथा समस्तवेदादिविद्यासुप्रसिद्धो विधाता भारतीदया नानारसपरिष्कारेण सेव्यते, तथैवायं कविः सर्वार्थतत्त्वेषु प्रकाशमानया तयेति भाव। तत्प्रणीतं तेन अस्मदाचार्य्येण भवभूतिना प्रणीतं रचितं, प्रकृष्टतां नीतमित्यपि प्रणीतशब्दादानार्थं। एतेन वस्तुप्रशंसया सामाजिकप्रवृत्त्यानुकूल्यम्। उत्तरं महावीरचरितवर्णितपूर्ववृत्तापेक्षया परवर्त्तिवृत्तसम्वलितं प्रस्तुतं नाटकमित्यर्थं.। तथाचायमेव कविर्महावीरचरिते रावणनिधन कोशलराज्यलाभस्य श्रीरामस्य चरितांशं निबध्य, ततः परं कोशलमागतस्य रामस्य राज्याभिषेकमारभ्य परवर्त्ति-वृत्तमत्रेति विज्ञेयम्। प्रयोक्ष्यते प्रयोगेण उपस्थापयिष्यते अभिनेष्यत इत्यर्थः। प्रयोक्तृणाम् उत्तरस्य रामायणादिपुराणप्रसिद्धतया ख्यातवृत्तसम्पत्त्या वर्त्तमानरूपकस्य नाटकत्वनिर्वाह, तथाच—"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्" इत्यादि दर्पणे। इदमस्य नाटकीयप्रयोजनं प्रयोज्या। तथाच—"निवेदन प्रयोज्यस्य निर्देशो देशकालयो। कविकाव्यनटादीनां प्रशंसा च प्ररोचना"ति तल्लक्षणं वाक्यम्। वाग्देवताया कवेर्वश्यत्वसम्भावनादुत्प्रेक्षा, ब्रह्मपदस्य विधातृपरत्वाभ्युपगमे तु ब्रह्मतादात्म्यप्रतीत्या रूपकमिति बोध्यम्। केचित् इवशब्दस्य ब्रह्माणमित्यनेन सम्बन्धात् उपमेति वदन्ति। अनुष्टुप् वृत्तम्।

(ग) अत्र वर्णितरामविषयस्य अयोध्यासम्भवत्वेन च तादृशस्त्वेन च कथनाधुनिको वैदेशिकः

---

* ब्रह्माणमिवस्य ब्राह्मणम् इति क्वचित्। प्रयोक्ष्यते इत्यत्र प्रयुज्यत इति पितृपाठः।
† किमस्य, किमिदानीमिति भिन्नौ पाठौ।

(प्रविश्य) नटः। भाव! प्रेषिता हि दूतः स्वगृहान् महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गराक्षसाः सभाजनोपस्थायिनो नानादिगन्तागता ब्रह्मर्षयो राजर्षयश्च, यदाराधनाय एतावतो दिवसानुत्सव आसीत्। [घ]

सूत्रधारस्तस्य सम्यक्प्रतिपादनं कुर्य्यादित्याद्यपेक्षोपसंहरति—एषोऽहमिति। एषः सूत्रधारः अहम्। कार्य्यवशात् कर्त्तव्याधीनतया तात्कालिककृत्याभिनयानुरोधादित्यर्थः। आयोध्यिकः अयोध्यायां भव अयोध्यासम्भव, तदानीन्तनश्च तदानीं प्रयोक्तव्यावस्थाव्यापारकाले भवः जात तत्कालवर्त्ती, तथात्वेनैव वर्णयितव्यविषयान् सम्यक् प्रत्यक्षीकुर्वता तेषां सम्यक् सामाजिकहृदयीकरणसामर्थ्यात अदृष्टपूर्व्वसागरादिपदार्थनिचयेन नूनं सुदुष्करम् अन्येषु तदवस्थाप्रतिपादनमिति भाव।

अत्र केचित् अयोध्याविरहस्यैव प्रकृते वर्णनीयतया सूत्रधारस्य तत्कालीनत्वप्रतिपादनेन प्रवृत्तिसमावेशकथोपस्थापकतायामपि न प्रस्तावनाया विष्कम्भकता वादित्यापादनीयम्, अतएव अयोध्यावासित्वकथनेऽपि सूत्रधारत्वसिद्ध्या प्रकृतसन्दर्भस्य प्रस्तावनात्वव्यवस्थया प्रस्तावनालक्षण-व्याघातोन इति वदन्ति। समन्तात् चतुर्दिक्षु अवलोक्य रङ्गभूमिं सर्वं स्थानं दृष्ट्वेति भावः। भो भो सम्बोधनार्थकमव्ययम्। भवत्स्वरूप वा। यदि तावत् अत्रभवतः पूजनीयस्य राजगुरोः महामात्यस्य पौलस्त्यकुलधूमकेतोः पुलस्त्यस्य ब्रह्मणो मानसपुत्रस्य तदाख्यस्य ऋषेः अपत्यं पुमान् पौलस्त्य रावण, 'ऋष्यन्धकवृष्णिकुरुभ्यश्चे'ति अपत्यार्थे अण्, पुलस्त्यवंशधरः, रावणो हि पुलस्त्यस्य पौत्रो विश्रवस पुत्रश्च तस्य कुलस्य अन्वयस्य समस्तस्य वंशस्येत्यर्थः धूमकेतोः धूमकेतुवदमङ्गलरूपस्य विध्वंससाधकस्येत्यर्थः, अथवा धूमः केतुः चिह्नम् अनुमापकमित्यर्थः यस्य स तस्य अग्नेरित्यर्थः तथाच यथा अग्निः तृणगुल्मादीन् हुताशनो भस्मीकरोति, तथा रावणकुलविध्वंससम्पादकोऽसौ इति भाव। महाराजरामस्य महाराजपदवीमचिरमेव समधिगतस्य राजसिंहासने समधिरूढस्येत्यर्थः, अथ वर्त्तमान अनुभूयमान इत्यर्थः। अभिषेकसमय अभिषेकस्य राज्याभिषेकस्य समय, काल, तत्सम्बन्धाचारो वा, तथाच कोषः "समयः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः। रात्रिन्दिवं रात्रौ च दिवा च इति समस्य अन्यः, 'अचतुर' इत्यादिसूत्रे च निपातनात् तत्पदसाधुत्वम्। अहर्निशमित्यर्थः। एवं तत्र आनन्दनान्दीषु अनवरतं प्रवृत्त अविच्छिन्ना सन्ततं प्रचलन्तो आनन्दनान्दो राज्याभिषेकार्थीयजनवर्त्तमानाः मङ्गलगीतादिविधि, यत्र सः इदं समयविशेषणम्। "महोत्सवे"ति कः। तत् एवं महोत्सवे इदानीं सत्यपीत्यर्थः, किमिति कस्मात् कारणात् चत्वरस्थानानि प्राङ्गणप्रदेशाः तत्र च नर्त्तकवादित्रगीतवाद्यादिः प्रवर्त्तनसम्भवात्, विश्रामस्थानानि विश्रान्ताः क्रियातो निवृत्ताः स्तुतिगीतादिकार्य्यमकुर्वाणा इत्यर्थः, चारणाः वैतालिकाः स्तुतिपाठका इति यावत्, तेषु तानि वैतालिकप्रभृतीनां सङ्गीतादेरयुक्तानीत्यर्थः। तथाच—अत्र महाराजस्य रामस्य राज्याभिषेकमहोत्सवे सत्यपि कथं सङ्गीतादिनिपुणा वैतालिकादयः सङ्गीतादिविविधैः प्राङ्गणं न मुखरयन्ति, कथमेवमिति भावः। एष एव प्रकृतवस्तूपस्थापनार्थमुपक्रमः सूत्रधारस्य।

(घ) सूत्रधारेण जिज्ञासित विषयं विज्ञापयितुं तदधीनः कश्चिन्नटोऽनायमित एव प्रवि-

अन्यच्च,—वशिष्ठाधिष्ठिता देव्यो गता राघव [रामस्य] मातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥ २ ॥

[२ । वशिष्ठाधिष्ठिता देव्यः राघवमातरः, अरुन्धतीं पुरस्कृत्य यज्ञे जामातुः आश्रमं गताः, इत्यन्वयः] ।

नीरवेच समीतत्र प्राक्स्थला निर्जनत्वहेतु विज्ञापयति—आर्येति । आर्य नटप्रधान, सूत्रधारस्य सम्बोधनमिदम् । तथाच "सूत्रधारं वदेद् भाव इति वै पारिपार्श्विकः" इति दर्पणे । महाराजेन महाराजपदभागिना गुणगौरवादिना राजकुलप्रधानेन वा रघुपतिनेत्यर्थः । इत अन्नात् सम्पन्नात् स्वकीयनिकेतनात् अयोध्याया इत्यर्थः । कष्टासमय सुहृद, कष्टायां यद्यपि. यः समरः रणस्तत्र सहायाः तव सुहृद् सौहार्देन साहाय्यकारिणः यद्दीक्षितकामुका इत्यर्थः, महात्मानः परमोदारचरिताः प्लवङ्गराक्षसाः. प्लवेन समुत्पतनेन गच्छन्तीत्यर्थः गच्छन्ति ये ते शाखामृगाः सुग्रीवप्रमुखा वानरा इत्यर्थं । प्लवङ्गशब्दागमि: स्व: । रक्षति हविः एभ्य इति रक्षांसि रक्षांस्येव राक्षसाः रक्षेरमुन् "क्वचित् स्वार्थिका अपि प्रकृतेर्लिङ्गवचनानि अतिवर्तन्ते" इति पुंस्त्वं इत्यनायासः । तत उभयोर्द्वन्द्वः । प्रेषिताः विसर्जिताः सुग्रीवादयो वानरमुख्याः विभीषणादयश्च राक्षसमुख्याः महोत्सवावसाने स्वस्वपुरं प्रति विसर्जिताः श्रीरामचन्द्रेणेति शेषः । अपि च समाजनोपस्थायिनः सभाजनाय कादम्बवत्-करवर्तिं...स्य वनमनुगम्य निर्विघ्नमयोध्यां परिप्राप्तस्य राजर्षि...तः श्रीरामचन्द्रस्य चिरकालिकसम्भाषणाय उपतिष्ठन्ते इति तथाभूताः । तिष्ठतेर्णिनिः, राजसम्भोषणेन प्रजानां मनस्समभिरञ्जनात् । रामचन्द्रं महाराजपदमध्यासीनं परितोषयितुमुपागता इत्यर्थः, अथवा ...र्यविधिं यथाविधिसम्माननादिकम् उपतिष्ठन्ते लभन्ते इति तथाभूताः, ननानागमनाशावसरेषु यथायथं ...समुदाचारसम्भाविता इत्यर्थः । नानादिगन्तागताः नानादिगन्तेभ्यः बहुप्रदेशेभ्यः सर्वदिक्स्थितदेशेभ्य इत्यर्थः, आगता महोत्सवमनुभवितु-मुपस्थिता: ब्रह्मर्षयः ब्राह्मणजातीया ऋषयः अथवा ब्रह्माण ब्राह्मणा ऋषयः वशिष्ठादयश्च राजर्षयः ...मन्तः । सम्पूजाद् प्रेषिता इति पूर्वेणान्वयः । यदाराधनाय येषां प्लवङ्गराक्षसानां ब्रह्मर्षिराजर्षीणाञ्च आराधनाय सम्भावनाय तेषां सम्भोषणमाननायेत्यर्थः । एतावतः इयत्परिमितान् बहुनित्यर्थः, दिवसान् समयान् यावदिति शेषः, अत्रान्तर्भाविता । उत्सवः आनन्दजनकव्यापार आसीत् । महोत्सवदिवसेषु येषां समागमेन प्राक्स्थेय तथाभूतः आनन्दव्यापारः समभवत्, अद्य त एव स्वस्वगृहं प्रति प्रत्यागच्छन्तीति सङ्गीतादिविधि-विधायकाः प्राक्स्थेषु न सङ्गीतादिविधीन् प्रवर्तयन्तीति भावः ।

(२) वशिष्ठेति ।—वशिष्ठाधिष्ठिताः वशिष्ठेन रघुकुलगुरुणा तन्नाम्ना मुनिना अधिष्ठिताः परिपालिताः वशिष्ठनायका इत्यर्थः, देव्यो राघवमातरः कौशल्यादयः अरुन्धतीं वशिष्ठपत्नीं पुरस्कृत्य अग्रे कृत्वा गुरुपत्नीत्वमनुसन्धायेत्यर्थः, जामातुः ऋष्यशृङ्गस्य यज्ञे यज्ञनिमित्तं

सूत्र। वैदेशिकोऽस्मीति पृच्छामि, कः पुनरसौ जामाता? (ङ)

नट। कन्यां दशरथो राजा शान्तां नाम व्यजीजनत्।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥ ४ ॥

[४। राजा दशरथ शान्ता नाम कन्या व्यजीजनत्, अपत्यकृतिका या राज्ञे लोमपादाय ददौ, इत्यन्वय।]

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे, तेन च साम्प्रतं द्वादशवार्षिकं सत्रमारब्धं, तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गत इति। (च)

'निःनत(कर्मसंयोगे' इति मतमा। परं तु अत्र अधिकरणत्वाविवक्षया सप्तमी, ननु ताद्दशनिःमत्ताथे, "मुक्ताफलाय करिणं हिनस्ति चर्मणि द्वीपिनं हन्ति" इत्यत्र संयोगपदेन उपष्टम्भाख्य संयोगस्य ग्रहणात् तस्य च संयोगस्य "उपष्टम्भश्चान्तर्योगो दन्तकेशत्वगादिषु" इत्यनेन दन्तादिना सहैव स्वीकारात्। यद्वा सप्तम्या द्वारभूत यज्ञे द्वादशवार्षिकसत्रे सति आश्रम कव्ययज्ञवनम् गता। प्रस्थिता। सत्रमपिन्नाश्रम ज्ञानं'ग्गिति पदस्य यज्ञ श्रम ध्या सह अन्वय.। वशिष्ठादिबशिष्ठनैत्यत्र सकारयो सकृत्साम्य न छेकानुप्रासोऽलङ्कार।

(ङ) वैदेशिक इत्यादि। विभक्त देश विदेशो देशान्तर तत्र भवो वैदेशिक। विदेशशब्दात् ठञ्। अस्मि। अहमित्यर्थकमव्ययम्। यथा अस्मीति क्रिया, अहमिति कर्तृपदमूह्यम्। पूर्वं अभिनयरूपप्रयोजनवशात आधाख्यिकं इत्युक्तम्, अत्र तु वास्तविकमुक्तमिति न विरोध।

(४) कन्यामिति। राजा इति दशरथ दशसु दिक्षु रथ अप्रतिहतो यस्य स, शान्ता कन्या दुहितर व्यजीजनत् उत्पादयामास 'जनी प्रादुर्भावे' इति धातोर्णिच्। यां कन्यां लोमपादाय राज्ञे स्वमित्राय अपत्यकृतिका अपत्यस्य कृतिव्यापारो यस्यास्तथाविधा, 'शेषात् विभाषा' इति कप्। कृत्रिमकन्यास्वरूपा ददौ दत्तवान्। कन्या ददाविति उक्ते कृत्रार्थमिति प्रतीतिस्तद्वारणाय अपत्यकृतिकामिति। 'अङ्गराजो वै लोमपाद इति श्रुत। स राजानं दशरथ प्रार्थयिष्यति भूमिप ॥ अनपत्योऽस्मि मे कन्या सखे दातुं त्वमर्हसि"—इत्यादि रामायणीकथात्रानुसन्धेया।

(च) विभाण्डकेति। विभाण्डकसुत विभाण्डकस्य मुने सुत पुत्र ऋष्यशृङ्ग ऋष्यस्य मृग विशेषस्य शृङ्गमिव शृङ्गं यस्य स। तां शान्तां उपयेमे परिणिन्ये, 'उपाद्यम स्वीकरणे' इत्यात्मनेपदम्। तेन ऋष्यशृङ्गेण च साम्प्रतमधुना द्वादशवार्षिकं द्वादशवर्षाणि व्याप्य भविष्यतीति द्वादशवत्सरसाध्य 'तमधीष्टो भृतो भूतो भावी' इत्यधिकृत्य विहितष्ठञ् द्विग। 'वर्षाल्लुक् च' इति पाक्षिको लुगभाव। अनुशतिकादित्वादुभयत्र वृद्धि। न तु उत्तरपदवृद्धिरत्र 'अभविष्यति' इति प्रतिषेधात्। सत्रं यज्ञ 'सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च' इत्यमर। याग विशेष - एकाहाहीनसत्रभेदात, तत्र एकदिनसाध्य एकाह द्विप्रभृति द्वादशदिनसाध्य

२ -उ

सूत्र। तत् किमनेन? एहि, राजद्वारमेव स्वजातिसमयेनोपतिष्ठाव। (छ)

नट। तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः। (ज)

सूत्र। मारिष! (झ)

सर्वथा व्यवहर्त्तव्ये कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्ज्जनो जनः ॥५॥

[५ सर्वथा व्यवहर्त्तव्ये कुतः अवचनीयता, हि जनः स्त्रीणां यथा तथा वाचां साधुत्वे दुर्ज्जनः (भवति) इत्यन्वयः]

अद्यैव द्वादशदिवसात् सहस्रवत्सरपर्यन्तसाध्ययागस्य सत्रमिति संज्ञा अतो न सत्रमिति पदम्। आरब्धं प्रक्रान्तम् तदनुरोधात् तस्य कथ्यप्रसङ्गस्य अनुष्ठानात् छन्दानुवर्त्तनात्, हेत्वर्थे पञ्चमी कठोरगर्भा कठोरः पूर्णः गर्भः यस्याः सा, तामपि जानकीं सीतां विसृज्य त्यक्त्वा अयोध्यायाः रामसकाशात् गुरुजनः कौशल्यादिस्त्रीजनः ऋष्यशृङ्गाश्रमे इति यावत् गतः प्रस्थितः। इति ग्रन्थस्य पूर्वप्रस्तावमध्ये निर्वर्णित।

(छ) तदिति तत् तस्मात् अनेन प्रस्तावेन किम् निष्प्रयोजनमित्यर्थः यतः ऋष्यशृङ्ग प्रभृतिस्तु नास्माकं प्रस्तावविषय इति अथवा तत् तस्मात् चत्वरस्थानानां विश्रान्तचारणत्व यथासम्भवमनुपस्थानात् तद्विषयालोचनं निष्प्रयोजनम् अनेन इति किमयोगे तृतीया, यद्वा गम्यमानसाधनक्रियानुरोधात् तृतीया एहि आगच्छ स्वजातिसमयेन स्वस्य जातिः, तस्याः समयेन आचारेण 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः जात्यनुरूप स्तुतिपाठादिकर्मणा इत्यर्थः प्रकृत्यादिभ्यस्तृतीया राजद्वारमेव उपतिष्ठाव गच्छाव तोषयाव इति वा। स्वजात्यनुगुणरूपं यत् स्तोत्रं तत् कुर्व इति भावः। उपतिष्ठाव इत्यत्र देवपूजाद्यर्थे ऽवर्त्तमानात् परस्मैपदम्

(ज) तेन तस्मात्, स्तोत्रमिति यत् तेन इत्यर्थः भावः कर्त्ता राज्ञः रामचन्द्रस्य नृपतेः सुपरिशुद्धाम् अदुष्टाम् अनिन्दनीयामित्यर्थः उपस्थानस्तोत्रपद्धतिम् उपस्थानस्य उपसर्पण कालस्य अथवा उपस्थाने गमनसमये उपयुक्ता राजसमीपगमनयोग्याम् इत्यर्थः स्तोत्र पद्धति स्तव प्रणाली निरूपयतु निर्द्धारयतु वदत्वित्यर्थः

(झ) मारिषेति। मारिष आर्य्य आर्य्यस्तु मारिष इत्यमरः सूत्रधारेण नटाय प्रयोक्तव्योऽयं शब्दः। तथाच रूपककारः — सूत्रधारो मारिषेति

(५) सर्वथेति सर्वथा सर्वप्रकारेण व्यवहर्त्तव्ये व्यवहार्य्ये सर्वथा समालोचनयोग्ये इति

मन्ः अतिदुर्ज्जन इति वक्तव्यम् । (अ)
देव्यामपि हि वैदेह्यां सापवादो यतो जनः ।
रक्षोगृहे स्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

[८ यतः जनः देव्याः वैदेह्याः अपि सापवादः हि रक्षोगृहे स्थितिः मूलम् अग्निशुद्धौ तु अनिश्चयः इत्यन्वयः]

या ... व्यवहर्तव्य आचारतव्य कम ॥ अवचनीयता अनवद्यता कुत, न सम्भवती त्य ... हि यत जन लोक स्त्रीणा न गोणा साधुत्व पातिव्रत्यलक्षणे विषये यथा दुर्ज्जन दारकष्टक तथा वाचा प्रबन्धेना च स धुन्व प्रमादाद्गुणवत्त्व विग्रहतारम इत्यथ, दुर्जन खलगण सदाचारसम्पन्नानाम् अपि पतिव्रताना यथा मात्रकारपि प्रकृति दोषमुद्भावयति तथा सद्गुणान्वितम् सालङ्कारपद्यमपि प्रबन्धेन दूषणानि आपादयति सर्वथा व्यव हर्तव्य । मतं पारं सवथा सवथा प्रकारेण व्यवहर्तव्य व्यवहार कर्तव्य व्यवहारशब्दोऽय प्रकृ ... तिकरणरूपव्यापारपर अवचनीयता वचनीय दोष तद्रहितता सुपरि शुद्धत इत्यथ कुत कस्मात सम्भवति न कथमपि इत्यथ यत इह जगति न कनापि निन्दा अतिक्रमितु शक्यते अत निन्दातया ... तिपातादिरूपव्यवहारविलोप कर्तु न शक्य । अथवा कुत किमथ यद्वा कुत कस्मै सार्वविभक्तिकस्तसि इति चतुर्थ्यर्थे तसि । [अत्राभिप्रायः—८ वचनया वा दोषराहित्यतया वा गुणवत्तया वा स्तुतिकरणरूपव्यापार कर्तव्य तस्य जातारभ्यत्वात् तदुक्तसुपरिशुद्धतया तु किम, तस्या फलाभावादिति । ननु जनाभिनन्दनमेव तत फलमस्तु कुत फलाभाव इत्यताह—यथा स्त्रीणामित्यादि । पूर्वपादस्य हिशब्दस्यात्र सम्बन्ध ।] जन स्त्रीणा साधुत्व यथा पातिव्रत्यविषय इव वाचा साधुत्वे माधुर्या ... आदिविषये ... दोषदर्शी दोषदर्शित्वमेव हि दौर्जन्यमिति भाव । हि यस्मात् तस्मात अवचनीयता किमर्थमित्यर्थ इति । नञ्यप्रधानस्य अवचनीयता इति शब्दस्य समासे गुणीभूतत्वात् विधेयाविमर्शदोष अत्र प्रकृतस्तोतव्य अवचनीयता प्रति ... पादकतया ... प्रतिपाद्यार्थस्य ... काव्यालङ्कारमलङ्कार, हेतोर्वाक्यपदार्थत्वे काव्यलिङ्ग निगद्यते इति लक्षणात् । स च यथा स्त्रीणामित्यादिभाग प्रतिपादितः वाचि ... न वाच्य न वाच्यया उपमया अङ्गाङ्गीभावेन सङ्कीर्यते । अनु ... वृत्तम् ।

(अ) अतिदुर्ज्जन इति । अति दुर्जन अत्यन्तखलस्वभाव इत्यर्थ । दुर्जन इति पदेन मर्यादकालस्वभावता इयत्ता न सम्यक सूच्यते, अत लोक अतिदुर्जन इति वक्तव्यम् । निर्दोषाणा दोषकीर्तनम् अतिदुर्ज्जनस्यैव स्वभाव ।

(६) अतिदुर्ज्जनत्वस्य प्रमाणमाह—देव्यामपीत्यादि । यत यस्मात् जन लोक देव्या दीप्तिमत्याम् अपि स्वभावतो दोषप्रतिभटादाम अपीतार्थ वैदेह्या विदेहराजपुत्र्या ब्रह्म

सूत्र — यदि पुनरियं किंवदन्ती महाराजं स्पृशेत् * ततोऽतिकष्टं स्यात् ।

नट । सर्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति † (परिक्रम्य) । भो भोः । क्वेदानीं महाराजः ? । (आकर्ण्य) । एवं जनाः कथयन्ति (ठ)—

वादिन राजापजनकस्य दुहितारमपातीय । सापवादं अपवादेन दोषकथनेन निन्दया इति यावत् सहितं । तथाच वैदेहीमप्यपवादसहितं इत्यर्थं । नित्यसापेक्षत्वात् समास, तदुक्तम्— सम्बन्धिशब्द सापेक्षो नित्यं सर्वः समस्यते' इति । सतीशिरोमणिभूताया जानक्या अपि अपवादमुद्घोषयति लोक इति भाव तत चरित्रसन्देहे मूलं कारणं रक्षोगृहे रावणानग्र स्थितिरव्याख्यानम् । रावणेनापहृता सीतादेवी लङ्कायामशोकवनिकायां कतिपयान् मासान् यदवात्स, तत्सततमेवावलम्ब्य [illegible] खलु निन्दां करोति । न किन्तु अग्निशुद्धि रावणवधात् पर सर्वेषां समक्षम् अग्नौ अनल गत्वा [illegible] सीतानां चरित्रनिर्णय अभूत्, तत्र यद्यपि अनिश्चय, अपवाद [illegible] स्याद्यपरोक्षज्ञानस्य दूर [illegible] लङ्काद्वीपे सम्पादितत्वात् अयताजन तस्मिन् न विश्वसितीत्यर्थ । अत्र देव्या इति पदेन पूज्यभावेन दोषाभावश्च उक्त । रक्षो गृहे स्थिति इत्यनेन [illegible] सदुक्तम् तथाच [illegible] तमसत्कर्मापि नालोचितमिति भाव । विषयप्रभावमविगणय्य अस [illegible] दोषस्य [illegible] कार्यम् तथापि बाधकप्रमाण मप्यविश्वस्यासाधारणकारणमप्यदृष्टा [illegible] प्रभावमप्य [illegible] सतीऽपि दोषस्य कथन, ततोऽप्यति दुःखजनकार्यमिति तस्मात् [illegible] न इति वक्तव्यमिति पूर्वेणान्वय । अग्निशुद्धौ इत्यत्र अग्निशब्दविरहात् [illegible] तथा अनिश्चय इत्यत्र प्रधानस्य सञ्जयंसा समासे गुणी भूतत्वात् [illegible] दोष अत्र निश्चयइत्यर्गयत्वात् [illegible] ऽपि निश्चयरूपकार्यार्थ भावबर्णनात् इत्यस्य फलाभावरूपा विशेषोक्तिरलङ्कार

(ट [illegible] यदि पुन [illegible] पूर्वोक्तरूपा किंवदन्ती जनश्रुति लोकापवाद इत्यर्थ महाराजं स्पृशेत् रामचन्द्रस्य [illegible] तत तर्हि, अतिकष्टम् अतीव दुःखकरं स्यात् [illegible] कष्टं [illegible] दर्शनीयम् आपतेत इति नाटकीयवस्तुधानम् [illegible] भुवन

(ठ सर्वथा सर्वप्रकारेण [illegible] देवता ब्रह्मादयो [illegible] प्रणमादिति इत्यन [illegible] इत्यादिना वर्णनात् परमपि सीतया सह पुनर्मिलनरूपमिति [illegible] देवतादिकर्तृ श्रेयोविधानरूप

* '[illegible] परिस्पन्दते [illegible] इति विद्यासागर. ।

स्नेहात् सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान् ।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ ७ ॥

[७। जनकः स्नेहात् सभाजयितुम् एत्य अमूनि दिनानि उत्सवेन नीत्वा विदेहान् गतः ततः विमनसः देव्याः परिसान्त्वनाय नरेन्द्रः धर्मासनात् वासगृहं विशति इत्यन्वयः ।]

इति निष्क्रान्तौ । प्रस्तावना । (ङ)

वीथ्यङ्गमाकाशभाषितं नाम सन्ध्यङ्गमुक्तम् तद्यथा ... इति । परिक्रम्येति । राजद्वारगमनाय किञ्चित्पदानि गत्वा इत्यर्थः । भो भो सम्बोधनार्थमव्ययमिदम् । इदानीम् अधुना महाराजः नृपतिः रामः इत्यर्थः क्व कुत्र वर्त्तते इति शेषः । आकर्ण्य श्रुत्वा ... आकाशभाषितमुच्यते यथा— 'किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते । श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम्' ॥ इति एवंविधं स्नेहादित्यादिवक्ष्यमाणरूपं जनाः लोकाः कथयन्ति आमनन्ति

(... किं जनाः कथयन्ति इत्याह—स्नेहादिति । जनकः विदेहाधिपतिः राजर्षिः स्नेहात् वात्सल्यात् सभाजयितुम् अभिनन्दितुं कुशलेन वनवासात् प्रत्यागतान् सीतारामलक्ष्मणान् प्रत्यभिनन्दितुमिति यावत् । समाजः इत्यदन्तचुरादिसम्भवात् तुमुन् एत्य उपगम्य अयोध्यामिति शेषः अमूनि एतावन्ति दिनानि वासराणि उत्सवेन आनन्दजनकव्यापारेण अभिषेकहेतुकेन इत्यर्थः नीत्वा यापयित्वा अद्य विदेहान् स्वराज्यं मिथिलां, स च शब्दोऽयं पुंसि भूम्नि प्रयुज्यते । विदेहानां निवास इति जनपदे अणो लुप ... बहुत्ववदस्मादस्य लोकाधिकरणस्य' इति लौपतिसूत्रेण बहुवचनम् गतः तस्मात् पितृगमनात् इत्यर्थः विमनसः विच्छिन्नं मनो यस्याः तस्याः खिन्नहृदयाया देव्याः सीतया हृदयागमनया कर्मणि षष्ठी परिसान्त्वनाय सदयालापनयनसमधुरवचनप्रयोगाय सान्त्वनाय इति चतुर्थी नरेन्द्रः नरेषु इन्द्रः इव, निर्धारणे सप्तमीसमासः नरनाथः धर्मासनात् विचारासनात् सिंहासनं परित्यज्य इत्यर्थः ल्यब्लोपे कर्मण्यधिकरणे च इति पञ्चमी । वासगृहम् अन्तःपुरं शयनगृहमिति यावत् । विशति गच्छति प्रविशतीत्यर्थः । वसन्ततिलकावृत्तम् 'उक्ता वसन्ततिलका तभजा जगौ गः' । ... 'अथ वसन्ततिलकं तभजा जगौ गः' इति गङ्गादासः ।

ङ इतीति इति इत्थं प्रस्तुतविषयमवधार्य निष्क्रान्तौ रङ्गभूमिं निर्गतौ नटः सूत्रधारश्चेति शेषः । प्रस्तावनेति । प्रस्तावयति प्रतिपाद्यविषयमुत्थापयति या सा, अभिनवार्थकप्रस्तावः इत्यर्थः । प्रस्तावनालक्षणं यथा साहित्यदर्पणे—'नटी विदूषको वापि पारिपार्श्विक

ततः प्रविशत्यासनस्थो रामः सीता च । (ङ)

राम । देवि ! समाश्वसिहि, न ते हि गुरवश्चिरं शक्नुवन्ति अस्मान् वियोक्तुम् । (ण)

किन्त्वनुष्ठाननित्यत्वं * स्वातन्त्र्यमपकर्षति ।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

[८ किन्तु अनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति, हि आहिताग्नीनां गृहस्थता सङ्कटा इत्यन्वयः] ।

एव वा सूत्रधारेण सहिता स यत्र कुरुते । चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ।' इति । सा चात्र प्रयोगातिशयरूपा, यथा तत्रैव—यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते । तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥'

(ङ) अथाङ्क सूचयति—तत इत्यादिना । प्रविशति रङ्गभूमौ आविर्भवति । अङ्कलक्षणं—'प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः' इत्यादि दर्पणे ।

(ण) देवीति समाश्वसिहि आश्वस्ता भव इत्यर्थः । न गुरवः पितरः तव जनको राजर्षिर्जनकः गुरवस्तु गौरवादौ च स गुरुः पितरि इत्यादि'' इति कोषः । गौरवे बहुवचनम् । रामस्य श्वशुरत्वात् जनकोऽपि गुरुः । जनकः खलु विदेहनगरीं प्रति प्रस्थितः, एतदेव दुःखकारणम् अन्ये च कौशल्याप्रभृतयो गुरुजना ऋष्यशृङ्गस्य आश्रमं गतवन्तः । एतेषामपि गुरुजनानां विरहात् सीताया दुःखमुपजातम् । चिरं बहुकालम् अस्मान् वियोक्तुं परित्यज्य स्थातुं न शक्नुवन्ति समर्था भवन्ति । हि अवधारणे । शीघ्रमेवागमिष्यन्तीति भावः ।

(८) न खलु जनकः स्नेहाभावात् अस्मान् परित्यज्य गतः, अपि तु अन्यत् कारणमिति तदेव वक्ति—किन्त्विति । किन्तु किन्तु अनुष्ठाननित्यत्वम् अनुष्ठानानां वैदिकक्रियाणां सन्ध्यादिकर्मणाम् अवश्यकर्तव्यतया नित्यत्वं अक्रियमाणतया प्रत्यवायसाधकत्वं यदकरणे प्रत्यवाय इति श्रवणात् अवश्यकर्तव्यत्वमित्यर्थः । स्वातन्त्र्यं स्वः आत्मा तन्त्रं प्रधानं यस्य स स्वतन्त्रः तस्य भावः गुणवचनादित्वात् ष्यञ्, स्वाधीनतामित्यर्थः, अपकर्षति हरति नाशयति इत्यर्थः । अवश्यकर्तव्यकर्मानुरोधात् न हि आहिताग्नयः इच्छावशतोऽपि अन्यत्र अधिककालम् स्थातुं शक्नुवन्ति इति भावः । हि यतः यदा हि निश्चितम्, आहिताग्नीनाम्

सीता। जाणामि अज्जउत्त! जाणामि। किन्तु सन्दावआरिणो बन्धुजणविप्पओआ होन्ति। (त)

[त। जानामि आर्य्यपुत्र! जानामि, किन्तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति, इति सम्]।

राम। एवमेतत्। एते हि हृदयमर्म्मच्छिदः संसारभावाः, येभ्यो वीभत्समानाः सन्त्यज्य सर्वान् कामानरण्ये मनीषिणो विश्राम्यन्ति।(थ)

(प्रविश्य कञ्चुकी) (द) रामभद्र! (इत्यर्द्धोक्ते साशङ्क)। महाराज!(ध)

अहिता अप्रती य नप, वाहिताग्न्यादिषु' इति आहितशब्दस्य पाक्षिकपरनिपातत्वात् पक्षे अग्न्याहितानाम्। साग्निकानां गृहस्थता गृहे तिष्ठतीति गृहस्थः, 'सुपि स्थः' इति कः, तस्य भावः, भावे तल्प्रत्ययः। गृहस्थधर्म्मः प्रत्यवाये अन्तराये कर्त्तव्यानुष्ठानजः परैवित्यर्थः सङ्कटा सङ्कीर्णं कटं स्थानं यस्मिन् तथोक्ता, सङ्कुला निविडा इत्यर्थः।

(त) जानामीति। जनकविच्छेदजन्यशोकबाहुल्यात् द्विरुक्तम्। साग्निकानां प्रागुक्तं प्रत्यवाये गृहस्थतायाः सङ्कटत्वं मया ज्ञातं किन्तु दुर्निवारा खलु आत्मीयजनविरहवेदना इति भावः।

(थ) एवमिति। त्वया यदुदीरितं तत्तथैव, एते संसारभावाः 'संसारः मिथ्याधी-प्रभवा वासना' इति प्रामाण्यवादे गादाधरी टिप्पणी। 'अदृष्टोपनिबद्धशरीरपरिग्रहः संसारः' इति कलापपरिशिष्टटीकायां तर्काचार्य्यः। यद्वा शरीरसम्बन्धानुबन्धिसुखदुःखसमुदायः संसारः। तथाच गुरुबन्धुवियोगादौनां तदेकदेशत्वं सङ्गतम्। तस्य जगतः भावाः अवस्थाः हृदयमर्म्मच्छिदः हृदयस्य चित्तस्य मर्म्माणि सन्धिस्थानानि छिन्दन्तीति ते तथोक्ताः हृदयग्रन्थिविश्लेषकाः। हि अवधारणे। येभ्यः संसारभावेभ्यः "जुगुप्साविराम—" इत्यादिना अपादाने पञ्चमी। वीभत्समानाः जुगुप्समानाः विरक्ता इत्यर्थः 'बध बन्धने' इत्यस्मात् स्वार्थे सनि रूपमिदम्। 'बधेश्चित्तविकारे' इति वार्त्तिकादस्य चित्तविकारे हान। सन्तः मनीषिणः मनीषा विद्यते येषां ते, आत्मदर्शिनः पण्डिताः सर्वान् सकलान् कामान् विषयाभिलाषान् सन्त्यज्य विहाय अरण्ये वने विश्राम्यन्ति सुखं लभन्ते इत्यर्थः।

(द) प्रविश्येति। कञ्चुकोऽस्यास्तीति कञ्चुकी 'कञ्चुकी बारबाणोऽस्त्री' इत्यमरः। "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इति नाट्यशास्त्रं। 'अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः। सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते॥" इत्यमरः।

(ध) रामभद्रेति। रामभद्र इति वात्सल्यभावद्योतकनाम्ना सम्बोधनाभासेन दशरथ-

राम। (सस्मितम्)। आर्य्य! ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य तद्यथाभ्यस्तमभिधीयताम्। (न)

कञ्चु। देव! ऋष्यशृङ्गाश्रमादष्टावक्रः सम्प्राप्तः। (प)

सीता। अज्ज! तदो किं विलम्बीअदि? (फ)

[फ आर्य्य! तत किं विलम्ब्यते, इति सम्]

राम। त्वरितं प्रवेशय। (ब)

(कञ्चुकी निष्क्रान्तः)

(प्रविश्य) अष्टावक्र। स्वस्ति वाम्। (भ)

राम। भगवन्! अभिवादये, इत आस्यताम्।

समसामयिकेन कञ्चुकिना इदानीं राज्याभिषिक्तं रामं प्रति महाराज इति उपयुक्तसम्बोधन मकुर्वता शिष्टाचारभङ्गभयेन 'रामभद्र' इत्यनुक्त्वा महाराज' इति निगदितम्।

(न) आर्य्येति। आर्य्य मान्य! ननु अवधारणे, अनुनये वा, 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। रामभद्र इत्येव रामभद्र इति शब्द एव मां प्रति उपचारः शिष्टाचारः व्यवहार इत्यर्थः तातपरिजनस्य तातस्य [illegible] परिजनः अनुजीविजनः तस्य, वयसा ज्येष्ठस्य प्रतिपालकत्वेन च पितृस्थानीयस्य। कृद्योगात् कर्त्तरि षष्ठी। शोभते योग्यो भवति। गुरुजनेभ्यः वात्सल्यद्योतकमभिधानमेव प्रार्थनीयं न तु पदमर्य्यादासूचकं सम्बोधनमिति भावः। तत् तस्मात् कारणात् यथाभ्यस्तम् अभ्यस्तमनतिक्रम्य इत्यव्ययीभावः। अभिधीयताम् सम्बोध्यताम्। एतेन रामचन्द्रस्य विनयातिशय्यं सूचितम्।

(प) देवेति। ऋष्यशृङ्गाश्रमात् ऋष्यशृङ्गतपोवनात् अष्टावक्रः अष्टौ स्थानानि वक्राण्यस्येति यद्वा अष्टम् अवयवेषु वक्रः एतेन 'अष्टन् संज्ञायाम्' इति दीर्घः। योगरूढ़शब्दः। अष्टवक्राण्यङ्गानि। सम्प्राप्तः समागतः।

(फ) अज्ज इति। तूर्णमस्यानयनमावश्यकम् इत्यर्थः एतेन जनकात्मजाया मुनौ भक्तिवात्सल्यं सूच्यते।

(ब) त्वरितमिति त्वरितं शीघ्रम् [illegible] पक्षे—तूर्णम्

(भ) स्वस्तीति। वाम् युवाभ्यां, नमः स्वस्ती [illegible] चतुर्थी [illegible] इत्यर्थः। [illegible] 'स्वस्त्याशी क्षेमपुण्यादौ' इत्यमरः। [illegible] अष्टावक्रप्रवेश इति कश्चित् काव्यरसिकः।

(म) भगवन्निति। अभिवादये प्रणमामि [illegible] इत आस्यतां स्थीयतां, मया सह [illegible]

सीता। भअवं ! णमो दे, अवि कुसलं सजामादुअस्स गुरुअणस्स अज्जाए सन्ताए अ। (य)

[य। भगवन् ! नमस्ते, अपि कुशलं सजामातृकस्य गुरुजनस्य आर्य्यायाः शान्तायाश्च ? इति सम्]।

राम.। निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यशृङ्गः, आर्य्या च शान्ता ? (र)

सीता। अम्हे वि सुमरेदि ?। (ल)

[ल। अस्मानपि स्मरति ? इति सम्]।

अष्टा। (उपविश्य)। अथ किम्। देवि ! कुलगुरुर्भगवान् वशिष्ठस्त्वामिदमाह—(व)

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयञ्च। ८॥

[८। भगवती विश्वम्भरा भवतीम् असूत, प्रजापतिसमः राजा जनकः ते पिता, हे नन्दिनि ! येषां कुलेषु सविता गुरुः, वयं च (गुरवः), त्वं तेषां पार्थिवानां वधूः असि]।

(य) भअवं इति। पत्युर्ज्येष्ठभगिनीत्वात् आर्य्या इति पदम्।

(र) निर्विघ्न इति। विहन्यते अनेन इति विघ्नः अन्तरायः, निर्गतः विघ्नः यस्य सकाशात् इति भावः, सः, अन्तरायरहित इत्यर्थः। सोमपीथी सोमस्य पीथं पानम् इति सोमपीथं तत् विद्यते अस्य इति अस्त्यर्थे इनिः। 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' इति पिबतेः थक्। सोमपीतीति पाठे सोमस्य पीतं पानमस्यास्तीति इन्। यद्वा पीतमनेनेति पीती ; इष्टादिभ्यश्चेति इनिः, सोमे पीती इति सोमपीती "तस्मिन् विग्रहे" इति सप्तम्या समासः। भगवान् षडैश्वर्य-शाली। आवुत्तो भगिनीपतिः। "भगिनीपतिरावुत्तः" इत्यमरः।

(ल) अम्हे वि इति प्रश्नार्थे अपिशब्दः।

(व) अथेति। कुलस्य इक्ष्वाकुवंशस्य गुरुः कुलगुरुः। वशिष्ठः अयम् एषाम् अतिशयेन वसु इति इष्ठन्। वसिष्ठ इति वा दन्त्यः पाठः। त्वां सीतामित्यर्थः। इदं वक्ष्यमाणवचनम् आह कथितवान्, मन्मुखेन इति शेषः।

(श) वशिष्ठ किमाहेत्याकाङ्क्षायामाह—विश्वम्भरेति। भगवती षडैश्वर्य्यपूर्णा

तत् किमन्यदाशास्महे, केवलं वीरप्रसवा भूयाः । (ग)

विश्वम्भरा, यत्र विभर्त्ति धारयतीति स मात्रा भगवती—' इत्यादिना खच्, मुमागमश्च । वसुन्धरा । विश्वम्भरेति पदं शान्तिप्रधानत्वसूचनाय । भगवतीं त्वाम् असूत अजनयत् । तथा प्रजापतिसमः प्रजापतिना ब्रह्मणा समः तुल्यः विधातृप्रतिम इत्यर्थः, स्वाध्यायादिना ब्रह्मतुल्य इति यावत् । राजा राजते दीप्यते इति 'कनिन् युवृषितक्षि—' इत्यादिना कनिन् । नृपतिः, ब्रह्मज्ञानपरिपूर्णतया नैष्ठिकब्रह्मरतिमयदीप्तियुक्त इति वा यद्वा ज्ञानभक्तिवैराग्यैरखण्डदीप्त्यापि रञ्जयतीति राजा धातूनामनेकार्थत्वात् । जनकः मैथिलः "जनको ह वैदेह" इत्यादिषु प्रसिद्ध इत्यर्थः । ते तव पिता जनकः । अयि नन्दिनि । नन्दयति प्रीणयतीति नन्दयतेः णिनि स्त्रियां ङीप्, कन्यावत् आनन्ददायिनि । येषां पार्थिवानाम् इत्यर्थः कुलेषु वंशेषु गौरवे बहुत्वम् । यद्वा शाखाभूयस्त्वात् बहुवचनम् । सविता सर्वं जगत् सुवति कर्मानुष्ठाने प्रेरयतीति सूर्यः, गुरुः पिता वंशप्रवर्त्तक इत्यर्थः वयञ्च अहम् 'अस्मदो द्वयोश्च' इति एकत्वे बहुवचनम् । 'सविशेषणस्य प्रतिषेध' इति तु न विधयविशेषणविषयो । यद्वा वयं वशिष्ठविश्वामित्रप्रभृतय इत्यर्थः । वशिष्ठाधिष्ठिता देवी प्राचेतसस्तथा' इति वक्ष्यमाणरीत्या वाल्मीकेः कुशलवास्त्रसम्प्रदायेन विश्वामित्रस्य वामदेवादेश्च ग्रहणात् । गुरुशिष्यानुपक्रमस्य वचन विपरिणामात् गुरवो हितोपदेष्टारः । तेषां तस्मात् सूर्यवंशीयानां नृपतीनां वधूः स्नुषा त्वम् असि भवसि यच्छन्दस्य चरमपादे सन्निवेशनात् विधेयादिमर्षदोषः अलङ्कारश्च जनकजाया भाग्यवत्त्वरूपकार्य्यस्य साधने धरणीकन्यात्वरूपे एकस्मिन् कारणे वर्त्तमानेऽपि जनकस्य कन्यात्वं तथा सूर्य्यवंशस्य वधूत्वमिति कारणान्तरोपन्यासात् समुच्चयः, 'समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके । खले कपोतिकान्यायात्तत्करः स्यात् परोऽपि चे'त्यलङ्कारलक्षणात् । स प्रजापतिसम इत्युपमया जनकः पिता इत्यनेनोक्तितपुनरुक्तवदा भासेन च संसृष्टिरिति ।

(ग) तदिति । तत् तस्मात् कारणात् अन्यत् पुत्रादन्यत् इत्यर्थः, किं वस्तु इति यावत् । आशास्महे 'आङः शासु इच्छायाम्' इति धातोर्लट् । आङ्पूर्वयो स्तिष्ठतिशास्योरिच्छार्थे आत्मनेपदम् । या वेदेषु उत्पन्ना परिपूता, नानागुणमयी भूतधात्री यस्याः प्रसूतिः, मधुरकुलञ्च यस्याः अन्यत्प्रसं तस्याः का नाम आशीः करणीयास्ति इति भावः । केवलं वीरप्रसवा वीरः प्रसवः यस्याः । यद्वा वीरौ प्रसवौ यस्याः सा वीरजननी भूयाः भवनेराशिषि लिङ् । अयं भावः—ते गुणाभिधेया नावास्य विश्वम्भरा भगवती'त्युक्तमातृवंशसम्भवत्वादेव तत्सिद्धम् । नापि ज्ञानभक्तिवैराग्यादिकं, ब्रह्मविज्जनकसम्बन्धादेव तल्लाभात् । नवा हितयाचित-ऐश्वर्यं सर्वं सम्यक्प्रयुक्तानिवापाभावश्च प्राप्यं तेषां सद्गुरुसम्बन्धाद्विभवात् जनकाकुल-सद्भावानुभूतादेव सिद्धत्वात् । अत एव तथा नाशास्महे, किन्तु

राम। अनुगृहीताः स्मः। (घ)

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ १०॥

[अ० — लौकिकानां साधूनां वाक् अर्थम् अनुवर्त्तते हि, आद्यानाम् ऋषीणां पुनः वाचम् अर्थः अनुधावति, इत्यन्वयः]।

अष्टा। इदञ्च भगवत्या अरुन्धत्या देवीभिः शान्तया च भूयोभूयः सन्दिष्टं,—यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात् सम्पादयितव्य इति। (ङ)

एष ऋषिमुखोविधानभूतवसिष्ठानुग्रहरूपबीजस्य बहुकरणात् परिकरः तदुक्तम्—'बीजस्य बहुकरणं परिकरः' इति।

(घ) अनुगृहीता इति। अनुगृहीता अनुकम्पिता। एतदनुग्रहानुग्रहरूपबीजाङ्गी-करणरूपं समाधानं नाम सन्ध्यङ्गम्, यथा—'बीजाङ्गीकरणं समाधानम्' इति।

(१०) लौकिकानामिति। लौकिकानां लोके प्रसिद्धानां सामान्यानां वा, साधूनां सच्चरित्राणां महानुभवानां वाक् वचनम् अर्थं वस्तु भवितव्यविषयमित्यर्थः, अनुवर्त्तते अनु-सरति, लोकव्यवहारपण्डिता सज्जना कार्यकारणसम्बन्धादिकमालोच्य ज्ञात्वा च विषयमिति, तदनुसारिणीं वाचं प्रयुञ्जते, अर्थानुसन्धानं विना ततप्रयुक्तवचनस्य निष्फलत्वात्। हि निश्चये, पुनः किन्तु आद्यानाम् आदौ भवा आद्या पुराणा श्रेष्ठा वा, तेषाम् ऋषीणां वसिष्ठप्रमुखानां मुनीनां वाचं वाक्यं कर्म्म अर्थः वस्तु अनुधावति अनुसरति। तपः-स्विनामुक्तिरिहं तपःप्रभावेणासम्भवमपि अर्थमुत्पादयति इति भावः। यथा 'ऋषि मती' इत्यस्य मुख्यार्थत्वात् कालत्रयवर्त्तिवस्तुसाक्षात्कर्त्तृत्वम् ऋषिपदप्रवृत्तिनिमित्तम्। अथाच भाविनमर्थं दृष्टा ते वदन्ति, ततः स्वकाले प्राप्ते सोऽर्थस्तामनुसरतीति भावः। अत्र साधा-रणसाधुभ्यो वसिष्ठादीनाम् ऋषीणाम् उत्कर्षविषयवर्णनात् व्यतिरेकोऽलङ्कारः। एतत् ऋषिमुखोवितरणरूपबीजगुणवर्णनात् विलोभनं नाम सन्ध्यङ्गमुक्तम्। 'गुणाख्यानं विलोभनम्' इति दर्पणोक्तेः।

(ङ) इदञ्चेति। भूयोभूयः पुनः पुनः, शान्तया विशेषि। सन्दिष्टम् आज्ञप्तम् गर्भदोहद इति। दोहम् आकर्षम् अभिलाषविशेषमित्यर्थः, ददाति जनयतीति, गर्भिण्यभि-लषितपानभोजनादिविषयम् इत्यर्थः। यद्वा गर्भसमये दोहद अभिलाष इति। 'गर्भिण्य-भिलाषो दोहद'मिति तन्त्रान्तरम्। विशेषणानि सामान्ये नाभिधानं, गर्भाभावेऽपि दोहदमिति चिन्त्यम्। अनर्पितस्य दोहदस्य जीवनमाशङ्कते। तदुक्तम्—'अथ दोहदं, इच्छा-

रामः । क्रियते, यद्यदेषा कथयति । (ङ)

अष्टा । ननान्दुः पत्या च देव्याः सन्दिष्टमृष्यशृङ्गेण—वत्से ! कठोरगर्भेति नानीतासि, वत्सोऽपि रामभद्रस्त्वद्विनोदनार्थमेव स्थापितः । तत् पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्याम इति । (च)

रामः । (सहर्षलज्जितम्) । तथास्तु । भगवता वशिष्ठेन किमादिष्टोऽस्मि ?

अष्टा । श्रूयताम्,—

जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवञ्च राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत् परमं धनं वः ॥ ११ ॥

[११ । वयं जामातृयज्ञेन निरुद्धाः त्वं बाल एव असि, राज्यञ्च नवं, तस्मात् प्रजानाम् अनुरञ्जने युक्तः, यत् यशः वः परमं धनम्, इत्यन्वयः]।

श्रद्धा स्पृहेच्छा तर्षवाञ्छा लिप्सा मनोरथः ।' इति । अन्ये तस्य पुंनपुंसकत्वं स्वीकुर्वन्ति, यथा—'दोहदं पुंनपुंसक'मिति रभसः । सः दोहदः अचिरात् अविलम्बेन सम्पादयितव्यः पूरयितव्यः ।

(ङ) क्रियत इति । एषा जानकी यत् यत् दोहदम् इष्टार्थः कथयति प्रकाशयति, तत् क्रियते पूर्यते । 'यद्येषा' इति पाठे तु अत्यन्तसङ्कोचशीलत्वात् नैव किञ्चिदपि प्रकाशयति, यदि कदाचित् किञ्चिदपि प्रकाशयति तर्हि अवश्यमचिरादेव तत् सम्पाद्यते इति भावः ।

(च) ननान्दुरिति । ननान्दुः भर्तृभगिन्याः शान्तायाः । पत्या ऋष्यशृङ्गेण । देव्याः इत्यस्य पूर्वोत्तराभ्यां सम्बन्धः । तथाच देव्याः ननान्दृपतिना देव्याः सन्दिष्टम्, देवीं प्रति आदिष्टमिति भावः । किमादिष्टमित्याह—वत्से इति । कठोरगर्भा कठोरः पूर्णः गर्भो यस्याः सा इति हेतोः न आनीतासि, आसन्नप्रसवत्वात् यातायातक्लेशं सोढुं नार्हसि ।' इत्यस्मद्गृहागमनात् इति भावः । त्वद्विनोदनार्थं त्वच्चित्तानुरञ्जनार्थम् । स्थापितः रक्षितः । पुत्रेति । पुत्रपूर्णः उत्सङ्गः क्रोडो यस्याः ताम्, आयुष्मतीं चिरायुष्कां द्रक्ष्यामः इति यावत् ।

११ । जामात्र इति । वयं जामातृयज्ञेन जामातुः ऋष्यशृङ्गस्य यज्ञसमाप्तिं यावत् निरुद्धाः अवरुद्धाः अनिवृत्ताः; त्वम् बालः अवयस्कः राज्यम् अभिनवम् अतः प्रजानाम् अनुरञ्जने युक्तः स्याः इति भावः । अनेन भगवत्प्रजानुरञ्जने सर्वातिशयी वशिष्ठादीनां अभवत् । तथाऽपि यत्नः आवश्यक इत्यादरणीयतापूर्वकं तात्पर्यम् । एवं च तद्विरहिते कार्ये च प्रजारञ्जनाधिकारः इति पर्यवसितार्थः । अतएव मया एकाकिना एव राज्यं पालनीयम्,

राम:। यथाह भगवान् मैत्रावरुणिः। (क)

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

[१२। लोकानाम् आराधनाय स्नेहं, दयां च सौख्यञ्च यदि वा जानकीमपि मुञ्चतः मे व्यथा नास्ति, इत्यन्वयः]।

किन्तु त्वं बालः अपरिणतवयाः न तु कूटराज्यतन्त्रविचारोपमर्दाभिज्ञ इत्यर्थः, एव अस्ति भवसि, अत एव वयमाकुला इत्यर्थः। [इदमवधेयम्—किल दशरथजामातरम् ऋष्यशृङ्गं जानातीति निर्दिशन् वशिष्ठः स्वस्य दशरथस्यात्मीयतामभिप्रैति, तच्च रामबुद्ध्या च। एवं वात्सल्यबालशब्दः पुत्रत्वाभिप्रायमूलकः। अत एव त्वदीयराज्यपालनार्थमहं दशरथस्यात्मीयं नामसन्निकृष्टं वाचतः इत्याह—त्वं बाल एवासीति। अपि च इदानीमपि नास्ति अचिराधिगतस्य राज्यस्य पालने केनचित् सहायता इत्यत आह—नवमिति]। नवं नूतनम् अचिरमधिगतं राज्यं, न चेदानीमपि—इदमतिदुष्करम्। न तु गुर्वादिवत् परिचितपूर्वमिति भावः। सत्यदोषाविष्कारणे प्रकृतयो विक्षुब्धीरन् इति फलितार्थः। ननु तर्हि किं कर्त्तव्यमित्याह—युक्त इति। अतः प्रजानां प्रकृतीनाम् अनुरञ्जने चित्ततोषणे युक्तः, नपुंसके भावे क्तः, ततः तदस्यास्तीति अर्श आदित्वात् अच्, एकाग्रचित्तः अभिनिवेशवान् इति यावत्। स्याः भवेः। यत् यस्मात् यशः प्रकृतिरञ्जनलब्धख्यातिः वः युष्माकम् रघूणाम् परमं सर्वोत्कृष्टं धनम्, यद्वा तस्मात् प्रजानुरञ्जनात् यत् यशः तत् परमं धनमित्यन्वयः। "एकदिग्व्यापिनी कीर्त्तिः सर्वदिग्व्यापि वै यशः।" इति वचनात् यशःशब्दस्य प्रयोगः। अत्र यथाक्रमं पूर्वार्द्धोक्तवाक्यार्थयोः तृतीयपादार्थं प्रति तत्र च चतुर्थपादार्थस्यापि हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। इन्द्रवज्रावृत्तं—"स्यादिन्द्रवज्रा यदि तौ जगौ गः।" इति लक्षणात्।

(क) यथेति। मैत्रावरुणिः मित्रश्च वरुणश्च तौ मित्रावरुणौ 'देवताद्वन्द्वे च' इत्यानङ्। तयोरपत्यम् इत्यर्थे बाह्वादित्वात् इञ् प्रत्ययः। अत्र पौराणिकी वार्त्तानुसन्धेया। यथाह सम्यक् आदिशति।

(१२) स्नेहमिति। लोकानां जनानां प्रजानाम् इत्यर्थः, 'लोकस्तु भुवने जने' इत्यमरः, आराधनाय तोषणाय अनुरञ्जनार्थमित्यर्थः, लोकान् सन्तोषयितुमिति यावत्, तादर्थ्ये चतुर्थी, तुमर्थाच्च भाववचनादिति वा। स्नेहं हार्दं 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः, ममत्वमिति यावत्। [स्नेहो हि सुखदः सुखाभ्यासहेतुश्च, किं च 'कुर्यात् वस्तु विज्ञानं निजार्थे न परित्यजेत्' इत्युक्तरीत्या दुर्निवार्यं च। तथाच तत्परित्यागोऽपि मम न दुःखायेति भावः। स्नेहस्य व्यवस्थितविषयत्व एव सुखकत्वम्, अन्यथा तु दोषकरत्वमिति

सीता। अहो एव्व राहवकुलधुरन्धरो अज्जउत्तो। (ख)
[छा। अत एव राघवकुलधुरन्धर आर्यपुत्र इति क्रम्]।

राम। कः कोऽत्र भोः! विश्राम्यतां भगवानष्टावक्रः। (ग)

अष्टा। (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः। (घ)

(इति निष्क्रान्तः)।

निष्कर्षं]। दया च करुणा च। [परदुःखहरणेच्छा दया, भूतेषु अनुकम्पा इति यावत्
"सर्वभूतेषु सर्वत्र सन्तुष्ट्या येन केनचित्। सर्वेन्द्रियोपशान्त्या च तुष्ट्याराधनं जनार्दन॥"
इत्युक्ता धर्मरूपतया, किं च परदुःखाधीनसन्ततया च तन्निवृत्तिं विना दुर्निवार्या]। सौख्यं च
आत्मन, सुखप्रवाहरूप सुखसाधनविषयमिति वा, यदि वा अथवा जानकीं जनकतनयाम् प्राणा-
धिकां सीताम् अपि मुञ्चत त्यजतो मम मे व्यथा नैव नास्ति। आस्तां तावत् स्नेहादीनां कथा,
लोकानुरञ्जनार्थं प्राणेभ्योऽपि गरीयसीं सीतामपि परित्यक्तुं समर्थोऽस्मि। अत्र सीतामित्यनुक्त्वा
जानकीमित्युक्तिर्लोकाराधनापेक्षया [illegible] इति सूचयति।
अपिच जानकीपदेन जनकनन्दनीयजनकजाया अविचल सर्वथा परित्यागानर्हत्वं च प्रकट्यते।
[लोके हि अभिमतवस्तुपरित्यागात् पूर्वं कोऽपि अभिमतवस्तुन अविद्यमानात् न दुःखभूयस्त्वं, परि-
त्यागात् परमपि अतीतत्वात् न दुःखभूयस्त्वम्, तत्परित्यागकाले तु भवति दुःखभूयस्त्वं
तावत्तं मानसात्। मम तु तत्परित्यागकालेऽपि न दुःखमिति तत्परित्यागार्थं मुञ्चत इति पदतो
लभ्यते]। अत्र जानकीमपीति पदेन अर्थापत्तिरलङ्कारः, स च मुञ्चत इति एकया क्रियया
स्नेहादीनामन्वयात् तुल्ययोगितासङ्कीर्णं, अपि नाम स्नेहादीनामुत्तरोत्तरोत्कर्षप्रतिपादनात्
सारालङ्कारो व्यज्यते। 'दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते' 'पदार्थानां प्रस्तुतानामन्येषां
वा यदा भवेत्। एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता॥' 'उत्तरोत्तरमुत्कर्षो वस्तुनः
सार उच्यते।' इति लक्षणानि।

(ख) अहो इति। अत एव यन्मम हृदयप्रजानुरञ्जनतत्पर इत्यर्थं, राघवकुलधुरन्धर.
राघवकुलेषु रघुवंशीयेषु धुरन्धर. धुरं धरति इति खच् निपातनात् साधु। राघव-
पदोपादानं साभिप्रायकं, अरण्यगतस्य रघुभूतस्य लोकाराधनैकपरत्वस्य प्रसङ्गात् तथैवानुरूप-
निश्चितिरागमः।

(ग) क इति। विश्राम्यतां विश्रामयतु विश्रामयतु। विश्राम्यात् कर्मणि लोट्।
विश्रामयताम् इति पाठे तु विश्रामं प्राप्नोतु इत्यर्थः, कर्मणि परस्मैपदलोटप्रातङ्।

(घ) उत्थायेति। परिक्रम्य लोकान्तरं गत्वा इत्यर्थः।

(प्रविश्य) लक्ष्मणः। जयति जयत्वार्यः। आर्य, तेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथिकायामभिलिखितं, तत्पश्यत्वार्यः। (ङ)

राम। जानासि वत्स, दुर्मनायमानां देवीं विनोदयितुम्। तत् कियन्तमवधिं यावत्? (च)

लक्ष्म। यावदार्याया हुताशने विशुद्धिः। (छ)

राम। शान्तम्। (ज)

(ङ) जयतीति। आर्यः पूज्य जयति सर्वोत्कर्षेण वर्त्तताम् इत्यर्थः। पूज्यजनान्तिके एतदुक्ति विनयप्रकाशो भवति। एवमन्यत्रापि ज्ञेयम्। तेन भवदाज्ञानुवर्त्तिना चित्रकरेण चित्रं करोतीति चित्रकरः, "दिवाविभानिशा"दिना कर्मणि टः। आलेख्यकरणपटुना। अर्जुनेन इति क्वचित् पाठः, तत्र तन्नाम्ना इति यावत्। अस्मदुपदिष्टम् अस्माभिः उपदिष्टं दर्शितम् आर्यस्य पूज्यपादस्य भवतः चरितं कर्म्म, अस्यां वीथिकायां चित्रमण्डपद्वारे कुड्योपरिभागे इति यावत्। 'पङ्क्तिवर्त्मगृहाद्ये तु वीथिर्वीथी च वीथिका' इति रत्नकोषः। अभिलिखितम् अङ्कितम्। तत् चित्रम्। चित्रदर्शनस्य प्रयोजनं भूमिकायां द्रष्टव्यम्।

(च) जानासीति। वत्स औरस। दुर्मनायमानां दुःखितमनस्काम्, जनकस्य स्वदेशान् प्रति गमनादिति भावः। दुःखितं मनो यस्याः सा दुर्मनाः, सा इव आचरतीति। 'कर्त्तुः क्यङ् सलोपश्च'। ङित्त्वादात्मनेपदम्। शानच्। देवीं देवनशीलां सीतां विनोदयितुं कौतुकोद्दीपनेन जनकादिवियोगजदुःखं निरस्य सन्तोषं ग्राहयितुम्। नुद प्रेरणे, उपसर्गवशेन तदर्थलाभः। जानासि अवगतवान् असि। तत् तस्य भवच्चरितं अदस्य अभिलिखितं तस्य इति भावः। कियन्तम् अवधिं यावत् अवधिरन्तः कियान् वा नाम तस्य सीमा इत्यर्थः। अनेकसंख्यकेषु मद्व्यापारेषु कीदृगस्य सङ्ग्रहयुक्तोऽवध्यापारः, कश्च चित्रस्यावधिरिति प्रश्नार्थः। अवधिमित्यत्र यावद्योगे द्वितीया।

(छ) यावदिति। यावत् आर्यायाः देव्याः सीतायाः इत्यर्थः, हुताशने अनले विशुद्धिः चारित्र्यविशुद्धिसूचनम्। हुताशनविशुद्धिरिति क्वचित् पाठः, तत्र हुताशनेन शुद्धिरिति विग्रहः। यावच्छब्दोऽवधारणे। अभवदिति शेषः। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात् अत्र यावद्योगेऽपि न द्वितीया।

(ज) शान्तमिति। शान्तं पापं निवारितं भवतु इत्यर्थः। पापवार्त्ताश्रवणे एतदुक्तिः, 'अवाच्यं कथने शान्तम्' इति मेदिनी। नैतत् श्रोतव्यं न च द्रष्टव्यम् इति भावः।

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १३ ॥

[१३ । उत्पत्तिपरिपूतायाः अस्याः पावनान्तरैः किम् ? तीर्थोदकं वह्निश्च अन्यतः न शुद्धिम् अर्हतः । इत्यन्वयः]।

देवि, देवयजनसम्भवे, प्रसीद, एष ते जीवितावधिः प्रवादः । (झ)

---

(१३) उत्पत्तीति । उत्पत्तिपरिपूतायाः उत्पत्त्या जन्मना परिपूतायाः परिशुद्धायाः सर्वेषामेव जीवानां शुक्रशोणितादिसम्पर्कात् अपवित्रं खलु भवति जन्म, क्लेदादिमयगर्भवासात् च तेषां सर्वथैव अपवित्रत्वं जायते, किन्तु अयोनिजायाः सीतायाः नास्ति तद्दोषलेशोऽपि, देवयजनसम्भवत्वात् । अविमलत्वनिरासार्थमिदं, स्वभावतो दोषसम्भिन्नाया इत्यर्थः । अस्याः सीतायाः पावनान्तरैः पावयन्तीति पावनानि, नन्द्यादित्वात् ल्युप्रत्ययः । अन्यानि अनलादीनि पावनानि पवित्रीकरणसमर्थानि वस्तूनि तैः किं किं प्रयोजनमस्ति न किमपि इत्यर्थः । गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया । शुद्धिर्हि दोषनिर्हरणम्, अयोनिजायाः अविद्यमानदोषायाः कथं शुद्धिरिति भावः । किञ्च अन्तरशब्देन दोषरहितमात्रस्य पावनत्वापेक्षा नास्ति । इयं च न केवलं दोषरहिता अपि तु पावनी चेति सूच्यते । 'अपि मां पावयेत साध्वी स्नात्वेतीच्छति जाह्नवी" इति न्यायात् । उक्तमर्थं परार्द्धेन द्रढयति—तीर्थेति । तीर्थोदकं गङ्गादिपावनजलम् । तीर्थशब्दोऽविशेषणमात्रपरः यथाश्रुते तीर्थशब्दस्यैव परिशोधकत्वाभिधानात् । यथा तीर्थानां गुरूणाम् उदकं पादावनेजनाम्भः, 'आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे' इति श्रुतेः । अथवा तीर्थमेव उदकम् कर्मधारयः । 'तीर्थं शास्त्राध्वर-क्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु' इति मेदिनी । 'योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि' इति हलायुधः । तीर्थानां गङ्गादीनाम् उदकमिति वा । वह्निश्च अनलश्च अन्यतः पावनान्तरात् शुद्धिं पवित्रत्वं न अर्हतः, न अपेक्षेते इत्यर्थः । वस्तुद्वयानुरोधात् द्विवचनम्, एकवचनमपि भवितुमर्हति । यथा पावकत्वाविशेषात् तीर्थोदकानलयोः इतरापेक्षा नास्ति, तद्वदस्याः सीताया अपि पावकत्वाविशेषेण तदपेक्षा नास्तीति स्फुटम् । किं च विनिगमनाविरहात् अनलस्य वा जलस्य वा सम्पर्कात् शुद्धिः किं न स्यादित्याशयः । ... अपि-प्रस्तुतार्थं वा । प्रतिवस्तूपमालङ्कारः, 'प्रतिवस्तूपमा सा स्यात् वाक्ययोर्गम्यसाम्ययोः । एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्' । इति लक्षणात् । स च प्रस्तुततीर्थोदकवह्निरूपानेक-पदार्थयोरेकधर्मसम्बन्धाभावरूपधर्मसम्बन्धात् तुल्ययोगिताङ्गीभूतः ।

(झ) देवीति । देवि देवतारूपे, महिषि इति वा । देवीशब्दस्य नाट्योक्तौ कृताभिषेका राजपत्नीति अर्थो लभ्यते । देवयजनसम्भवे देवा इज्यन्ते अस्मिन्निति देवयजनं यज्ञभूमि

कष्टं जनः कुलधनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशिवं नहि तत् क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्द्ध्नि स्थितिर्न चरणैरवताड़नानि ॥ १४ ॥

[१४ कुलधनैर्जनः अनुरञ्जनीयः कष्टं, तदयत् नः अशिवम् उक्तं, तत् क्षमं न हि । सुरभिणः कुसुमस्य मूर्ध्नि स्थितिर्नैसर्गिकी सिद्धा, चरणैरवताडनानि न, इत्यन्वयः]।

सम्भव उत्पत्तिस्थानं यस्याः सा, यद्वा देवयजनात् सम्भवो यस्याः सा, अथवा देवयजनेन यज्ञकर्मणा सम्भव जन्म यस्याः सा, तत्सम्बुद्धौ । प्रसीद प्रसन्ना भव, मर्षय मे दोषम् इति भावः । ते तव जीवितावधि जीवितं प्राणा अवधिः सीमा यस्य सः यावज्जीवमित्यर्थः । एष प्रवादः लोकापवादः निन्दा इति यावत् । अग्निपरीक्षाविषयकः प्रवादोऽयं यावज्जीवं स्थास्यति इति भावः ।

(१४) एवमपवादिनो जनाः कथं न दण्डिता इत्याशङ्क्य आत्मदोषमपसारयति—कष्ट-मिति । कुलधनैः कुलमेव धनं श्लाघ्यतया अनपवादनीयतया वा रक्षणीयं येषां तैः यद्वा कुलं धनं येषां तैः कुलक्रमागतरीतिरक्षणतत्परैः जनैः इति शेषः, जनः साधारणः प्रजावर्गः एव लोकः अनुरञ्जनीयः तोषणीयः, अथवा मिथ्याभूतमपवादं रटन्नपि जनः सन्तोषणीय इति कष्टं, दण्डदानस्यापि दण्डदानासामर्थ्यात् इति शेषः । यद्वा आपामरसाधारणजनसमूहस्यैव चित्तानु-वर्त्तनं विधेयम् इति कष्टसाध्यमेतत् कर्म । "कष्टो जनः" इति पाठः दृष्टोऽपि जनः सन्तोषयि-तव्य इति । "क्लिष्टो जनः कुलधनैरनुरञ्जनीयः" इति च क्वचित् पाठः । तत्र दःखितो जनः जनैः अनुरञ्जनीयः क्लेशं विज्ञाप्य तोषणीय इति । तत् तस्मात् कारणात् लोकानुरञ्जनार्थम् इत्यर्थः, नः आवयोः यत् अशुभम् अमङ्गलम् उक्तं वचनं, नपुंसके भावे क्तः प्रायश्चित्त-शब्दः त्वम् अत एव वत्से यदीष्टं गन्तव्यं व्रतं वा अग्निपरीक्षा देया इत्यादिरूपवाक्यं ते तव सम्बन्धे न हि क्षमं न योग्यं यद्वा नः आवयोः सीतारामयोः इत्यर्थः, सम्बन्धे 'अस्मदो द्वयोश्च' इति वित्वे बहुवचनम् । तत्सिद्धिः यत् एकाकिनी एतावन्तं कालं रक्षोभवनस्थिता जानकी कथं परीक्षां विना ग्राह्या स्यात् इति अशुभम् उक्तं लङ्कास्थदुष्टलोकैरिति शेषः । तत् तव सम्बन्धे सर्वथा अयोग्यं जगतः पवित्रत्वात् । अथवा नः आवयोः त्वदेकजीवितयो-स्तव निर्दोषतां च जानतो रामलक्ष्मणयोरित्यर्थः । यत् उक्तं "आवद्भ्यामपि पुनरपि विपदि" इत्युक्तमपवचनम्, 'रामस्य दयितो वाह्यश्चरणो मन्त्रिवर' इत्युक्तं, एवमपवचितं वचनमपि आवयोर्जानतो रामचन्द्रस्य चिन्तनमेव । तदयुक्तं न ते क्षममिति । एतदेव समर्थयन्नाह

सीता। भोदु, अज्जउत्त ! भोदु, एहि पेक्खह्म दाव दे चरिदं। (ञ) (इत्युत्थाय परिक्रम्य)।

[ञ। भवतु, आर्य्यपुत्र ! भवतु ; एहि प्रेक्षामहे तावत् ते चरितम्, इति छाया]।

लक्ष्मण। इदं तावदालेख्यम्। (ट)

सीता। (निर्वर्ण्य)। के एदे उवरि णिरन्तरट्ठिदा उवत्थुवन्ति विअ अज्जउत्तं ? (ठ)

[ठ। के एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्य्यपुत्रम् ? इति छाया]।

लक्ष्मण। देवि ! एतानि सरहस्यानि जृम्भकास्त्राणि, यानि भगवतः कृशाश्वात् कौशिकमृषिमुपसंक्रान्तानि, तेन च ताटकावधे प्रसादीकृतान्यार्य्यस्य। (ड)

दृष्टान्तयति—नैसर्गिकीति। सुरभिणः सुगन्धप्रधानस्य कुसुमस्य पुष्पस्य मूर्ध्नि शिरसि स्थितिः अवस्थानं नैसर्गिकी स्वाभाविकी सिद्धा लोके प्रसिद्धा, किन्तु चरणैः पादैः अवताडनानि अवमर्द्दनानि न सिद्धानीत्यर्थः। स्थापयति खलु लोको मूर्द्धनि पुष्पगुच्छम् इति भावः। सुरभिकुसुमवत् सर्व्वथा समादरणीया, न तु अवधीरणीया इति निर्गलितार्थः। अत्र सुरभिणः कुसुमस्य यथा पादावमर्द्दनमयुक्तं, तद्वल्लोकप्रतिष्ठायाः सीताया अपि दोषारोपः अयुक्त इति बिम्बप्रतिबिम्बभावेन सादृश्यप्रतीतेः दृष्टान्तालङ्कारः। कथितात् कुसुमस्य मूर्द्धावस्थितिरूपवस्तुनः अन्यस्य चरणावताडनस्य नैत्यादिशब्दतो अपीतरप्रत्ययात् प्राप्तौ परिसंख्यापि। वसन्ततिलका वृत्तम्, "वसन्ततिलका तभौ जो गौ" इति पिङ्गलोक्तलक्षणात्।

(ञ) भवतु इति। भवतु लोकापवादः यथा योऽयं प्रयातु इत्यर्थः। दैन्यार्थे द्विर्वचनम्, एतेन विनयभूषणायाः सीतायाः लोकानुवर्त्तनप्रयत्ने इच्छाविरहो व्यज्यते।

(ट) इदमिति। आलेख्यं चित्रम्। तावत् वाक्यालङ्कारे।

(ठ) के एते इति। निर्वर्ण्य अवलोक्य। उपरि निरन्तरस्थिताः, नास्ति अन्तरम् अवकाशः यस्मिन् कर्म्मणि तत् यथा स्यात् तथा, निरन्तरं निविड़ं स्थिता इति। अवकाशविशिष्टा इत्यर्थः। तेषां दिव्यास्त्रत्वादुपरि स्थितियुक्ता इति उपरिपदम्। उपस्तुवन्ति स्तुवन्ति आर्य्यपुत्रं रामचन्द्रम्।

(ड) देवीति। एतानि सरहस्यानि, रहस्यानि प्रयोगमन्त्रसंहारोपदेशकमन्त्रादयः, तैः सह वर्त्तमानानि जृम्भकास्त्राणि जृम्भकाख्यानि आयुधानि उद्दीपनास्त्राणि इत्यर्थः। यानि अस्त्राणि भगवतः कृशाश्वात् विश्वामित्रपितामहात् कौशिकं कुशिकस्य अपत्यं पुमान् ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यादिना अण्। विश्वामित्रम् ऋषिं मुनिम् उपसंक्रान्तानि आगतानि प्राप्तानि इत्यर्थः। उप-

राम. । वन्दस्व देवि ! दिव्यास्त्राणि । (ढ)

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि ।
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥१५॥

[१५ । ब्रह्मादयः पुराणाः गुरवः ब्रह्महिताय परःसहस्राः शरदः तपांसि तप्त्वा स्वान्येव तपोमयानि तेजांसि एतानि अपश्यन्, इत्यन्वयः]।

सीता । णमो णमो एदाणं । (ण)

[ण । नमो नम एतेषाम् ।]

स क्रान्ते ति कर्तृप्रत्ययेन स्वयमेव तानि कौशिकं प्राप्तानि इति लभ्यते। तेन विश्वामित्रस्य आर्जवस्य रामचन्द्रस्य इत्यर्थः, सम्बन्धमात्रविवक्षया षष्ठी । प्रसादीकृतानि प्रसाद्यते मम एभुःइति प्रसादानि स्वानुग्रहदानानि । अप्रसादमपि प्रसादानि कृतानीति अभूततद्भावे च्विः । अनुवाक्यमा वचानि ।

(ढ) वन्दस्वे ति । देवि द्युतिशालिनि । दिव्यास्त्राणि दिवि स्वर्गे भवानि तानि च अस्त्राणि आयुधानि चेति दिव्यास्त्राणि, वन्दस्व प्रणम ।

(१५) दिव्यत्वं प्रकाशहेतुमाह—ब्रह्मादय इति । ब्रह्मादयः ब्रह्मा आदिर्येषां ते चतुर्मुखप्रभृतयः पुराणाः प्राचीनाः गुरवः उपदेष्टारः तपोनिवर्तका इत्यर्थः, ब्रह्महिताय ब्रह्म देवः 'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापति'रित्यमरः । तस्य हिताय रक्षणाय । यद्वा ब्रह्म परमात्मा, प्रधानं च, तत्कार्यत्वात् जगत् ब्रह्मशब्देनोच्यते । तदुक्तं—'तादर्थ्यात्तदुपचारोऽस्ति क्वचित् कार्याभिधायकः । ब्रह्मशब्दो जगत्यस्मिन् कार्ये वेदो ब्रह्मेत्युच्यते ॥' इति तस्य हिताय तदपेक्षितेष्टानिष्टप्राप्तिपरिहारसाधनाय तपःफलभूतस्त्रकोपदेशेन राक्षसादिविरोधिनिरसनेन जगतः पुरुषार्थसाधननिर्वर्तनमभिप्रेत्येति भावः । परःसहस्राः सहस्रात् परा इति परःसहस्राः - सहस्रादधिकाः राजदन्तादित्वात् परनिपातः, परात् सहस्रस्य पारस्करादित्वात् । परःसहस्रमिति पाठे तु 'विभाषया सर्वेनामे सर्वाः सं'योग-सं'ख्ययोः' इत्यनुशासनात् एकत्वम् । शरदः संवत्सरान्, अत्यन्तसंयोगे द्वितीया । तपांसि तप्त्वा तपस्यां कृत्वा, सहस्रसंख्याधिकसंवत्सरेषु निरन्तरं तप्त्वेत्यर्थः । एतानि अस्त्राणि जृम्भकास्त्राणीत्यर्थः, स्वानि स्वकीयानि एव तपोमयानि तपसः समुद्भूतानि तपःस्वरूपाणि वा, विकारार्थे स्वरूपार्थे वा मयट् । तेजांसि अपश्यन् दृष्टवन्तः । अत्र अस्त्राणां तपोमयत्वेनाभेदाध्यवसायेऽपि तत्सम्बन्धप्रत्ययनादेव भवद्भाग्यवशात् विश्वामित्रद्वारैव प्राप्तिरिति ध्वनिः । इन्द्रवंशोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति तल्लक्षणम् ।

(ण) नम इति । 'चतुर्थ्याः षष्ठी'ति प्राकृतविशेषसूत्रात् 'एतेषाम्' इत्यत्र चतुर्थ्यर्थे षष्ठी । यद्वा सम्बन्धविवक्षया षष्ठी । "एदाणं" इत्यत्र 'एदेहिं' इति क्वचित् पाठः, तत्र एतेभ्य इति संस्कृतम्, नमः शब्दयोगे चतुर्थी च ।

राम। सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति। (ग)

सीता। अणुग्गहीदम्हि। (घ)

[छा। अनुगृहीतास्मि, इति छाया।]

लक्ष्म। एष मिथिलावृत्तान्तः। (ङ)

सीता। अम्महे! दलन्तणवणीलुप्पल-सामल-सिणिद्ध-मसिण-सोह-माण-मंसलदेहसोहग्गेण विम्हयत्थिमिदताद-दीसमाणसुन्दरसिरी अणादरखण्डिदसङ्करसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो। (च)

[छा। अहो। दलन्नवनीलोत्पलश्यामल-स्निग्ध-मसृण-शोभमान-मांसलदेहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसुन्दरश्रीः अनादरखण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आभिलिखित, इति छाया]।

(ग) सर्वथेति। इदानीम् अधुना मदधिगमजन्मकाले इति यावत्, सर्वथा सर्वप्रकारैः निषेधैः उपायैः हारैः च, सर्वशस्त्राणि जृम्भकास्त्राणि। त्वत्प्रसूतिं त्वदपत्यं, त्वत्पुत्रा-वित्यर्थः। 'दिष्ट्या गर्भं वहसि तदनु दिवसे' इति वक्ष्यमाणरीत्या यमजत्ववत्पुत्रत्वमपि निर्णीत-मिति गम्यते, अन्यथा स्त्रीप्रजात्वे जृम्भकास्त्रगमनमसङ्गतं स्यात्। उपस्थास्यन्ति उपस्थि-ताः भविष्यन्तीत्यर्थः। सकर्मकत्वात् पूजाद्यर्थाभावाच्च परस्मैपदम्।

(घ) अम्हीति। अनुगृहीतास्मि मम पुत्रस्य जृम्भकास्त्रलाभसम्भावनात्, इति भावः।

(ङ) एष इति। एष इत्यङ्गुलिनिर्देशः। मिथिलावृत्तान्तः मिथिलानगर्यां वृत्तान्तः घटनावली। हरधनुर्भङ्गसीताविवाहप्रभृतय अत्र अभिलिखिता इत्यर्थः।

(च) अहो इति। अम्महे इति शौरसेन्यां विस्मयसूचकमव्ययम्। दल-न्निति। दलत् विकसत् यत् नवनीलोत्पलम् ईषद्विकसितेन्दीवरं, तद्वत् श्यामलं श्यामवर्णं स्निग्धं चिक्कणं मसृणं चाकचिक्ययुक्तमित्यर्थः, अत एव शोभमानं सुन्दरं मांसलं उपचितं यत् देहं तस्य सौभाग्येन सौन्दर्येण च। विस्मय इति। विस्मयेन आश्चर्येण स्तिमितः निश्चलः तेन तातेन जनकेन दृश्यमाना सुन्दरी मनोज्ञा श्रीः शोभा यस्य सः। अनादर इति—अनादरेण अवज्ञया हेलया इत्यर्थः, खण्डितं भग्नं शङ्करस्य हरस्य शरासनं धनुर्येन सः। शिखण्डेति। शिखण्डेन काकपक्षेण मुग्धं सुन्दरं मुखमण्डलं वदनं यस्य सः। आर्य-पुत्रः रामचन्द्र इति यावत्, आलिखितः चित्रितः।

जन। आर्ये ! पश्य—

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।

गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

[१६। एष तव तातः जनकानां पुरोहितः गौतमः शतानन्दश्च सम्बन्धिनो वसिष्ठादीन् अर्चति, इत्यन्वयः।]

राम:। द्रष्टव्यमेतत् । (ग)

जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः ।

यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

[१७। जनकानां रघूणां च सम्बन्धः कस्य न प्रियः, यत्र कुशिकनन्दनः स्वयं दाता ग्रहीता च इत्यन्वयः]।

---

(१६) सम्बन्धिन इति। एष तव तातः राजर्षिर्जनकः, जनकानां जनकवंश्यानां पुरोहितः पुरोधाः गौतमः गोतमस्य अपत्यं पुमान्, अहल्यायां जातः पुत्रः शतानन्दश्च सम्बन्धिनः विवाहजन्यसम्बन्धवतः गौतमसम्बन्धेन सम्बन्धात् वा वसिष्ठादीन् वसिष्ठदशरथप्रभृतीन् अर्चति पूजयति सत्कृत्य उपचरतीति यावत्। यद्वा यथाक्रमं तव तातो जनकः सम्बन्धिनो दशरथप्रभृतीनर्चति, जनकवंशस्य तेषां पुरोहितो गौतमः शतानन्दश्च वसिष्ठादीन् अर्चति इत्यन्वयः। प्रस्तुतयोः शतानन्दजनकयोः एकधा एव अर्चनक्रियया सम्बन्धात् तुल्ययोगितालङ्कारः।

(ग) द्रष्टव्यमिति। द्रष्टव्यम् ईक्षितव्यम् एतत् विवाहचित्रमित्यर्थः, हेमारविन्दपरिमलन्यायादिति भावः।

(१७) जनकानामिति। जनकानां जनकस्य अपत्यानि पुमांसः जनकाः, तेषां जनकवंशीयानामित्यर्थः, तथा रघूणां रघोरपत्यानि पुमांसः रघवः, अपत्यस्य तद्राजसंज्ञकत्वात् अणो लुक्। तेषां रघुवंशोद्भवानां सम्बन्धः विवाहजन्यः कस्य जनस्य न प्रियः प्रीतिकरः, काम्यनीय इति यावत्, अपितु सर्वस्यैव इत्यर्थः। यत्र सम्बन्धे कुशिकनन्दनः विश्वामित्रः स्वयं दाता दानस्य कर्ता, ग्रहीता आदानकर्ता च। यस्मिन् सम्बन्धे उभयोरपि पक्षयोः वामादुहितृपक्षयोरध्यक्षः स्वयं महाप्रभावो विश्वामित्रः, एतादृशः सम्बन्धः सर्वेषामेव सन्तोषकर इति भावः। सम्प्रदानको विश्वामित्रः खलु ... कन्यादानमयोऽन्यथा ... इति दशरथं प्रति ... जनकं प्रति ... च ... म्। यथाहुः प्राचीनाः—परिणयद्वयोऽयं सम्बन्धो जनकदशरथयोः कौशल्यादेः ... अन्येषां अन्यानां मध्ये कस्यचिदपि नाप्रियः। तथापि जनकानां रघूणामिवैव ...

सीता । एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विवाहदीक्खिदा तुम्हे । अम्महे ! जाणामि, तस्सिं ज्जेव पदेसे तस्सिं ज्जेव काले वट्टामि । (प)

[प । एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम् । अहो । जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्त्ते, इति छाया] ।

धेष्वाम् जनकवंश्यान् प्रति चाप्रियत्वमिति लभ्यते । अत्र निमीनामित्यनुक्त्वा जनकानामिति पदोपादानेन 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति जनके प्रसिद्ध कर्मयोगयोग्यत्वमिव चाद्योत्यते । एव काकुत्स्थानामित्यनुक्त्वा रघूणामित्युक्त्या 'श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिव' इत्यादि कालिदासनिबन्धात् 'लक्षिपञ्चाङ्गलोपच' इत्यनुप्रासनेन च लभ्यते जानाति सर्वमिति व्युत्पत्त्या 'मनुरिक्ष्वाकवेऽब्रवीत्' इत्थं चाक्य रघुकुलस्याचारस्य ज्ञानयोगयोग्यत्व सूच्यते । तथाचान्यादृग्जनकविषये चातोऽप्यसम्बन्ध सम्बन्धिना नित्यमिमतो भवति । तत्र चौरप्रकंरावदन्योन्यसम्पर्करमणीयत्वानन्तर्पर्यीजनकविषयत्वे तु तस्य पैनारविन्दपरिमलन्यायेनातिशाय्यत्वमिति ताम् प्रत्यप्रियत्वमाह च । अत एव सीतारामौ प्रत्यपि नाप्रियत्व, यत्र दातेत्याविनापि जनकदशरथौ प्रत्यप्रियत्वं व्यावर्त्यते । तत्र दशरथं प्रत्यवाचितोपनतत्वाज्जनकं प्रति दुष्करधनुर्भङ्गप्रतिज्ञानिर्वहणकपरलोपकारकरणाच्च गुर्वनुज्ञाप्राप्तत्वात् महर्षिकारितत्वाच्च न सीतारामौ प्रति चाप्रियत्वम् । ब्रह्मर्षिणोक्तवेदादिमूलकमिमङ्गलाजनकविषयत्वोपप्रश्नव्याप्ति । अत एव जनान् प्रति चाप्रियत्व निरस्तम् । शिष्टानुगतस्य धर्मत्वे शिष्टकारिते तस्य कैमुतिकसिद्धत्वात् । तथाचापस्तम्बस्मृतिः—'यत्त्वार्याः क्रियमाणं तं प्रशंसन्ति स धर्मः' । इति । ब्रह्मर्षिविश्वामित्र इत्याद्युक्त्या कुशिकनन्दने इति पदोपादानं विश्वामित्र ब्रह्मर्षित्वमविस्मयस्य भूतपूर्वत्वा चाश्रित्य सीताया वत्सभावेन विवाहघटकः चाद्यीऽिति सूचयति । अत्र चार्थापत्तिरलङ्कारः, स च विरोधाभासर्संकटः ।

प) एते इत्यादि । एते दृश्यमाना यूयम्, खलु सम्भावनायाम् । तत्कालकृतगोदानमङ्गलाः तत्काले हरधनुर्भङ्गानन्तरसमये कृतम् अनुष्ठितम् मङ्गलम् इति शेष । गोदानमङ्गलं नाम केशाः दानमें क्रियन्ते यस्मिन् इति गोदानं गोदानमेव केशान्तारख्य चविवाशां दार्षिकवर्षे कर्त्तव्यः संस्कार एव मङ्गलं येषां ते तथोक्ताः । गोदानविधिर्हि विवाहात् प्राक् कर्त्तव्यः स चारविशेष, यथाह मनु—'केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे तु वैश्यस्य द्व्यधिके ततः ॥' गोदानविषये कालिदासः—'अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयद्गुरुः ।' इति । अथ पशूनां दानं निरस्तमिति चेत् ?

रामः । एवम् ।

समयः स वर्त्तत इवैष यत्र मां
समनन्दयत् सुमुखि गौतमार्पितः ।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः ॥ १८ ॥

[१८ । हे सुमुखि ! यत्र गौतमार्पितः आगृहीतकमनीयकङ्कणः तव अयं करः मूर्त्तिमान् महोत्सव इव मां समनन्दयत्, स एष समयः वर्त्तते इव, इत्यन्वयः] ।

लक्ष्मणः । इयमार्य्या, इयमप्यार्य्या माण्डवी, इयमपि वधूः श्रुतकीर्त्तिः । (क)

तत्र, 'वैवाह्यः पुनर्मोहनाख्यं कर्म' इति मिताक्षरावचनात् । चत्वारो भ्रातरः रामलक्ष्मण-भरतशत्रुघ्ना इति यावत् । विवाहदीक्षिताः विवाहे दीक्षिताः व्रताः । यहो । चित्रनिपुणता । यद् तस्मिन्नेव प्रदेशे चित्रितस्तारापत्या तस्मिन्नेव काले विवाहसमये वर्त्ते तिष्ठामि इति जानामि अनुभवामि चित्रचरितदर्शनादिति भावः । चित्रकौशलात् स समयः स देशश्च अधुना वर्त्तमान इव प्रतिभातीति कवितात्पर्यः ।

(१९) समय इति । हे सुमुखि ! सु शोभनं मनोरममिति यावत्, मुखं यस्याः सा, तत् सम्बुद्धौ । यत्र यस्मिन् काले विवाहसमय इत्यर्थः । गौतमार्पितः गौतमेन पुरोहितेन शतानन्देन अर्पितः प्रतिपादितः मम करोपरि स्थापित इत्यर्थः । आगृहीतकमनीयकङ्कणः आ सम्यक् गृहीतं धृतं परिहितमित्यर्थः, कमनीयं स्निग्धं सुन्दरमिति यावत् कङ्कणं वैवाहिकमङ्गलसूत्रं विवाहमङ्गलसूत्रमिति यावत्, येन सः, 'कङ्कणं करभूषायां सूत्रमण्डनयोरपि' इति मेदिनी । "कङ्कणं हस्तसूत्रं स्यात् भूषणं शेखरं तथा" इति च विश्वः । कङ्कणं करभूषणमिति अर्थो न रुचिरः, विवाहे मङ्गलसूत्रस्यैव अधिकवैशिष्ट्यात् । तव अयं गोचरीभूतः करः पाणिः मूर्त्तिमान् मूर्त्तिः विद्यते यस्य इति मतुप्, शरीरी महोत्सवः महान् उत्सवः महोत्सवः 'आन् महतः समानाधिकरणे' इत्यादिना आकारोऽन्तादेशः । आनन्दातिरेक इव मां समनन्दयत् समतोषयत् । स एव समयः कालः वर्त्तते एव अतीतोऽपि वर्त्तमान इव अनुभूयते चित्र-नैपुण्यात् इत्यर्थः । विवाहकाले आलालकरे कन्याकरग्रहणरूपा रीतिः वर्णिता । यतः मङ्गलवती मूर्त्तिमतो महोत्सवस्य करे तावन्मात्रकथनमात्रात् तस्मिन् अतीते समये वर्त्तमानतत्कालानन्दस्यैव इव समुद्भूतप्रतीतेः । अनुप्रेक्षावहारत्वम् उत्प्रेक्षावृत्तिः—"सजसा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात् ।

(क) इयमिति । सर्वत्र चक्षुषा निर्देशः । आर्य्या भवती । आर्य्या माण्डवीति

सीता । वच्छ ! इअं वि अवरा का ? (व)

[व । वत्स ! इयमप्यपरा का ? इति छा] ।

लक्ष्म । (सस्मितमपवार्य) । अये ऊर्मिलां पृच्छत्यार्या, भवत्व-न्यतः सञ्चारयामि (भ) । (प्रकाशम्) । आर्ये ! दृश्यतां द्रष्टव्यमेतत् । अयञ्च भगवान् भार्गवः (म) ।

सीता । (ससम्भ्रमम्) । कम्पिदम्हि (य) ।

[य । कम्पितास्मि, इति छा] ।

राम । ऋषे ! नमस्ते ।

लक्ष्म । आर्ये ! पश्य, अयमार्येण— । (इत्यर्धोक्ते) (र)

भरतभार्यात्वात् । अनयोस्तु ज्येष्ठभ्रातृभार्यात्वेन मातृवत् पूज्यत्वात् आर्यापदेन निर्देशः । इयमपि वधूरिति शत्रुघ्नभार्यात्वात् कनिष्ठत्वेन वधूपदम् । माण्डवी श्रुतकीर्तिश्च जनकानुजस्य कुशध्वजस्य दुहितरौ ।

(व) वत्सेति । [illegible] लाक्षणीम ऊर्मिलां परिचाययितुमक्षमं लक्ष्मणं कौतुकाय पृच्छति नर्मवचसा सीता 'वत्स इयमपरा के'ति ।

(भ) अन्यतः इत्यादि । [illegible] इति [illegible] इत्यर्थः, [illegible] कौतुकाय [illegible] इति ज्ञात्वेन च इत्यर्थः । [illegible] यथा तथा । अपवार्यमिति । [illegible] आहेति शेषः । [illegible] तदिह [illegible] मत' मिति दर्पणे । [illegible] इत्यर्थः, [illegible] आर्याया: दृष्टिं न [illegible] ।

(म) प्रकाशं—सुव्यक्तं, 'सर्वश्राव्यं प्रकाशं स्यात्' इति विश्वनाथः । द्रष्टव्यम् [illegible], [illegible] इति यावत् । भार्गवः भृगोरपत्यं पुमान् इति परशुराम इत्यर्थः ।

(य) ससम्भ्रममिति । सम्भ्रमः भीतिजनितत्वरा, तद्युक्तम् ।

(र) आर्ये इति । आर्येण रामेण अयं भार्गवः निर्जितः इति [illegible] । [illegible] एव [illegible] रामेण [illegible] । [illegible] इति [illegible], [illegible] रामः प्रतिषिद्धवान् इत्याशयः ।

राम। (साक्षेपम्।) वत्स! बहुतरं द्रष्टव्यमग्रतो दर्शय। (ल)

सीता। (सस्नेहबहुमानं निर्वर्ण्य।) सुट्ठु सोहसि अज्जउत्त। एदिणा विणअमाहप्पेण। (व)

[व। सुष्ठु शोभसे आर्य्यपुत्र। एतेन विनयमाहात्म्येन, इति संस्कृतम्]।

लक्ष्मण। एते वयमयोध्यां प्राप्ताः।

राम। (सास्रम्।) स्मरामि हन्त स्मरामि। (श)

जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥ १९॥

[१९। तातपादेषु जीवत्सु, नवे दारपरिग्रहे मातृभिः चिन्त्यमानानां नः ते दिवसाः गताः, इत्यन्वयः]।

(ल) साक्षेपमिति। आक्षेपेण वाक्यस्य अन्तरा भङ्गेन सह वर्त्तमानं यथा तथा, लक्ष्मणोक्तिं वारयित्वा इत्यर्थः। बहुतरं प्रभूतम्। अन्यत् अपरं किञ्चित् “सर्वविभक्तिभ्यस्तसिः” इति द्वितीयायां तसि। एतेन रामचन्द्रस्य विनयातिशय्यं प्रकटितम्।

(व) सस्नेह इत्यादि। स्नेहः प्रेम, बहुमानः आदरातिशयः, ताभ्यां सह वर्त्तमानं यथा तथा। निर्वर्ण्य दृष्ट्वा। विनयमाहात्म्येन विनयगौरवेण। भुवनैकवीरस्य त्रिजगुरोः पूज्यपादस्य परशुरामस्य पराजयप्रसङ्गं स्वकीयविजयव्यापारवर्णनं श्लाघाशङ्कया सहमानस्य रामचन्द्रस्य तच्चित्रपरिवर्ज्जनाभिलाषरूपमाहात्म्येन इत्यर्थः।

(श) स्मरामि इति। हन्त इति खेदार्थे अव्ययम्। स्मरामि तत्कालीनवृत्तान्तमिति शेषः। विषादे द्विरुक्तिः।

(१९) जीवत्सु इत्यादि। तातपादेषु पितृषु, पूजायां पादशब्दः, ‘उत्तमानां स्वरूपं तु पादशब्दे न भण्यते’ इति। गौरवे बहुवचनम्। जीवत्सु प्राणान् धारयत्सु ‘यस्य च भावेन—’ इति सप्तमी। नवे नूतने दारपरिग्रहे दाराणां स्वीकारे विवाहे कृते सतीत्यर्थः, मातृभिः कौशल्याप्रमुखाभिः चिन्त्यमानानां लाल्यमानानां रामभद्रोऽद्य भोक्ष्यते, भरतोऽद्य शयिष्यते इत्यादि व्यवस्थाप्यमानसमस्तविषयकाणां नः अस्माकं ते अनुभूतसुखबहुलाः दिवसाः गताः अतीताः हि निश्चितमेव। हन्त न ते पुनरावर्त्तिष्यन्ते इति भावः। ते इत्यत्र अनुभूतार्थविषयत्वात् यच्छब्दनिराकाङ्क्षः तच्छब्दः। उक्तञ्च मल्लिनाथेन—“तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दसापेक्षत्वम्—” प्रक्रान्तप्रसिद्धविषयकतच्छब्दो यच्छब्दोपादानं नापेक्षते इति फलितम्। अत्र दिवसा इत्यत्र उत्सवदिवसपरत्वादर्थान्तरसंक्रमितवाच्यो ध्वनिः।

इयमपि तदा जानकी । (घ)

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-

र्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम् ।

ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-

रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥ २० ॥

[२० । प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः दशनमुकुलैः मुग्धालोकं मुखं दधती शिशुः (इयं जानकी) ललितललितैः ज्योत्स्नाप्रायैः अकृत्रिमविभ्रमैः मधुरैः अङ्गकैः मे अम्बानां कुतूहलम् अकृत, इत्यन्वयः] ।

(घ) इयमिति । जानकीति प्रथमान्तपदं, 'प्रतनु' इत्यादिश्लोकस्थया अकृतेति क्रियया अन्वेति ।

(२०) प्रतनु इति । प्रतनुविरलैः प्रतनवः सूक्ष्माश्च ते विरलाः अनतिघनाश्च तैः, सूक्ष्मैरतिनिबिडैश्च शैशवकालिकत्वात् इति भावः । प्रान्तोन्मीलन्मनोहरकुन्तलैः प्रान्तयोः मुखस्य उभयोः अन्तयोः पार्श्वयोरित्यर्थः, उन्मीलन्तः स्फुरन्तः अत एव मनोहराः शोभनाश्च कुन्तलाः केशाः तैः, वक्षोपरि विलसच्चिकुरैरित्यर्थः । तथा दशनमुकुलैः दशनाः दन्ताः मुकुलानि कुड्मलानि इव तैः कुन्दकोरकतुल्यैर्द्विजैरित्यर्थः, मुग्धः सुन्दरः आलोकः दर्शनं यस्य तत् रम्यदर्शनमिति यावत्, मुखम् आननं दधती धारयन्ती । कृतीयान्तविशेषणद्वय मुग्धत्वं प्रति हेतुः । शिशुः बालिका इयं जानकी तदा शैशवे ललितललितैः सुन्दरप्रकारैः । "प्रकारे गुणवचनस्य" इति द्विर्भावः, कर्मधारयवदुत्तरेषु इति सुब्लोपः, यद्वा ललितात् कुसुमात् अपि ललितैः मनोहरैः । "ललितं कुसुमे रागे च विलासे मनोहरे ।" इति यादवः । अथवा ललितं नाम सुकुमारविधानेन च नेत्रादिक्रियाविशेषः —तथाचोक्तम् — 'सुकुमारतया विन्यासो ललितं परिकीर्तितम् ।' भावे क्तः । तेन ललितैः रुचिरैः । लड विलासे कर्तरि क्तः, कर्मणोपादित्वात् डस्य लत्वं वा इति भरतः । ज्योत्स्नाप्रायैः ज्योत्स्नायाः चन्द्रिकायाः तद्वत् आह्लादकस्य इत्यर्थः प्रायः प्राचुर्यं येषु तैः, प्रायशब्दः प्रचुरवाची अन्नप्रायो देश इतिवत् । यद्वा प्रायेण ज्योत्स्ना इति सुप्सुपेति समासः, कौमुदीसदृशैः । 'प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययो'रिति मेदिनी । अकृत्रिमविभ्रमैः अकृत्रिमाः स्वाभाविकाः विभ्रमाः विलासाः येषां तैः, निसर्गसुन्दरैरित्यर्थः, मधुरैः प्रियैः यद्वा 'अनुभवतोऽपि रम्यत्वं माधुर्यमिति कथ्यते' इत्यनेन अनलङ्कृतैरपीत्यर्थः, अङ्गकैः क्षुद्राङ्गैः, 'अल्पे' इति सूत्रेण कप्रत्ययः । मे मम अम्बानां जननीनां कौशल्याप्रभृतीनां कुतूहलं आनन्दं अकृत अजनयत् । सर्वदैव सीतायाः अत्र पुरस्थायित्वं न अन्यासां तासामिन्द्रियानन्दकत्वात्

लक्ष्म। एषा मन्थरा। (स)

राम.। (अनुत्तरमन्यतो दर्शयन्) (ह)। देवि! वैदेहि।

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः॥ २१॥

[२१। पुरा शृङ्गवेरपुरे स्निग्धेन निषादपतिना यत्र समागमः आसीत्, 'अयं सः इङ्गुदीपादप इत्यन्वयः']।

लक्ष्म। (विहस्य स्वगतम् (च)।) अये! मध्यमाम्बावृत्तान्तोऽन्तरित आर्य्येण। (क)

सीता। अम्मो! एसो जटासञ्जमणवुत्तन्तो। (ख)

[ख। अहो! एष जटासंयमनवृत्तान्तः. इति सम्]।

केवल अज्ञानामित्युपन्यसम्। मुखोपमा, तथा कुतूहलकरचरुपकार्य्ये प्रति प्रचुरकारण-निवेशात् समुच्चयश्चेति अङ्गाङ्गीभावेन सङ्करः। हरिणीवृत्तम्—'रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा' इति पिङ्गलोक्तलक्षणात्।

(स) एषा इति। मन्थरा कैकेय्याः प्रियपरिचारिका, रामवनवासप्रयोजिका।

(ह) अनुत्तरमिति। नास्ति उत्तरं यस्मिन् कर्म्मणि तद् यथा तथा, न किञ्चित् अपि उक्त्वा, अन्यतः चित्रवीथिकायाः अन्यमंशं दर्शयन्। अवलोकिते सति मन्थराचित्रे मध्यमाम्बायाः कैकेय्याः रामनिर्व्वासनार्थं वरप्रार्थनादिकां दुष्कीर्त्तिं सूचयन् कश्चित् समालोचयिष्यते इति शङ्कया तत् चित्रं चित्तसंदर्शं च इति यावत्। गुरुजनानुष्ठितस्य अन्याय्याचरणस्य समालोचनं न श्रवणीयमिति उदारहृदयस्य रामस्य आशयः इति फलितम्।

२१) इङ्गुदीति। पुरा वनप्रयाणकाले शृङ्गवेरपुरे गुहकनाम्नाऽऽख्यातदेशे स्निग्धेन वयस्येन निषादपतिना व्याधनायकेन गुहकेन सार्द्धं, यत्र यस्मिन् इङ्गुदीतले समागमः सम्मिलनं आसीत्, अयं सः पूर्वपरिचितः इङ्गुदीपादपः इङ्गुदीवृक्षः चित्रित इति शेषः।

(च) विहस्येति। रामेण कैकेयीवृत्तान्तस्य गोपितत्वात् इति भावः।

(क) अये इति। अन्तरितः प्रच्छादितः निह्नुत इति यावत्।

(ख) अम्मो इति। जटासंयमनवृत्तान्तः जटायोः संयमनं बन्धनं, तस्य वृत्तान्तः उदन्तः। जटाबन्धनघटनाचित्रमित्यर्थः।

राम। पुत्रसंक्रान्तलक्ष्मीकैर्यद्‌वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्य्येण पुण्यमारण्यकं व्रतम्॥ २२॥

[२२। पुत्रसंक्रान्तलक्ष्मीकैः वृद्धैः इक्ष्वाकुभिः यद्‌ धृतम्, आर्य्येण तत् पुण्यम् आरण्यकं व्रतं बाल्ये धृतम्, इत्यन्वयः]।

सीता। एसा पसण्णपुण्णसलिला भअवदी भाईरही। (ग)

[ग। एषा प्रसन्नपुण्यसलिला भगवती भागीरथी इति सम्]।

राम। देवि! रघुकुलदेवते! नमस्ते। (घ)

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात् प्लुष्टान् पुरा प्रपितामहान्।

२२। पुत्रेति। पुत्रसंक्रान्तलक्ष्मीकैः पुत्रेषु तनयेषु संक्रान्ता संश्रिता लक्ष्मीः श्रीः राजश्रीरिति यावत् येषां ते पुत्रेषु न्यस्तराज्यभारैः, वृद्धैः इक्ष्वाकुभिः वंशजैः इक्ष्वाकवंशीयैः तैः प्राचीनैः इक्ष्वाकुवंश्यैः यत् व्रतं वानप्रस्थरूपं धृतम् आचरितं, आर्य्येण भवता श्रीरामचन्द्रेण इति यावत्। तत् पुण्यं पवित्रम् आरण्यकं अरण्ये निवसन्ति ये ते आरण्यकाः, तेषाम् आरण्यकानाम् इदम् इति आरण्यकं 'तस्येद'मित्यण्। वनवासरूपं व्रतं नियमं बाल्ये मध्ये वयसि धृतम् अवलम्बितम्। अत्र पुत्रसंक्रान्तलक्ष्मीकैरित्यनेन पुत्रेष्वनुपभुक्तराज्यभारस्य संक्रान्तेति व्यत्ययेन यावच्छरीरयौवनमुपभुक्तराज्यवत्त्वम्, वृद्धैरित्यनेन वार्द्धके आरण्यकत्वं। एवं चैतेषां समुदितानां सत्त्वं एव पूर्वेषाम् आरण्यकव्रतधारणं न तु यत्किञ्चिदपूर्वम्। रामस्य तु एतेषां सर्वेषामभावेऽप्यारण्यकव्रतधारणम् बाल्ये इत्यनेन पुत्रसंक्रान्तोपभुक्तराज्यत्वशरीरयौवनवार्द्धक्याभावानां लाभात्। व्रतमित्यनेन अवश्यकर्तव्यत्वम्। व्रतस्य पुण्यत्वमभिधानात् पुण्यमिति विशेषणं प्रसिद्धत्यागद्योतकम्, यदि परन्तु इव पुण्यफलसाधनम्, इदं तु सकलभुवनभोगसाधनमिति। आर्य्येण इत्यनेन न यथाकथञ्चित् निबन्धनेत्याद्यभावात् अवलम्बितम्, अपितु महानुभावादिति सूच्यते। अत्र वानप्रस्थस्य कालविशेषावलम्बनं तस्य तु वर्त्तमानत्वात् असमये रामे तदौचित्ये तदाचरणप्रकाशनविधानात् अवश्यकर्त्तव्यतासूचनम्, तदुक्तं —'कार्यकारणयोर्भिन्नदेशताकालसङ्गतिः।' इति॥

(ग) एषा इति। प्रसन्नपुण्यसलिला प्रसन्नं स्वच्छं पुण्यं पवित्रं सलिलं जलं यस्याः सा। भगीरथी भगीरथेन आनीतत्वात् गङ्गाया भागीरथी इति नामान्तरम्।

(घ) देवीति। रघुकुलदेवते रघुकुलस्य देवता अधिष्ठात्री। सगरसुतानां समुद्धरणात् अस्याः रघुकुलदेवतात्वम्।

अगणिततनूपातं तप्त्वा तपांसि भगीरथो-
भगवति तव स्पृष्टानद्भिश्चिरादुददीधरत् ॥२१॥

[२१। हे भगवति! पुरा सगराध्वरं तुरगविचयव्याकुलान् उर्वीभिदः अमर्षात् कपिल-महसा प्लुष्टान् प्रपितामहान् भगीरथः अगणिततनूपातं तपांसि तप्त्वा तव अद्भिः स्पृष्टान् चिरात् उददीधरत्, इत्यन्वयः]।

(२१) रघुकुलं प्रति गङ्गाया अनुग्रहं विवृणोति—तुरग इति। हे भगवति ईश्वरि! पुरा पूर्वं सगराध्वरे सगर इति नाम्नः अश्वमेधपर्वप्रवर्तकस्य कस्यचित् नृपतेः अध्वरे अध्वानं राति, स्वर्गमार्गं ददाति इति अध्वरः तस्मिन्, यज्ञे आश्वमेधिके इति शेषः। तुरगविचयव्याकुलान् तुरस्य तुरं शीघ्रं गच्छति इति तुरगः, डप्रत्ययः, तस्य इन्द्रेणापहृतस्य आश्वमेधिकस्य अश्वस्य इति भावः, विचये अन्वेषणे व्याकुलान् व्याकुलान् उर्वीभिदः उर्वीं पृथिवीं भिन्दन्ति यज्ञीयाश्वार्थं खनन्ति ये ते भूतलविदारणकारिणः इत्यर्थः तान् पुत्रान् इत्यादिना क्विप्। अमर्षात् क्रोधात् 'अयमेव अश्वापहारकः' इत्यादिवाक्यैः तर्जितत्वात् इति शेषः, कपिलस्य आदिविदुषः महर्षेः महसा तेजसा प्लुष्टान् दग्धान्, प्लुषदाहे कर्मणि क्तः। प्रपितामहान् पितृपितामहसंज्ञकान् सगरपुत्रान् भगीरथः अगणिततनूपातं न गणितः न विचारितः तन्वाः शरीरस्य पातः यस्मिन् कर्मणि तत् यथा स्यात् तथा, देहनाशमप्यङ्गीकृत्य इत्यर्थः, तपांसि तप्त्वा तपसा त्वद्याचनायाः इति भावः, तव अद्भिः सलिलैः स्पृष्टान् परामृष्टान् चिरात् महता कालेन उददीधरत् उद्धारयति स्म, मोक्षं प्रापितवान् इत्यर्थः। उत्पूर्वात् धरतेर्णिचि लुङ्। अत्र च पौराणिकी कथा,—पुरा सगरो नाम सूर्यवंशीयः कोऽपि नृपतिः शताश्वमेधयज्ञमारेभे। शततमे च शताश्वमेधे इन्द्रः 'शताश्वमेधयाजी देवराजत्वं लभेत' इति मत्वा तमपहृत्य यज्ञीयाश्वं पाताले ध्यानस्तिमितलोचनस्य मुनिवर्यस्य कपिलस्य सन्निधौ स्थापयामास। ततः तदन्वेषणे नियुक्ताः षष्टिसहस्रसंख्यकाः सगरतनयाः अश्वखुरपदवीमनुसरन्तः पातालं प्रविष्टाः, मुनेः समीपे हयश्च दृष्टः। ततस्ते जातरोषाः 'दुरात्मायं अश्वापहारी' इति उच्चैः तर्जयन्तः अधावन्। तेनापि भगवता दैवतपरिवर्तितलोचनेन विलोकिताः, तच्छरीरसमुत्थेन अग्निना दह्यमानाः विनेशुस्ते सगरसुताः इति। विस्तरोऽस्य विष्णुपुराणे चतुर्थांशे द्रष्टव्यः। 'पुरा प्रपितामहान्' इत्यत्र 'पितृ-प्रपितामहान्' इति क्वचित् पाठो दृश्यते, नैतत् समीचीनतया प्रतिभाति। यतश्चोक्तं रामायणे—'सगरादसमञ्जस्तु असमञ्जादथांशुमान्। दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः॥' इति। एतेन सगरात्मजाः असमञ्जस्य भ्रातरः अंशुमतः पितृव्याः भगीरथस्य च प्रपितामहा भवन्ति, न तु तत्पितुः दिलीपस्य इति। प्रस्तुताङ्गया महती अस्मीभरिकामात्... अतिशयोक्तिः—अलंकारः। हरिणीवृत्तम्—लक्षणं तु प्रागेव उक्तम्।

सा त्वमम्ब ! सुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव (क)

अष्ट। एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम। (ख)

राम। (सस्पृहमवलोकयति)।

सीता। सुमरदि एदं पदेसं अज्जउत्तो ? (ग)

[ग। स्मरत्यं तं प्रदेशमार्यपुत्र ? इति सम]।

रामः। अयि कथं विस्मर्यते !

अलसलु [ल] लितमुग्धान्यध्वसञ्जा [म्य] तखेदात्
अशिथिलपरिरम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

[२४। यत्र त्वम् अध्वसञ्जातखेदात् अलसललितमुग्धानि अशिथिलपरिरम्भैः दत्त-संवाहनानि परिमृदितमृणालीदुर्बलानि अङ्गकानि मम उरसि कृत्वा निद्राम् अवाप्ता, इत्यन्वयः]।

(क) सा इति। हे अम्ब मातः। सा सूर्यकुलदेवता त्वं स्नुषायां पुत्रवध्वां सीतायामिति यावत्, अरुन्धतीव, यथा गुरुपत्नी अरुन्धती शुभानुध्यायिनी तद्वत् शिवानुध्यानपरा शिवस्य मङ्गलस्य 'श्वःश्रेयस शिवं भद्रं कल्याणं मङ्गलं शुभ'मित्यमरः। अनुध्यानं चिन्तनं, तदेव परं प्रधानं यस्याः सा मङ्गलचिन्तापरायणा भव इत्यर्थः। एतेन सीतानुगुणमीतत्साहनरूपं भेदो नाम सन्ध्यङ्गमुक्तम्, तदुक्तम्—'बीजानुगुणमीत्साहन भेदः।' इति ॥

(ख) एष इति। एषः चिन्तितः इत्यर्थः, भरद्वाजावेदितः भरद्वाजेन मुनिना आवेदितः परिचायितः चित्रकूटयायिनि चित्रकूटपर्वतगामिनि वर्त्मनि पथि कालिन्दीतटे यमुनातीरे वनस्पतिः अपुष्पस्सन् फलवान् वृक्षः, तदुक्तं—'अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः।' इति। पारस्करादित्वात् निपातनं सुट्। वटः न्यग्रोधवृक्ष इत्यर्थः। श्यामो नाम तथा प्रसिद्धिमान्।

(२४) तत्प्रदेशजातघटनाविवरणेन स्मृतत्वमात्मनः ज्ञापयति—अलसेति। यत्र यस्मिन् प्रदेशे त्वं अध्वसञ्जातखेदात् अध्वनि मार्गे सञ्जातः समुत्पन्नः त्वरितगमनेन इति शेषः, 'अध्वानो गमितानि बहूनी कुशकण्टकान्' इत्युक्तत्वात्। यः खेदः आयासः परिश्रम इति यावत्,

लक्ष्म। एष विन्ध्याटवीमुखे विराधसंवादः। (ञ)

सीता। अलं दाव एदिणा, पेक्खामि दाव अज्जउत्तहत्थधरिद-तालवेण्टादवत्तं अत्तणो दक्खिणारण्णप्पवेसारम्भं। (झ)

[झ। अलं तावदेतेन, प्रेक्षे तावदार्य्यपुत्रहस्तधृततालवृन्तातपत्रमात्मनो दक्षिणारण्य-प्रवेशारम्भम्, इति सं]।

तस्मात् हेतो अलसलुलितमुग्धानि अलसानि प्रसारणाकुञ्चनासमर्थानि लुलितानि शिथिली-भूतानि मुग्धानि सुन्दराणि अध्वक्लान्तमनोहराणि। अशिथिलपरिरम्भैः गाढालिङ्गनैः दत्तं सम्वाहनं श्रमापनोदनार्थं मर्द्दनं येषु तानि, अथवा येभ्यः इति चतुर्थीबहुव्रीहिः। सम्वाहनं नाम अध्वना गमनादिजनितायासशमनोपयिकहस्तादिस्पर्शविशेषः। परिरम्भैः, इति बहुवचनं आलिङ्गनाहृत्यभिप्रायकं, कामतन्त्रप्रसिद्धालिङ्गनभेदबाहुल्याभिप्रायकं वा। तथा परिमृदित-मृणालीदुर्बलानि परितः साकल्येन मृदिता निष्पीडिता या मृणाली विसलता सा इव तद्वत् इत्यर्थः, दुर्बलानि कार्य्याक्षमाणि स्वस्वधारणसामर्थ्यरहितानि इत्यर्थः, अङ्गकानि अवयवान् 'अनुकम्पायाम्' इति कन्प्रत्ययः। मम उरसि वक्षसि कृत्वा स्थापयित्वा निद्राम् अवाप्ता गता आसीरित्यर्थः, तत्प्रदेशः कथं विस्मर्य्यते इति योजना। अत्रायं भावः—पूर्वमध्वसंजात-खेदः, ततो ललितत्वसौकुमार्य्यद्विगुणीभावः, ततस्तद्दर्शनवशादशिथिलालिङ्गनबाहुल्यं, ततश्च तत्संवाहनता, ततः स्वस्वधारणसामर्थ्यविरहदौर्बल्यम्, ततो रामवक्षःस्थल एव लग्नता, तत-स्तदीयसौकुमार्य्यपारवश्यात् तत्रैव निद्राप्राप्तिरिति। मृणालीदुर्ब्बलानीत्यत्र समासगतलुप्तोपमा-लङ्कारः। मालिनीवृत्तम्,—'मालिनी नौ मयौ य्' लक्षणात्।

(ञ) एष इति। विन्ध्याटवीमुखे विन्ध्यपर्वतारण्यप्रारम्भे। विराधसंवादः* विराध-राक्षसहननम्। विराधसंरोध इति पाठे विराधराक्षसेन अस्मद्गमनबाधाप्रदानम्।

(झ) अलमिति। अलं निष्प्रयोजनमित्यर्थः। एतेन विराधराक्षसस्य हननप्रदर्शनेन प्रेक्षे वा पश्यामि अवलोकयामि तावत् आर्य्यपुत्रहस्तधृततालवृन्तातपत्रम् आर्य्यपुत्रेण स्वहस्तेन धृतं मम मस्तकोपरि स्थापितं यत् तालवृन्तं तदेव आतपत्रं छत्रं यस्मिन् तम्। दक्षिणारण्यप्रवेशारम्भं दक्षिणारण्ये यः प्रवेशः, तस्य आरम्भः मुखमित्यर्थः, तम्।

---

* "संबाधः, संरोधः" इति पाठभेदौ।

राम । एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि * तपोवनानि ।
येष्वातिथेयपरमाः शमिनो † भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

[२५ । गिरिनिर्झरिणीतटेषु वैखानसाश्रिततरूणि एतानि तानि तपोवनानि, येषु आतिथेयपरमाः नीवारमुष्टिपचनाः शमिनः गृहिणः गृहाणि भजन्ते, इत्यन्वयः]।

लव । अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम । (ज)

(२५) एतानीति । गिरिनिर्झरिणीतटेषु पार्वत्यनदीनां तटेषु तीरभूमिषु वैखानसाश्रिततरूणि वैखानसैः वनवासिमुनिविशेषैः 'वानप्रस्थो वैखानसोऽयव' इति त्रिकाण्डशेषः । आश्रिताः सेविताः आलम्बिताः तरवो वृक्षाः वृक्षमूलानि इत्यर्थः, येषु तानि, तपोवनानि विपिनानि इति शेषः । येषु तपोवनेषु आतिथेयपरमाः अतिथये साधु आतिथेयम् अतिथिसत्कार इत्यर्थः, तदेव परमं प्रधानं कर्म इति शेषः, येषां ते, यद्वा आतिथेयेषु अतिथिसत्कारकर्मेषु परमाः श्रेष्ठा इति । नीवारमुष्टिपचनाः नीवाराणां तृणधान्यानां मुष्टेः पचनं येषां ते, यद्वा नीवारमुष्टेः पचनं पाको येषां ते, अथवा नीवारमुष्टिं मुष्टिपरिमितमुनिधान्यतण्डुलं पचन्ति ये ते, 'नीवारः मुनिधान्यं स्यात्' इत्यमरः । अनायासलब्धवन्यधान्यादिभिः शरीरस्थितिं कुर्वन्तः स्वल्पाहारा इत्यर्थः । शमिनः इन्द्रियनिग्रहशालिनः गृहिणः गृहस्थाः गृहाणि पर्णशालाः भजन्ते आश्रयन्ति । यद्वा शमिन इति द्वितीयान्तम् । आतिथेयप्रवणाः जनाः शमिनः यतीन् भजन्ते सेवन्ते । अथवा आतिथेयपरमाः आतिथ्यापेक्षया शमिनः गृहिणः गृहस्थस्य गृहाणि भजन्ते तत्र निवसन्ति । वसन्ततिलकावृत्तम् ।

(ज) अयमित्यादि । अयमित्यङ्गुल्या निर्देशः । अविरलाः निबिडसन्निवेशाः घना इति यावत्, ये अनोकहाः अनसः शकटस्य अगं गतिं घ्नन्ति इति तथा, 'अनोकहः कुटः सालः' इत्यमरः । तेषां निवहेन समूहेन निरन्तरं निरवकाशं स्निग्धं मसृणं शीतलं इति यावत्,

* वैखानसाश्रमतरूणि इति पाठभेदः ।

† यमिनः इति क्वचित् पाठः ।

राम । स्मरसि सुतनु तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि ।
स्मरसि सुरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्त्तनानि ॥ २६ ॥

[२६ । हे सुतनु ! तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्य्यासुस्थयोः (आवयोः) तानि अहानि स्मरसि ? तत्र सुरसनीरां गोदावरीं वा स्मरसि ? तदुपान्तेषु आवयोः वर्त्तनानि स्मरसि च ? इत्यन्वयः]

अपि च, किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ।

नील श्यामल परिसर पर्य्यन्तभागो यस्य तत तथोक्त यत् अरण्य वन तत्र परिणद्धा परिवाहिता या गोदावरी तदाख्या नदी तया तस्यास्तरङ्गाघातशब्दादनत्यर्थ मुखरा शब्दायमाना कन्दरा गुहा यस्य स तथोक्तः सन्तत अनवरतम् आभिष्यन्दमाने वर्षति, यद्वा मुहुरुपचय व्रजति मेदुरे पयोधरे मेघे मन्दिरित स्निग्धीकृत यद्वा सान्द्रीकृत नीलिमा श्यामलत्व यस्य स तथोक्त पर्वतानां स्वतोऽपि नीलत्वान्मन्दिरित इत्युक्तम् जनस्थानमध्यग जनस्थानस्य तदाख्यस्य महारण्यस्य खरालयस्य इति यावत् मध्य मध्यभाग गच्छतीति, जनस्थानमध्यवर्त्ती प्रस्रवणो नाम गिरि पर्वत, अत्र चित्रित इत्यर्थः ।

(२६) स्मरसीति । सुतनु सु शोभना तनुरङ्गयष्टि यस्याः सा तस्याः सम्बुद्धौ हे शोभनाङ्गि ! तस्मिन् पर्वते प्रस्रवणगिरौ इति यावत् लक्ष्मणेन प्रतिविहिता कृता या सपर्य्या पूजा सेवा इत्यर्थ तया सुस्थयोः सुखेन अवस्थितयो आवयो तानि अहानि दिनानि स्मरसि किम ? तत्र गिरिसन्निधौ सुरसनीरां सुरसं सुस्वादु नीर जल यस्या सा सुमधुरसलिलाम् अनेन समुद्रसङ्गमसमीपस्थजलस्य व्यावर्त्तनं सरसनीरामिति पाठे सरस नीरं सजलं तीरं तट यस्या सा तां गोदावरीं गां स्वर्ग स्नानात् ददाति प्रापयति इति यद्वा गाम् अम्बु ददातीति गोदा नद्यस्तासु वरी श्रेष्ठा इति । तन्नाम्नीं प्रसिद्धां नदीं वा स्मरसि किम् । तथा तदुपान्तेषु तस्या गोदावर्य्या उपान्तेषु पर्य्यन्तभागेषु आवयो वर्त्तनानि अवस्थानानि, यद्वा स्वच्छन्दसञ्चारान् च स्मरसि किम् । अत्र प्राथमिकत्वादप्राप्यत्वाच्च प्रथम तान्यहानीति दिनस्योक्तिः आनन्त्याद्‌दुरुहत्वाच्च आवयोर्वर्त्तनानि इत्यस्यानन्तरोक्तिः, तदुभयोपकारित्वात् गोदावर्य्या मध्ये निवेशित धर्म्म

अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

[२७ । आसत्तियोगात् अविरलितकपोल मन्द मन्दम् अक्रमेण किमपि किमपि जल्पतो अशिथिलपरिरम्भव्यापृतैकैकदोष्णो (आवयो) अविदितगतयामा रात्रि एव व्यरंसीत्, इत्यन्वय]।

अत्र अरंसीदित्येकपदस्यैव पुन पुन सन्निवेशनात् अनवीकृतत्वदोष । मालिनीवृत्तम्— 'ननमयययुतेयं मालिनी भोगिलोकै' इति लक्षणात् ।

(२७) किमपीति । आसत्ति सन्निधान तस्य योग न वशात सन्निधिवशादित्यर्थ । आसक्तियोगादिति क्वचित् पाठ । तत्र आसक्तिरत्यभिनिवेशा विषयानुभूत्यनवस्थानलक्षणा तस्य योगात् सम्बन्धाद्धेतो इत्यर्थ । अविरलितकपोलम् अविरलित निरन्तरीकृत कपोल येन यस्मिन् कर्मणि तत् यथा स्यात् तथा परस्परमिलितगण्डमिति यावत्, मन्द मन्दम् अनुच्चाक्षरम् अतिनीचै इत्यर्थ, वीप्साया द्विरुक्ति । अक्रमेण क्रम विना कदाचिदेतत् कदाचिदन्यत् पर्यायराहित्येन इति भाव । प्रकृत्यादिभ्यस्तृतीया । किमपि नानारहस्य मित्यर्थ, इदं च गुप्तकथनमिति प्राञ्च । जल्पतो आलपतो तथा अशिथिलपरिरम्भव्यापृतैकैकदोष्णो अशिथिल गाढ य परिरम्भ आलिङ्गन तत्र व्यापृत निरत एक दो बाहु ययो सीतारामयो इत्यर्थ । जनकजाया एक बाहु रामचन्द्रस्य परिरम्भ आसक्त, रामस्यापि एक बाहु सीतालिङ्गने निरत आसीदित्यर्थ । व्यापृतैकैकदोष्णो इत्यस्य व्यापृतैकैकदोषो इति पाठिक रूपम । आवयो मम पत्न्या । अविदितगतयामा अविदितम् अज्ञात यथा तथा गता अतीता यामा प्रहरा यस्या सा तथाभूतैव रात्रि रजनी व्यरंसीत् विरराम प्रभाता आसीदित्यर्थ । 'व्याङ्परिभ्यो रम' इति परस्मैपदम् । रात्रिरेव इत्यत्र एवकार अन्ययोगं वारयति । सुखमानन्दनिमग्नाना सुदीर्घकालोऽपि निमेषवत् गच्छति इति भाव ।

रात्रिरेव व्यरंसीत् न तु आलाप इति विशेषार्थंद्योतकाविधायक कथितात् रात्रिविरामात् अनवरत आलापविरामस्य पर्यन्ते [illegible] परिसङ्ख्यामधिकचमत्काराय दर्शित । अत्र यथावद्वस्तुवर्णनात् स्वभावोक्तिरलङ्कारश्चेति मतम । मालिनीवृत्तम । अत्र अविदित गतिर्येषां यया वा अनुक्ता अविदितगतयामेति यामपदस्य द्वाविंशति अतिमधुरमि रजन्यास्तथा सुरतसूचनात् "रमयति रमणीया पश्चिमे यामयाम" इति नियमाविष्कृत परिमोल्य सीताया प्रतिपादनं । रतिमन्याभीष्टिकामन्दमयन्याश तदानीमनयामामानविदितगतत्वमिति निपुणधिय ।

लक्ष्म । एषा पञ्चवट्यां शूर्पणखा ।

सीता । हा अज्जउत्त ! एत्तिअं ज्जेव दंसणं ।(ट)

[ट । हा आर्य्यपुत्र ! एतावदेव दर्शनम्, इति सम]।

राम । अयि विप्रयोगत्रस्ते ! चित्रमेतत् । (ठ)

सीता । जहा तहा होदु, दुज्जणो असुहं उप्पादेइ । (ड)

[ड । यथा तथा भवतु, दुर्जनोऽसुखमुत्पादयति इति सम्]।

राम । हन्त वर्त्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति । (ढ)

लक्ष्म । अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा चालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्य्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ २८ ॥

[२८ । अथ पापैः रक्षोभिः कनकहरिणच्छद्मविधिना इदं तथा वृत्तं, यथा चालितमपि व्यथयति । शून्ये जनस्थाने विकलकरणैः, आर्य्यचरितैः, ग्रावा अपि रोदिति वज्रस्य अपि हृदयं दलति, इत्यन्वयः]।

(ट) हा इति । हा खेदे । एतावदेव एतत्कालपर्यन्तमेव दर्शनं तवेति शेषः । चित्रनैपुण्यात् अतीतोऽपि शूर्पणखावृत्तान्तः वर्त्तमान इव सीतासविधे प्रतिभाति । शूर्पणखादर्शनानन्तरमेव सीता अपहृता आसीत् इति चित्रत्वं विस्मृत्य यथार्थैव घटना इति मन्यमानायाः सीतायाः भीतिविह्वलोक्तिरियम् ।

(ठ) अयीति । विप्रयोगत्रस्ते विप्रयोगात् वियोगात् त्रस्ता भीता तत्सम्बुद्धौ, 'पञ्चमी' इति योगविभागात् समासः । अयि विरहभीरु इति । एतत् चित्रं, न तु वास्तविकविषयः; नैव परमार्थतः शूर्पणखा, अतः शङ्का न कर्त्तव्या ।

(ड) यथेति । यथा तथा भवतु चित्रं प्रकृतमप्रकृतं वा इति भावः । दुर्जनः चित्रस्थोऽपि इति शेषः असुखम् अमङ्गलम् उत्पादयति जनयति ।

(ढ) हन्त इति । हन्त इति विषादसूचकमव्ययम् । वर्त्तमान इव अतीतोऽपि इति शेषः । मे मम जनस्थानवृत्तान्तः जनस्थानस्य घटनासमूहः ।

सीता (सास्रम् [स-अस्रम्]) अज्ज देव ! रहुउलाणन्द ! एव्वं वि मम कारणादो किलिन्ता आसी । * (ग)

[ग । आर्य्य देव रघुकुलानन्द एवमपि मम कारणात् क्लान्त आसीः, इति शम् ।]

ल (रामं निर्वर्ण्य साकूतम् ।) आर्य्य ! किमेतत् । (त)

अयन्ते बाष्पौघस्त्रुटित इव मुक्तामणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति चिरमाध्मातहृदयः † ॥ २९ ॥

[२९ । अयं ते बाष्पौघः त्रुटितः मुक्तामणिसर इव धाराभिः विसर्पन् जर्जरकणः धरणीं लुठति । चिरमाध्मातहृदयस्य आवेगः निरुद्धः अपि स्फुरदधरनासापुटतया परेषाम् उन्नेयः भवति च इत्यन्वयः ।]

(२८) अलङ्कृतमिति । अथ अनन्तरं गणनाविधानानन्तरं इत्यर्थः । पापे दुराचारे वर्त्तासि मायाचारादिभिः राक्षसं कनककुरङ्ग कनकच्छद्मसाधनः कनकाङ्गः स्मृतः सुवर्णरचित इत्यर्थः, ... सुवर्णमृगः मायामृगः इति यावत् स एव छद्म यद्वा तस्य यत् छद्म छलं तस्य विधिना अनुष्ठानेन सुवर्णमृगरूपेण मारीचेन वञ्चयित्वा इति यावत् । हृतः सीताहरणमित्यर्थः, तथा तत्र परिणते यथा शालिनमपि सम्यक् प्राणिकं मन्ये सन्तापविषवेधेन इति शेषः । व्यथयति कारणात् दुःखं जनयति तत्र हृदयस्य निर्गत मात्राणां इति वा । मनस्थान विकल करणे विकलानि छिन्नानि स्वस्वव्यापारशून्यानि इति यावत् करणानि इन्द्रियाणि यस्य ते आस्यवर्त्ति ग्रावा शिला अपि का कथा अन्यस्य इति अपिशब्दार्थः । रोदितीति अश्रु मुञ्चति । वज्रस्य कुलिशस्य अति कठिनस्येति भावः । अपि हृदयं मध्यप्रदेशं दलति विदीर्य्यत एव । अत्र ग्रावापि रोदिति वज्रमपि दलति इत्यपिशब्दाभ्यां तदपेक्षया मृदुवस्तुनो रोदनदलनयोरनुषङ्गत एव प्रत्ययात् अर्थापत्तिः । ग्राविण रोदनस्य वज्रे च दलनस्य सम्भावनाया प्रतीयमानत्वात् भावाभिमानिक्रियात्मकः । शालिनमपि व्यथयति इत्यत्र शालनप्रयोऽप्यव्यथाभावविवक्षस्य व्यथाकृत्प्रकाश्यस्य शालनरूपप्रयोगकमस्यापि निबन्धनात् विशेषोक्तिभेद इति निपुणाः । शिखरिणीवृत्तम्—'शिखरिणी यमौ नसौ भलौ ।' इति लक्षणात् ।

(ग) अद्येति । कारणात् निमित्तात् क्लान्त क्लिष्ट आसी त्वमिति शेषः ।

(त) राममिति । निवर्ण्य अवलोक्य । साकूतम् आकूतेन अभिप्रायेण सह वर्त्तमानं यथा तथा, कथमधुनापि रामनयनं अश्रुधारा इति आशङ्कया सह इत्यर्थः ।

(२९) अयमिति अयं दृश्यमानः ते तव बाष्पौघः अश्रुप्रवाहः त्रुटितच्छिन्नसूत्र मुक्तामणिसरः मुक्तामयहार इव धाराभिः अविच्छिन्नपातैः विसर्पन् बहिर्गच्छन् जर्जराः भूमी

* कलिन्तासि, किलिन्तासि किलम्मिदासि इति पाठभेदाः ।
† आवेगः च चिरमाध्मातहृदय इति पाठान्तरम् ।

राम । वत्स !

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विषोढ़ः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो-
हृन्मर्म्मव्रण इव वेदनां करोति § ॥ ३० ॥

[३० । प्रियजनविप्रयोगजन्मा तीव्र अपि दुःखाग्निः तत्काले प्रतिकृतिवाञ्छया विषोढः, मनसि पुनः विपच्यमानः हृन्मर्म्मव्रण इव वेदनां करोति इत्यन्वयः ।]

सीता । हद्दी हद्दी, अहं वि अदिभूमिं गदेण रणरणएण अज्ज-उत्तसुण्णं विअ अत्ताणं पेक्खामि । (थ)

[थ । हा धिक् हा धिक्, अहमपि अतिभूमिं गतेन रणरणकेन आर्य्यपुत्रशून्यमिवात्मानं प्रेक्षे, इति मम]

पतनेन चुटच्चुटाग्रतया विभक्ता कणा बिन्दवो यस्य स तादृशः सन् धरणौ भूतले लुठति उपश्लिष्यति । विरसेन विरागेण अप्रियत्वेन दुःखजनकेन यावत्, आध्मात परिपूरित हृदय चित्तं यस्य स तथोक्त आवेग. शोकप्रसर निरुद्धोऽपि नियन्त्रितोऽपि हृदयमध्ये आवद्धोऽपि स्फुरन् स्पन्दमान अधरयो. नासायाश्च पुटे यस्य स तथोक्त तस्य भाव स्फुरदधरनासापुटता तया, अधरनासापुटयो , स्फुरणदर्शनेन इत्यर्थ , तथा परेषा कर्त्तरि षष्ठी । अन्यैर्वा उन्नेयः अनुमेयो बोधयोग्यो भवति इत्यर्थः । अत्र प्रथमार्द्धे वाष्पौघ त्रुटितमुक्तामणिसरस्य इवशब्देन सादृश्यप्रत्यायनात् वाच्योपमालङ्कार, द्वितीयार्द्धे च निरुद्धोऽपि उन्नेय इति भागेन निरुद्धत्वोन्नेयत्वयोर्व्विरोधात् अतिशयेन च तत्खण्डनात् ज्ञानेन विरोधाभासेन विच्छित्ति-विशेषजननात् स्फुरदधरनासापुटतारूपसाधनेन आवेगस्य अनुमित्यात्मकज्ञानबोधनात अनुमानालङ्कार । 'अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ।' इति लक्षणम् । शिखरिणीवृत्तम् ।

(३०) तत्कालमिति । प्रियजनस्य प्रियजनेन वा विप्रयोगात विरहात् जन्म यस्य स तथोक्त. सीतारूपप्रियजनविरहजनित इत्यर्थ. । तीव्रोऽपि दु.सहः अपीत्यर्थः, प्रति-कृतिवाञ्छया प्रतिकारेच्छया तत्काल सीताहरणात् परस्मिन् काल इत्यर्थः, विषोढः सह्यः कृतः मनसि चेतसि पुनर्विपच्यमानः पुन. पुन स्मरणेन विपाक गच्छन् चित्रदर्शनात् पुनरभ्युद्दीप्तः इति यावत्, दुःखाग्नि हृन्मर्म्मव्रण इव वक्षसो मध्यगतस्फोटक इव वेदनां यातनां करोति उत्पादयति । अत्र दु.खे अग्नित्वारोपात् रूपकम्, दुःखाग्नेश्च वेदनाकारित्वसाधर्म्येण च हृन्मर्म्मव्रणेन सह सादृश्यस्य इवशब्देन प्रत्ययात् पूर्णोपमालङ्कारश्च । प्रहर्षिणीवृत्तम् ।

(थ) हा इति । हाधिगित्येकमेव विषादसूचकमव्ययं, तस्यातिशयार्थे द्विर्वचनं । अतिभूमिं चौत्कट्यं गतेन अत्यारूढेन इत्यर्थः । रणरणकेन उद्वेगेन ।

---

§ तनोति इति पाठान्तरम् ।

लक्ष्म। (स्वगतम्) भवतु, अन्यतः क्षिपामि। (चित्रं विलोक्य प्रकाशम्) अथैतन्मन्वन्तरपुराणस्य गृध्रराजस्य तत्रभवतस्तातजटायुषश्चरित्रविक्रमोदाहरणम्। (द)

सीता। हा ताद! णिव्वूढो दे अवच्चसिणेहो। (ध)

[ध। हा तात! निर्व्यूढस्तेऽपत्यस्नेहः, इति छाया]।

राम। हा तात काश्यप शकुन्तराज! क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः?। (न)

(द) भवतु इति। भवतु स्वगतमात्राद्याचक्षदयमनेन समाप्तं भवतु इत्यर्थः। एतच्चित्रदर्शनेन तत्तद्घटनास्मरणादनयोः सीतारामयोः अत्यन्तव्याकुलत्वादिति भावः। अन्यतः अन्यघटनायामिव क्षिपामि सञ्चारयामि, मनसी विषयान्तरसञ्चारणेन पूर्वोक्तं विस्मारयामि इत्यर्थः। अथेति व्यापारान्तरचित्रदर्शनारम्भ। मन्वन्तरपुराणस्य मन्वन्तरं व्याप्य पुराणः तस्य, अत्यन्तसंयोगे इति द्वितीयासमासः। यद्वा मन्वन्तर इव पुराणः तस्य, उपमानानि सामान्यवचनैरिति समासः। अथवा अन्यः मनुः मन्वन्तरं, मयूरव्यंसकादित्वात् समासः। तस्मात् मन्वन्तरादपि पुराणः, सह सुपेति समासः। तस्य मन्वन्तरप्राचीनस्य। मन्वन्तराणि च पुराणेषु चतुर्दश इति परिगण्यन्ते। एकस्मिन् कल्पे स्वायम्भुवाद्याश्चतुर्दश मनवः पर्यायेण सृष्टिपालनादावधिकृताः। तन्मध्ये वैवस्वतमनोरधिकारे प्राप्ते, अतीतोपक्रमे जटायुष उत्पत्तिमभिलक्ष्य मन्वन्तरपुराणस्य गृध्रराजस्येत्युक्तम्। 'दैवपरिमाणैकसप्ततियुगपरिमितकालवर्तिन इति कश्चित्। मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः।' इति कोषवचनात्। गृध्रराजस्य पक्षिराजस्य तातस्य, पितृमित्रत्वात्तातपदव्यपदेशः। जटायुषश्चरित्रं निःस्वार्थभावेन सीतारक्षणोद्यमादि परोपकारादिकं, विक्रमं रावणेन सह युद्धोपयोगिसामर्थ्यं तयोरुदाहरणं निदर्शनं तस्य चित्रसदृशचित्रलक्षणमित्यर्थः।

(ध) हा इति अपत्यस्नेहः सन्तानवात्सल्यं निर्व्यूढः सम्पन्नो जातः, सन्तानस्थानीया मम रक्षार्थं प्राणत्यागादिति भावः।

(न) हा इति। तात पितृसखत्वात् पितः! काश्यप! कश्यपप्रजापतिपौत्र! कश्यपस्य विनतायां कश्यपस्य द्वौ पुत्रौ बभूवतुः अरुणो गरुडश्च, तयोरग्रजस्यापि द्वौ पुत्रौ सम्पातिजटायुष इति। शकुन्तराज पक्षिराज! क्व कुत्र पुनः तादृशस्य तथाविधस्य तीर्थस्य विद्योपदेशोपकारादिगुणयुक्तपात्रस्य गङ्गादितीर्थवत् पावनस्येति वा साधोः धार्मिकस्य सम्भवः उत्पत्तिः। न कुत्रापीत्यर्थः।

लक्ष्म । अयमसौ जनस्थानपश्चिमतः* चित्रकुञ्जवान् नाम दनुकबन्धाध्युषितो दण्डकारण्यभूभागः, तदिदमृष्यमूकपर्व्वते मतङ्गस्याश्रमपदं, इयञ्च श्रमणा नाम सिद्धशबरी, तदेतत् पम्पाभिधानं सरः ।(प)

सीता । जत्थ किल अज्जउत्तेण विच्छड्डिदामरिसधीरत्तणं † पमुक्तकण्ठं रुदिदं आसी । (फ)

[फ । यत्र किलार्य्यपुत्रेण विच्छर्दितामर्षधीरत्वं प्रमुक्तकण्ठं रुदितमासीत् इति शेषः]।

राम । देवि ! रमणीयमेतत् पम्पासरः । (ब)

एतस्मिन् मदकलमल्लिका[भ]क्षपक्ष-

व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।

वाष्पाम्भःपरिपतनोद्गमान्तराले

संदृष्टाः कुवलयिनो भुवो विभागाः ॥ २१ ॥

[२१ एतस्मिन् मदकलमल्लिका[भ]क्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः कुवलयिनः भुवः विभागाः वाष्पाम्भःपरिपतनोद्गमान्तराले संदृष्टाः (मया) इत्यन्वयः ।]

(प) अयमिति । अयमसौ पुरा निर्दिष्टः पश्चिमः । चित्रं विचित्रं मनोरममिति यावत्, कुञ्जं लताद्याच्छादितस्थानमस्यास्तीति चित्रकुञ्जवान् । दनुकबन्धेन दनुनामकः कबन्ध इति दनुकबन्धः दनुनामकः कबन्धः मूर्द्धहीन उदरस्थितवदनः राक्षस इति । 'कबन्धः स्त्री क्रियायुक्तमपमूर्द्ध कलेवरम् ।' इति अभिधानम् । मतङ्गस्य तदाख्यस्य मुनेः आश्रमपदं तपोवनम् । श्रमयति तपस्यायासेन या सा श्रमणा । सिद्धशबरी तपःसिद्धा काचन शबरजातीया रमणी पम्पा इति नाम अभिधानं नाम यस्य तत् सरः दीर्घिका ।

(फ) यत्रेति । यत्र पम्पासरसि । विच्छर्द्दितः त्यक्तः अमर्षः क्रोधः येन तत् अमर्षविच्छर्दितं सह शोकसाम्राज्येन प्रयुक्तमित्यर्थः । प्रमुक्तकण्ठं अनिरुद्धं यावदर्थाभिव्यक्तिं ... तावद् वहिर्गतमित्यर्थः । कण्ठस्वरः यस्मिन् तत् उच्चैः स्वरमित्यर्थः ।

(ब) देवीति । रमणीय चित्ताकर्षकम् ।

(२१) एतस्मिन्निति । एतस्मिन् पम्पासरसि मदकला मदमत्ता ये मल्लिकाक्षाः पक्षिविशेषाः तेषां पक्षैः व्याधूतानि कम्पितानि स्फुरन्ति प्रकाशमानानि उरुदण्डानि दीर्घनालानि येषां तथाभूतानि पुण्डरीकाणि पद्मानि येषु ते तथोक्ताः कुवलयिनः कुवलयानि इन्दीवराणि सन्ति येषु ते उत्पलविशिष्टाः भुवः विभागाः भूप्रदेशाः पम्पायाः अवयवाः इत्यर्थः ।

---

* जनस्य तत्र यत्र इति क्वापि पाठः । † विच्छर्दित, विच्छर्दिताम इति पाठभेदौ ।

लक्ष्म । अयमार्य्यो हनूमान् । (म)

बाष्पाम्भसाम् अश्रूणां परिपतन चरणम् उद्गम पुनरुत्पत्ति. तयोरन्तराले मध्ये, एक बाष्पाम्बुबिन्दु पतित. यावदन्य उत्पद्यते तावत्कालमध्य इत्यर्थ । सहृष्टा अवलोकिता मयेति शेष । तदानीं तव विरहदुःखेन अविरतमेव दूयमानहृदयेन मया रुदित, किन्तु तथापि अत्यन्तमनोहरत्वात् तत्प्रदेशा दृष्टा इति भाव । 'मल्लिकाक्षपक्ष' इत्यत्र 'मल्लिकाक्ष पक्ष' इति, 'भुवो विभागा' इत्यत्र 'मया विभागा' इति च क्वचित पाठ सदृश्यत । अत्राह वीरराघवा—कुवलयिन इत्यत्र प्रथमाया मतुपा प्रशस्तकुवलययुक्ता इत्यर्थलाभन रावो दृष्टा इति सूच्यते। कश्चित्तु—मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीका विभागा बाष्पाम्भ परिपतनोद्गमान्तराल कुवलयिनो दृष्टा इत्यन्वयमुक्त्वा बाष्पाम्भ प्रसरमलिनीकृतपुण्डरीका कुवलयवन्तो दृष्टा इत्यर्थमाह । परे तु—मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीका कुवलयिनश्च विभागा । विभज्यत इति विभागा, परस्पर सकीर्णप्रदेशा बाष्पाम्भ परिपतनोद्गमान्तराल स दृष्टा एकीकृत्य दृष्टा । समित्य कौ-कार्य अविभागेन दृष्टा इत्याहु । इतरे तु—ननु "रमणीयमेतत पम्पासर" इत्युक्त तथा तत कथमुपपद्यत विरहाद्दीपकक्वणत्कूजितयुक्तव्याधूतपुण्डरीकयुक्तस्य सरसो दृष्टुमशक्यत्वादित्यत आह—एतस्मिन् मदकलेति । मत् अकलात पदच्छेद, मदिति पञ्चम्य क वचन पृथक्पद समस्त वा । मत मत्तिमित्त विरहबाधातुरमत्तीर्भ विद्यते काल कूजित येषा ते तथा मल्लिकाक्षाणा हसविशेषाणा पक्षव्याधूतानि कम्पितानि, अत एव स्फुरदुरुदण्डानि निस्सारधारतया चलद्दुरुदण्डानि पुण्डरीकाणि येषु तथा कुवलयिन पुण्डरीक बहिर्वाविकासाद्यभावार्कविकारत्वात हसैरव्याधूततया कुवलयभावाभाव । एतस्मिन विभागा बाष्पाम्भ परिपतनोद्गमान्तराल म दृष्टा सम्यक दृष्टा परिभावनसम्भावितत्वा हर्षप्लुतिया.तरकलिततरत्यन्त दृष्टा इत्यर्थ निर्वापप्रवणतया सम्यगदृष्टा इति भाव । मल्लिकाक्षा खलु विरहोद्दीपकस्य मम कत स्वत विरहमुद्दीपक कूजित त्यक्ता तदुद्दीपकानि पुण्डरीकाण्यनायत्यत् । तत्रापि निर्वापप्रवणतया मात्सर्यकतया वा अ्यतिपद्यन्त ताम् विरहानि दृष्टवान इति फलितम युक्त चैतत विरहिवृन्द राम प्रति मल्लिकाक्षाणाम् अपि यावा वादात इति व्यायत करुणाया मध्यमात् हसचक्रवाकशापदर्शनन चक्र वाकशापदाता रामो.न्यायकमपि शाप दास्यति न भीत्या शब्दाप्रभावात । कथन च गवलित मन,पे शिरस पुण्डरीकानां कमम इत्यादि बहु बह्वपेक्षिरत्वामपि विराधमनानुरोध प्रतिभाति वदन्ति । इति प्रथमाह पाठमातिवर्तनात अभावोक्तिरिति वदन्ति । प्रकृपितोक्तम् 'प्रवर्त्तिं यो मनो मनो गु' इति ललवान

(म) अयमिति। टवधानमधनत्वात महात्मत्वात महोपकारकत्वाच्च हनूमत मान्य इति विशेषणम।

सीता । एसो सो चिरणिव्विण्णजीअलोअपच्चुद्धरणगुरुओवआरी महाणुभावो मारुदी । (स)

[स एष स चिरनिर्विण्णजीवलोकप्रत्युद्धरणगुरूपकारी महानुभावो मारुतिः, इति समम्]

राम दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धनः ।
यस्य वीर्य्येण कृतिनो वयञ्च भुवनानि च ॥ ३२ ॥

[३२ दिष्ट्या सो ऽयं महाबाहुः अञ्जनानन्दवर्द्धनः यस्य वीर्य्येण वयञ्च कृतिनः भुवनानि च (कृतानि) इत्यन्वयः]

सीता। वच्छ ! एसो कुसुमिदकअम्बतरुणच्छविदतरङ्गिणो किण्णामधेओ गिरी ? जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुच्छन्तो तुए पक्कदिएण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो । (य)

[स वत्स एष कुसुमितकदम्बतरुणच्छवितरङ्गिणः किनामधेयो गिरिः । अनुभावसौभाग्यमात्रपरिशेषधूसरश्रीः मूर्छन् त्वया प्रह्लादनेन अवलम्बितस्तरुतले आर्य्यपुत्र आलिखितः इति समम्]

एष इति । चिर निर्विण्णस्य चिरं कष्टमनुभूतवतः अत एव कृतापराधादपि विरक्तस्य इत्यर्थः जीवलोकस्य जगतः प्रत्युद्धरणेन तदुद्धरणेन गुरुरुपकारो गुरुकम उपकारो इति सम्प्रदाय समम महोपकारो महानुभावो महाप्रभावः मारुतिः मारुतस्य वायोरपत्य हनुमान । रामायणोक्तरीत्या सीतान्वेषणेऽञ्जनासुतेन निरीक्षिता विरहादित्य कम् । लङ्कायां स्वसत्त्वेन जीवलोकप्रत्युद्धरणं तदुद्धरणमभावेन च जीवलोकप्रत्युद्धरण मित्यर्थः

(३२) दिष्ट्येति । दिष्ट्या आनन्दसूचकमव्ययम् । अयं दृश्यमानः स प्रसिद्धः महाबाहुः विशालभुजबलशाली अञ्जनानन्दवर्द्धनः अञ्जनाख्याया वानर्य्याः सुखवर्द्धिकारी हनुमानित्यर्थः । यस्य हनुमतो वीर्य्येण बलेन वयञ्च लक्ष्मणभरतप्रभृतयः सीताविभीषणसुग्रीववानरप्रभृतयश्च भुवनानि च + + सीतासमागमहेतुरावणवधेन च सिद्धकामाः इत्यर्थः अन्य + सीतासमाश्वासनप्रयुक्तसीताविरहपरिहारेण, तथा आपद्व्यापन्नलक्ष्मणस्य वह्निप्रवेशात् रक्षा भरतप्रभृतयो, अरण्यागतस्वपरिग्रहसिद्धा

+ पक्षे च इति पाठान्तरम्

लक्ष्म: । सोऽयं शैल: ककुभसुरभिर्माल्यवान् नाम यस्मिन्
नील: स्निग्ध: श्रयति शिखरं नूतनस्तोयवाह: ।
राम: । वत्स तस्माद्विरम विरमात: परं न क्षमोऽस्मि
प्रत्यावृत्त: पुनरिव स मे जानकीविप्रयोग: ॥ ३३

[३३ । ककुभसुरभि, माल्यवान् नाम स. अयं शैल., यस्मिन् नील: स्निग्ध: नूतन: तोयवाह: शिखरं श्रयति (इति लक्ष्मणवाक्यम्) । वत्स, एतस्मात् विरम विरम अत:परं न क्षम: अस्मि, स मे जानकीविप्रयोग: पुन: प्रत्यावृत्त इव (इति रामवाक्यम्), इत्यन्वय] ।

लक्ष्म । अत:परमार्य्यस्य तत्रभवतां कपिराक्षसानाञ्च असंख्यातान्युत्तरोत्तराणि कर्म्माश्चर्य्याणि, परिश्रान्ता चेयमार्य्या, तद्विज्ञापयामि विश्र[श्रा]म्यतामिति । (र)

र्गेन विभीषणस्य, सुखोत्पादनेन सुग्रीवस्य, मधुवनभङ्गापराधेन वानराणां, जगद्विरावणवधसाहाय्येन च भुवनानामुपकृतत्वमिति बोद्धव्यम् ।

(य) वर्त्ते ति । कुसुमान्यं षां जातानीति कुसुमिता पुष्पिता ये कदम्बतरवस्तेषु ताण्डवान्येषां जातानीति ताण्डविता नृत्यन्त. बर्हिणा मयूरा यत्र स तथोक्त । किं नामधेय यस्य स: किंनामधेय., किमाख्य । यत्र गिरौ तरुतले अनुभावेन तेजसा यत् सौभाग्य सौन्दर्य्यं तस्मात् परिणमम् अवशिष्ट यत्र तादृशा भ्रमरा पाण्डु,वर्णा श्री शोभा यस्य स' क्षामाङ्गोऽपि स्वाभाविकतेज सम्पन्न इत्यर्थं । मुहूर्त मुहूर्त्त कियन्त कालम् अर्वतन्यो भवन्, प्रकृष्ट रुदितं यस्य तेन अतीव क्रन्दता त्वया अवनम्बित भूत । आलिङ्गितश्चिरित. ।

(३३) सोऽयमिति । ककुभैरर्जुनपुष्पै सुरभि शोभनगन्धोपेत 'पुष्पमूलेषु बहुलम्' इति लुप । माल्यवान् नाम अय दृश्यमान स प्रसिद्ध शैल पर्वत, नतन अचिरपूर्णजल' अत एव नील श्यामल स्निग्ध चिक्कणश्च तोयवाह तोयं वहतीति कर्म्मण्यण, मेघ, यस्मिन् यस्य पर्व्वतस्योपरि इत्यर्थं । अकर्मकत्वादर्थं प्रति भेदो नास्तीति श्रवणात् । शिखर शृङ्ग श्रयति अवलम्बते ।

वत्से ति । वत्स । लक्ष्मण । एतस्मात् माल्यवत्पर्वतचित्रदर्शनात् विरम विरम निवर्त्तस्व निवर्त्तस्व । द्वैधं वित्वात् । कारणमित्याह—अत पर न क्षमो न शक्तोऽस्मि द्रष्टुमिति शेष. । अत्र हेतुमाह—स पूर्वानुभूत मे मम जानकीविप्रयोग सीताविरह पुन प्रत्यावृत्त इव प्रत्युपस्थित इव । अत्र विप्रयोगे प्रत्यावृत्तत्वसम्भावनाया इवशब्दवाच्यत्वात् भावाभिमानिनी वाच्या—स्थितोत्प्रेक्षालङ्कार न तु वत्सेत्यादिवाक्यार्थं प्रति सत्यमनन्तरवाक्यार्थस्य तं प्रति च तदनन्तरवाक्यार्थस्य निष्पादकतया हेतुत्वात् वाक्यार्थहेतुककाव्यलिङ्गं न सङ्कीर्य्यते । मन्दाक्रान्तावृत्त—"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्म" मिति लक्षणात् ।

(र) अत इति । आर्य्यस्य भवत । कपिवानर । असंख्यातानि न

सीता। अज्जउत्त! एदेण चित्तदंसणेण पच्चुप्पण्णदोहदाए अत्थि मे विण्णप्पं। (ल)

[(ल) आर्य्यपुत्र। एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यम्, इति सम्]।

राम। नन्वाज्ञापय। (व)

सीता। जाणे, पुणोवि पसण्णगम्भीरासु वणराईसु विहरिस्सं पवित्त-णिम्मलसिसिरावगाहाञ्च भअवदीं भाईरहीं अवगाहिस्सं। (श)

[(श)। जाने, पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रनिर्म्मल-शिशिरावगाहाञ्च भगवतीं भागीरथीमवगाहिष्ये, इति सम्।]

राम। वत्स लक्ष्मण!

लक्ष्म। एषोऽस्मि। (ष)

राम। अचिरं सम्पादनीयोऽस्या दोहद इति सम्मत्यैव गुरुभिः सन्दिष्टम्। तदस्खलितसुखसम्पातं रथमुपस्थापय। (स)

बहूनि। उत्तरोत्तराणि उत्तरश्च उत्तराणि इति क्रमेण हर्षि गतानि कर्म्माश्चर्य्याणि विस्मयकराणि कार्य्याणि सुबाहुसवधवालिवधसमुद्रलङ्घनादीनि अद्भुतानि कर्म्माण्यौत्सर्ग:। "आहिताग्न्यादिषु वा पर" मिति आश्चर्य्यशब्दस्य परनिपात। इयमार्य्या सीता परिश्रान्ता बहुक्षणं यावत् दक्षायमानतया चित्रदर्शनादिति भाव.। विश्रम्यतां सीतयेति शेष:।

(ल) आर्य्यपुत्रेति। प्रत्युत्पन्नो जातो दोहदोऽभिलाषो यस्याः सा, तस्याः मे मम विज्ञाप्य निवेद्यम् अस्ति। प्रत्युत्पन्नदोहदाया इत्यनेन अष्टावक्रमुखेन वदन्त्यादीनामादिष्ट-करणात् प्रकृतदोहदस्य अवश्यपालनीयत्व सूच्यते।

(व) ननु इति। नन्विति सम्बोधने। आज्ञापय आदिश। "बहुविलम्बेन तवाहमधीन एवास्मि, सुतरां विज्ञाप्यमस्तीत्यनुक्त्वा आज्ञाप्यमस्ती"त्येव वक्तुमर्हसीति रामस्याभिप्राय:। एतेन प्रभुनिर्देशवत् सीतादोहदस्य रामेण अवश्यकर्त्तव्यता व्यक्ता।

(श) जाने मन्ये। मम इच्छास्तीत्यनुमानेनैव त्वया ममाभिलाष: अवश्यमेव पूरणीय: सुतरां पुनरपि पञ्चवटीविहार: गङ्गावगाहश्च ममावश्यम्भावीति ज्ञापनाय "इच्छामी"त्यनुक्त्वा जाने इत्युक्तम्। प्रसन्ना: उद्वेगहेतुरहिता: ता: स्निग्धगम्भीरा: सश्रीकाश्च:, वनराजय: अरण्यसमूहा: तासु। पवित्र: पुण्यजनक: निर्म्मल: पापनाशक: शिशिर: शीतलश्च अवगाह: स्नानं यस्यां तां भागीरथीं गङ्गाम्।

(ष) एष इति। आदिश्यतामिति शेषवाक्यम्।

(स) अचिरमिति। अस्याः सीतायाः दोहदः अभिलाषः अचिरं विलम्बमकृत्वा

सीता। अज्जउत्त! तुम्हेहिं वि तहिं गन्तव्वं। (ङ)

[(ङ) आर्यपुत्र! युष्माभिरपि तत्र गन्तव्यम् इति क्रमः।]

राम। अयि कठिनहृदये! एतदपि वक्तव्यमेव? (च)

सीता। तेन हि पिअं मे। (छ)

[(छ) तेन हि प्रियं मे इति क्रमः।]

राम। यथाज्ञापयत्यार्या। ([illegible])

राम। प्रिये! इतो वातायनोपकण्ठे मुहूर्तं संविष्टौ भवावः। (ग)

सम्पादनीय पूर्वमित्य इति सम्प्रति अधुना एव गर्भ [illegible] मन्निष्ट वाचक प्रार्थितम्, अनावक्रमुखेन इति भावः न केवलं सीताया मम च आयत्याम् अपि तु [illegible] प्रभृतीनाम् आनन्दार्थमपि अस्याः कामनाः सम्पूरणीया इति भावः। तत तस्मात् अनवाप्तेन सुखसम्पाते न [illegible] न [illegible] मृगमध्यात् [illegible] गमनं तस्मात् तत् तथोक्तं, येन गच्छता शरीरेक [illegible] न भवतीत्यर्थः। सीतायाः पुष्पमनो न [illegible] हृदयस्य वयस्य गमनापर्योगित्वम्।

(ङ) आर्येति। राजकार्यानुरोधात् यदि राम [illegible] नादिसम्दर्शनार्थं न यायादिति शङ्कया युष्माभिरपि गन्तव्यमिति प्रार्थितं सीतया। युष्म भावात गौरवे बहुवचनं, स्वामिन इत्यर्थः।

(च) अयीति। कठिनहृदये कठिनं निष्ठुरं हृदयं यस्याः सा तस्याः सम्बुद्धौ। एतदपि वक्तव्यमिति, त्वया विरहितोऽहं गृहे स्थास्यामि इति निर्गदितं त्वं सम्भाव्य अत मम [illegible] ते निश्चिनोषीति भावः। त्वया सह मया गन्तव्यमिति यत् तत् किं वक्तव्यमेव इति काकुः, अपितु कथमपि न। त्वया विना सुखमपि च स्यात् [illegible] निष्फलत्वं अनुरोध। यद्यपि परित्यागकाले मां [illegible] सह रामो न वनं गतवान् तथापि सीतावियोगानन्तरं तत्र गतोऽभूत् अतो न रामवाक्यस्य [illegible]। अथवा युष्माभिरपि तत्र गन्तव्यम् इत्यत्र युष्माभिरित्यत्र [illegible] बहुवचनम्। [illegible] वनगमनं सीतासहचरं [illegible] अतो न रामवचनस्य [illegible]। यद्वा न खलु रामेण 'अहं त्वया सार्द्धं गमिष्यामि' इत्युक्तम्, अपितु 'एतदपि वक्तव्यम्' अपितु नैव मम गमनं सुसम्भवम् इति कथितम्, अतो न [illegible] इति ध्येयम्।

(छ) तेन इति। तेन मया सह तव गमनेन इत्यर्थः।

(ज) यथा इति। [illegible] आदेशति। [illegible] इति भावः।

(ग) प्रिये इति। वातायनोपकण्ठे वातस्य [illegible] [illegible] प्रविष्ट [illegible]

सीता। एव्वं भोदु, पोढ्ढीरिस्सामि क्खु परिस्समजणिदाए णिद्दाए। (घ)

[(घ) एवं भवतु, अपक्रिये खलु परिश्रमजनितया निद्रया, इति मम।]

राम। तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय। (ङ)

जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः॥ २४

[२४। ससाध्वसश्रमस्वेदबिन्दुः, ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः जीवयन् इव बाहुः अधिकण्ठं अर्प्यताम्, इत्यन्वयः।]

(तथा कारयन् सानन्दम्) प्रिये! किमेतत्। (च)

यावत् यस्मात् स गवाक्ष तस्य उपकण्ठं कण्ठसमीपे इति सामीप्यार्थे अव्ययीभावः। उपकण्ठम् तृतीयासप्तम्योरन्यतरस्यामिति सप्तम्या पाक्षिकं रूपम्। गवाक्षसमीपे इत्यर्थः। मुहूर्तम् अल्पकालमित्यर्थः। उपविष्टौ शयानौ भवाव आवामिति शेषः।

(घ) एवमिति। एवं गवाक्षसमीपे आवयोरुपवेशनं भवतु। परिश्रमजनितनिद्रया परिश्रमेण चित्रदर्शनजन्येन आयासेन जनितया निद्रया अपक्रिये अभिभूये, विलुप्तचेतना भवामीत्यर्थः। निद्रा मामनुकर्षतीति भावः।

(ङ) तेन इति। तेन निद्राकर्षणेनैव हेतुना इत्यर्थः, निरन्तरं निर् नास्ति अन्तरम् अवकाशो यस्मिन् कर्मणि तत् यथा स्यात् तथा गाढमित्यर्थः, माम् अवलम्बस्व धारय, अत्र वातायनोपकण्ठं, शयनाय शयितुमित्यर्थः।

(२४) केन प्रकारेण आलम्ब्य इत्याह—जीवयन्निति। ससाध्वसश्रमस्वेदबिन्दुः साधु सम्यक् अस्यति विक्षिपति चित्तं यत् तत् साध्वसं भयं चित्रे राक्षसादिदर्शनादिति भावः, श्रमः दक्षायमानत्वं च चित्रदर्शनादायासः, ताभ्यां ये स्वेदबिन्दवः घर्मबिन्दवः तैः सह वर्त्तमान इति। अत एव ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः, इन्दोश्चन्द्रस्य इमे ऐन्दवाः तैर्मयूखैः किरणैः चन्द्रपादैरिति यावत्, चुम्बितः स्पृष्ट अत एव स्यन्दी जलस्रावी यश्चन्द्रमणिहारः चन्द्रकान्तमणिमाला तस्य विभ्रम इव विभ्रमो विलासो यस्य सः, घर्मबिन्दुसम्पर्कात् चन्द्रकरस्पर्शेन द्रवन्तीं चन्द्रकान्तमणिनिर्म्मितां हारयष्टिम् अनुकुर्वन् इत्यर्थः। जीवयन्निव तापशान्तिसुखोदयात् मां उज्जीवयन्निव अयं ते बाहुः भुजः सुखस्पर्श इत्यर्थः। अधिकण्ठं मम गलदेशे अर्प्यताम् स्थाप्यताम्। त्वयेति शेषः। उत्तरार्द्धेन जलबिन्दुस्राविचन्द्रकान्तमणिना बाहोः साम्यप्रतीतेः प्रथमार्द्धे तत्रैव उज्जीवनकारित्वसम्भावनाया इवशब्देन प्रत्ययनाच्च वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा उपमासङ्कीर्णा। रथोद्धता वृत्तम्—‘रथोद्धता रनौ रलौ ग’ इति लक्षणात्।

(च) तथा इति। तथा कारयन् सीतया ग्रीवां वा इति शेषः। ‘हृक्रोरन्यतरस्याम्’-

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च * ॥ ३५

[३५ । अयि सीते । एतत् सुखमिति वा दुःखमिति वा प्रमोहः वा, निद्रा वा, किमु विषविसर्पः किमु मदः इति विनिश्चेतुं न शक्यः । तव स्पर्शे स्पर्शे मम परिमूढेन्द्रियगणो विकारः चैतन्यं भ्रमयति च सम्मीलयति च, इत्यन्वयः ।]

लिवि अयि वत्सः पाणिक्ष कर्णोत्वम् । स्वकीये कण्ठदेशे सीताबाहुम् अर्पयन् । सानन्दम् आनन्देन सम्मोवेन वर्त्तमानं यथा तथा, आहेति शेषः । किमेतदिति. बाहुस्थापनानन्तरम् अनुभूयमानं दशान्तरं किं कीदृशं जातमिति शेषः ।

(३५) बाहुस्पर्शेन जातमवस्थान्तरं विवृणोति—विनिश्चेतुमिति । अयि प्रिये । एतत् सुखमिति वा किमहं सुखमनुभवामि तव स्पर्शेन इति शेषः, एवमन्यत्र योज्यम् । दुःखमिति वा किमहं दुःखमनुभवामि इति वा, अयं कि प्रमोहो वा भ्रान्तिर्वा, निद्रा वा किमहं निद्रामि इति वा । किमु विषविसर्पः किं मम देहे विषसञ्चारात् ईदृशीम् अवस्थाम् आपन्नः अस्मि इति वा, किमु मदः किं मद्योपयोगजः कश्चोऽप्यानन्दमयं भावम् अवाप्तः अस्मि इति वा, एतत् किमपि विनिश्चेतुं निर्णेतुं न शक्यः समर्थः अस्मि इत्यर्थः । हि यस्मात् तव स्पर्शे स्पर्शे प्रतिस्पर्शे परिमूढः स्वस्वविषयग्रहणासमर्थः इन्द्रियगणः मनःप्रभृतीनि इन्द्रियाणि यस्मिन् सः तथोक्तः विकारः अन्यथाभावः चैतन्यमिति यावत्, मम चैतन्यं अनुभवशक्तिं भ्रमयति चञ्चलयति संमीलयति मुद्रयति च, समुन्मीलयति च इति पाठे प्रकाशयति इत्यर्थः । तव स्पर्शेनैव मम सर्वाण्येव इन्द्रियाणि लोकोत्तराह्लादेन विवशानि सञ्जातानि, किञ्च मम बुद्धिरपि आनन्दातिरेकात् तथा मूढतामापन्ना यथाहं आत्मनः अवस्थां सम्यक् अवधारयितुं प्रकाशयितुञ्च न शक्नोमि इति फलितार्थः । शक्य इत्यत्र शक्तः इति पाठान्तरम् । अत्र प्राचीनानां व्याख्या—'अत्र सुखदुःखशब्दौ प्रियाप्रियविषयक सं पादिजन्यमानससुखदुःखपरौ शारीरसुखदुःखमदविसर्पप्रभृतीनां पृथगुपादानात् । सुखदुःखयोः शारीरमानसभेदेन विभाग 'कर्णेऽपि च येन सम्पर्कात् कर्णुः शरीरसुखम्' इति सूत्रतद्व्याख्यानयोः स्पष्टः । अत्र सीते इति सम्बोधनमध्याहार्येण, तव इत्युक्तेः । हे सीते ! तव स्पर्शे स्पर्शे अतीवानन्दप्रदस्पर्शेषु परिमूढः स्वस्वविषयग्रहणासमर्थः इन्द्रियगणश्चक्षुरादीन्द्रियसमूहः येन

---

* समुन्मीलयति च इति पाठान्तरम् ।

सीता । (विहस्य) थिरप्पसादा तुम्हे, इदो दाणिं किमवरं । (ङ)

[(ङ) । स्थिरप्रसादा यूयं, इत इदानीं किमपरम्, इति शम् ।]

राम. । म्लानस्य जीवकुसुमस्य विकासनानि

सन्तर्पणानि सकलेन्द्रियमोहनानि ।

एतानि ते सुवचनानि सरोरुहाक्षि *

कर्णामृतानि मनसश्च रसायनानि ॥ ३६

[३६ । हे सरोरुहाक्षि, म्लानस्य जीवकुसुमस्य विकासनानि सन्तर्पणानि सकलेन्द्रियमोहनानि कर्णामृतानि मनसः रसायनानि च एतानि सुवचनानि, इत्यन्वयः ।]

स तथोक्तो मम विकार आन्तरावस्थाविशेषः । चैतन्यमन्तःकरणावच्छिन्नचैतन्यम् । जीव-चैतन्यमिति यावत् । चयैतमतमक्रियमेदमुक्तम् । मदनान्तरात्मानमित्यर्थः । भ्रमयति प्रतिकूलतया भासमानः सन् क्षुभितं करोति । संमीलयति च अनुकूलतया भासमानः सन् म्लापयति च । ततः चयमित्यध्याहार्यम् । अयं विकारः सुखमिति विनिश्चेतुं न शक्यः दुःखमिति वा विनिश्चेतुं न शक्यः । प्रमोहो वा प्रकृष्टमूर्च्छात्वेन संशयितुं योग्या निद्रा वा सुषुप्तित्वेन संशयितुं योग्या । विषविसर्पः किमु विषेण विसर्प्यत इति विसर्पः, कर्मणि घञ् विषप्रसरणजन्यत्वं न संशयितुं योग्य इत्यर्थः । मदः किमु । मदत्वेन संशयितुं योग्य इत्यर्थः । अस्य विकारस्य स्पर्शजन्यत्वात् परिमूढेन्द्रियगणत्वादन्तरात्मक्षोभकरत्वाच्च तथाविधशास्त्राहि-स्पर्शजन्यमानमदुःखत्वेन स संशयोग्यत्वम् । एवं स्पर्शजन्यत्वात् परिमूढेन्द्रियगणत्वात् अन्त-रात्मोल्लासकारित्वाच्च तथाविधचिन्तादिस्पर्शजन्यमानसुखत्वेन स संशयत्वं, भवति च मित्राहि-स्पर्शजन्यसुखं परिमूढेन्द्रियगणम् । 'नीवीं प्रति प्रणिहिते तु करे प्रियेण—' इत्याद्युक्तेः । एवं मदेऽपि । मदस्य चारसुराद्याप्यायकवस्त्वायत्तत्वात् स्पर्शजन्यत्वं परिमूढेन्द्रियगण-मन्तरात्मानुकूलत्वादित्यादि ।' अत्र प्रथमार्द्धे सन्देहालङ्कार, स च दीपकसंकरः । शिखरिणीवृत्तम् । लक्षणं पूर्वमुक्तम् ।

(ङ) स्थिर इति । यूयं त्वम् गौरवे बहुत्वम् । स्थिरः अविचलितः प्रसादः मयि अनुग्रहः येषां ते । मयि सर्वदैव यूयं प्रसन्ना इति भावः । इत इदानीं किमपरं, अतोऽन्यत् अन्यत् न किमपि प्रार्थ्यमिति भावः ।

(३६) म्लान इति । अयि सरोरुहाक्षि ! सरसि कासारे रोहति जायते यत् तत् सरो-रुहम् पद्मम्, तदिव अक्षिणी नेत्रे यस्याः सा, पद्मलोचने सम्बोधनम्; म्लानात् घञ्, निष्ठीत्यादित्व-

---

* तानि वचनानि सरोरुहाक्ष्याः इति विद्यासागरधृतः पाठः ।

सीता। पिअंवद ! एहि संविसम्ह। (इति शयनाय समन्ततो निरूपयति) (ञ)

[(ञ)। प्रियंवद। एहि संविशाव। इति सम्]

राम। किमन्वेष्टव्यम् (झ)

ष्टेति ङीप् ततमन्वयस्त्री। (आयतत्वविपुलत्वाभ्यां माहात्म्यमभिप्रेतम्। एवं च स्वस्य अपि स्ववचनवैलक्षण्यप्रयुक्तविस्मयातिशयाय सुधीरायतत्वविपुलत्वद्विगुणीभाव इति भाव।) हे कमलायतलोचने। स्नानस्य सांसारिकाय यत्न शरूपे मरुवाते सुखाप्राप्यस्य हर्षजनयवत् इत्यर्थः। जीवकुसुमस्य जीवो जीवनमेव कुसुमं तस्य प्राणपुष्पस्य विकासनानि विकासजनकानि हर्षोत्पादकानि इत्यर्थः। सन्तर्पणानि सम्यक्तृप्तिजनकानि अत एव सकलेन्द्रियमोहनानि सकलानां सर्वेषाम् एव न केवलं कर्णयोरित्यर्थः, इन्द्रियाणां चक्षुप्रभृतीनां करणानां मोहनानि अवशतासम्पादकानि कर्णामृतानि कर्णयोः श्रवणयोः सुधाधारनिषेकवत् प्रीतिजनकानि तदवदेषामर्थालोचनं विनापि रमणीयत्वमिति भावः। मनसः चित्तस्य ग्लानिमापन्नस्य इति शेषः। रसायनानि रसस्य वीर्यस्य अयनम् आगमः एभ्य इति, वीर्यवन्ति औषधानि। रसायनं नाम अनेकरसवस्तुसमष्ट्यात्मकं रसवस्तु विशेषः चिकित्साशास्त्रे प्रसिद्धः। तथाच भावप्रकाशे—'यज्जराव्याधिविध्वंसि वयसः स्तम्भकं तथा। चक्षुष्यं बृंहणं वृष्यं भेषजं तद्रसायनम्॥' इति। बहुवचनादनेकरसायनसमष्ट्यात्मकानीति व्यज्यते। किंवानेकरसायनवत्सुस्वादनेन सर्वेषां रसानां तत्रोपलम्भः। एवं अस्वादान्तरश्रवणाजन्यसुखानामेतद्वचनेष्वाभ इति व्यज्यते। अपि च तथा रसायनस्य रसमयत्वात् भोग्यत्वम् औषधात्मकत्वाद्रोगनिवर्तकत्वञ्च, एवमेतेषामपि प्रियत्वं हितत्वं चेति व्यञ्जयितुं रसायनत्वोक्तिः। एतानि ते सुवचनानि श्रुतिमधुराणि वाक्यानि। स्वकीयवचनवैलक्षण्यातिशयात् सीतायाः स्ववचनेषु स्वीयतासंशयः स्यादिति 'ते' इत्युक्तिः। सुशब्देन सीतावचनस्यापि एतादृशं मधुरत्वं नानुभूतपूर्वमिति व्यज्यते। 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।' इति न्यायेन न दोषः। अत्र एतानि ते सुवचनानि इत्यनेनैव समाप्तत्वात् पुनरपि कर्णामृतानि इति वाक्यार्थस्योपादानात् समाप्तपुनरात्तत्वाद्दोषः। अत्र वचनेषु कर्णामृतत्वस्य रसायनत्वस्य च आरोपात् रूपकालङ्कारः। वसन्ततिलकावृत्तम्।

(ञ) प्रियंवदेति। प्रियंवद प्रियवादिन्, 'प्रियवशे वदः खच्' इति खच्। पूर्वोक्तरूपप्रियवाक्यप्रयोगात् प्रियंवद इति पदम्। संविशाव शयनं कुर्वः। शयनाय शयितुं 'तुमर्थाच्च भाववचनात्' इति चतुर्थी। निरूपयति अवलोकयति शयनस्थानयोग्यस्थानम् अस्ति न वेति निर्णयार्थमिति शेषः।

(झ) किमिति। अन्वेष्टव्यं विचेतव्यम्। तव प्रयोजनानुरूपं कार्यं मयैव सम्पादनीयम् अतस्तव किमपि अन्वेष्टव्यं नास्ति इति भावः।

आ विवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥ ३७

[३७ । आ विवाहसमयात् शैशवे गृहे यौवने तदनु पुनः वने स्वापहेतुः अन्यया अनुपाश्रितः एष रामबाहुः ते उपधानम्, इत्यन्वयः ।]

सीता । (निद्रां नाटयन्ती) । अत्थि एदं अज्जउत्त । अत्थि एदं । इति स्वपिति) (ञ)

[(ञ) । अस्तीदम् आर्यपुत्र । अस्तीदम् । इति संस्कृतम् ।]

राम । कथं प्रियवचना वक्षसि प्रसुप्तैव । (निर्वर्ण्य सस्नेहम्) (ट)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु * विरहः ॥ ३८

(३७) शयने उपधानमेव प्रधानतमं प्रयोजनीयम् अतस्तदेवान्विष्यतीति विचिन्त्य आह—आ विवाहसमयादिति । आ विवाहसमयात् परिणयकालादारभ्य, 'पञ्चम्यपाङ्परिभि'रिति आयोगे पञ्चमी । शैशवे बाल्यकाले, गृहे गृहावस्थानसमये, यौवने तारुण्ये, तदनु तत्पश्चात् । वने अरण्ये वनवासकाले इत्यर्थः । स्वापहेतुः स्वापस्य निद्रायाः हेतुः उपकरणभूतः अन्यया स्त्रिया अनुपाश्रितः अनवलम्बितः केवलं त्वयैव उपधानत्वेन व्यवहृतः इत्यर्थः । 'न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति ।' इत्युक्तेः । एष अयं रामबाहुः मम भुजः ते तव उपधानम् उपधीयते उपकल्प्यते शिरोऽस्मिन् इति, उपबर्हम् इत्यर्थः । 'उपधानन्तूपबर्हः' इत्यमरः । 'बालिश' इति भाषा प्रसिद्धिः । अतः स एव मम बाहुरिदानीं त्वया उपधानत्वेन, व्यवहर्तव्य इति भावः । मद्बाहुरुपधानमित्यनुक्त्वा रामबाहुरित्युक्तिः प्रतिविशिष्टोतनार्था, 'उपधाय भुजं तस्य' इति वचनात् । अत्र बाहौ आरोप्यमाणस्य उपधानत्वस्य प्रकृतशयनोपयोगितया परिणामालङ्कारः, तदुक्तं—'विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि । परिणामो भवेत्—' इति । गृहे वने इत्यनयोः शैशवे यौवने इत्यनयोः यथासंख्यान्वयात् यथासंख्यालङ्कारं वदन्ति । रथोद्धताछन्दः ।

(ञ) निद्रामिति । नाटयन्ती अभिनयन्ती । अस्तीति—तव बाहुः इदं मम उपधानमस्तीत्यर्थः ।

(ट) कथमिति । प्रियवचना प्रियं मनोहरं वचनं वाक्यं यस्याः सा । 'या प्रियस्य' इत्यनुप्रासशेन पद्ये वचनमिदम् ।

* पुनरसह्यो न, इति पाठान्तरम् ।

[३८। इयं गेहे लक्ष्मी, इयं नयनयो अमृतवर्ति, असौ अस्या स्पर्श वपुषि बहल-चन्दनरस । अयं कण्ठे (अस्या) बाहु शिशिरमसृण मौक्तिकसर । अस्या किं न प्रेय यदि परं विरहस्तु असह्य, इत्यन्वय]

(प्रविश्य) प्रतीहारी । देव । उवत्थिदो । (ठ)

[(ठ) । देव । उपस्थित, इति शम् ।]

---

(३८) इयमिति । इयं सीता गेहे गृहे लक्ष्मी श्री सौभाग्याधिष्ठात्री देवी इति यावत । इयं नयनयो नेत्रयो ममेति शेष अमृतवर्ति सुधानिष्यन्दिनी शलाका तत्स्वरूपा इत्यर्थ, नयनानन्दकरी इति भाव । असौ अनुभूयमान इत्यर्थ अस्या वपुषि देहे बहल प्रचुर चन्दनरस चन्दनद्रव तद्वत् सुशीतल इत्यर्थ । मलयजसेकेन यथा निदाघतप्तस्य देहस्य तापशान्ति सुखोदयश्च भवति, तथा अस्या स्पर्शेन मम शरीरस्य अनिर्वचनीया कापि निर्वृति सञ्जायते । अयं कण्ठे गलदेशे अर्पित इति शेष, बाहु भुज शिशिरमसृण शिशिरश्चासौ मसृणश्चेति विशेषणयो कर्मधारयनिर्वाह । शीतल कोमलश्च मौक्तिकसर मुक्तामयी हारयष्टि । यथा मुक्तामाला सुशीतलत्वात् मसृणत्वाच्च आनन्ददात्री, अस्या भुजोऽपि तथा प्रीतिप्रद इति भाव । सुतराम् अस्या सीताया सम्बन्धि किं न प्रेय, प्रियशब्दात् ईयसुन् । प्रियतरम्, किन्तु परं केवलं विरह विच्छेद असह्य सोढुमशक्य । विरहव्यतिरिक्तम् अस्या सर्वमेव आदरणीयमिति भाव । यदि सम्भावनायाम् । अत्र 'इयं गेहे लक्ष्मी' इत्यादिभिरेकस्या एव सीताया बहुविषये दीपशलाकाकार्यकारित्व चक्षुर्विषये ज्योत्स्नादिकार्यकारित्व कण्ठे हारकार्यकारित्वञ्च बध्यते । श्लोकेऽस्मिन् प्रथमचरणे विषयभेदेन सीताया अनेकधा उल्लेखात् उल्लेखालङ्कार, तदुक्तं 'क्वचिद्भेदात् ग्रहीतॄणां विषयाणां तथा क्वचित् । एकस्यानेकधोल्लेखो य स उल्लेख उच्यते ॥' तत्र च भेदेऽभेदाध्यवसायमूलातिशयोक्तियोग । द्वितीयतृतीयचरणयो रूपकम् । चरमचरणे च प्रियतमाया सीताया अप्रियतमविरहदोषोपस्थापनात् विषमालङ्कार, तदुक्तं—"गुणौ क्रिये वा चेत् स्यातां विरुद्धे हेतुकार्ययो । यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भव: । विरूपयो सङ्घटना या च तत् विषमं मतम् ॥" इति । शिखरिणीवृत्तम् ।

(ठ) प्रविश्येति । प्रतीहारी अन्तःपुरद्वाररक्षिका । सम्वादवाही परिचारक इति केचित् । देव महाराज । उपस्थित इति । उपस्थित इत्यनेन वक्ष्यमाणदुर्मुख इत्यध्याहार्यम् 'उपस्थितो दुर्मुख' इति वाक्यसमाप्तिनिबन्धना प्रतीहारीवाक्यं 'देव' इति निबद्धम् । किन्तु पूर्वोक्तस्य 'किन्तु' इत्यनेनापि 'उपस्थित' इत्यस्य

राम। अये! कः?।

प्रती। आसन्नपरिचारओ देवस्स दुम्मुहो। (ड)

[(ड)। आसन्नपरिचारको देवस्य दुर्मुख इति सम]।

राम। (स्वगतम्) शुद्धान्तचारी दुर्मुखः, स मया पौरजानपदानपसर्पितुं प्रयुक्तः। (प्रकाशं)। आगच्छतु। (ढ) (प्रतीहारी निष्क्रान्ता।)

(प्रविश्य) दुर्मुखः। (स्वगतं) हा कधं सीदादेवीए ईरिसं अचिन्तणिज्जं जणाववादं देवस्स कधइस्सं, अहवा णिओओ क्खु ईरिसो मन्दभाअस्स। (ण)

[(ण)। हा, कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि? अथवा नियोगः खलु ईदृशो मन्दभागस्य। इति सम]

'सीताया विरहे उपस्थिते' इति वाक्यात् आसन्नसीताविरहसूचनात् एतत् पताकास्थानमिदम्, तदुक्तं दर्पणे द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः। प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्॥ अत्र पताकास्थानं सीताविरहरूपभाव्यर्थसूचनार्थम्।

(ड) आसन्न इति। देवस्य भवतः आसन्नपरिचारकः आसन्नः निकटस्थः सन् परिचरति सेवते इति। सदा सन्निधौ यस्तिष्ठति तादृशः भृत्य इत्यर्थः। दुर्मुखः दुष्टं मन्दकथनेन निन्दात्मकमिति यावत् मुखं यस्य सः, तन्नामा जनः।

(ढ) शुद्धान्तेति। शुद्धान्तः शुद्धाः कामविरताः रक्षकाः अन्तेऽस्य इति शुद्धान्तः तस्मिन् अवरोधे अन्तःपुरे इत्यर्थः, चरतीति शुद्धान्तचारी, 'शुद्धान्तोऽन्तःपुरे आच्छन्नरहस्ये कक्षान्तरेऽपि च' इति मेदिनी। स दुर्मुख इत्यर्थः, मया पौरजानपदान् पुरे निवसन्ति ये ते पौराः जनानां पदम् इति जनपदः, आस्पदप्रतिष्ठायामिव जनपदानि इति पुंस्त्वम्। जनपदेभ्य आगता इति जानपदाः पौराश्च जानपदाश्च इति पौरजानपदाः अयोध्यावासिनः तत्प्रदेशवासिनश्च तान् अपसर्पितुं गूढभावेन चरित्वा तेषां चित्तं परिज्ञातुं प्रयुक्तः नियुक्तः प्रेरित इत्यर्थः।

(ण) हा इति। हा खेदे। कथं केन प्रकारेण सीतादेव्याः जनकजायाः सीतायाः इति शेषः। सीतादेवीति पदेन सर्वथा अस्याः परिग्रहत्वं सूचयति सकलजनपूज्यत्वात् तत्सम्बन्धे ईदृशम् अश्राव्यमिति भावः। अचिन्तनीयं मनसा कल्पयितुमपि अशक्यं जनापवादं लोकापवादं देवस्य महाराजस्य सम्बन्धविवक्षया षष्ठी। कथयिष्यामि प्रकाशयिष्यामि। अथवा नियोगः अधिकारः खलु ईदृशः एवम्प्रकारः मन्दभाग्यस्य निर्भाग्यस्य ममेति शेषः

सीता । (उत्स्वप्नायते) हा अज्जउत्त ! * कहिं सि ? । (त)

[(त) । हा आर्य्यपुत्र । क्वासि ?]

राम । अये ! सैवेयं रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति । (सस्नेहमात्मगतं परामृशन्) (थ)

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रसः ।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं
भद्रं तस्य † सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ‡ ॥ ३९

[३९ । यत् सुखदुःखयो अद्वैतं, सर्वासु अवस्थासु अनुगुणं, यत्र हृदयस्य विश्रामः, यस्मिन् जरसा रस अहार्य्यः, कालेन आवरणात्ययात् यत् परिणते स्नेहसारे स्थितं, तत् एकं भद्रं सुमानुषस्य कथमपि हि प्राप्यते इत्यन्वय ।]

जिति मयि नास्ति इति भाव । मन्दभाग्यस्य दुरदृष्टम् । यत सतीशिरोमणिभूतायाः सीतादेव्या अपि अयथा दोषकीर्त्तनं मया कर्त्तव्य ततो नास्ति मम कोऽपि दुर्भाग्य इति कथितम् ।

(त) उत्स्वप्नायते इति । उत् उत्पन्न उत्कट विलापादिप्रयोजकः स्वप्नः, अथः स्वप्नः सा उत्स्वप्ना, सा इव आचरतीति उत्स्वप्नायते । 'कर्त्तुः क्यङ् सलोपश्च' इति क्यङ् । यथा उत्स्वप्न स्वप्नावस्थायां विलापादि न करोतीति करणार्थकक्यङ्प्रत्ययः । अत्र प्रलपतीत्यर्थः । क्वासि कुत्र वर्त्तसे इत्यर्थः ।

(थ) अये इति । रणरणकदायिनी रणरणकम् उद्वेगं दातुं शीलमस्याः इति ताच्छील्ये णिनि, उद्वेगकारिणी । चित्रदर्शनात् पूर्व्ववृत्तादिचित्र विलोकन इति शेषः । विरहभावना मम विरहचिन्ता 'हा अज्जउत्त एत्तिअ ईदिसं' इत्यादिरूपा विरहचिन्ता इति यावत् । देव्याः सीतायाः स्वप्नोद्वेगं स्वप्ने निद्रायाम् उद्वेगम् उत्कण्ठां करोति जनयति । देव्याश्चित्ते आवरणत्वायां या भावना समुदिता आसीत्, इदानीं अत्रेऽपि तादृशी चिन्ता एव अस्तीति इति कथितम् । सस्नेहमिति । स्नेहेन आदरेण सह वर्त्तमानं, सादरमित्यर्थः । आत्मगतं सीतायाः अङ्ग स्पृशन् । परामृशन् स्पृशन् ।

---

* हा अज्जउत्त कहिं सि इति विद्यासागर । † मनुष्य इति विद्यासागरः । ‡ प्रार्थ्यते

(३८) ईदृक्परमपवित्रतमाः खलु जनकादिविधिविवाहकर्मोचितं च आसीदिति विचिन्त्य तस्य दुःखसन्तापादीन् अनुशोचति—अद्वैतमिति। तत् आर्य्यारूपं वस्तु यत्। यत् प्रेम इति योजनीयम्। सुखदुःखयोः सुखस्य दुःखस्य इति सुखदुःखे तयोः, सुखसमये दुःखसमये च, अद्वैतं द्विधा इतं प्राप्तम् इति द्वीतं द्वीतस्य भावं भावो वा इति द्वैतम् अथ् प्रत्ययः, नास्ति द्वैतं विरूपत्वं यस्मिन् तत् अद्वैतम्। सुखेन सुखि, दुःखेन दुःखीत्यर्थः। यत् सर्व्वासु अवस्थासु सम्पत्सु विपत्सु च अनुगुणम् अनुगतम् अनुकूलमित्यर्थः। न तु सम्पदि अनुकूलं विपदि च प्रतिकूलमिति भावः। प्रतिकूलेष्वपि दशान्तरेषु यत् वस्तु प्रतिकूलतां न भजति इति फलितम्। यत्र आर्य्यारूपे वस्तुनि हृदयस्य सांसारिकानन्त-सन्तापयुक्तस्य चित्तस्य विश्रामः दुःखविरामः श्रमापनयनकरसुखविशेषानुभवः इति यावत्, यत् प्राप्य शोकमोहादिभिर्व्याकुलं मनः शान्तिं लभते इत्यर्थः। अत्र विश्राम इत्य-पाणिनीय, 'नोदात्ते'ति वृद्धि प्रतिषेधात्। मोहर्षिस्तु 'विश्रामो विश्रमश्च' इति विरूपकोषे उक्तवान्। तदेतत् समादधते तत्त्ववेदिनो ज्ञानेन्द्रसरस्वतीपादाः—'श्रा चित्त-विरामे' इति सूत्रस्य वा इत्यस्य मितो भवन्ति इति सूत्रे अनुवर्त्तनेन तस्य च व्यवस्थित-विभाषाश्रयणाश्रयणात् विश्रामयति, विश्रमयति इति रूपद्वयम्। ततो विश्रामि इति धातोः 'एरच्' इति अच् प्रत्ययेन विश्राम इति रूपसिद्धिः, न तु घञ् प्रत्ययेन इति।' काशिकायान्तु 'यो ममेत्यत्र निर्द्दिष्टत्वानित्यत्वाद् विश्रामः' इत्याहुः। यस्मिन् आर्य्यारूपे वस्तुनि जरसा वार्द्धक्येन रसः अनुरागः न हार्य्यः न दूरीकर्त्तुं शक्यः, इतरत्राभि प्रायेण कामादीनाम् यौवनो. इष्यते, जरसा तु न तथा इति भावः। यत् वस्तु कालेन कालक्रमेण पुनाव्य नुपस्ति-क्रमेण इति यावत् आवरणात्ययात् लज्जादिरूपप्रतिबन्धकनिवृत्तेः परिणते परिपाकम् उपेयुषि स्नेहसारे स्नेहस्य प्रेम्णः सारे निर्य्यासे स्थायीत् उत्कर्षे इत्यर्थः, स्थितं परिनिष्ठितं, कालात्ययादेव अक्षुण्णमवस्थानं भवतीत्यर्थः। यदा 'आवरणात्ययादि'ति पदद्वयमिदं, अत्ययं विवाहः, आवरणः शरीरसम्बन्धः देहपात इति यावत्. अत्ययं आत्ययये ति इति अत्ययाय समाहारद्वन्द्वः, तस्मात् आ इति वा मरणावधि विवाहादारभ्य मरणपर्य्यन्तं व्याप्य इत्यर्थः, कालेन वर्त्त-मानेन इति शेषः, सुदीर्घकालेन इति यावत्, 'परिणते उपचयं प्राप्ते प्रेमसारे उत्कृष्टप्रेम्णि स्थितं निहितम् इति' प्राचीनव्याख्यातारः। तस्य सुमानुषस्य जनस्य आर्य्यारूपस्येति शेषः, तत् प्रसिद्धम् एकम् अद्वितीयं केवलं निरवच्छिन्नमिति यावत्, भद्रं मङ्गलं कथमपि महता कष्टेन प्राप्यते लभ्यते अन्यत्र इति शेषः। तादृक्गुणाभ्योजनमेव प्रायेण भवति निरव-च्छिन्नमेव दुर्ल्लभमिति भावः। सुमानुषस्य इत्यादिषु अन्यव्याख्याता मतं यथा—"सुमानुषस्य दाम्पत्यस्य 'सुमानुषं तु दाम्पत्य'मिति अभिधानादिति। अत एव एतद्विषयविधुर-दाम्पत्यार्थकमिति विशेषणस्य व्यावृत्तिरपि। अन्ये तु 'अकारणात्सुखात् विशेषणस्यास्य दाम्पत्ये अर्थे सुमानुषस्येति अविवेकपरा पोनपोन्येन सोऽस्यो-

दुर्मु.। (उपसृत्य) जअदि जअदि देओ। (द)

[(द) जयति जयति देवः।]

राम। ब्रूहि यदुपलब्धम्। (ध)

दुर्मु.। उवत्थु(त्थु)अन्ति देअं पोरजाणवदा, विसुमरिदा म्ह महाराअदसरहस्स रामदेएण त्ति। (न)

[(न)। उपस्तुवन्ति देव पौरजानपदाः, विस्मारिता वयं महाराजदशरथस्य रामदेवेनेति।]

राम। अर्थवाद एषः, दोषन्तु मे कञ्चित् कथय, येन स प्रतिविधीयते। (प)

मानुषो येन इत्याहुः। केचित्तु सुमानुषस्य सौजन्यस्य इति आमनन्ति। कथमपि सर्वप्रकारेण अपि। प्राप्यं न प्रकर्षेण याच्यते, अभिलष्यते वा। हि यस्मात् सुमानुषस्य भद्रमेक मुख्यं प्राप्यते तस्मात् तेन स्वारवत्कटायमोत्पादपूर्वं आश्रय। अनर्थमङ्गीनि बन्धुमित्रहृदया नीति व्यायिनति भाव। प्रमत्तारं स्थितमित्यनेन मधुकटाहाभिमरसालफलसाहश्य मध्यते। अत्र फलविषयकौत्सुक्यमतिवादनादारम्भ उक्तः। तदुक्तम्—'औत्सुक्यमात्र-मारम्भः फललाभाय भूयसे' इति। प्राकरणम् आध्यादिवचनेन सर्वथा प्रियतमत्वख्यापनरूप कार्यं प्रति बहुतरकारणसङ्ग्रहात् समुच्चयोऽलङ्कारः। याद्वालोकोक्तित उक्तम्, तदुक्तम्—'याद्वालोकोक्तित मयां त्रसौ तौ गादन्यच्चपद्य" इति।

(न) उप इति। उपस्तुवन्ति प्रशंसन्ति। रामदेवेन देववत्प्रतिभायुक्तेन रामचन्द्रेण वयं महाराजदशरथस्य विस्मारिता विस्मृतिं प्रापिताः। महाराजरामचन्द्रस्य पालनगुणेन वयं भूतपूर्वं राजानं दशरथं मन्दोत्कण्ठाः कृता इति प्रकृतयः समामनन्ति। दशरथात् अपि समधिकगुणशाली श्रीराम इत्यर्थः। दशरथस्येति 'अधीगर्थदयेषां कर्मणि' इति षष्ठी। दशरथापेक्षया श्रीरामस्य गुणाधिक्यस्य व्यञ्जनाद् व्यञ्जनो व्यतिरेकालङ्कारः।

(प) अर्थवाद इति। अर्थवादः अर्थस्य गुणस्य वादः कथनम्, प्रशंसा इत्यर्थः। 'अर्थवादः प्रशंसा च श्लोकमोक्षास्तुतिर्नुतिः" इति हलायुधः। यद्वा प्रशंसानिन्दान्यतरस्य वादः कथनमर्थवादः। तथाचोक्तं पूर्वमीमांसायां भट्टैः—'प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः" इति। स तु स्तुत्यर्थवादत्वेन निन्दार्थवादत्वेन च द्विविधः, अत्र स्तुत्यर्थवादस्य ग्रहणम्। दोषम् अपराधं, राज्यपालने त्रुटिमित्यर्थः। येन दोषकथनेन, दोषं विदित[illegible]तत्, सः दोषः प्रतिविधीयते प्रतिक्रियते। स्तवनेन ज्ञानाभावात् अज्ञानतामात्र[illegible]प्-नाशिति भावः।

दुर्मु॰ । (साशङ्कम्) सुणादु देवो । (कर्णे एवमेवम्) (फ)

[(फ) शृणोतु देव. ।]

रामः । अहह ! तीव्रसंवेगो वाग्वज्रः ! (इति मूर्च्छति) (ब)

दुर्मु॰ । आस्ससदु देवो । (भ)

[(भ) आश्वसितु देवः ।]

राम. । (आश्व) (म)

हा हा धिक् परगृहवासदूषणं यद्-
वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत्तत् पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् * ॥ ४०

[४० । हा हा धिक्, वैदेह्याः यत् परगृहवासदूषणम् अद्भुतैः उपायैः प्रशमितं, तत् एतत् दैवदुर्विपाकात् आलर्क विषमिव सर्वतः प्रसृप्तम्, इत्यन्वयः ।]

(फ) कर्णे इति । कर्णे एवमेवमिति कविवचनम् । कर्णे श्रोत्रसमीपे मुखमुपनीय । एवमेव प्रकारेण कथयति । किमिति 'रावणालये एकाकिनी युवती सीता बहुदिनमवस्थिता, अतः दोषावहसम्भावनायामपि सा च हृदयात् महाराजरामचन्द्रेण परिगृहीता' इत्यादिरूपं किञ्चित् इति फलितार्थः । अन्यः कोऽपि मा शृणुयादिति आशङ्कया कर्णोक्तिः । उक्तं च नाटकादौ 'अयस्ववनेन विना यः पश्चात् मात्वा प्रकाशते । कर्णे एवमित्युक्त्वा नाट्यकर्म प्रयुज्यते ॥' इति ।

(ब) अहह इति । अहह इति खेदातिशयसूचकमव्ययम् । तीव्रः प्रचण्डः असहनीय इति यावत्, संवेगः पतनवेगः यस्य सः । वाग्वज्रः वाक् एव वज्रः, वाग्रूपाशनिः, यद्वा वाक् वज्र इव ।

(भ) आश्वस इति । आश्वस चैतन्य लभ्य । अत्रेदमवधेयम्—'आश्वसितु, समाश्वसिहि' इत्याद्युक्तिः एव मूर्च्छितस्य स आश्वासप्रदानोपयं इत्याद्यप्रयत्नं । अतः सोपसर्गेभ्यः श्वसधातोः लोटि प्रयोगानन्तरमेव चैतन्यप्राप्तिः सर्वत्र दृश्यते इति ।

(४०) हा इति । हा इति खेदे अव्ययं, द्वैते द्विरुक्तिः । कष्टमित्यर्थः । वैदेह्याः सीतायाः यत् परगृहवासदूषणं परस्य गृहे रावणगृहे वसतिरिति वा, रावणस्य इत्यर्थः, यद्वा आत्मनि अदायापिनिति यावत्, आलः अलर्कस्य इव जातम् आलर्कं इति शेषः, तेन दूषणं

---

* प्रसृतमिति क्वचित् पाठः ।

तत् किमत्र मन्दभाग्यः करोमि । (विमृश्य सकरुणम्) अथवा किमन्यत् ।—(म)

सतां केनापि कार्य्येण लोकस्याराधनं व्रतम् ।
यत् पूरितं [जितं] हि तातेन माञ्च प्राणांश्च मुञ्चता ॥४१

[४१ । केनापि कार्य्येण लोकस्य आराधनं सतां व्रतम् । तातेन मां प्राणांश्च मुञ्चता यत् पूरितम् हि, इत्यन्वयः]

दोषं सकलङ्कमिति यावत् । यद्यपि विश्वम्भरे उपायैः अग्निपरीक्षादिभिः साधने, प्रशमितं परिहृतं दूरोत्सारितमित्यर्थः । एतावता रावणगृहे वासजनित कौलीनं तावत् सर्वलोकसमक्षं अग्निपरीक्षया निवारितम् इति भावः । तदेतत् परगृहवासदूषणं दैव-दुर्विपाकात् दैवस्य दुरदृष्टस्य दुर्विपाकात् प्रतिकूलपरिणामात् अलर्कस्य चित्रकुक्कुरस्य इव इति पाठस्य तात्पर्य्यम् 'अलर्की धवलार्के स्यात् रोगोन्मादितकुक्कुरे' इति मेदिनी । विषमिव उन्मादकमिव पुनरपि भूयोऽपि सर्वत समन्तात् सर्वत्र इत्यर्थः, प्रसृतं परिव्याप्तम् । यथा कदाचित् शरीरप्रविष्टं अलर्कविषं तदानीं मन्त्रौषधादिना प्रशमितमपि दुरदृष्ट-वशात् कालान्तरे दारुणविकाररूपेण प्रकाशं प्रसर्पति तथा वैदेहीसम्बन्धि परगृहवास-दूषणमग्निपरीक्षया तदानीं निवारितमपि दुर्दैवविपाकात् पुनः पौरजानपदेषु विसृतिं प्राप्त-मिति भावः । तत्र परगृहवासदूषणं अलर्कविषमिव इत्यादि प्रत्ययात् उपमालङ्कारः । प्रहर्षिणी वृत्तम् ।

(म) तदिति तत् तस्मात् किमत्र मन्दभाग्येन सीताया परित्यक्तुमशक्यत्वात्, प्रजानुरञ्जनस्य च आवश्यकत्वात् अवश्यकरणीयत्वात् एतदुभयमध्ये किं करोमि इति भावः । विमृश्य विचिन्त्य । सकरुणं सखेदम् किमन्यत् अन्यत् किं करोमि —सीतापरित्याग एव मत्पक्षे श्रेयान् इति आशयः ।

(४१) जानकीपरित्यागरूपस्याश्रयणं औचित्यानुसारं दर्शयति—सतामिति । केनापि अनि-र्वचनीयेन दुष्करेणापि इत्यर्थः । स्वाभीष्टजनत्यागेन जानकीपरित्यागरूपेण इति भावः, कार्य्येण कर्म्मणा लोकस्य जनस्य प्रजानामिति यावत् कर्म्मणि षष्ठी । आराधनं तोषणं लोकस्य प्रीतिजनकव्यापार इत्यर्थः । सतां साधूनां, कर्त्तरि षष्ठी । व्रतं नियमः अवश्य-करणीयं कर्म्म । हि यतः हि तातेन पित्रा दशरथेन मां च प्राणांश्च जीवनञ्च 'नपुंसकम्-नपुंसकेन' इत्येकशेषाभावः, बहुवचनम् । मुञ्चता त्यजता यत् व्रतं लोकाराधनरूपमिति यावत्, पूरितं परिसमापितम् । पूर्व्वं प्रतिश्रुतमङ्गीकृतं च कैकेय्यै वरद्वयं सत्यरक्षणार्थं मां प्रजानामनुरञ्जनार्थं [illegible]

सम्यक्तोव भगवता वशिष्ठेन सन्दिष्टम् । अपिच—(१)

यत् सावित्रैर्दीपितं भूमिपालै-
लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त धिङ्मामधन्यम् ॥ ४२ ॥

[४२ । लोकश्रेष्ठैः सावित्रैः भूमिपालैः यत् साधु शुद्धं चरित्रं दीपितम् । मत्सम्बन्धात् चेदस्मिन् कश्मला किंवदन्ती स्यात् हन्त अधन्यं मां धिक्, इत्यन्वयः ।]

हा देवि देवयजनसम्भवे ! हा स्वजन्मानुग्रहपवित्रीकृतवसुन्धरे ! हा जनकवंशनन्दिनि ! हा पावकवशिष्ठारुन्धतीप्रशस्तशीलशालिनि !

प्रियतरोऽप्ययम् अपत्ये निर्वासित, महिरस्तं प्राणाश्च तेन त्यक्ता अतो मया प्रजानामनुरञ्जनार्थं पतिव्रता सीता वने विसृज्य तातेनाद्यापितव्रतमेव अनुचरिष्यते इति फलितम् । अत्र तातस्य अपत्यत्यागेन प्राणपरित्यागेन च प्रजारञ्जनरूपविशेषेणैव साधुसामान्यानां येन केनापि प्रजारञ्जनरूपस्य सामान्यस्य समर्थनात् विशेषेण सामान्यसमर्थनरूप अर्थान्तरन्यासः । साधुसामान्यानां सर्वथा लोकाराधनं कर्तव्यमिति सामान्यादप्रस्तुतात् "मया सीतापरित्यागेनापि लोकाराधनं कर्तव्यम्" इति विशेषस्य प्रस्तुतस्य गम्यत्वात् अप्रस्तुतप्रशंसापि च । एकस्या लोपनक्रियायाः कर्तृत्वाव्यम्न न मानात माबाषत्य अयो प्रस्तुतपदार्थयोरन्वयात् तुल्ययोगिता चेति सापेक्षत्वात् सङ्करः ।

(१) सीतापरित्यागविषये युक्त्यन्तरमाह—सम्यगिति । सम्यक्त्वं च अधुना एव, न तु बहुपूर्वेण विस्मृतिमेव इति भावः । भगवता वशिष्ठेन कुलगुरुणा इति यावत्, सन्दिष्टम् आज्ञप्तम् अष्टावक्रमुखेन इति भावः, 'युक्तः प्रजानामनुरञ्जने स्याः' इति शेषः । सीतापरित्यागे अयमपि उपदेशः प्रमाणमित्यर्थः । अपिच इति । अस्मिन् विषये अस्ति च युक्त्यन्तरम् इत्यर्थः ।

(४२) किं तत् युक्त्यन्तरमित्यत आह—यदिति । लोकश्रेष्ठैः, लोकेषु श्रेष्ठैः, प्रशस्ततमैः । एतेन विद्या उक्ता । सावित्रैः, सवितुरपत्यानि पुमांसः इति सावित्राः तैः, सूर्यवंशीयैः । 'तस्यापत्यम्' इत्यण्प्रत्ययः । अनेन अभिजनम् उक्तम् । भूमिपालैः भूमिं पालयन्ति ये ते, तैः, अर्थवद् । राजभिः । एतेन अवश्यम्भोगभूमिपालनाममहत्त्वमुक्तम् । यत् साधु यत् यथा साधु इति दीपितमिति क्रियाया विशेषणम्, सम्यक् इत्यर्थः । शुद्धं निष्कलङ्कं चरित्रं शुद्धं दीपितम् उज्ज्वलीकृतम् । मत्सम्बन्धात् मत्सम्पर्कात् अस्मिन् कुले मम जायापरिग्रहात् इति यावत् । चेत् यदि अस्मिन् वंशे इत्यर्थे, कश्मला मलिना निन्दनीया इत्यर्थः, 'कश्मलं मलिनं कार्यं मलीमसमुदाहृत'मिति हलायुधः । अमरसिंहेन कश्मलशब्दः खलु मोहार्थवे तथा विशेष्यनिघ्नत्वे च दर्शितः, न तु विशेषणत्वे मलिनार्थत्वे च तथा—'मूर्च्छा तु कश्मलं मोहः ।' इति । किंवदन्ती लोकापवादः स्यात् । हन्त खेदे, तर्हि अधन्यं दुर्भाग्यं मां धिक् । मम कारणात् यदि पवित्रवंशेऽस्मिन् अपवादः स्यात्, तर्हि सर्वथा शोच्योऽस्मि इति भावः । अत्र सावित्रैरित्यादिविशेषणानां साभिप्रायकतया परिकरालङ्कारः ; शालिनीछन्दः—'शालिनी मतौ गौ' इति लक्षणात् । हन्त धिक् मामधन्यमित्यत्र विशेषणार्थं च समासभावस्य पुनरागमनात् समाप्तपुनरात्तमिति केचित् । अस्तु निन्दार्थं निन्दाविषयतया अधन्यस्य मामकर्मीकरणात् कामविरहाद्युपहारीऔचित्यात् न समाप्तिः ।

हा रामैकजीविते ! हा महारण्यवासप्रियसखि ! हा तातप्रिये ! हा स्तोकप्रियवादिनि ! कथमेवंविधायास्तवायमीदृशः परिणामः ! (ख)

(ख) एवं सीतापरित्याग एव अधुना कर्तव्य इति स्थिरीकृत्य शोकोदयात् विलपति— हा देवीत्यादि : देवीत्यनेन सतो निर्दोषत्वं सूच्यते। उत्पत्तिदोषोऽपि नास्ति इत्याह— देवयजनसंभवे इति। देवा इज्यन्ते अस्मिन्निति देवयजनं यज्ञस्थलं तस्मात् सम्भवः उत्पत्तिर्यस्याः सा, तत्सम्बोधनम्। सीता स्वोत्पत्तिभूमिरपि शुचिजननीत्याह—स्वजन्मेति। स्वजन्म एव अनुग्रहः तेन पवित्रीकृता वसुन्धरा यया सा, तत्सम्बुद्धौ। या खलु पृथिव्यां जन्म परिगृह्य वसुधां पावितवती इत्यर्थः। सम्पर्कवंशदोषोऽपि नास्तीत्याह— जनकेति। जनकवंशस्य नन्दिनी आनन्ददायी तत्सम्बुद्धौ। जनकवंशसाधवत् सर्वथा माननीयः, स इव नन्दिनीत्यनेन औरसकन्यापेक्षया अभिमतेति व्यज्यते। गुरुदेवताभिमतेत्याह— पावकवसिष्ठेति। पावकश्च वसिष्ठश्च अरुन्धती च पावकवसिष्ठारुन्धत्यः, ताभिः प्रशस्तं प्रशंसितं यत् शीलं स्वभावः, तेन शालते शोभते इति णिनिः। अग्निदैवतेन अग्निपरीक्षया अरुन्धत्या च या प्रशंसिता, सा हि पतिव्रताशिरोमणिः इत्यत्र नास्ति कोऽपि सन्देह इति भावः। तदिदमाह— रामैकजीविते इति। राम एव एकः अद्वितीयः जीवितं जीवनं यस्याः सा, रामजीवने इत्यर्थः। अनेन रावणगृहवासमपि दूरान्तरितमिति व्यज्यते। रामस्य रावणकारागृहवासविरहवेदनां स्मृत्वापि, किन्तु अनुरागेण प्रकटितमित्याह—महारण्येति। महारण्यवासेऽपि सहचारिणीत्यर्थः। या हि वनवासकाले मम दुःखार्थं विरहासहनतया अनायासकालेऽपि स्वयमेव मे सहचारिणी अभूत्, तामिदानीं परित्यजामीति को विधिः इत्यर्थः। "प्रियसखि"त्यनेन निर्वन्धरीकरणादिव्याख्यायं, सखीत्यनेन पत्नीत्वमपुत्रत्वमावाप्य नाशीकृतं, किन्तु सुहृदं सहचरामपि मानत्वमेवेति, 'समानं ख्यायते इति सखा' इति व्युत्पत्तेः समानकक्षामिदं रामापेक्षया प्राधान्यमाप, 'अपरश्च गमिष्यामि अग्रतो कुशकण्टकान्' इत्युक्तत्वात्। इति वीरराघवः॥ सीतापरित्यागेन परलोके दशरथोऽपि असन्तुष्टो भविष्यतीति आह—तातप्रियेति। तातस्य प्रिये अभिमते, 'वधूचतुष्केऽपि' इत्यादि वक्ष्यमाणवचनैरिति भावः। पितृप्रीतिकारिणीत्यर्थः। स्तोकप्रियवादिनि स्तोकं मितम् अल्पमित्यर्थः, प्रियं प्रीतिकरं वदितुं शीलं यस्याः सा। निमित्तविशेषाभावेऽपि कथम् एवंविधायाः यथाख्यातगुणवत्याः सर्वथा निर्दोषायाः इत्यर्थः, ईदृशः शोभनः, परिणामः दशाविपाकः, तथा त्रिलोकप्रसिद्धरिहायम्. परिणामः अतीव हृदयविदारकः अनुचितश्चानुरूपश्च इति भावः। अत्र शीलादिविशेषणपदानाम् कर्तृनिर्देशनात् परिकरोऽलङ्कारः तदुक्तं—'विशेषणैः साभिप्रायैः परिकरो मतः' इति।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ४३॥

[४३। त्वया जगन्ति पुण्यानि, जनोक्तय. त्वयि अपुण्याः। त्वया लोकाः नाथवन्तः, त्वम् अनाथा विपत्स्यसे, इत्यन्वय.।]

[दुर्मुखं प्रति) दुर्मुख, ब्रूहि लक्ष्मणम्, एष ते नूतनो राजा रामः समाज्ञापयति। कर्णे एवमेवम्) (ख)

---

(४३) त्वया इति। त्वया करणभूतया जगन्ति भुवनानि पुण्यानि पुण्यवन्ति पवित्राणि इत्यर्थः, त्वच्चरणस्पर्शादिना इति शेषः। 'सतीनां पादरजसा सद्यः पूता वसुन्धरा' इत्युक्तेः। मत्वर्थीयाच्प्रत्ययः। किन्तु जनोक्तयः जनानाम् लोकानाम् उक्तयः जल्पनानि त्वयि त्वद्विषये अपुण्याः अपवित्राः अश्राव्याः इति यावत्। यत्तु कल्पनयापि सम्भावयितुं नोचितं, तत्तु भाग्यविपर्ययात् सङ्घटितम् इति भावः। जनानामुक्तय इति षष्ठी-बहुवचनेन विषये कश्चित् एको दुर्जन एव प्रलपति इति न, किन्तु बहुजना एवं वदन्तीति गम्यते। बहुवचने प्रमाणं तु—'रे रे पौरजानपदा, न खलु भवतां देव्या. स्थाने वह्नेरपि-मतम्' इत्यादि वक्ष्यमाणरामवचनम्। तेऽपि कदाचिदित्युक्त्वा विरमन्तीत्यपि न, बहुशो वदन्तीति च बहुवचनार्थः। नाथवन्त इति। तथा त्वया लोकाः नाथवन्तः अधिपति-मन्तिनः सहायवन्त इति यावत्, त्वत्तोऽपत्यात् ममैव लोकानां ईश्वरत्वार्थः। 'अथ लोकेश्वरो लोकोत्तरकस्य पुरे सत । शुभक्षेमे इत्योत्पाते' इत्याद्युक्तत्वात्। चाश्चैव भगवान् इतिवत् अभेदे तृतीया। यद्वा राज्यपालकत्वात् अहं लोकानामधीशः त्वमपि तेषाम् ईश्वरी। किं वा त्वं मयि आत्मतया अवस्थिता, अहं च त्वयि तथावस्थितः। उक्तं च हनुमता—'अस्या देव्या मनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम्। तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति॥' इति। तथाच लोकिकैरपि प्रतिपन्नत्वात् लोकनाथत्वं अहीन-मित्यर्थः। किन्तु एवंविधा त्वम् अनाथा अशरणा रक्षकरहितेति यावत्, सती विपत्स्यसे विपन्ना भविष्यसि। रामचन्द्रेण सीताया वने निर्वासनस्य मनसि निर्धारितत्वात् 'अनाथा विपत्स्यसे' इत्युक्तम्। किञ्च पूर्ववियोगोऽपि रावणापहृतत्वात् कृत्रिमः इति न त्वयि तदा त्वं विपन्ना, अयं तु वियोगस्तु सौमित्रेरपि परित्यागविषये मम प्रिये स्मारि मे' इति लक्ष्मणायोक्त्या पूर्वोपायविरहितत्वात् इत. परमेव विपन्ना भविष्यसि इति व्यज्यते। अत्र विरोधाभासोऽलङ्कारः। विभावनालङ्कार इति प्राचीनाः, 'क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना' इति लक्षणात्, तन्न हृदयङ्गमं। अत्र अनुष्टुप् वृत्तम्। अत्र प्रश्नाद्यनुपस्थितौ अनुक्रान्तश्लोकः। इत्यलं प्रसङ्गेन।

दुर्मु०। कधं दाणिं अग्गिपरिसुद्धाए गब्भपरिट्ठिदपवित्त-रहुउलसन्ताणाए देईए, दुज्जणवअणादो एव्वं अण्णहा अज्झवसिदं देवेण ?। (अ)

[(अ) कथमिदानीम् अग्निपरिशुद्धाया गर्भपरिस्थितपवित्ररघुकुलसन्तानाया देव्या दुर्जनवचनादेवमन्यथाध्यवसितं देवेन ? इति सम्।]

राम। शान्तम्! कथं दुर्जनाः पौरजानपदाः ? (क)

इक्ष्वाकुवंशोऽभिमतः प्रजानां

जातञ्च दैवाद्वचनीयबीजम् ।

यच्चाद्भुतं कर्म विशुद्धिकाले

प्रत्येतु कस्तद्भुवि दूरवृत्तम् ॥ ४४ ॥

[४४। इक्ष्वाकुवंश प्रजानाम् अभिमत, दैवात् वचनीयबीजं जातं, विशुद्धिकाले यच्च अद्भुतं कर्म दूरवृत्तं, तत् भुवि कः प्रत्येतु, इत्यन्वय]

(अ) न हीति। नूहि कथय। ननु अदृष्टपूर्व्वाश्च तपूर्व्व कर्म्मा इत्यर्थः। अ. खलु एवमपि परीक्षया निर्द्दोषित न निर्णीता अतोऽसदपवादे नश्यावनमननकाशा तद्दुतजीविता मामेष्यो ऽपि प्रियतमाम् आसन्नप्रसवा यत् कस्यचित् वचनेन निर्व्वासयितुमर्हति च नूतन एवेति। एवंविधो व्यापार सर्व्वथा अश्रुतपूर्व्व. अदृष्टपरश्च इत्याशय। एवमेवमिति। किञ्चित् पूर्व्वं सीतया तपोवनदर्शनार्थम् आग्रह कृत, तत्प्रदर्शनव्याजेन तस्याः वनमार्ग विधाय अचिरमानन्दयामित्यर्थं।

(अ) कथमिति। कथमिदानीम् अधुना अग्निपरिशुद्धाया. अग्निना परिशुद्धायाः पवित्रितायाः गर्भपरिस्थितपवित्ररघुकुलसन्तानाया गर्भे परिस्थितः प्रकाशित पवित्रः रघुकुलसन्तानो यस्या तस्या, एतस्यामिदानीं प्राणित्यागानिष्टपातसम्भवात् गुरुतरपातक मेव स्यादिति भाव। देव्या, दुर्जनवचनात् दुष्टा जना इति दुर्जना तेषां वचनात् अपवादोक्तेः। एवम् अनार्य्य गर्हितम् अनायुष्मतीचितमित्यर्थः। देवेन महाराजेन। अध्यवसितं निश्चितम् अनुष्ठितम् इति यावत्।

(क) शान्तमिति। शान्त विरतं भवतु इति शेष,। कथं केन प्रकारेण पौरजानपदाः दुर्जना आख्यायन्ते इति भाव। दुर्जना भवन्तीत्यर्थ, पौरजानपदान् प्रति दुर्जनत्वारोपो न कार्य्य इति भाव:।

(४४) पौरजानपदानामदुर्जनत्वं प्रतिपादयति—इक्ष्वाकु इति। इक्ष्वाकु प्रजानां

---

* अस्माकं इति विद्यासागर.।

तद्गच्छ ।

दुर्मु । हा देव ! (इति निष्क्रान्तः ।) (ख)

[(ख) । हा देवि । इति सम् ।]

राम. । हा कष्टमतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः । (छ)

शैशवात् प्रभृति पोषितां प्रियां
सौहृदादपृथगाशयामिमाम् ।
छद्मना परिददामि मृत्यवे
सौनिको गृहशकुन्तिकामिव ॥ ४५ ॥

[४५ । शैशवात् प्रभृति पोषितां सौहृदात् अपृथगाशयाम् इमां प्रियां सौनिकः गृहशकुन्तिकामिव छद्मना मृत्यवे परिददामि, इत्यन्वय ।]

प्रकृतीनां कर्त्तरि षष्ठी । अभिमत प्रिय, गजत्वेन अभीष्ट इत्यर्थ, 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमाने क्त । इक्ष्वाकुवंश्येषु नृपतिषु प्रजा हि चिरमतीवानुरक्ता, अतो मां प्रति विवेकवशात् अपवादं घोषयन्तीति न सम्भवतीति भाव: । तर्हि कथमेवं ते जनश्रुतिजाता इति । दैवात् दुरदृष्टवशात् अपनोदयोग्य अपनीयका निन्दाया: बीज निमित्त, राक्षसगृहावस्थानरूप निन्दाकारणमिति यावत् । जातं स घटितम् । ननु जनकजाया: अग्नौ विशोध्य परिगृहीतत्वात् राक्षसगृहस्थितिनिमित्तं दूषण परिहृतं, तत्कथमिदानीम् अपवादस्य अवकाश इत्यत आह —यदिति । विशुद्धिकाले अग्निपरीक्षया निर्दोषत्वप्रतिपादनसमये यत् अद्भुतं लोकोत्तरं कर्म्म प्रज्वलितानले पतिताया: सीताया, दैवात्मनपि न दग्धमिति आश्चर्य्यं जातमित्यर्थ., दूरस्थ अतिदूरवर्त्तिन्या लङ्काया सम्पन्नं तत् अद्भुतं कर्म्म इत्यर्थ: । इह पृथिव्या क: को जन: प्रत्येतु विश्वसितु, न कोऽपि इत्यर्थ: । यदि आत्मन: पौरजनस्य विश्वासस्थापने कुण्ठिता भवन्ति, अतीव नैते अनुयोज्या: इति भाव: । विश्वासस्य अभावं प्रति दूरस्थत्वस्य पदार्थस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कार: । इन्द्रवज्रावृत्तम् ।

(छ) हा कष्टमिति । अतिबीभत्सकर्मा अतिबीभत्सं अतिघृणितं निन्दनीयमिति यावत् अकारणपत्नीपरित्यागादिति भाव:, कर्म आचरणं यस्य स:, जुगुप्सिताचरण इत्यर्थ: । नृशंस: नॄन् लोकान् शंसति हिनस्तीति, क्रूर: इत्यर्थ:, संवृत्त: सञ्जात: ।

(४५) आत्म पर्यवसितां विडम्बनां—शैशवादिति । शैशवात् बाल्यात् आबाल्यकालादपि, प्रभृतियोगयोगे पञ्चमी । पोषितां वर्द्धितां प्रतिपालितान् इत्यर्थ: । अतीव 'विश्वस्तोऽपि

---

* अपृथगाश्रयामिति पाठान्तरम् ।   † सौनिके इति क्वचित् पाठः ।

तत् किमित्यस्पर्शनीयः पातकी देवीं दूषयामि । (ख)

अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥४६ ॥

[४६। अयि मुग्धे । अपूर्वकर्मचाण्डालं मां विमुञ्च, चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमं श्रिता असि, इत्यन्वयः ।]

च ' यदीद स्वयं हि तुमकाम्नतम्' इति न्यायः कार्थ्यते । ननु कामियत्वं त्याज्यत्वमित्यवाह— प्रियामिति । प्रियां मनोरमामित्यर्थः । ननु तथापि दोषप्रसक्तौ का गतिरित्यवाह— अपृथगाश्रयामिति । अपृथगाश्रयां न पृथक् भिन्न आश्रय. अवलम्बन यस्याः तां, मदेक- शरणामित्यर्थः । ननु तथापि मनोऽभिरम्यत इत्यत आह—मोहशादिति । मोहशात् सुहृदस्य भावः सौहृद तस्मात मोत्वतिरेकात्, प्रणयबाहुल्यात् एकस्यामेव स्थितामित्यर्थः । इमां दृश्यमानां प्राणेभ्योऽपि प्रियतमां दयितामित्यर्थः, इमामिति इदम्पदेन तात्कालिकाम्ल- पीनोत्थितराजकायादिकं परामृश्यते । सौनिक. वैतंसिक. मांसविक्रयीत्यर्थः, 'वैतंसिकः सौनिकः स्यात् कौटिको मांसविक्रयी' इति कोषः । गृहजशकुनिकाम्, अनुकम्पायां कन् । गृहपालितपक्षिणीमिव, पोषिताम् अपृथगाश्रयामिति विशेषणद्वय शकुनिकायामपि योज्यम । कृपणा कपटतया, सीताविलपितवननप्रस्थापनरूपव्याजेन इत्यर्थः । मृत्यवे सुपहराणि अर्पयामि । परिददानि अस्याः नाश साधयामि इत्यर्थः । यथा कश्चित् मांसविक्रेता सौहृदात् पालितां निजगृहे विश्वस्ता पक्षिणीम् अर्थलोभात् कपटेन निहत्य विक्रीणीते, तथाहमपि प्रजारञ्जनलोभिष्णुः सौहृदात् पोषिता मदेकशरणा स्वगृहपालितां प्रियां दयितां तपोवन- दर्शनव्याजेन निहन्तुमुद्युक्तोऽस्मि । अनन्यादिकबहुलदृढे महारण्ये निर्वासनात् अस्याः मृत्युरवश्यम्भावीति परमपतिव्रताया ईदृशनरघटनव्यापारात् को नाम क्रूरोऽस्ति इति तात्पर्यार्थः । यस्मिन् सौनिकस्य सीतायां गृहजशकुनिकायाश्च साम्यमाह. प्रत्यक्षात् उपमालङ्कारः । सौहृदात् मम पोषितत्वादिधर्मेण अत्यन्ते अधमा हानिन विरोधात् तद्व्याजाप्रापि- [illegible] च विरोधाभासो अलङ्कृतो रघोदात्तम् ।

(ख) तदिति । अस्पर्शनीयः स्पृष्टुमयोग्यः पातकी उक्तवर्णितरीत्याऽऽत्मनः पापयुक्तः अहम् देवीं देवस्त्रीयां देवीमत् प्रियपत्नीमित्यर्थः, आत्मनौ दूषयामि स्पर्शेन अपवित्रां करोमीति । देवीपदेन सीतायाः सर्वथा पवित्रत्वं परित्यागानर्हत्वञ्च व्यज्यते ।

(ग) सीतायाः इति । स्व ं मनैः मनैः । उत्तमम उद्याम्य ।

(४६) अपूर्वं इति । अयि मुग्धे सरले अपूर्वकर्मचाण्डालम् अपूर्वं न [illegible] कर्मणा च अपूर्वैः कर्मभिः [illegible] तत्तुल्यं मिथ्या एव तात्पर्यः । कर्मणा इति पदेन न तु जात्या चाण्डाल [illegible] त्वमी ।

(उत्थाय) । हन्त ! विपर्य्यस्तः सम्प्रति जीवलोकः, अद्य पर्य्यवसितं जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्, असारः संसारः, कष्टप्रायं शरीरम् । अशरणोऽस्मि, किं करोमि, का गतिः, क्व गच्छामि । अथवा (ख)—

अपूर्वेति पदेन रत्नाकरमधुवादिव्याहत्ति । न ते कदाचित् कस्यचित् वचनमनुसरन्तः जीवाराधनमग्रतया यशोलिप्सया च ईदृशीं पतिव्रतां सहधर्मिणीम् हिंस्रकुलसङ्कुलगहने परित्यक्तुम् उद्यता आसन् इति भावः । मुग्ध इति पदेन सीतायाः सज्जनदुर्जनविवेकराहित्य सूच्यते । ईदृश मां विमुच्य परित्यज । नाहं तव योग्य इति फलितम् । कथमित्याह—चन्दनशाखाया इत्यादि । तु चन्दनशाखायाः चन्दनतरुशमेव प्रकृत्यादिभ्यश्चोपसंख्यानमिति तृतीया । दुर्विपाकं दुष्टो विपाकः परिणामफलं मरणमिति यावत् यस्य तम् । आपातत प्रीतिप्रदतया प्रतीयमानमपि परिणामे निरतिशयक्लेशप्रदमित्यर्थः । विषद्रुम विषवृक्षं श्रिता अवलम्बितवती असि । अतीतार्थेन अद्यापि न मुञ्चसीति व्यज्यते । यथा कश्चित् सरलो जन मदवलम्बनेन सुतीक्ष्णया विषज्वालया मरणमप्याप्स्यति एव विषं विषवृक्षं चलसारोऽयमिति विश्वस्य आश्रयति तथा त्वमपि सज्जनं मत्त्वा ईदृशोऽयमिति विभाव्य निष्ठुरतममतिदुर्जनं मां पतित्वेन प्राप्तवतीत्यर्थः । अत्र चन्दनशाखाया अवलम्बनस्य इव सज्जनशमेव दुःखं नाम्रय क्रूत इति बिम्बप्रतिबिम्बभावबोधनात् निदर्शनालङ्कार । अपूर्वकर्मचाण्डालमस्य विशेषणमतया विनोपमहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम् । पथ्यावक्त्रं वृत्तम् ।

(ख) हन्त इति । हन्त खेदार्थे अव्ययम् । सम्प्रति अधुना सीताविरहे इति यावत्, जीवलोक जीवानां प्राणिनां जगत् संसार इदं प्राणिसमार्थं भूतलमित्यर्थः, विपर्यस्तः विपरीतः सतत उत्क्षिप्त इति यावत् । हि यतः मया सह एकभावस्थानेन परमसुखमनुभवन्ति स्म, ते हि नितरां शान्तौ त्वद्दर्शनेन सर्वथा दुःखितमनस्का भवेयुरित्यर्थः । अद्य सीताविरहे रात इति शेष, रामस्य जीवितप्रयोजनं जीवितेन प्राणधारणेन प्रयोजनं जीवनोद्देश्यमिति यावत्; यद्वा जीवितमेव प्रयोजनं पर्यवसितं परिसमाप्तम् । सीताविरहितं मम जीवितं निष्प्रयोजनं, सीतामयजीवितत्वात् तदभावे मम जीवननाशो भविष्यतीति भावः । अत एव मम अधुना जीर्णारण्यं नीरसविरसम्प्रायम् अरण्यमिव जगत् संसारः शून्यं शून्यमिव प्रतिभातीत्यर्थं । स तादृशितेः हि हि सकुलमतासङ्कुलं अरण्यमपि पञ्चवट्याः 'सर्वा ते दिवसा' इति रीत्या आनन्ददम्; तदभावे तु सम्पदमपि जीर्णारण्यमिवाभवः । असारः जगत् संसारः, न विद्यते सारः, उत्तममञ्जलसारः आशिः इति यावत्, सञ्जित् सः असिविरहित इति भावः । शरीरं कष्टप्रायं कष्टबहुलम् । कष्टमयमिति कथित् पाठः, तत्र

दुःखसंवेदनायैव रामे चैतन्यमर्पितम्
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ ४७ ॥

[४७ । दुःखसंवेदनाय एव रामे चैतन्यमर्पितम्, मर्मोपघातिभिः स्थिरैः प्राणैः वज्र-कीलायितम्, इत्यन्वयः ।]

हा अम्ब अरुन्धति ! हा भगवन्तौ वसिष्ठविश्वामित्रौ ! हा भगवन् पावक ! हा देवि भूतधात्रि ! हा तात जनक ! हा तात !

'ज्योत्स्नेव हिमदीधितेः' इत्युक्ता यथा चन्द्रस्य चन्द्रिकाभावे काङ्क्षावता तद्वत् भवेत्सर्वेति । अत पूर्ववत् 'सुखार्थं भरत गत', 'स्नातः भरत गत', इत्यादिवाक्य नाववाय इत्याह— अशरण्योऽस्मीति । अशरण नास्ति शरणं रक्षिता यस्य स अशरणाय इत्यर्थः । पूर्ववत् श्रेतुमनमादि कर्तव्यं नास्ति इत्याह—किं करोमीति । का गति न उपाय । अथ पूर्ववत् राज्यपालनादिकर्त्तव्यं प्राप्य नास्ति इत्याह—का गतिरिति । गम्यते इति गतिः इति प्राचीनव्याख्यानम् । किं वनमेव तत्र क गच्छामि किमरण्यं गच्छामि उत पातालविवरम्, किं वा मरणं गच्छामि इति विकल्पार्थम् । अतस्तत् कस्य सर्वोऽपि न सम्यक् इत्याह—अवधेयेति ।

(४७) दुःख इति । दुःखस्य एव संवेदनम् अनुभवः तस्मै केवलं क्लेशमनुभवितुमेव रामे दुरदृष्टे मयि चैतन्यम् आत्मा ज्ञानं वा, अर्पितम् आहितं विधिनेति शेषः । आहितं भवति 'रामाद्दयमभी वने वासः सीता नष्टा हिता हत । ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥' इत्युक्तरीत्या दुःखानुभवायैव चैतन्यमभूत् इति भावः । अन्येषां चैतन्यं तावत् दुःखमिश्रसुखानुभवाय, अन्यस्य दुःखमिश्रसुखानुभवाय, मम तु सुखासंमिश्रदुःखानुभवाय इति निष्कर्षार्थः । तर्हि मरणं गमिष्यामीति कल्पनान्तरमाह—मर्मोपघातिभिरिति । मर्मोपघातिभिः मर्म जीवस्थानं उपघ्नन्ति पीडयन्ति ये तैः, अधनुभवैरित्यर्थः, स्थिरैः कठिनैः अपसारयितुमशक्यैरपि निरन्तरं प्राणैः असुभिः वज्रकीलायितं वज्रकीलं पाषाण-घटितमिव, तेन इव आचरितम्, यथा हृदि निखातो वज्रकीलः न जातिमनुत्पाट्यति तन्न प्राणाः अपि तथा भूता, इमे हते प्राणापगम एव न वाम् इति भावः । अत्र पूर्वार्द्धे एवकारो-पादानात् अत्यावश्यकता, प्रतीते आत्माभिमानिनिश्चितोत्प्रेक्षालङ्कारः, उत्तरार्द्धे च उपमा वाक्य-कीलस्यानुमानालङ्कारः, अनयोः निरपेक्षत्वात् संसृष्टिः । पथ्यावक्त्रं वृत्तम् ।

(४८) हा अम्ब इति । हा खेदे, अम्ब मातः अरुन्धति वसिष्ठपत्नीत्यर्थः । अरुन्धतीतन-

---

* आर्पितम् आहितमिति क्वचित् पाठः । † इतीति पाठान्तरः ।

हा मातरः ! हा प्रियसख महाराज सुग्रीव ! हा सौम्य हनुमन् ! हा परमोपकारिन् लङ्काधिपते विभीषण ! हा सखि त्रिजटे ! मुषिताः स्थ परिभूताः स्थ रामहतकेन । (ग)

अथवा को नामाहमेतेषामाह्वाने ? (घ)

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥४८॥

[४८ । हि महात्मानः ते कृतघ्नेन दुरात्मना मया गृहीतनामानः पाप्मना स्पृश्यन्त इव मन्ये, इत्यन्वयः ।] ,

---

सीतापातिव्रत्यानुमोदनं न प्रमाणीकृतमिति भावः । हा भगवत्यौ वशिष्ठविश्वामित्रौ इति, भवतोर्ज्ञानं शक्तिमपि जना न पश्यन्तीति भावः । पावकेति, त्वयि प्रवेशोऽपि व्यर्थ इत्यर्थः । भूतधात्रीति, त्वत्सुतायामभिमिथ्यादोषवादिनो जनान् कथं बिभर्षि इति भावः । जनक इति ब्रह्मविन्तमस्य तवापि पुत्र्याः एवंविधोऽपवादः । तात इति । पश्य खलु तव आदरिण्याः स्नुषायाः परिणामम् । मातर इति, यत् सीतां यूयं यत्नेन अवेक्षध्वम्, तामहं परित्यजामि इति भावः । यस्याः कृते सुदूरस्थिता अपि यूयं सर्वदा व्याकुलाः, गर्भभरालसायास्तस्याः इदानीं वनविसर्जनं भविष्यति इति निष्कर्षः । सुग्रीव इति, तव प्राणपात-परिश्रमो निष्फल इति । विभीषण इति, तवापि मत्पक्षावलम्बनं परासम । हनुमन् इति, भवदीयः प्रयासोऽपि व्यर्थ इति भावः । त्रिजटे इति, तव सान्त्वनावाक्यं सर्वथा निरर्थकं संवृत्तम् । त्रिजटानाम राक्षसी अशोकवनसमये सीतायाः सान्त्वनाकारिणी आसीत् । मुषिताः वञ्चिताः, भूषिता इति पाठे उपहसनीयाः । परिभूताः तिरस्कृताः अवमानिता इति यावत् । सर्वैरेव युष्माभिः नितान्तमिन्यवचरित्रायाः सीतायाः प्रशंसा कृता, अधुना तस्याः एव चरितदोषापवादेन परित्यागात् सर्वेषामेव मिथ्यावादित्वं जातम्, अतो यूयं अवमानिता इत्यर्थः । रामहतकेन कुत्सितो राम इत्यर्थे 'कुत्सितानि कुत्सनैः' इति समासः । विशेष्यस्य पूर्वनिपातार्थमयमारम्भ इति काशिका ।

(घ) अथवा इति । एतेषां पूर्वोक्तानां सीतानुकूलपक्षपातिनाम् आह्वाने आकारणे को नाम अहं, सर्वथा अयोग्य इत्यर्थः, नामेति कुत्सायां 'नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने' इत्यमरः ।

(४८) अत्र हेतुमाह—ते हीति, हि यस्मात् महात्मानः महान् आत्मा स्वभावो येषां ते, पुण्यशीलाः वशिष्ठादयः, कृतघ्नेन, कृतं हन्ति इति मूलविभुजादित्वात् कः,

सोऽहं—

विस्रम्भादुरसि निपत्य लब्धनिद्रा-

मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम्।

आतङ्कस्फुरितकठोरगर्भगुर्वीं

क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि॥ ४९॥

[४९। निर्घृणः (सोऽहम्) विस्रम्भात् उरसि निपत्य लब्धनिद्रां गृहस्य शोभाम् आतङ्कस्फुरितकठोरगर्भगुर्वीं प्रियगृहिणीम् उन्मुच्य क्रव्याद्भ्यः बलिम् इव क्षिपामि, इत्यन्वयः]।

(सीतायाः पादौ शिरसि कृत्वा) देवि! देवि! अयं पश्चिमस्ते रामस्य शिरसि पादपङ्कजस्पर्शः। इति रोदिति। (ङ)

अकृतज्ञेन अधमाचीर्णतमप्रवासादिना इत्यर्थः। दुरात्मना क्रूरेण अपतितभार्यात्यागशीलेन इति यावत्, मया गृहीतनामानः गृहीतानि उच्चारितानि नामानि येषां ते तथोक्ताः, पाप्मना पापेन स्पृश्यन्ते संसृज्यन्ते सम्बध्यन्त इव इति मन्ये अहमिति शेषः। पापस्य मे कथनेन तत्-शब्देन महात्मनां तेषां नामाक्षराणां सम्पर्कात् तेऽपि महात्मानः पापसंसर्गः भवन्तीति मन्ये इति भावः। अत्र तत्पदप्रतिपाद्यानां वसिष्ठादीनां पापस्पर्शसम्भावनया इवशब्द-वत्त्वात् आभासाभिमानिनी क्रियोत्प्रेक्षालङ्कारः। मया गृहीतनामान इति पदार्थस्य विशेषणत्वया पापस्पर्शहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कार इति अनयोः सापेक्षत्वात् सङ्करः।

(४९) नामोच्चारणेन पापस्पृष्टत्वे हेतुमुपन्यस्यति—विस्रम्भादिति। निर्घृणः नास्ति घृणा करुणा यस्य सः निर्दय इत्यर्थः, 'कारुण्यं करुणा घृणा' इत्यमरः। सः अहम् इति पूर्वान्वयः। विस्रम्भात् विश्वासाधिक्यात्, अयं मे प्राणेभ्योऽपि प्रियतमः स्वामी, अतः सर्वथा निराशङ्कं स्थापयिष्यतीति आशात उरसि वक्षसि निपत्य निहिता लब्धनिद्रा लब्धा प्राप्ता निद्रा यया सा तां प्रसुप्तामित्यर्थः, गृहस्य भवनस्य संसारस्य इति यावत्, शोभां लक्ष्मीम्। शुभ धातो भिदादित्वादङ्, भिदादिरागृतिगणत्वात्, क्वचिदपि गुणो निपात्यते। यद्वा शोभयतीति शोभा, तस्मात् कर्तरि अच्, तत टाप्। आतङ्कस्फुरितकठोरगर्भगुर्वीम् आतङ्केन केनचित् दुःखेन महाग्निजनितदौर्बल्येन इत्यर्थः, अथवा आतङ्कोऽत्र स्वप्राणभूतरामपरित्यागजनितभयम् तेन स्फुरितः कम्पितः कठोरः पूर्णो यो गर्भस्तेन गुर्वी आसन्नप्रसवा आसन्नगमना इति यावत् ताम् आसन्नप्रसवां स्त्रीजनमात्रावस्थामिति भावः। प्रियगृहिणीं प्रियतमां भार्याम् उन्मुच्य परित्यज्य इति यावत्, क्रव्याद्भ्यः क्रव्यं मांसमदन्तीति विग्रहः। 'क्रव्ये च' इति विट्। मांसभोजिजन्तुभ्यः व्याघ्रादिभ्य इत्यर्थः। सम्प्रदाने चतुर्थी। बलिमिव उपहारमिव क्षिपामि अर्पयामि। एवमकृतज्ञेन मया उच्चारितनामानः पूतचरिताः वसिष्ठादयः किं न पापभाजो भवन्तीति भाव। सीतायां बलित्वाद्यारोपेण प्रयुक्तात् उपमालङ्कारः। प्रहर्षिणीवृत्तम्।

(ङ) शोभाया इति। कृत्वा अर्पयित्वा। अर्पयामि। रोदिति पृष्ठ क

(नेपथ्ये) अब्रह्मण्यम्, अब्रह्मण्यम्। (च)

रामः। ज्ञायतां भोः! किमेतत्? (छ)

(पुनर्नेपथ्ये) ऋषीणामुग्रतपसां यमुनातीरवासिनाम्।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः *॥ ५०॥

[५०। यमुनातीरवासिनाम् उग्रतपसाम् ऋषीणां स्तोमः लवणत्रासितः (सन्) त्रातारं त्वाम् उपस्थितः, इत्यन्वयः]।

रामः। आः! कथमद्यापि राक्षसत्रासः? तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्य लवणस्योन्मूलनाय शत्रुघ्नं प्रेषयामि। कतिचित् पदानि

अविमृश्यैवार्थं.। पदात् अस्मात् क्तिन्प्रत्ययः। रामस्य शिरो यशो, शिरसि इत्येन सम्बन्धः। शिरसि इत्यत्र शिरसा इति क्वचित् पाठः, तत्र कर्तरि तृतीया। ननु 'पतिरेको गुरुः स्त्रीणां' मित्यादिवचनात् रामस्य 'वयं पतिमस्ते' इत्याद्युक्तिः न समीचीना इति चेत्? सत्यं, तथापि, 'यदि नीचानि कर्मोपादेयु तान्यपि' इति वचनात् अत्रैव सीतायां महानुकम्पात्वात् तथैव रामेण शिरसा सीतापादपङ्कजमर्चः कृतः, अतो न दोषाय। अथवा प्रकारान्तरमप्यत्र समाधानम्, विसर्गोऽयं तत्त्वमीमांसयैव तथा रसमर्मरीप्रवृत्तिषु अनुसन्धेयः।

(च) नेपथ्य इति। नेपथ्ये यवनिकान्तराले। 'कुशीलवकुटुम्बस्य स्थली नेपथ्यमिष्यते', इत्यमरतिरस्करिणीतिरोहितनर्त्तनभूमिकापरिवर्तोपविष्टस्थानविशेष इत्यर्थः। अब्रह्मण्यम् ब्रह्मणे विप्राय हितम् ब्रह्मण्यम्, न ब्रह्मण्यम् अब्रह्मण्यं विप्राणामहितम्, उत्पात इत्यर्थः 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः। प्रकृते अवध्यस्य वधो न अत्र कोऽप्यर्थः। यथा अवध्या वधं न यान्ति तथा क्रियताम् इति अब्रह्मण्यशब्दस्य विवक्षितार्थः। दैन्यो विद्युक्तिः।

(छ) ज्ञायतामिति ज्ञायतां परिज्ञायतां अविकारं प्रकारान्तरमित्यर्थः, परिज्ञानाकुलितस्य उक्तिरियम्।

(५०) ऋषीणामिति। यमुनातीरवासिनां यमुनायाः कालिन्द्याः तीरे तटे वसन्ति ये तेषां यमुनातटवासिनाम् उग्रतपसाम् उग्रं घोरं तपः येषां तेषां दुश्चरतपोनिरतानां ऋषीणां मुनीनां स्तोमः समूहः, 'स्तोमः स्तोत्रेऽध्वरे वृन्दे' इत्यमरः। लवणत्रासितः लवणेन मधुतनयेन तन्नाम्ना राक्षसेन त्रासितः भीषितः सन् त्रातारं रक्षकं त्वाम् उपस्थित उपागतः। लवणराक्षसाद्दुरात्मनः रक्षितुं रामसमीपमृषिसङ्घ उपस्थित इति भावः।

(ज) आः इति। आः इति क्रोधव्यञ्जकमव्ययम्। 'आस्तु स्यात् कोपपीडयो' रित्यमरः। अद्यापि अधुनापि निःशेषितराक्षसकुलत्वादिति शेषः। यद्वा कथमत्र राक्षसत्रासोऽद्याप्यवशिष्टः, न केवलं सीताविरहदुःखमपि, किन्तु राक्षसभयं चेति सूचयत्यर्थः।

गत्वा पुनः प्रतिनिवृत्य) हा देवि! क्वेमेवंविधा गमिष्यसि। भगवति वसुन्धरे! श्लाघ्यां दुहितरमवेक्षस्व जानकीम्। (अ)

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम्।
यां [तां] देवयजने पुण्ये पुण्यशीलामजीजनः॥ ५१॥

[५१। हे जनकानां रघूणाञ्च कृत्स्नं गोत्रमङ्गलम्, पुण्यशीलां यां पुण्ये देवयजने अजीजन, इत्यन्वय।) (इति निष्क्रान्त.)

सीता। हा सोम्म अज्जउत्त! कहिं सि? (सहसोत्थाय) हद्धी हद्धी! दुस्सहविरहदहणविप्पलद्धाहं अज्जउत्तं आक्कन्दामि। हद्धी हद्धी! कधं एआइणीं मं पसुत्तं उज्झिअ अज्जउत्तो गदो, ता किं दाणिं एदं, भोदु, तस्स कुविस्सं जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिजणो? (आ)

[(आ) हा सौम्य आर्यपुत्र! क्वासि? हा धिक्, हा धिक्, दुःसहविरहदहनविप्र-लब्धाहम् आर्यपुत्रम् आक्रन्दामि। हा धिक् हा धिक्! कथमेकाकिनीं मां प्रसुप्तां उज्झित्वा आर्यपुत्रो गत तत् किमिदानीमेतत्? भवतु, तस्मै कोपिष्यामि यदि त प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजन ?]

क्वचिदिति विमर्शे। पूर्वमेव त्वया निश्चितमिदमाश्चर्यकरमिति भाव। राक्षसवास: राक्षसैरध्युषितः भयं निशाचरजन्म इति भाव। तद्यावत् कुम्भीनसीपुत्रस्य कुम्भीनसीनाम काचित् राक्षसी, रावणभगिनीति भावत, तस्या पुत्रस्य लवणस्येत्यर्थं, दुरात्मन' दुर्वृत्तस्य समुन्मूलनाय शत्रुघ्नं यच्च प्रेषयामि प्रेषयिष्यामि। 'यावत् पुरानिपातयोर्लट्'। एवंविधा मया वर्जिता वर्जिनी सती क्वेयं'। भगवति सर्वंसहे, श्लाघ्या प्रशंसनीया निर्दोषा दुहितरं कन्यां जानकीं विपद. त्रायस्व। वसुन्धरे इति सम्बोधनेन श्लाघ्यामिति सीताविशेषणे जानकीत्यनेन सीताया निर्देशेन च अवेक्षणस्य अवश्यकर्तव्यत्व सूच्यते वसुन्धराया वसुधारित्वात् सीतायाश्च श्लाघ्यत्वात् जनकदुहितृत्व वसुरूपत्वात् दुहितृत्वेन च रक्षणीयत्वाच्च इति सूचनीयम्।

(५१) जनकानामिति। यत् जनकानां जनकवंश्यानां रघूणां रघुवंश्यानाञ्च। यदिति विधेयप्राधान्यात् क्लीबत्वम्। कृत्स्नं समग्रं गोत्रमङ्गलं गोत्रयो वंशयो मङ्गलं कल्याणं, तथा पुण्यशीला पुण्यं पवित्रं शीलं स्वभावो यस्याः सा तां पावनचरित्रां तां सीतामिति शेषः, पुण्ये पवित्रे देवयजने यज्ञभूमौ अजीजन, उत्पादितवत्यसि। तां दुहितरमवेक्षस्व इति पूर्वेणा-न्वय.। अत्र विशुद्धान्त समुच्चयालङ्कारम्, दाम्पत्यविषयविरुद्धदर्शितत्वात् पुनरुक्तं दृष्टान्तत्वाच्च तदुक्तम्—'अथान्तरापेक्षिवर्ण्य' इति विशुद्धान्तं दृष्टान्तम्' इति।

(अ) हा तात। सौम्य भद्र। 'हा सोम्म अज्जउत्त, कहिं सि' इत्युक्ति' स्वप्नावस्थाया-मिति ध्येयं। हा धिगिति खेद:। दु:सहविरहदहनविप्रलब्धा दुःखः सह. दुः य

(प्रविश्य दुर्मुखः।) देव। कुमारलक्खणो विण्णवेदि, सज्जो रहो, आरुहदु देवी त्ति। (ट)

[(ट) देवि! कुमारलक्ष्मणो विज्ञापयति, सज्जो रथः, आरोहतु देवीति।]

सीता। इयमहं आरुहामि। (उत्थाय परिक्रम्य)। परिप्फुरदि विअ मे गब्भभारो, ता सणिअं गच्छम्ह। (ठ)

[(ठ) इयमहमारोहामि। परिस्फुरतीव मे गर्भभारः, तत् शनैर्गच्छामः।]

दुर्मु॰ इदो इदो देवी। (ड)

[(ड) इत इतो देवी।]

सीता। णमो णमो तवोवणाणं, णमो णमो रहुउलदेवदाणं, णमो णमो अज्जउत्तचरणकमलाणं, णमो णमो सअलगुरुअणाणं। (ढ)

(ढ) नमो नमस्तपोवनेभ्यः (तपोवनानाम् इति केचित्) नमो नमो रघुकुलदेवताभ्यः नमो नम आर्यपुत्रचरणकमलेभ्यः, नमो नमः सकलगुरुजनेभ्यः।

इति चित्रदर्शनो नाम प्रथमोऽङ्कः। (ण)

रघुवत्र उद्वेगस्य विप्रलब्धा वञ्चिता 'आर्यपुत्रोऽत्र नास्ति' इत्येवंरूपा प्रतारिता इति भावः। अह आर्यपुत्र रामचन्द्रमिति शेषः, आक्रन्दामि समुद्दिश्य व्याकुलमालपामि। समन्ततः दृष्टि-पातं कृत्वा रामचन्द्रमदृष्ट्वा आह—हा धिगिति। कथं नाम एकाकिनीं असहायां प्रसुप्तां निद्रिताम् उज्झित्वा परित्यज्य आर्यपुत्रो गतः प्रस्थितः। नैतत् समीचीनमिति भावः। तस्मै रामचन्द्राय कोपिष्यामि त्वां प्रति कोपं प्रकाशयिष्यामि इत्यर्थः। तस्मै इत्यत्र क्रोधार्थधातुयोगे चतुर्थी। यदि चेत् आत्मनः प्रभविष्यामि स्वाधीना स्थातुं समर्था भविष्यामि इत्यर्थः। यदैव श्रीरामचन्द्रो मम नयनपथं पात्याय ते तदैव तस्य लोकोत्तररूपलावण्यसुधासंसेवनात् सर्वथा अवशा निजतन्त्रीयसत्ता च भवामि, अतस्तस्मै कोपं कर्त्तुं प्रभवामि नवेति महान् सन्देहः। कोऽत्र इति, परिजन त्वां मध्ये कोऽत्र सन्निहित इत्यर्थः।

(ट) देवीति। विज्ञापयति निवेदयति। सज्जः गमनाय प्रयाणार्थमित्यर्थः, प्रगुणीकृतः गमनसाधनद्रव्यादिना च युक्तः इति यावत्।

(ठ) इयमिति। परिस्फुरति स्पन्दते। शनैः शनैः मन्दं मन्दम्।

(ढ) नम इति। तपोवनानां वशिष्ठविश्वामित्रवाल्मीक्यादीनाम्, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति न्यायात् नमोयोगे चतुर्थीं बाधित्वा षष्ठी। यद्वा 'चतुर्थ्यर्थे षष्ठी'ति प्राकृतपिङ्गलसूत्रेण षष्ठी। एवमन्यत्र।

(ण) इतीति। चित्रदर्शनः चित्राणां दर्शनं यत्र सः। नाम प्रसिद्धौ। अङ्कः परिच्छेदः

द्वितीयोऽङ्कः ।

(नेपथ्ये) स्वागतं तपोधनायाः । (क)

(प्रविश्याध्वगवेषा तापसी ।) अये ! वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते । (ख)

(प्रविश्य) वनदेवता । (अर्घ्यं विकीर्य) (ग)

> यथेच्छाभोग्यं * वो वनमिदमयं मे सुदिवसः
> सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
> तरुच्छाया तोयं यदपि तपसो † योग्यमशनं
> फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

[१ । इदं वनं यथेच्छं भोग्यम् । अयं मे सुदिवसः हि सतां सद्भिः सङ्गः पुण्येन कथमपि भवति । तरुच्छाया तोयं फलं वा मूलं वा यदपि तपसो योग्यमशनं तदपि इह वः पराधीनं न । इत्यन्वयः ।]

(क) स्वागतमिति । तपोधनायाः तप एव धनं मुख्यसाधनं यस्याः तस्याः तपःपरायणायाः स्वागतं सु सुखेन आगतं, यद्वा सु शोभनम् आगमनम् अभिप्रेतमिति शेषः ।

(ख) प्रविश्येति । अध्वगवेषा अध्वानं गच्छति य सः अध्वगः पथिकः, अध्वगस्य वेष इव वेषो यस्याः सा, पथिकवेषा दण्डादिधारिणीत्यर्थः, तापसी आत्रेयी इति यावत् । वनदेवता वनाधिष्ठात्री काचित् सन्न्यासिनी । फलकुसुमपल्लवार्घ्येण फलानि कुसुमानि पुष्पाणि पल्लवानि नवपत्राणि च फलकुसुमपल्लव तदेव अर्घ्यं अर्घार्थं द्रव्यमिति फलकुसुमपल्लवार्घ्यं तेन अर्घार्थ द्रव्यम् इति अर्घ्यम् "पादार्घाभ्यां चेति" यत् । कर्त्तरि तृतीया । यद्यपि 'आप क्षीर कुशाग्राणि दधि सर्पिः स तण्डुलाः । यवाः सिद्धार्थकाश्चैव अर्घोऽष्टाङ्गः प्रकीर्त्तितः ॥' यद्वा 'सिद्धार्थमक्षतांश्चैव दूर्वा च तिलमेव च । अर्घं गन्ध फलं पुष्पमष्टाङ्गं त्वर्घ्यमुच्यते ॥' इत्यादि शास्त्रवचनमस्ति, तथापि वनभूमिसुलभं दुष्प्राप्यानन्यद् फलकुसुमपल्लवं कल्पितस्यापि अर्घ्यत्वं देयत्वात् नात्र दोषः, तथाच माघः 'उपात्तशुभ्राः कथा पुष्पैः फलैः पल्लवैरपि । पर्णैः स्वर्यथा लाभं मनिमान् सत्कृतं भवेत् ॥" इति । मामुपतिष्ठते पूजयति 'उपाद्देवपूजा—सङ्गतिकरणमित्रकरणपथिषु' इत्युक्त्या आत्मनेपदम् । 'सर्वदेवमयोऽतिथिः' इत्युक्त्या अतिथिषु देवतात्वारोपः ।

(ग) प्रतिश्येति । विकीर्य विक्षिप्य ।

---

* यथेच्छाभोग्यमिति क्वापि पाठः । † तपसामिति पाठः ।

तापः। किमत्रोच्यते। (घ)

प्रियप्राया वृत्तिर्विनयमधुरो * वाचि नियमः

प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।

पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं

रहस्यं साधूनामनुपधि विशुद्धं विजयते॥ २॥

(इत्युपविशतः)।

[२। (साधूनां) वृत्तिः प्रियप्राया, वाचि नियमः विनयमधुरः, मतिः प्रकृत्या कल्याणी परिचयः अनवगीतः, पुरो वा पश्चाद्वा अविपर्यासितरसम् अनुपधि विशुद्धं साधूनां तदिदं रहस्यं विजयते इत्यन्वयः।]

---

(१) समागतमतिथिजनं सभाजयितुमाह—इदमिति। इदं मदीयमित्यर्थः, वनं तपोवनं वो युष्माकं यथेच्छम् इच्छामनतिक्रम्य इति अव्ययीभावः, यथाभिलाषं भोग्यं व्यवहार्यम्। इच्छानिवृत्तिपर्यन्तमसङ्कोचेनोपभोगार्हम्। व इति पूजायां बहुवचनम्, अतिथिसामान्याभिप्रायकं वा। अयं विद्यमानो दिवस इत्यर्थः, मे मम सम्बन्धे सुदिवसः शुभदिनं साधुजनसम्पर्कादिति भावः। सुदिवसत्वे कारणमुपन्यस्यति—सतामिति। हि यस्मात् सतां विद्यमानानामेव, न तु प्रमादनादिमकुर्वतामित्यर्थः। सद्भिः साधुभिः सङ्गः संसर्गः समागम इति यावत्, कथमपि लभ्यत एव पुण्येन सुकृतफलेन भवति, साधुजनसम्पर्कलाभः खलु कठोरतपस्यासाध्यो भवतीति भावः। वनस्य यथेच्छोपभोग्यत्वं प्रति हेतुमाह—तरुच्छायेति। तरुच्छाया तरोः वृक्षस्य छाया अनातप अध्वश्रमविनोदनार्थमिति शेषः। तरूणां छाया इति विग्रहे तरुच्छायमिति पदं स्यात्। 'छाया बाहुल्ये'। तोयं जलं तृष्णानिवारणार्थमिति शेषः, फलं वा मूलं वा कन्दादिकम् इति यावत्, यदपि तपसः तपश्चरणस्य योग्यम् अनुकूलम् अशनं खाद्यं नीवारादिकमित्यर्थः, तदपि इह अस्मिन् वने वः युष्माकं न पराधीनं न परायत्तम्, भवता सर्वमात्मीयमिति मत्वा स्वेच्छया विनोद्यम् इति तात्पर्यार्थः। सतामित्यादिना अप्रस्तुतेन सामान्येन वनदेवतायाः पुण्येन प्रकृततापसीसमागमलाभरूपस्य प्रस्तुतस्य शंसनात् अप्रस्तुतप्रशंसामिदं। सुदिवसत्वं प्रति सतामित्यादिवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, हेत्वाख्यालङ्कारस्याप्यत्र काव्यलिङ्गमिति विवेचनीयम्। यथेच्छभोग्यत्वं प्रति स्वाधीनत्वरूपकारणसन्निवेशात् काव्यलिङ्गम् तथा तरुच्छायादिषु बहुषु प्रकृतेष्वेव एकस्य पराधीनत्वाभावरूपधर्मस्य सम्बन्धबोधनात् तुल्ययोगिता। पुनः एतेषामेव सङ्करूपकारणेन कार्यस्य सुदिवसत्वस्य समर्थनात् अर्थान्तरन्यास इति निपुणा वदन्ति। शिखरिणीवृत्तम्।

(घ) किमिति। अत्र अस्मिन् विषये किमुच्यते न किमपि वक्तव्यमस्तीति भावः। अभ्यर्थनापरायणायां त्वयि विनयादिकं सर्वमेव दृष्टमिति निष्कर्षः।

---

* मधुरा इति पाठान्तरः।

वन । कां पुनरत्रभवतीमवगच्छामि ? (क)

ताप । आत्रेय्यस्मि । (ख)

वन । आर्ये आत्रेयि ! कुतः पुनरिहागम्यते ? किं प्रयोजनं वा दण्डकारण्यप्रवेशे † ? (ग)

(२) सदाचारपरायणानां खलु साधूनां प्रकृतिशुद्धत्वमिति तदेव प्रपञ्चयितुमाह—प्रियप्राया इति । साधूनां सज्जनानां वृत्ति व्यवहार क्रियासु प्रवृत्तिरिति यावत्, 'वृत्ति कायिकव्यापार', इति केचित् । प्रियप्राया प्रायेण भूम्ना प्रिया मनोहारिणी प्रियबहुरा इति यावत् । तथापि वाक्यनैष्ठुर्यं महान् दोष इत्यत आह—विनयमधुर इति । वाचि वाक्ये वचनप्रयोगे इति भाव:, नियम. प्रकार· रीति इत्यर्थ , यद्वा नियम सावधानता वाङ्नियमनं मितभाषित्वमिति यावत् । विनयमधुर विनयेन अनिकर्षभावनारूपेण मधुर नितरां श्रुति सुखकर. न तु उपतापक इति भाव । तथापि मनोऽशुद्धिदौष्ट्यं आदत आह—प्रकृत्येति । मति बुद्धि प्रकृत्या स्वभावेन निसर्गत इति यावत्, कल्याणी मङ्गलमयी, जगतां कल्याणकरेष्वेव विषयेषु साधूनां मति प्रवर्त्तते इति भाव । तथाप्यसत्सङ्गवशात् वैपरीत्य स्यादत आह—अनवगीत इति । परिचय संस्तव परस्परं विशेषेण ज्ञानमित्यर्थ , अनवगीत अनिन्दित दोषसंसर्गशून्य शुभोदर्क इति यावत् पुरो वा अग्रे वा पश्चात् अन्ते वा, भूतभविष्यत्कालयो इत्यर्थ । अविपर्यासितरसम् अविपर्यासित. अपरिवर्त्तित: रस अनुरागो यस्मिन् तत् तथोक्तम्, अप्रच्युतानुरागमिति यावत् । अनुपधि अकपटं 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमर । अत एव विशुद्धं निर्मलं साधूनां तत् प्रसिद्धम् इदं प्रत्यक्षीक्रियमाणम् अनिर्वचनीयमिति वा, साधूनां सज्जनानां रहस्यं गूढचरितं प्राकृतजनानाम् अविषय य चरितमित्यर्थ । विजयते सर्वोत्कर्षेण वर्त्तते । अत्राप्रस्तुतात् सज्जनचरित्रसामान्यात प्रस्तुतस्य वनदेवतात्रेय्युभयविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कार । तदुक्तं दर्पणकारेण "क्वचिद्विशेष सामान्यात सामान्यं वा विशेषत । कार्य्यान्निमित्तं कार्यञ्च हेतोरथ समात् समम् । अप्रस्तुतात् प्रस्तुतञ्चेत् गम्यते पञ्चधा तत । अप्रस्तुतप्रशंसा स्यात्" इति । तथा रहस्यस्य सर्वोत्कर्षेण वर्त्तनं प्रति प्रियप्रायत्वादीनां हेतुत्वाभिधानात् काव्यलिङ्गमपि । शिखरिणीवृत्तम् ।

(क) कामिति अवगच्छामि जानामि । किमभिधानं भवत्या इति वाक्यार्थ ।

(ख) आत्रेयीति । आत्रेयीति नाम्ना मां विजानीहीति भाव । आत्रेयी खलु वनदेवतया अदृष्टपूर्वा किन्तु श्रुतपूर्वा काचित् विद्यार्थिनी ब्रह्मचारिणी तपस्विनी इति ध्येयम् ।

† किम्प्रयोजनो वा दण्डकारण्यप्रचार इति पाठान्तरम् ।

आर्त्र । अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
वाल्मीकिपार्श्वादिह पर्य्यटामि ॥ ३ ॥

[१] अस्मिन् प्रदेशे अगस्त्यप्रमुखा भूयांस उद्गीथविद वसन्ति । तेभ्य निगमान्त विद्याम् अधिगन्तु वाल्मीकिपार्श्वात् इह पर्य्यटामि इत्यन्वय ।

वन यदि तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते, तत् कोऽयमत्रार्य्याया दीर्घ-प्रवासप्रयासः ? (ज)

(क) आत्रेयीति । कुत कस्मात् स्थानात् किमिति किमर्थमागमनप्रयोजनमिति वाक्यार्थ

(ख) आगमनप्रयोजनं विवृणोति –अस्मिन्निति अस्मिन् प्रदेशे दण्डकारण्यभूभागे अगस्त्यप्रमुखा अगस्त्यादय भूयांस बहव उद्गीथविद उद्गीथ: सामवेदस्य अवयवविशेष: तं विदन्ति ये ते सामवेदज्ञातार , यद्वा 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यनेन परस्मिन् ब्रह्मणि उद्गीथदृष्टिं कुर्वन्त इत्यर्थ सकलवेदान्ततात्पर्य्यपर्य्यालोचनशीला इति यावत् । अत्र च उद्गीथशब्द सामान्यवचन , तेन च उद्गीथविद वेदविद इत्यर्थलाभ । वसन्ति स्थिति कुर्वन्ति, तेभ्य अगस्त्यप्रमुखेभ्य वेदज्ञेभ्य आख्यातोपयोगे पञ्चमी । निगमान्त-विद्या निगमा वेदा तेषा अन्ता चरमभागा निगमान्ता तद्रूपा विद्या वेदान्तविद्याम् उपनिषद्भिरिति यावत्, अधिगन्तुम् अध्येतु वाल्मीकिपार्श्वात् वाल्मीकिपार्श्वं परित्यज्य इत्यर्थ:, इह दण्डकारण्यभागे पर्य्यटामि आगच्छामि । अगस्त्यादीनामाश्रमानुसन्धानार्थं परिभ्रमामि इति भाव । 'सावित्री प्रणव यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् मृत सोऽधिगच्छती'ति अनुशासनेन शूद्रस्त्रीणामेव स्त्रीणां वेदाध्ययनादिनिषेध स्मर्य्यते, नतु ब्रह्मवादिनीनाम् । 'ब्रह्मवादिनीनामुपनयनम् अग्नीन्धन-वेदाध्ययन स्वगृहे च भैक्षचर्य्ये'ति वचनान्तरेण विरोधात् एकवाक्यतालक्षणात् ।

(ज) यदीति । यदि तावत् यस्मात् कारणादित्यर्थ ' अन्येऽपि मुनय अगस्त्यादय: ब्रह्मविद्या-मधिजिगमिषव' इति शेष । हि निश्चये । पुराणब्रह्मवादिन ब्रह्म परमात्मानं वेदान्

आत्रे। तत्र महानध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः (झ)

वन। कीदृशः ? (ञ)

आत्रे। तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्त्तमानं दारकद्वयमुपनीतम्। तत् खलु न केवलमृषीणामपि तु * सचराचराणां भूतानामान्तराणि तत्त्वान्युपक्लेदयति। (ट)

वन। अयि ! तयोर्नामसंविज्ञानमस्ति ? (ठ)

वा वदतीति ब्रह्मवादी पुराणर्षिः ब्रह्म [illegible] प्राचेतस इति [illegible]। प्राचेतस प्रचेतसो पुत्र पुमान् प्राचेतसः [illegible] वाल्मीकि मुनिः ब्रह्मपारायणाय ब्रह्मणः पारं [illegible] अयनं गमनं तस्मै साकल्येन वेदज्ञानलाभाय तादर्थ्ये चतुर्थी पारायणं नाम आदित आरभ्य अन्तपर्य्यन्तमविच्छेदेन अध्ययनम् उपासते सेवन्ते तत्र तस्मात् आश्रमात् भवत्या कोऽयमत्र [illegible] दीर्घप्रवासप्रयासः दीर्घप्रवासस्य महान्तं कालं व्याप्य [illegible] प्रयासः उद्यमः सर्वप्रभवस्य [illegible] विहाय कथं वेदपाठाय अत्र दीर्घप्रवासक्लेशो भवत्या अङ्गीकृत इति भावः।

(झ) तत्रेति तत्र वाल्मीकिसकाशे [illegible] अध्ययनप्रत्यूहः अध्ययनस्य प्रत्यूहः अन्तरायः विघ्न इति यावत्।

(ञ) कीदृश इति कीदृशः किंविधः प्रत्यूहः इत्यर्थः।

(ट) तस्य भगवतः वाल्मीकेः समीपे इत्यर्थः केनापि अविज्ञातनाम्ना देवताविशेषेण देवताविशेषेण सर्वप्रकारेण सर्वैः प्रकारैः अद्भुतम् आश्चर्यजनकं दारकद्वयं दारकयोः द्वयम् बालकयुगलम् उपनीतम् आनीय दत्तम्। स्तन्यत्यागमात्रके वयसि वर्त्तमानं [illegible] स्तन्यस्य त्याग इति स्तन्यत्यागः स मात्रा परिमाणं [illegible] तत् स्तन्यत्यागमात्रकम् [illegible] विभाषा इति कः। [illegible] वयसि [illegible] स्तन्यत्यागः [illegible] वयसि [illegible] उपनीतम् उपस्थापितं अर्पितम् तत् दारकद्वयं सचराचराणां स्थावरजङ्गमादिसहितानां भूतानां प्राणिनाम् आन्तराणि अन्तः वर्त्तीनि तत्त्वानि [illegible] मनोबुद्ध्यहङ्कारादीनि तत्त्वानि इति यावत् उपक्लेदयति आर्द्रीकरोति [illegible] करोति सर्वेषामेव चित्तम् [illegible] इत्यर्थः।

* केवलमृषीणामेव न किन्तु [illegible] भूतानामपि आन्तराणि इति पाठः।

आत्रे। तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः। (ड)

वन कीदृशः प्रभावः?

आत्रे तयोः किल सरहस्यजृम्भकास्त्राण्याजन्मसिद्धानीति। (ढ)

वन अहो नु भोः! चित्रमेतत्। * (ण)

आत्रे तौ च भगवता वाल्मीकिना धात्रीकर्मवत्सलतां † परिगृह्य पोषितौ परिरक्षितौ च, वृत्तचौड़कर्माणोश्च ‡ तयोस्त्रयीवर्जमितरा विद्याः सावधानेन परिनिष्ठापिताः, समनन्तरञ्च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ, नह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। यतः—(त)

[illegible] वनोपिनिगदस्य [illegible] ताम्नि दक्षावशादन्यथाभिमतया तथा प्रवाद्य महानधर्मो रामेणेन [illegible] इति [illegible] यत त्व कामसाहत क्रौञ्चमिथुनात् एकम् अवधी तत त्वमाप [illegible] सदा आयु [illegible] बहुनि वर्षाणि

(ड) अथोति नाममात्रज्ञानम् नाम्नी सविज्ञानम् [illegible] नामपरिचय इति यावत् [illegible] तथानामनी इत्यर्थ

(ड) तयो इति कुशश्च लवश्च तौ कुशलवौ नामनी आख्याते, प्रभाव लोक-विलक्षण शक्तिविशेषश्च आख्यात कथित [illegible] इति निष्ठाया [illegible] किलेति वार्त्तायाम 'किल सम्भाव्यवार्त्तयो'

(ढ) तयोरिति आजन्मसिद्धानि जन्मत आरभ्य स्फुरितानि, शिक्षामन्तरेण [illegible] स्वत एव प्रादुर्भूतानि जृम्भकास्त्राणि इत्यर्थ।

(ण) अहो इति अहो नु भो इत्येकमेव विस्मयद्योतकमव्ययम्, अत्र तु विस्मयद्योतिका-[illegible] बहुवचनात्मकपदनिबन्धनम् चित्रम् आश्चर्यम्।

(त) तौ इति। तौ कुशलवौ धात्रीकर्मवत्सलतया, धात्री उपमाता तस्या कर्म कार्यम् [illegible] इत्यर्थ, तत्र वत्सलतया अनुराग परिगृह्य स्वीकृत्य [illegible]-अङ्गीकृत्य वाल्मीकिना तौ पोषितौ पालितौ, परिरक्षितौ [illegible] परित्रातौ च। वृत्त-

* इति हि भोश्चित्रमिति क्वचित् † धात्रीकर्मवत्सलत इति क्वापि पाठः।

‡ [illegible] च परिपाठितौ इति क्वचित् पाठ।

वितरति गुरु प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुन * र्भूयान् भेद फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चय ॥ ४ ॥

[४ गुरु यथा प्राज्ञ तथैव जडे विद्या वितरति तयो ज्ञाने शक्तिं न करोति खलु न वा अपहन्ति फलं प्रति पुन भूयान् भेद भवति च, तद् यथा शुचि मणि बिम्बोद्ग्राहे प्रभवति मृदा चय न । प्रभवति इत्यन्वय ।]

चौडकर्मणा चूडा शिखा तस्या इदम् इति चौडम् तत् निष्पादितं चौडकर्म यथा तथा कृतवतो तयोर्बालकम् तथा वेदान् वेद पारम्पर्य ग्राह्यानि कर्माणि तत् यथा तथा परिनिष्ठापिता इति क्रियापदस्य विशेषणम् नु सामान्य परित्यज्य उपनयनात् पूर्व वेदाध्ययनस्याविधत्वादित्यर्थ तत अन्य वेद धनुर्वेदात् सावधानेन अवधानेन सह वर्त्तमान इति सावधान तेन अवहितचेतसा मुनिना इत्यर्थ परिनिष्ठापिता निःशेषित साकल्येन अध्यापिता इत्यर्थ उपगत सुभार्गलग्नवति —इत्यादिना एतम् समनन्तरम् इतरविद्यावदुपगादनन्तर गर्भैकादशे गर्भे न एकादशे वर्षे अथास्य बाल्य अतीता अविद्यायाश्च प्रथम् इति वाच तत अविद्याचितत्वम् कथन कस्मात् मनुष्ठीयत अननन्तर काल अनुष्ठान परिपाटीप्रकाशकस्य तेन, विधिना इति यावत् उपनीय मौञ्जीबन्धनादिसंस्कारेण संस्कृत्य तौ त्रयीविद्या वेदविद्याम् अध्यापित पाठितौ अत्र मनु— 'गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश ॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मत प्रथमेऽब्दे तृतीये वा कर्त्तव्यम् श्रुतिचोदनात् ॥ एताभ्य कुशलवाभ्यामित्यर्थ, अतिप्रदीप्तप्रज्ञामेधाभ्यां प्रज्ञा च बाध्यमिव मेधा च स्मृतिर्मेधा इति प्रज्ञामेधे अति प्रदीप्ते अत्युत्तीर्णे प्रज्ञामेधे ययो ताभ्याम् सह अस्मदादेर अधमस्य अध्ययनयोग अध्ययनेन योग सङ्गति सतोऽयं अनिवार्यं नास्ति न सम्भवतीत्यर्थ । अध्ययन श्रम' कालेन च तौ बुद्धिमन्तौ यावत् पाठमभ्यसत, मादृशा निर्बोधा तावत् पाठं तेन कालेन अधिगन्तुमसमर्था इति भाव

४ । वितरतीति गुरु अध्यापक प्राज्ञ बुद्धिमति छात्र यथा विद्या वितरति ददाति उपदिशति इत्यर्थं, जड निर्बोधे छात्र तथैव विद्या वितरति । अध्यापक किन्तु

* तयोरिति पाठान्तरम्

वन। अयमस्मदध्ययनप्रत्यूहः ? (थ)

आत्रे। अपरश्च। (द)

वन। अथापरः कः ? (ध)

आत्रे। अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवने * नदीं तमसा-मनुप्रपन्नः, तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श,

---

सुमेधसं अल्पमेधसञ्च शिष्यम् अविशेषेण अध्यापयति इत्यर्थः। प्राज्ञे जड़े इत्यधिकरणविवक्षया सप्तमी। तयोः प्राज्ञजड़योः ज्ञाने बोधे शक्तिं सामर्थ्यं न करोति न जनयति न वा अपहन्ति न नाशयति खलु निश्चितमेव। बोधविषये एकस्य शक्तिं नोन्मेषयति अन्यस्य न नाशयति। बोधशक्तिर्हि नैसर्गिकी, न खलु गुरुणा केनापि सा समुत्पाद्यते, न वा विनाश्यते। फलं प्रति अध्ययनफलं प्रति पुनः किन्तु भूयान् प्रभूत. भेदः पार्थक्यं वैलक्षण्यमिति यावत्, भवति। तत्र न विस्मयकारणमस्तीति मनसिकृत्य दृष्टान्तयति—तदिति। मणिः निर्मलः मणिः वज्रं रत्नसामान्यं वा, बिम्बोद्ग्राहे बिम्बस्य प्रतिबिम्बस्य "बिम्बस्तु प्रतिबिम्बे स्यान्मण्डले पुंनपुंसक"मिति मेदिनी। उद्ग्राहे ग्रहणे प्रभवति समर्थो भवति, मृदां मृत्तिकानां चयः स्तूपः न बिम्बग्रहणे प्रभवतीति भेदः। एकस्यैव गुरोः सकाशे समानवर्त्तिनां मध्ये बुद्धिमतः विद्यार्थिनः निर्मलचित्ते गुरूपदेशः सम्यक् प्रतिफलति न तु निर्बोधस्य मलिन-चित्ते इति भावः। अत्र गुरोर्विद्यादाने प्राज्ञे न च जड़स्य शाठ्यत्वादेः प्रत्ययात् उपमा, तयोरिवमनेन उद्दिष्टाभ्यां प्राज्ञजड़ाभ्यां सह क्रमेण मणिकरणमृत्तुल्यपातत्वोरन्वय-प्रतीतेः यथासंख्यालङ्कारः, चतुर्थपादोक्ताभ्यां मणिमृच्चयाभ्यां प्राज्ञजड़योः बिम्बानुबिम्बभाव-प्रत्ययात् दृष्टान्तालङ्कार इति। तयैव इत्यनेन अन्यकारणस्य व्यावर्त्तनात् परिसंख्यापि। हरिणीवृत्तम्, 'हरिणी नसौ मरौ सलौ ग् ऋतुसमुद्रहयैः' इति लक्षणात्।

(थ) अयमिति। अस्मदः सोऽयम् इत्यर्थः। अनेनैव अन्तरायेण वाल्मीकि-समागमात् आगतास्मि किल इति तात्पर्यार्थः।

(द) अपर इति। अस्ति अपरः पूर्वोक्तव्यतिरिक्तः अन्यः अन्तरायः इत्यर्थः।

(ध) अथेति। अथ प्रश्ने। कः अन्तरायः।

(न) अथेति। अथ इति आरम्भे। सः ब्रह्मर्षिः ब्रह्मा ब्राह्मणः स चासौ ऋषिश्चेति ब्रह्म

---

* माध्यन्दिनसवनाय इति पाठान्तरम्।

प्राक्तनजन्मसंस्कारवशात् दैवीं वाचमव्यतिकीर्णामानुष्टुभेन छन्दसा † परिणतामभ्युदैरयत् । (क)

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥ ५ ॥ इति ।

[५] (हे) निषाद ! त्वम् शाश्वतीः समाः प्रतिष्ठां मा अगमः यत् क्रौञ्चमिथुनात् काममोहितम् एकम् अवधीः इत्यन्वयः ।]

विट्, प्रजापति ' इत्यमरः । एकदा कदाचित् मध्यन्दिनसमये मध्यं दिनस्य इति मध्यन्दिनम् मध्यन्दिनमेव समयः, यद्वा मध्यन्दिनं समय इति मध्यन्दिनसमयः । मध्यन्दिन शब्दः निपातितः तथाच—'मध्यम मध्यमीयं च मध्यन्दिनमुदाहृतम् ।' इति । मध्याह्ने तमसां नदीम् अनुप्रपन्नः प्राप्तः स्नानार्थं गतः तत्र तमसायाः नद्याः पुष्पवाटिके कुञ्जेन चरत इति पुष्पवाटिकौ तयोः मिथुनीभूय वर्तमानयोः क्रौञ्चयोः क्रौञ्ची च क्रौञ्चश्च इति क्रौञ्चौ तयोः मध्ये एकं पुमांसं केनचित् व्याधेन शरेण विध्यमानं ताड्यमानं शरेण निर्भिद्य हन्यमानमित्यर्थः, ददर्श अपश्यत् । तेन दुःखितहृदयः स महर्षिः प्राक्तनजन्मसंस्कारवशात् प्राक्तनैः पूर्वजन्मोपार्जितैः प्रभावात् अनुरूपं यथा तथा ताम् अव्यक्तात् ब्रह्मज्ञानात् अव्यतिकीर्णाम् अनन्यवाचिवर्णादिदोषरहिताम् आनुष्टुभेन छन्दसा परिणताम् पवित्रां वाचं दैवीं भारतीम् अभ्युदैरयत् उच्चारयामास ।

५ । श्लोकार्थं व्याचष्टे—मा निषाद इति । हे निषाद व्याध ! त्वं शाश्वतीः चिरन्तनीः बह्वीः इत्यर्थः, समाः वत्सरान् व्याप्य अत्यन्तसंयोगे द्वितीया । 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समा' इत्यमरः । प्रतिष्ठां स्थितिं मा अगमः मा लभस्व यत् यस्मात् क्रौञ्चमिथुनात् क्रौञ्चयोः पक्षिणोः मिथुनं द्वन्द्वं तस्मात् अपादाने पञ्चमी । काममोहितं कामेन मोहितम् कामावलम्बितम् विषयासक्तचित्तमित्यर्थः, एकं क्रौञ्चम् अवधीः निहतवान् मैथुनरतस्य क्रौञ्चस्य वधात् तव पुत्रादिवंशविनाशः भविष्यति इत्यर्थः मा अगमः—आर्षोऽयं प्रयोगः, लौकिके 'न माङ्योगे' इति अडागमप्रतिषेधात् । श्लोकोऽयं रामायणस्य बीजमिति कथ्यते । अत्र नानाविधा व्याख्याः दृश्यन्ते । तत्र किञ्चिदुच्यते—मा लक्ष्मीः निवसति यस्मिन् तत् सम्बोधनं मानिषाद, हे रामचन्द्र ! यत् यस्मात् त्वं क्रौञ्चमिथुनात् राक्षसमिथुनात् 'क्रौञ्चस्तु राक्षसे' इति रभसः । मन्दोदरीरावणद्वन्द्वात् एकं काममोहितं रावणम् अवधीः हतवानसि, तस्मात् त्वं शाश्वतीः समाः अनेकान् वत्सरान् व्याप्य प्रतिष्ठां

† अनुष्टुप्छन्दसा परिणतामिति पाठभेदः ।

आत्रे । चित्रम्, आम्नायादन्योऽयं नूतनश्छन्दसामवतारः ! (च)

वासं । तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्म-

वर्णानन्दावाप्तिम् अगमः प्राप्नुहि, तेनार्थतः शब्दतः अपि मनाक् काव्यार्थसूचनसिद्धेः श्रीरामकृतरावणवधरूपकाव्यार्थः काव्यादौ अवश्यकर्त्तव्याशीर्वादश्च सूचित इति केचित्। रामानुजस्तु श्लोकमिमम् एवम् आह—नारदात् सङ्क्षेपश्रवणानन्तरं वाल्मीकिमुनेः स्ववर्णनेच्छा जाता स्वचरितस्य च कविवरसमयत्नेन अतिकरुणचरितसंवादाधिकाराय अर्थं करुणचरितत्वजिज्ञासयेव पूर्वं भगवद्दत्तशापस्य पुनरुक्तत्वकरणेन दाम्पत्यसम्पादनाय च मुनेः ईक्षणाय च भगवान् राम एव निषादरूपेण आविर्भूय पश्यतो मुनेः पुरस्तात्कामाहृतः क्रौञ्चवधलीलां चकार, अत 'त्वम् अकार्यकरणात् प्रतिष्ठां लक्ष्मीवान्छितेन लिङ्किम् इह लोके मानवः मा प्राप्नुहि'। इति भगवान् मुनिः। एकमवधीरित्युक्तेः यथा क्रौञ्च तथा श्रीविरहितः कृतः सा च पतिहीना कृता, तथा त्वमपि प्रियया स्वभार्यया हीनो भव, सा च त्वया हीना भवतु इति गोस्वामिपादाः। अन्याहुर्भट्टपादाः—प्रतिष्ठां तु अगमः त्वम् इति पदचतुष्टयं निषादपक्षे योज्यम्। एवं च शाङ्गोक्ते अप्रतिष्ठानमिदेव उपपद्यते। अभीष्टञ्च न विद्यते सा लक्ष्मी यस्येति विग्रहः। एतच्च लक्ष्मीकेति निषादं प्रति सम्बुध्यते। अपरे भावा ऊह्याः।

(च) चित्रमिति। चित्रम् आश्चर्यम् आम्नायात् आम्नायते सम्यगभ्यस्यत इति आम्नायः वेदः तस्मात् श्रुतेः इत्यर्थः, यद्वा वेदविलक्षितच्छन्दसः। 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरः। अन्यो भिन्नः नूतनः छन्दसाम् अनुष्टुप्प्रभृतीनां वृत्तानाम् अवतारः आविर्भावः, वेदेषु प्रयुक्तच्छन्दोभ्यः अन्यत् नवं छन्दः कविना अवतारितम्। वस्तुतस्तु वेदेऽप्य-नुष्टुप्छन्दोबद्धानि वाक्यानि दृश्यन्त, तदत्र 'अन्य' इत्यत्र 'अन्यत्र' इति सम्यक्पाठः तथाच, आम्नायात् वेदादन्यत्र पौरुषेयग्रन्थेषु नूतनोऽयं छन्दसामवतार इत्यन्वयः। मन्वादि-संहितास्तु तदनन्तरम् निबद्धाः, अथवा आम्नायार्थप्रतिपादकत्वात् तासामपि वेदत्वम् इति न विरोधः। यद्वा वैदिकानि छन्दांसि पादवर्णवैषम्ययतिभङ्गादिदोषाक्रान्तानि, 'मा निषाद'इति श्लोकस्तु तद्दोषरहित इति तेभ्यो विलक्षणतया तस्य नूतनत्वनिर्देश इति। अथवा विलक्षणमपि वेदे एवंविधे छन्दसि, मनुष्यकृतभाषायामयमेव श्लोकः प्रथमोऽनुष्टुप्छन्दोरचितः, अतः नूतन-त्वनिर्देशः। आम्नायशब्दवाच्यासु उपनिषत्सु अनुष्टुप्छन्दोऽपि दृश्यते, तथाच कठोपनिषदि "आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥" मुण्डकोपनिषदि च—'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" इति।

(छ) तेन इति। तेन समयेन कालेन अपवर्गे तृतीया। यद्वा क्रियापवर्गे अत्यन्तार्थे तृतीया।

प्रकाशमृषिमुपसंगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्—ऋषे! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि, तद्ब्रूहि—रामचरितम्, अव्याहतज्योतिरार्षं ते प्रातिभं चक्षुः प्रतिभातु, आद्यः कविरसि" इत्युक्त्वान्तर्हितः। अथ भगवान् प्राचेतसः प्रथमं शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय। (फ)

वन। हन्त! तर्हि मण्डितः संसारः! (ब

आविर्भूतशब्दब्रह्मप्रकाशम् शब्द एव ब्रह्म इति शब्दब्रह्म, आविर्भूतं शब्दब्रह्म इति आविर्भूतशब्दब्रह्म, प्रकाशते प्रकृष्टं शोभते इति प्रकाशः, कर्तरि अच्। आविर्भूतशब्दब्रह्मणा प्रकाशः शोभमान इति आविर्भूतशब्दब्रह्मप्रकाशः तम्। शब्दब्रह्मणः आविर्भावेन चमत्कृतं द्योतमानमित्यर्थः। यद्वा आविर्भूतं शब्दब्रह्मणः प्रकाशः यस्मात् तम्। भूतभावन इति, भावयति चिन्तयति अभिध्यानमात्रेण सृजति इति यावत्,—भावनः, भूतानां पञ्चभूतविकाराणां भावन इति भूतभावनः इच्छामात्रेण स्थावरजङ्गमात्मकस्य जगतः स्रष्टा इत्यर्थः। पद्मयोनिः पद्मं योनिः कारणं यस्य सः विष्णुनाभिकमलोद्भवः ब्रह्मा। अनेन पूर्वोक्तभूतभावनत्वप्रयुक्तपरत्वाशङ्का निरस्ता। वागात्मनि वाक् एव आत्मा स्वरूपं यस्य तत् वागात्म तस्मिन् वाग्रूपे ब्रह्मणि परमतत्त्वे इत्यर्थः, प्रबुद्धोऽसि उन्मीलितज्ञानचक्षुः इत्यर्थः भवसि। ननु अज्ञातत्वात् रामस्य अविज्ञातचरितवर्णनमसम्भवमेव इत्यत आह—अव्याहतेति। न व्याहतं प्रतिहतं ज्योतिः प्रभा दृक्शक्तिरित्यर्थः यस्य तत् अव्याहतज्योतिः अप्रतिहतदर्शनशक्तिः, आर्षं आर्षज्ञानमयं प्रातिभं प्रतिभाजन्यं नवनवोन्मेषशालिन्या धिया जनितं ते चक्षुः प्रतिभातु प्रकाशितं भवतु, अतीतानागतव्यवहितविप्रकृष्टान् सर्वान् अर्थान् प्रत्यक्षमिव चक्षुषा साक्षात् द्रक्ष्यसि प्रतिभावशेन सम्यक् सर्वं विज्ञास्यसि च आद्यः कविः त्वमेव प्रथमः कविरसि इत्युक्त्वा अन्तर्हितः अन्तर्दधे ब्रह्मा इति शेषः। अथ अनन्तरं भगवान् प्राचेतसः वाल्मीकिमुनिः प्रथमं शब्दब्रह्मणः शब्दरूपस्य ब्रह्मणः तादृशं तथाविधं विवर्तम् वाक्यरूपेण परिणामम् यद्वा विवर्तं मिथ्याप्रतीतिविषयं, ब्रह्मरूपे रामायणाख्ये शब्दब्रह्मणोऽपि ब्रह्मैव सत् रामायणत्वेन तस्य या पृथक् प्रतीतिः सा मिथ्या एव रज्जौ सर्पप्रतीतिवत् इति बोध्यम्। तथाच वेदान्तसारे—"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः। अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः।" रामायणं रामः अयते गच्छति प्राप्यते यस्मात् तत्, इतिहासं पुरावृत्तं प्रणिनाय उपनिबबन्ध।

(ब) हन्त इति। हन्त इति हर्षे अव्ययम्। 'हन्त वाक्यारम्भविषादयोः' इति मेदिनी। तर्हि रामायणे रचिते सति संसारः जगत् मण्डितः अलङ्कृतोऽभवत्

आत्रे। तस्मादवोचं, तत्र महानध्ययनप्रत्यूह इति। * (भ)

वन। युज्यते। (म)

आत्रे। विश्रान्तास्मि भद्रे! सम्प्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि। (य)

वन। इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण। (र)

आत्रे। (सबाष्पं) अप्येतत्तपोवनम्? अप्येषा पञ्चवटी? अपि सरिदियं गोदावरी? अप्ययं गिरिः प्रस्रवणः? अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम्? (ल)

वास। अस्त्येतत् सर्वम्। (व)

आत्रे। वत्से जानकि!

स एष ते वल्लभबन्धुवर्गः
प्रासङ्गिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः
प्रत्यक्षदृश्यामिव नः करोति॥ ६॥

[६। प्रासङ्गिकीनां कथानां विषयः स एष ते वल्लभबन्धुवर्गः दृश्यमानः नामशेषाम् अपि त्वाम् नः प्रत्यक्षदृश्याम् इव करोति, इत्यन्वयः।]।

वास। (सभयं स्वगतम्)। कथं नामशेषामित्याह? (प्रकाशम्) आर्ये! किमत्याहितं सीतादेव्याः? (श)

(भ) तस्मादिति। दारकाभ्यां सह अस्माकं सतीर्थत्वं न सम्भवति इति प्रथमः प्रत्यूहः वाल्मीकेरिदानीं रामायणालोचनेनैव कालो गच्छतीति द्वितीयः प्रत्यूह इति ज्ञेयम्।

(य) विश्रान्तेति। विश्रान्ता अपनीताध्वक्लमा। ब्रूहि निर्दिश।

(र) इत इति। पञ्चवटी पञ्चानां वटानां समाहारः। संज्ञायामेवायम्। गोदावरीतीरेण गोदावर्याः तीरं तेन। करणे तृतीया।

(ल) अपीति। सर्वत्र अपिः प्रश्ने। वनदेवता वनाधिष्ठात्री।

(६) स इति। प्रासङ्गिकीनां प्रसङ्गात् आगताः इति प्रासङ्गिक्यः तासाम् प्रसङ्गतः एव जातानां कथानां संलापानां विषयः आश्रयः स एष ते तव वल्लभः प्रियः बन्धुवर्गः वासन्तीप्रमुखः दृश्यमानः विलोक्यमानः त्वम् नामशेषां नामैव शेषं यस्याः सा नामशेषा ताम् नाम्नैव स्थितां मृतां

आत्रे । न केवलमत्याहितं सापवादमपि । (च)

वास । कथमिव ? (छ)

आत्रे । [(कर्णे) एवमिव ।]

वास । अहह ! दारुणो दैवनिर्घातः । (इति मूर्च्छति) (ज)

आत्रे । भद्रे ! समाश्वसिहि ।

वास । हा प्रियसखि ! हा महाभागे ! ईदृशस्ते निर्माणभागः ! रामभद्र ! रामभद्र ! अथवा अलं त्वया ? आर्ये आत्रेयि ! अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ? (झ)

आत्रे । नहि नहि । (ञ)

शरीरेण नाममात्रावशिष्टा कृतामित्यर्थः, त्वां न अद्यापि कर्तरि षष्ठी । प्रत्यक्षदृश्या, प्रत्यक्षं दृश्या इति सुप्सुपेति समासः । ताम् साक्षाद्दृगविषयभूताम् इव करोति । सामनीमस्तु तव प्रियं सुहृद्वर्गं विलोक्य मृतामपि त्वां विलोकयामीव इति प्रत्यक्षदृश्यत्वकथनात्मा एवमन्तर्भावत्वात् वाच्या भावाभिमानिक्रियोत्प्रेक्षा त्वां सीं च नामशेषत्वस्य प्रत्यक्षदृश्यत्वेन विरोधात् तस्य वस्तुतत्त्वाद्यपोतेन च निरासात् विरोधाभासश्च बोध्यः । उपजातिः ।

(च) अत्याहितमिति । अत्याहितम् गुर्वी व्यापत् अनर्थम् आधीयते मनो यस्मिन् तदत्याहितम् । येन कर्मणा जीवनं हातुमर्हति तादृशं किमपि कर्मजातं किं घटितमित्यर्थः । "अत्याहितं महाभीतिः कर्म जीवानपेक्षि च" इत्यमरः ।

(छ) न इति । अत्याहितं तु जातमेव, तत्र कलङ्कोऽपि जात इत्यर्थः ।

(ज) कथमिति । कथं केन प्रकारेण जातमिति शेषः ।

(झ) अहह इति । अहह खेदातिशयद्योतनार्थं । दैवनिर्घातः दारुणः असहनीयः दैवकृतनिर्घातः, निर्घातं वातः निघातिः इत्यमरः निपतौ इत्यर्थः । दुरदृष्टजनितप्रहार इति यावत् ।

(ञ) हा इति । निर्माणभागः निर्माणस्य भागः भाग्यम् । तव निर्माणकृतकस्य विधातुः कार्यस्य परिणामः सृष्टिफलमित्यर्थः, ईदृशः ईदृशः परिणतः । विधात्रा त्वयि तादृशी लोकातिशायिनी सर्वगुणसम्पत् समावेशिता आसीत्, ताम् इदानीम् ईदृशं विरूपम् अवस्थान्तरं प्रापय्य तेन सर्वथा विवेकवर्जितम् एवम् आचरितम् इति भावः । त्वया अलं त्वया किंचित् साध्यं नास्ति, यद्वा त्वया निन्दितेन अलं तव निन्दया अधुना किमपि फलं नास्तीत्यर्थः । किं इदानीं काचित् । प्रवृत्तिः वार्ता ।

(ञ) नहि इति । नहि काचिदपि प्रवृत्तिरस्तीति भावः । अ

वास॰। हा कष्टम्, आर्यारुन्धतीवसिष्ठाधिष्ठिते रघुकुलगृहे* जीवन्तीषु च प्रवृद्धराज्ञीषु कथमिदं जातम्?। (ख)

आत्रे॰। ऋष्यशृङ्गसत्रे † गुरुजनस्तदासीत्। सम्प्रति परिसमाप्तं तद्द्वादशवार्षिकं सत्रम्, ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः, ततो भगवत्यरुन्धती "नाहं वधूविरहितामयोध्यां गमिष्यामि" इत्याह, तदेव राममातृभिरनुमोदितम्। तदनुरोधाद्भगवतो वसिष्ठस्य परिशुद्धा वाचो यथा—"वाल्मीकितपोवनं गत्वा तत्र वत्स्यामः" इति। (ग)

वास॰। अथ स राजा किमारम्भः ‡ सम्प्रति? (घ)

(ख) हा इति। आर्यारुन्धतीवसिष्ठाधिष्ठिते आर्यया अरुन्धत्या वसिष्ठेन च अधिष्ठिते रघुकुलगृहे रघूणां कुलं वंशः, तस्य गृहे भवने, तद्गृहे अरुन्धतीवसिष्ठप्रमुखाणामुपदेशकशिरोमणीनामधिष्ठाने पूतचरितानां रघुवंशीयानाञ्च निवासे, इत्यर्थः; प्रवृद्धासु वर्षीयसीषु राज्ञीषु कौशल्याप्रमुखासु जीवन्तीषु सतीषु। भावे सप्तमी। कथमिदम् ईदृशं बीभत्सं कर्म जातं सङ्घटितम्। अरुन्धती वसिष्ठः दशरथस्य पत्न्यश्च किं कीदृशमिदं कार्यं न न्यवारयन्नित्यर्थः।

(ग) ऋष्य इति। गुरुजनः वसिष्ठारुन्धतीकौशल्याप्रभृतयः इत्यर्थः। अत्र सीता-निर्वासनसमये। द्वादशवार्षिकं द्वादशवर्षाणि व्याप्य भवति इति तद्धितार्थे द्विगुः, कालात् ठञ् इति ठञ्प्रत्ययः। सत्रम् यज्ञः। विसर्जिताः स्वगृहगमनाय आज्ञप्ताः। वधूविरहिता वध्वा स्नुषया सीतया इत्यर्थः, विरहितां हीनाम् अयोध्यां न गमिष्यामि न यास्यामि इति अरुन्धती आह। राममातृभिः कौशल्याप्रभृतिभिः तदेव सीताशून्यायोध्यायां सर्वथा गमनमनुचितमिति यत् तदेव इति भावः, अनुमोदितं समर्थितं, तदनुरोधात् तस्य वाक्यस्य अनुरोधः अनुसरणम् तस्मात् यब्लोपे पञ्चमी, हेतौ वा।

(घ) अथ इति। अनन्तरं दुःखोपचयात् सीतापरित्यागेनापि राज्ञः प्रजानुरञ्जनप्रती-बोधकत्वाच्च आवश्यका राजेति विशेषणः शब्दः प्रयुक्तः। किमारम्भः कः आरम्भः कार्यं व्यापारो वा यस्य सः, किमाचार इत्यर्थः।

---

* जीवितेषु रघुकुलवृद्धेषु इति पाठान्तरम्।

† ऋष्यशृङ्गाश्रमे इति क्वचित् पाठः।

‡ किमाचार इति पाठान्तरम्।

आत्रे । तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः । (ङ)

वास । अहह ! धिक्, परिणीतमपि ! (च)

आत्रे । शान्तं पापम् । (छ)

वास । का तर्हि यज्ञे सहधर्म्मचारिणी ? (ज)

आत्रे । हिरण्मयी सीताप्रतिकृतिः । (झ)

वास । हन्त भोः ! (ञ)

वज्रा पि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु [हि] विज्ञातुमर्हति ॥ ७ ॥

[७ । वज्रादपि कठोराणि कुसुमादपि मृदूनि लोकोत्तराणां चेतांसि को नु विज्ञातुम् अर्हति, इत्यन्वय)।

(ङ) तेन इति । अश्वमेध. अश्व. मेध्यते हिंस्यते यस्मिन् क्रतौ स । प्रक्रान्तः आरब्धः ।

(च) अहह इति । न केवलं निरपराधा जानकी निर्वासिता, पुन. दारपरिग्रहोऽपि कृतः इत्यर्थः । अपत्नीकस्य धर्माचरणे अधिकाराभावात् सीताविरहितस्य रामस्य भार्यान्तर-परिग्रहं विना अश्वमेधानुष्ठान न सम्भवतीति मत्वा तत्परिणय. शङ्कितः । परिणीतेति भावे क्तः ।

(छ) शान्तमिति । पापं पापवत् अकर्चिकर, रामस्य दारान्तरग्रहणसम्बन्धीयवाक्यं शान्तं विरतं भवतु इत्यर्थं । रामेण पुन दारपरिग्रहो न कृत इति भाव. ।

(ज) का इति । तर्हि भार्यान्तरापरिग्रहे सतीत्यर्थ । सहधर्म्मचारिणी सह धर्म्मं चरति या सा, अभिन्नतया धर्म्मकारिणी पत्नीत्यर्थ. ।

(झ) हिरण्मयीति । हिरण्मयी विकारार्थे मयट्, तत. ङीप् । स्वर्णनिर्म्मिता इत्यर्थः । सीताप्रतिकृति. जानकीप्रतिमूर्त्ति ।

(ञ) हन्त इति । हन्त भो. इति हर्षविषादसूचकमव्ययम् ।

(७) वज्रादिति । वज्रात् शैलदारणात् अशने , अपि इत्यर्थ., कठोराणि कठिनानि, कर्त्तव्या-नुरोधात् कदाचित् वज्रोपमानि, कथमन्यथा प्राणेभ्योऽपि प्रियतमां निर्दोषां भार्य्यां [illegible]सयितुं समर्थानि इति भाव., कुसुमादपि पुष्पादपि मृदूनि कोमलानि [illegible] परतन्त्रा [illegible] सम्माने अतिसुकुमाराणि इति यावत् । लोकोत्तराणां अलौकिकानां मह [illegible] नांसि चित्तभावान् इत्यर्थ., को विज्ञातुम् विशेषेण वेदितुं अर्हति [illegible] ।

आर्व । विसृष्टश्च वामदेवाभिमन्त्रितो मेध्योऽश्वः, उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः, तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुः दत्तदिव्यास्त्रसम्प्रदायः चतुरङ्गसाधनान्वितोऽनुप्रहितः । (ट)

वास । (सवेगकौतुकास्रम्) । कुमारलक्ष्मणस्यापि पुत्रः ! हन्त, मातर्जीवामि ! (ठ)

न कोऽपि इत्यर्थः । दुरवगाहचित्तवृत्तयो हि महापुरुषा इति भावः । नु इति वितर्के । अयमाशयः—निर्दोषायां सीतायां रामहृदयस्य मृदुत्वमेव स्वाभाविकम् । कठोरत्वं तु मूर्खलोकानुसरणार्थत्वादागन्तुकमिति प्रतिकृतिकरणादवगम्यत इति । न च "यस्य भार्या विदूरस्था पतिता दूषितापि वा । अनिच्छा प्रतिकूला च तस्याः प्रतिकृतिः क्रिया ।" इति स्मरणात् प्रतिकृतिकरणं मृदुत्वानुपपादक इति वाच्यम् तस्य परिणयान्तराशक्तनिरवकाशक्रियाविषयत्वात्, अश्वमेधादेः सावकाशत्वात् परिणयान्तरशक्तत्वात् । किं च सीतासदृशप्रतिमाकरणं मृदुत्वापादकमेव । एतादृशविचारसाध्यत्वात् 'को नु विज्ञातुमर्हती' ति तज्ज्ञानस्वरूपयोग्यतापि दुर्लभेत्युक्तम् । अत्र कठोरकोमलयोर्विरूपयोः एकत्र सङ्घटनात् विषमालङ्कारः । तदुक्तम्—'गुणौ क्रिये वा चेत् स्यातां विरुद्धे हेतुकार्ययोः । यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः । विरूपयोः सङ्घटना या च तद्विषमं मतम्" मिति । प्रथमपादीयेन अपिशब्दद्वयेन अनुक्तसः तत्तदितरवस्त्वपेक्षया कठोरत्वकोमलत्वयोरपि प्रत्ययात् अर्थापत्तिरपि ।

(ट) विसृष्ट इति । वसिष्ठस्य असान्निध्यात् वामदेवाभिमन्त्रितः वामदेवेन अभिमन्त्रितः मन्त्रोच्चारणपूर्वकं संस्कृतः, तथोक्तः मेध्यः छेदनयोग्यः पवित्रः अश्वः विसृष्टः स्वच्छन्दगमनाय विमुक्तः । यथाशास्त्रं शास्त्रमनतिक्रम्य इति, शास्त्रविधानानुसारेण तस्य अश्वस्य रक्षितारः रक्षकाश्च उपकल्पिताः नियुक्ताः । तेषां रक्षिणाम् अधिष्ठाता अधिनायकः लक्ष्मणपुत्रः चन्द्रकेतुः दत्तदिव्यास्त्रसम्प्रदायः दत्तो दिव्यास्त्राणां उत्कृष्टास्त्राणां सम्प्रदायः समूहो यस्मै, यद्वा सम्प्रदीयते इति सम्प्रदायः, गुरुपरम्परोपदेशः, ततः पूर्ववत् । चतुरङ्गसाधनान्वितः हस्त्यश्वरथपादातरूपैः चतुर्भिः अङ्गैः पूर्णं यत् सैन्यं तेन अन्वितः युक्तः अनुप्रहितः अस्य अश्वस्य पश्चात् प्रेषितः ।

(ठ) सवेगमिति । सवेगकौतुकास्रम् वेगः पूर्वपरिचितस्य चिरविलक्ष्मणस्य स्मरणात्, कौतुकं बालकलक्ष्मणस्य पुत्रो जातः स च वीरधर्मम् अनुसरति इति चिन्तनेन, तयोः यदस्रं नयनजलं तेन सह वर्त्तमानं यथा तथा । हन्त इति हर्षे । जीवामि इति । प्रत्यस्तजीवनवती भवामि इत्यर्थः । वासन्ती खलु प्रियसख्याः सीतायाः विवासनवार्त्तां श्रुत्वा मृतकल्पा सञ्जाता आसीत्, अधुना निरतिशयस्नेहास्पदस्य लक्ष्मणस्य अद्भुतायमानं पुत्रजननवृत्तान्तं आकर्ण्य प्रत्यागतजीविता संवृत्ता इति भावः । यद्वा अपुत्रितस्य लक्ष्मणस्यापि पुत्रो जातः इति श्रुत्वा विस्मयप्रकाशार्थं मातर्जीवामीति वासन्तीवाक्यम् ।

अत्र। अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडमब्रह्मण्यमुद्घोषितं, ततो न राजापचारमन्तरेण प्रजानामकालमृत्युश्चरतीति आत्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्। (ङ)

"शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम्" ॥ ८ ॥

[८। शम्बूको नाम वृषलः पृथिव्यां तपः तप्यते हे राम! स ते शीर्षच्छेद्यः तं हत्वा द्विजम् जीवय, इत्यन्वयः।]

(ङ) अत्र इति। अत्रान्तरे एतस्मिन् अन्तरे अवकाशे केनचित् ब्राह्मणेन विप्रेण मृत अकाले गतजीवनं पुत्रं तनयं राजद्वारे राज्ञः रामचन्द्रस्य प्रासादस्य द्वारदेशे उत्क्षिप्य संस्थाप्य इत्यर्थः, सोरस्ताडम् उरसः वक्षसः ताडः ताडनम् इति उरस्ताडः तेन सह वर्तमानं यथा तथा वक्षसि कराघातं कृत्वा इत्यर्थः, अब्रह्मण्यम्, अब्रह्मण्यमिति शब्दः, उद्घोषितम् उच्चैः उच्चारितम्। ततः तस्य आर्तनादं श्रुत्वा इत्यर्थः, राजापचारं राज्ञः भूपस्य अपचारं अधर्मम् इति तम् अन्तरेणेति अव्यययोगात् द्वितीया। अन्तरेण विना प्रजासु मध्ये अकालमृत्युः अकाले प्रत्युत्पत्ति कालो मृत्युः न चरति न प्रसरति, प्रजाः असमये न म्रियन्ते इति विचिन्त्य आत्मदोषम् आत्मनः स्वस्य दोषं निरूपयति निश्चिनोति, ममैव दोषेण अयं ब्राह्मणकुमारः अकाले गतासुः इति अवधारयति सति, सहसा हठात् अशरीरिणी अमूर्त्ता वाक् वाणी दैववाणी इति यावत्, उदचरत् उदगच्छत्। उत्पूर्वात् चरतेरकर्मकात् परस्मैपदम्। दैवी वाणी अश्रूयत इत्यर्थः। राजापचारमन्तरेण इत्यत्र रामायणम्—'राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः। असद्वृत्ते हि नृपतावकाले म्रियते जनः'॥

८। शम्बूक इति। शम्बूक नाम शम्बूक इति नाम्ना प्रसिद्धः वृषलः वृष सुकृतं धर्मं लुनाति नाशयति इति वृषलः। यद्वा वृष सुकृतं तस्य अलं वारणं करोति इति वृषलः प्रकाशादित्वात् साधुः, शूद्रः पृथिव्यां तपः तप्यते तपश्चरति। 'तपस्तप कर्मकस्य' इत्यात्मनेपदम् बोध्यम्। हे राम! स शम्बूकः ते तव कर्त्तुः शीर्षच्छेद्यः शीर्षे मूर्द्धनि छेद्यः दण्ड्यः। शूद्रस्य तपसि अनधिकारात् अधर्मप्रवर्तकत्वात् स दण्डार्ह इति भावः। तं शम्बूकं हत्वा विनाश्य द्विजम् विप्रकुमारं जीवय, मृत्युं जीवय। तथाच मनुः—"न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति। नास्याधिकारो धर्मेऽस्ति न धर्मात् प्रतिषेधनम्॥" इति। अत्र पूर्वार्द्धोक्त शीर्षच्छेद्यत्वं प्रति हेतुत्वोपन्यासात् काव्यलिङ्गं वाक्यार्थहेतुक, शीर्षच्छेद्यत्वं प्रति हेतुत्वादयं काव्यलिङ्गम्।

इत्थं प्रस्तुत्यैव कृपाणपाणिः पुष्पकं विमानमारुह्य सर्व्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः सञ्चरितुमारब्धवान्। (ढ)

वास। शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति, तदपि नाम रामभद्रः पुनरपीदं वनमलङ्कुर्य्यात्? (ण)

आत्रे। भद्रे, गम्यतेऽधुना।

वास। एवमस्तु, कठोरीभूतोऽयं दिवसः। तथाहि (त)

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि—
घर्म्मस्रंसितबन्धनैः सकुसुमैरर्च्चन्ति गोदावरीम्।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः॥ ९॥

[९। कूले (स्थिताः) छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः कूजत्क्लान्तकपोतकुक्कुटकुलाः कुलायद्रुमाः कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभिः घर्म्मस्रंसितबन्धनैः सकुसुमैः गोदावरीम् अर्च्चन्ति, इत्यन्वयः]।

(इति परिक्रम्य निष्क्रान्ते।)

विष्कम्भकः॥ (थ)

(ढ) इत्थमिति। इत्थं पूर्व्वोक्तं वाक्यम् उपन्यस्य आकाशवाणीत्यर्थः एव, अत्र एवशब्देन अनन्तरक्रियाया अविलम्बेन क्रियमाणत्वं प्रतीयते। कृपाणपाणिः कृपाणः खड्गः पाणौ हस्ते यस्य सः खड्गपाणिः। 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः' इति सप्तम्यन्तस्य परनिपातः। पुष्पकं तन्नामकं विमानं देवयानम्। दिशः आशाः। विदिशः अपदिशम्। "क्लीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्" इत्यमरः। सर्व्वा इति द्वितीया, 'देशकालभावाध्वगन्तव्याः कर्म्मसंज्ञा अकर्म्मकाणा'मिति कर्म्मसंज्ञा। शूद्रतापसान्वेषणाय शूद्रश्चासौ तापसश्चेति शूद्रतापसः तस्य अन्वेषणम् अनुसन्धानं तस्मै शम्बूकानुसन्धानार्थमित्यर्थः।

(ण)। शम्बूक इति। धूमपः अधोमुखतया धूमपानकारी, नित्योपवासीत्यर्थः। तत् तस्मात् हेतोः, अपिशब्दः प्रश्ने। नाम सम्भावनायाम्। द्वितीयः अपिशब्दः समुच्चये। अलंकुर्य्यात् आगमनेन शोभयेत्।

(त) एवमिति। कठोरीभूतः अकठोरः कठोरः भूतः इति च्विप्रत्ययः। अत्युष्णः रविमयूखैः दुःसहो जातो दिवसः। मध्याह्नो वर्त्तते इत्यर्थः।

(९) कण्डूलेति। कूले गोदावर्य्याः तीरे स्थिताः छायापस्किरमाणविष्किरमुखव्याकृष्टकीट-

तत्र छायासु घनातपे चपञ्जिरमाणा हर्षादस्मिन्नुच्छन्त ये विष्किरा: पक्षिण: तेषां मुखै- श्चञ्चुभिरित्यर्थः, व्याकृष्टा आकृष्य बहिरानीता: कीटा: कृमिप्रभृतयो याभ्यस्ता:, छायापञ्जिर- माणविष्किरमुखव्याकृष्टकीटा: तथोक्ता: त्वचो वल्कलानि येषां ते, 'किरतेर्हर्षजीविकाकुलाय- करणेष्विति वाच्यम् ।' 'अपाच्चतुष्पाच्छकुनिष्वालेखने' इति सूत्राभ्यां सुट् । येषां तरुषु कुक्कुटादय: पक्षिण: सहर्षं तरुत्वगभ्यन्तरात् क्षुद्रान् कीटान् चञ्चुभि: संगृह्य भक्षयन्ति इत्यर्थः । कूजत्क्लान्तकपोतकुक्कुटकुला: कूजन्ति अव्यक्तमधुरं रुवन्ति क्लान्तानां मध्याह्नमार्तण्ड- किरणतप्तानां कपोतानां पारावतानां कुक्कुटानां चरणायुधानां च कुलानि समूहा येषु ते, मध्याह्नरविकिरणतापिता: पारावतादयो येषां तरुशाखासु निलीना निद्रालस्य कूजन्ति, तथोक्ता: कुलायद्रुमा: कुलायप्रधाना द्रुमा इति शाकपार्थिवादिवत् समास:, पक्षिनीड- निचिता वृक्षा: । कण्डूलेति, कण्डू: कण्डूतिर्विद्यते येषां ते कण्डूला: 'सिध्मादिभ्यश्चेति' लच् । कण्डूला ये द्विपानां हस्तिनां गण्डभित्तय: कपोलभित्तय इत्यर्थः, तेषां कषणेन कण्डूनिरासार्थं घर्षणेन य उत्कम्प: सञ्चलनं तेन सम्पातिभि: पातुकैर्घर्मस्रंसितबन्धनै: घर्मेण तापेन स्रंसितं श्लथीकृतं बन्धनं वृन्तं येषां तै: स्वकुसुमै: निज- पुष्पै: गोदावरीम् तन्नाम्नीं नदीम् अर्चन्ति पूजयन्ति । कपोलकण्डूविनयनार्थं कटे कण्डूयमानै: करिभि: कम्पितेभ्य: तीरतरुभ्यो दिनकरकरतापशिथिलीकृतबन्धनानि पुष्पाणि गोदावर्यां पतन्ति इत्यर्थः । तथाविधकुसुमसम्पात अर्चनत्वेन उत्प्रेक्ष्यते ।

अत्र हव्यवर्णनया वैदिकशिरोमणीनां गृहमेधिनां मध्याह्नकालकृत्यानि प्रतीयते । कण्डूले- त्यादिविशेषणेन द्विपानां दुष्टक्षत्राणां देहनिर्णयार्थमुपसन्नै: तै: तत्कृतोपद्रवनिरसन- संभ्रमतया संतुष्टै: भूमिपतिभि: समर्पितत्वं प्रतीयते । अर्चन्तीत्यनेन तेषां 'कषाये कर्मणि पक्व' इति निष्पन्नकामक्रोधादितया द्विपानां देवताराधनतया प्रतिहतपदार्थं प्रती- यते । छायापञ्जिरमाणेत्यनेन तेषां गृहेषु अतिथय: स्वयमागत्य भोज्यानि भुञ्जत इति प्रतीयते । कूजत्क्लान्तेत्यनेन तेषां मध्याह्नकालप्रयुक्तश्रान्तियुक्तानामागन्तूनां शाखाधोदेशनावट समाज- पीडाज्ञ प्रतीयते । कुलायेत्यनेन तेषामनेककुटुम्बभरणं प्रतीयत इति सहृदया दयां कुर्वन्तु इति । 'तत्र भवत: केनापि' इत्यारभ्य 'अयमस्माकमध्ययनप्रत्यूह' इत्यन्तेन अष्टावक्रप्रवेशात् उत्सृष्टस्य सीतावनप्रापणेनाल्लक्ष्यस्य बीजस्योद्भेदात् प्रतिमुखसन्धिरयम् । 'लक्ष्यालक्ष्यस्य बीजस्य व्यक्ति: प्रतिमुखं मतम्' इति लक्षणात् । 'अप्येतत्तपोवनम्' इत्यारभ्य दृष्टनष्टपदार्थानुसरण- रूपपरिसर्पं उक्त: । 'हा रामभद्र' इति प्रमुग्धनिष्ठुरवचनरूप वज्रमुक्तम् । 'सीताप्रति- कृति' इत्यादिनानुरागप्रकाशनरूपप्रगमनमुक्तम् । 'वज्रादपि' इत्यत्र आरभ्योपशमनात्मक: शम उक्त: । 'विसृष्टश्च वामदेवाभिमन्त्रित' इत्यारभ्य 'जनस्थान एव तपश्चरति' इत्यन्तेन चारित्रयज्ञानां कीर्तनात् वर्णसंहार उक्त: । इयं चूलिका । तदुक्तम्—'नेपथ्यान्त

ततः प्रविशति सदयोद्यतखड्गो रामभद्रः। (त)

राम। रे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य गात्रमसि दुर्वहगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते ?॥ १० ॥

[रे । रे दक्षिण हस्त मृतस्य द्विजस्य शिशोः जीवातवे शूद्रमुनौ कृपाणं विसृज। दुर्वहगर्भखिन्नसीताविवासनपटोः रामस्य गात्रम् असि, कुतः ते करुणा, इत्यन्वयः।]

पातं मूर्च्छिकाश्वस्य मृचनम् इति राघवभ। अत उत्प्रेक्षालङ्कारः, सा च सर्वनीत्यव इवशब्दाध्याहारेण प्रतीयमाना। अथवा अर्थान्तरस्य सिद्धवत्करणात् अर्थान्तरन्यासोऽपि तत्सम्बन्धरूपातिशयोक्तिः। शार्दूलविक्रीडितं वृत्तम्।

(ण) विष्कति। भूतानां भाविनीनाञ्च घटनानामुपस्थापकः संक्षिप्तप्रबन्धो विष्कम्भकः। तदुक्तं दर्पणे—"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥" तथाचास्मिन् प्रबन्धे सीतानिर्वासनं, कुशलवयोर्जन्म, वाल्मीकिसमीपे समर्पणमित्यादीनामतीतानां तथा अश्वमेधायोजनं, शम्बूकवधार्थं रामागमनञ्च इत्यादीनां भविष्यद्घटनानां संयोजकत्वं ज्ञायते। स च विष्कम्भकः अत्र शुद्धः, मध्यमाभ्यामात्रेयीवासन्तीभ्यां प्रयोजितत्वात्। मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात्' इति।

(त) तत इति। सदयोद्यतखड्गः सदयम् उद्यतः खड्गो येन सः आहिताग्न्यादिषु पाठात् परं खड्गोद्यत इति रूपम्। ब्राह्मणकुमारस्य सञ्जीवनानुरोधात् शम्बूकस्य विनाशाय खड्गः उद्यतः न तु वैरप्रतिमोचनार्थम् अतः करुणामयः श्रीरामः सदयम् असिमुत्तोलितवान् इति भावः।

(१०) रे इति। रे इति अवज्ञासूचकमव्ययं, सीतानिर्वासनकरणात् अवज्ञा इति ध्येयम्। दक्षिण हस्त अपसव्यभुज, मृतस्य अकाले त्यक्तप्राणस्य द्विजस्य शिशोः ब्राह्मणकुमारस्य जीवातवे पुनः जीवनाय 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे' इति मेदिनी। शूद्रमुनौ शूद्रजातौ तपस्विनि, मुनीनाम् आचारं प्रपन्ने शूद्रे तस्मिन् शूद्रतापसे कृपाणं खड्गं विसृज मुञ्च पातय इत्यर्थः। ननु दोषाभावे कथं प्रहरामि इत्याह—दुर्वहेति। दुर्वहगर्भखिन्नसीताविवासनपटोः दुर्वहः प्रकृष्टत्वात् दुःखेन वोढुं शक्यः पूर्ण इति यावत्, यो गर्भः तेन खिन्ना क्लिष्टा, तस्याः प्रपन्नगर्भभारालसायाः सीतायाः इत्यर्थः, तस्याः विवासने निष्कासने अरण्ये परित्यागे इति यावत्, पटोः निपुणस्य अतिनिर्भयस्य कर्मणि रामस्य गृहस्थस्य इत्यर्थः, गात्रमसि अङ्गं भवसि ; कुतस्ते करुणा कृपा, शूद्रतापसवधे कुण्ठा इत्यर्थः। येन पूर्णगर्भा पतिव्रता

अथ कथञ्चित् प्रहृत्य। कृतं रामसदृशं कर्म्म, अपि जीवेत् स ब्राह्मणशिशुः ?। (द)

(प्रविश्य दिव्यपुरुष।) जयति जयति देवः। (ध)

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमृद्धिः।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

[११। यमादपि दत्ताभये त्वयि दण्डधारे असौ शिशु सञ्जीवित, मम च इयम् ऋद्धि। एष शम्बूक शिरसा ते चरणौ नत। सत्सङ्गजानि निधनानि अपि तारयन्ति, इत्यन्वय]।

सीता इक्ष्वाकुकलङ्कभयात् विसर्ज्जिता, तस्य निरपराधिकारकस्य कारिजनप्रहार कल्पोदयो न सम्भवतीति भाव। अत्र दयाविरह प्रति सीताविवासननिपुणत्वरूपपदार्थस्य विशेषणगत्या हेतुत्वप्रत्ययात् काव्यलिङ्गमलङ्कार। वसन्ततिलकावृत्तम्।

(द) कथञ्चिदिति। कथञ्चित् कृच्छ्रेण इत्यर्थ, प्रहृत्य आहत्य। इद चिन्त्य, 'हृञ् हान वधम्') इत्यारभ्य 'एताभ्यद गकारिल्लात् प्रयोगानुसरतानि' इति न प्रवधात्। रामसदृश रामस्य नृपस्य विसर्ज्जितनिर्दोषपत्नीकस्य सदृश योग्य कर्म अतिनिष्ठुर कार्य्य कृतमित्यर्थ, अपि च कृत रामसदृश कर्म्म इत्यनेन न तु दशरथसदृश कर्म्म कृतमिति व्यज्यते। दशरथो हि अबुद्धिपूर्वक मुद्रतापसवध कृतवान्, तथाच 'पितृ शतगुण पुत्र इति न्यायेन दोषविषय एव, न तु गुणविषय इति ख्यापनम् इह व्यज्यत इति राघवभट्ट। अपि सम्भावनायाम पापकारणेन सीताया निर्दोषत्वनिश्चयेऽपि फलाभावदर्शन अन्यगौरवात् ब्राह्मणशिशुजीवन-प्राप्तिनिश्चयेऽपि स्वीयदैवविपर्य्ययवशात् तथा स्यादिति आशङ्का रामस्य इत्यर्थ।

(ध) प्रविश्यति दिव्यपुरुष स्वर्गीयाकृति पुरुष। शम्बूकशरीर विहाय दैवत्व नीति भाव।

(११) दत्तेति यमादपि वैवस्वतादपि अपादान पञ्चमी दत्ताभये दत्तम अभय येन तु तस्मिन् यमभयनिवारके, नारायणत्वा दति भाव। यद्वा मृतस्य पुनरुज्जीवनात् यमादपि अभयदातृत्वम्, तस्मिन् त्वयि दण्डधारे दण्ड धारयति य स दण्डधार [illegible], तस्मिन् वर्णधर्म्मोल्लङ्घनकारिणि मयीति शेष, असौ शिशु ब्राह्मणतनय स [illegible] भाव, मम च इयम् एषा ऋद्धि विभूति दिव्याकृतिलाभरूपा सम्पदिति याव[illegible] [illegible]ति

राम। इयमपि प्रियं नः, तदनुभूयतामुग्रस्य तपसः परिपाकः। (न)

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च * सम्पदः।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवाः॥ १२॥

[१२ यत्र आनन्दाश्च यत्र मोदाश्च यत्र पुण्याः सम्पदश्च, वैराजा नाम तैजसा ते लोका ध्रुवा ते सन्तु इत्यन्वयः]

शम्बू। युष्मत्पादप्रसादोपाय एष महिमा किमत्र तपसा, † अथवा महदुपकृतं तपसा। (प)

आशङ्कायामाह—शम्बूक इति। एषोऽहं शम्बूक नामा शूद्रतापसः शिरसा मूर्द्धा करणे तृतीया। ते तव चरणौ नतः तव चरणौ नमामि इत्यर्थः। अत्र नमधातोः क्तप्रत्ययश्चिन्त्यः। तत्र त्वं कथञ्चित् समाधानं यथा—नमन्ति फलिनो वृक्षा इत्यादि प्रयोगदर्शनात् पूज्यार्थे नमधातुः नातमात्रार्थे अकर्म्मकः पूजार्थे च सकर्म्मकः इत्यदीरित नमःस्व गत्यर्था कर्म्मका इत्यादिना कर्त्तरि क्तप्रत्ययः चरणाविन्यत्र तु क्रियाध्याहारेण कर्म्मत्वमिति। यद्वा नमधातोर्गत्यर्थत्वस्वीकारात् कर्त्तरि क्तविधानम् अन्यथा च्युतसंस्कृतिदोषो दुर्निवारः। ननु दण्डविधानात् कथम् ऋद्धिः इत्यत आह—सत्सङ्ग इति। सतसङ्गजानि सतां साधूनां सङ्गात् सङ्गमात् जायन्ते यानि तानि साधुसमागमसम्भूतानि निधनानि विनाशा अपि तारयन्ति संसारसागरमिति शेषः पुण्यलोकान् प्रापयन्ति इत्यर्थः। अत्र दण्डरूपकारणात् विभूति रूपकार्योत्पत्तेर्विषमालङ्कारः, स च सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासेन संसृष्टः। यस्मादपि इत्यपिशब्दे न यमापेक्षया सद्भ्यस्तरवस्तुभ्योऽभयदानस्य निधनान्यपि इत्यपिशब्देन च सङ्कलनमूला तारणकर्तृत्वस्य अनुषक्त एव प्रतीत्या अर्थापत्तिरपि मता। वसन्ततिलकं वृत्तम्।

(न) इयमिति। इयमपि ब्राह्मणशिशोः उज्जीवनम् तव च दिव्यदेहलाभः इत्युभयमेव प्रियं नः, अस्माकं प्रीतिमावहति। उग्रस्य दारुणस्य तपसः फलं पुण्यलोकनिवासरूपमित्यर्थः, अनुभूयतां प्राप्यतामित्यर्थः।

(१२) यत्रेति। यत्र येषु लोकेषु आनन्दा आत्मानुभवजन्या सुखा मोदा दिव्यविषयानुभवजन्या ह्लादाः पुण्याः पवित्राः सम्पदः अणिमादिविभूतयश्च सन्ति, विराजः ब्रह्मणः इमे इति वैराजा नाम प्रसिद्धाः तैजसाः तेजोमयाः न पुनर्भूलोकवत् पाञ्चभौतिकाः, ते लोकाः ध्रुवाः अनपायिनः नित्याः स्थानानि ते तव सन्तु भवन्तु चिरकालं ब्रह्मलोके तिष्ठ इति भावः

* पुण्याभिसन्धयः इति क्वापि पाठः। † ननु तपसः फलमिति पाठान्तरम्।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो

मामन्विष्यन्निह वृषलकं योजनानां शतानि ।*

क्रान्त्वा प्राप्तः स इह तपसां सम्प्रसादोऽन्यथा चेत्

क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ? ॥१३॥

[१३ । भुवने अन्वेष्टव्य भूतनाथ शरण्य (त्वमिति शेष) वृषलक माम् अन्विष्यन् योजनाना शतानि क्रान्त्वा इह सम्प्राप्त इति स तपस सम्प्रसाद , अन्यथा चेत अयोध्याया दण्डकाया वने व पुन उपगम क इत्यन्वय]

राम । किं नाम दण्डकेयम् ? । (सर्वतोऽवलोक्य) आः । (फ)

(प) युष्मदिति । युष्मत्पादप्रसादोपाय युष्माक पाद ना चरणाना प्रसाद अनुग्रह एव उपाय कारण यस्य स एष दिव्यलोकप्राप्तिरूप म हमा माहात्म्यम् । अत्र अभ्युदय विषये तपसा कि न किमपीत्यर्थ समर्थम क र भवदनुग्रहेण व सञ्जाता इति भाव ।

(१३) तप कर्तृक महोपकारमुपपादयति—अन्वेष्टव्य इति । भुवने लोके अन्वेष्टव्य मार्गितव्य श्रवणमननादिभिरनुसन्धेय इति यावत भूतनाथ भूताना प्राणिना नाथ पति शरण्य शरणे साधु इति, शरणागतवत्सल परित्राता त्वम् इति शेष , वृषलक शूद्रमधम माम् अन्विष्यन् विचिन्वन वृषलक इत्यत्र वृष धर्म लुनातीति व्युत्पत्या 'शूद्र.श्च वृषलश्च' इत्यादिशाभ्यास्थितानुसारेण स्वतन्त्रतपश्चरणरूपस्वदोषाधीनत्व विवक्षितम । योजनाना शतानि अयोध्या दण्डकयो योजनीयशतान्यपि व्यवधानमिति कृत्स्नभूमण्डलान्वेषणानन्तरमत्र प्राप्त इति सूचयति । क्रान्त्वा सुबहुमध्वान विलङ्घ्य पद्भ्यां क्रामित्वा इह अत्र पञ्चवट्यां सम्प्राप्त , समुपस्थित इति यत, यदिति सामान्य नपुंसकम तवेहागमनमित्यर्थ स विषयप्राधान्यात् पुंलिङ्गता, तपसां मया अनुष्ठितानां व्रताना सम्प्रसाद अनुग्रह फलमित्यर्थ अन्यथा चेत यदि तपश्चाफलमेव तदा आगमनकारणमिति न सम्भाव्यते तदा इत्यर्थ अयोध्याया सुदूरवर्ति-राजधानीत दण्डकाया वने दण्डकारण्ये वा युष्माक गौरव अचलवचनम । पुन भूयोऽपि, पुन इति पदेन अपूर्वदर्शनविलोकनस्य इत्यादिवाक्यार्थासिद्धिवारिता । उपगम आगमन क कुतो भविष्यतीत्यर्थ । एव सर्वप्रकारेणापि दुर्घटमेतदागमनसंघटकत्वात तपसा प्रसाद इति भाव । अत्र एकस्मिन् रामे अन्वेषणकर्तृत्वकर्तृत्वयोर्विरूपयो समावेशात विषमालङ्कार । तथा आगमन प्रति तप फलत्व हेतुनिर्देशात काव्यलिङ्गमित्यनयो सङ्कर । मन्दाक्रान्तावृत्तम्, मन्दाक्रान्ता मभौ नतौ तगौ ग् समुद्रर्तुस्वरा

(फ) किमिति । किमिति प्रश्न आः इति खेदे अव्ययम्

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
　　स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्राः *
　　संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

। १४　क्वचित स्निग्धश्यामा अपरत भीषणाभोगरूक्षा । स्थाने स्थाने निर्झराणा झाङ्कृत मुखरककुभ तीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्रा परिचितभुव एते दण्डकारण्यभागा सन्दृश्यन्त इत्यन्वय

राम　दण्डकैवेयं यत्र किल निवसता देवेन—(ख)
　　चतुर्द्दशसहस्राणि रक्षसा भीमकर्म्मणाम् ।
　　त्रयश्च दूषणखरत्रिमूर्द्धानो रणे हता. ॥ १५ ॥

१५ । (देवेन) भीमकर्म्मणा रक्षसा चतुर्द्दशसहस्राणि (तथा) दूषणखरत्रिमूर्द्धान त्रयश्च रणे हता इत्यन्वय ।

---

(१४) स्निग्ध ति　क्वचित कुत्रचिद्देश स्निग्धश्यामा स्निग्धाश्च त श्यामाश्च ति तरुलता गुल्मादीना सद्भावात् कोमलनीलवर्णा दृष्टिसुभग । इत्यथ , अपरत अन्यस्मिन विभागे समश्यामलशिल　भीषणाभोगरूक्षा भीषणेन भयङ्करेण आभोगेन विस्तारेण रूक्षा कर्कशा 'आभोग परिपूर्णता' इत्यमर　स्थाने स्थाने पदे पदे वीप्सायां द्वित्वम । निर्झराणा पार्वत्य वारिप्रवाहाणा झाङ्कृतै झाङ् झाङ इति शब्दै मुखरककुभ मुखरा शब्दायमाना ककुभ दिश येषु त निनादितादिङ्मुखा इति यावत, तीर्थेति—तीर्थानि पुण्यक्षेत्राणि आश्रमा तपोवनानि गिरय पर्वता सरित नद्य गर्त्ता विलानि कान्तारा अरण्यानि यद्वा दुर्गमा पन्थान त तीर्थाश्रमगिरिसरिद्गर्त्तकान्तारा तै मिश्रा युक्ता , सुविस्तीर्णा इति भाव , परिचितभुव परिचिता सम्यक् ज्ञातपूर्वा इति यावत् भू येषा त तथोक्ता ज्ञातप्रदेशा इत्यर्थ　एते दण्डकारण्यभागा दण्डकावनप्रदेशा सन्दृश्यन्त अवलोक्यन्ते, मया इति शेष , स्वभावोक्तिरलङ्कार । मन्दाक्रान्तावृत्तम् ।

(ख) दण्डका इति । निवसता वास कुर्वता । देवेन भवता इत्यर्थ , हता इति परेण सम्बन्ध ।

(१५) चतुर्द्दशेति । भीम भीषण कर्म्म येषा तेषा भीमकर्मणा क्रूरकर्म्मणामिति यावत,

---

* गर्भकान्तारमिश्रा इति पाठान्तरम् ।

येन सिद्धक्षेत्रेऽस्मिन् जनस्थाने माहशानामपि भीरुजानपदाना-मकुतोभयः सञ्चारो जातः। (भ)

राम न केवलं दण्डकेयं, जनस्थानमपि *। (म)

शम्बू। बाढं, एतानि सर्वभूतलोमहर्षणान्युन्मत्तचण्डश्वापद कुलसङ्कुल-गिरि गह्वराणि जनस्थानपर्यन्तानि दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते तथाहि—(य)

रक्षसां राक्षसानां चतुर्दशसहस्राणि दूषणखरत्रिमूर्द्धान दूषणः खरः त्रिमूर्द्धा त्रिशिराश्च ते प्रधाना येषां निहताः यथा मूर्द्धानो यस्य त्रिमूर्द्धः इति रूपम् स्यात्। द्वित्रिभ्यां ष मूर्द्ध इति समासान्तः ष। इह तु समासान्तविधरभाव कैश्चित्तु दूषणखर-त्रिमूर्द्धा रणे युद्धे नो हता व्यापादिता किम् इति काक्वा योजनीयमित्युक्ता षमन्वयः तामेव समर्थयन्त यद्वा समासान्तविधेरनित्यत्वज्ञापनमेव कवेरभिप्राय इति। अत्र पतेच्यतसंस्कृतिदोष। एकस्या हननक्रियायां कर्मतासम्बन्धेन बहुभि प्रस्तुतैरन्वयात् तुल्ययोगितालङ्कारः। पत्याबक्रं वृत्तम्

(भ) येनेति। येन पूर्वोक्तनिशाचरवधेन इदानीं अस्मिन् सिद्धक्षेत्रे सिद्धानाम् ऋषिमहर्षिसिद्धानां मुनीनां च क्षेत्रे स्थाने, यद्वा सिद्धं यत्र तस्मिन् सिद्धस्य सिद्धिप्रदपुण्यक्षेत्रे अस्मिन् तपस्यतः जनस्य चरितस्य सिद्धिलाभः भवति तस्मिन् इति भावः। जनस्थाने माहशानाम् अस्मदिव दृश्यन्ते ये ते माहशा तेषां भीरुजानपदानां भयशीलजनानाम् अकुतो भयं न विद्यते भयं भीति यस्मिन् स तथोक्तः, निर्भयः सञ्चारः विहारः गमनागमनमिति यावत्, मयूरव्यंसकादयश्च इति निपातनात् समासः

(म) न इति। अपिशब्दः समुच्चये

(य) बाढमिति। बाढं सत्यम्। इयं दण्डका जनस्थानस्य इदमेव इति यत् तत्र नास्ति विवादः इत्यर्थः। 'बाढं भृशप्रतिज्ञयो' इति मेदिनी सर्वभूतलोमहर्षणानि सर्वेषां भूतानां प्राणिनां लोमाञ्चकारीणि, उन्मत्तचण्डश्वापदकुलसङ्कुलगिरिगह्वराणि उन्मत्तानि क्षिप्तप्रायाणि चण्डानि अत्यन्तोग्राणि च यानि श्वापदकुलानि हिंस्रजीवसमूहाः तैः सङ्कुलानि परिव्याप्तानि गिरिगह्वराणि गुहाजालानि येषु तानि जनस्थानपर्यन्तभूतानि जनस्थानस्य पर्यन्तभूतानि, एकता जनस्थानस्य सीमारूपेण अवस्थितानि। दीर्घारण्यानि अत्यायतानि वनानि दक्षिणां दिशम् आभाव अभि लक्षीकृत्य वर्तन्ते दक्षिणस्यां दिशि प्रवर्त्तन्ते इत्यर्थः।

* न केवलं दण्डका, किन्तु न केवलं दण्डकैव न केवलं दण्डकारण्यमिति पाठः

निष्कूजस्तिमिताः क्वचित् क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

[१६ । क्वचित् निष्कूजस्तिमिताः क्वचित् प्रोच्चण्डसत्त्वस्वनाः स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः प्रदरोदरेषु विलसत्स्वल्पाम्भसः सीमानः यासु तृष्यद्भिः प्रतिसूर्यकैः अयम् अजगरस्वेदद्रवः पीयते इत्यन्वयः]

राम— पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव वृत्तान्तान् पूर्वाननुभवामि च ॥ १७ ॥

[१७ भूतपूर्वखरालयं जनस्थानं पश्यामि च, पूर्वान् वृत्तान्तान् प्रत्यक्षान् इव अनुभवामि च । इत्यन्वयः]

---

(१६) निष्कूजेति क्वचित् कुत्रचिद्भागे निष्कूजस्तिमिताः नास्ति कूजः पक्षिणां कूजनं यासु ताः निष्कूजाः निःशब्दा इत्यर्थः अत एव स्तिमिताः निश्चला इति, विशेषणद्वयस्य कर्मधारयनिवाह, क्वचिदन्यत्र प्रोच्चण्डसत्त्वस्वनाः प्रोच्चण्डः अत्युग्रः सत्त्वानां प्राणिनां श्वापदानामिति भावः स्वनः यासु ताः, श्वापदानां गर्जनेन निनादिताः, स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः स्वेच्छया न तु केनाप्युपद्रवेण सुप्तानां गाढनिद्रितानां गभीरः भोगः शरीरं फणा वा येषां तेषां गभीरभोगानां महाकायानां भोगः सुखे स्यादिभृतो अहेश्च फणकाययोः इत्यमरः । भुजगानां सर्पाणां श्वासे प्रबले निश्वासमारुते प्रदीप्तः ज्वलितः सन्धुक्षित इत्यर्थः, अग्निः वनानलो यासु ताः । प्रदरोदरेषु प्रदराणां गर्त्तानाम् उदरेषु अभ्यन्तरेषु गुहामध्येषु इत्यर्थः, विलसत्स्वल्पाम्भसः विलसन्ति विद्यमानानि स्वल्पानि अम्भांसि जलानि यासु ताः तथोक्ताः, सीमानः अरण्यप्रान्तभूमयः वर्त्तन्ते इति शेषः यासु सीमसु तृष्यद्भिः पिपासुभिः प्रतिसूर्यकैः कृकलासैः कृकलासस्तु सरटः प्रतिसूर्य्य इति त्रिकाण्डशेषः । अयम् अजगराणां सुमहतां सर्पाणां स्वेदद्रवः स्वेदस्य द्रवः इति गलितघर्म्माम्बुधारा इत्यर्थः पीयते, सुतरामतीवभीषणमिदं वनमिति भावः स्वभावोक्तिरलङ्कारः शार्दूलविक्रीडितं वृत्तम् ।

(१७) पश्यामीति । भूतपूर्वखरालयं भूतपूर्वं खरस्य आलयः यस्मिन् तत् जनस्थानं पञ्चवट्याः प्रदेशविशेषं पश्यामि विलोकयामि च, पूर्वान् वृत्तान्तान् उदन्तान् प्रत्यक्षान् पुरो वर्त्तमानान् इव अनुभवामि च । स्मृतिवैशद्येन प्रत्यक्षीकरोमि इति भावः । अत्र अतीतानां घटनानां प्रत्यक्षायमाणत्वात् भाविकालङ्कारः । पश्यामि अनुभवामि इति पदद्वयप्रतिपाद्ययोर्दर्शनानुभवक्रिययोर्यौगपद्यप्रत्ययात् क्रियासमुच्चयस्तेनयोः सङ्करः । परे तु प्रत्यक्षानिवेत्यनेन प्रत्यक्षत्वस्य सम्भावनाया इव शब्देन प्रत्यायनात् उत्प्रेक्षा इति वदन्ति, वयन्तु भाविकातिरिक्तस्यालङ्कारस्य नात्र विषयं स्वीकुर्म्मः । पथ्यावक्त्रं वृत्तम् ।

(सर्वतोऽवलोक्य।) सर्वथा प्रियारामा हि वैदेह्यासीत्, एतानि तानि नाम कान्ताराणि, किमतः परं भयानकं स्यात्। (ध)

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु।
इति हा रमतेवासौ * स्नेहस्तस्याः स तादृशः॥ १८॥

[१८। मधुगन्धिषु वनेषु त्वया सह निवत्स्यामि इति असौ हा अरमत एव। तस्याः स स्नेह तादृश, इत्यन्वय।]

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ १९॥

[१९। अकिञ्चित अपि कुर्व्वाण सौख्यै दुःखानि अपोहति। यो हि यस्य प्रिया जन तत् तस्य किमपि द्रव्यम इत्यन्वय।]

(ध) सर्वथा इति सर्वथा सर्वप्रकारेण प्रियारामा प्रिय प्रीतिकर आराम उपवन यस्या सा पत्नी आरामप्रिया अत्र आरामशब्देन वनमात्रमेवाभिप्रेत, हि अवधारणे। तानि पूर्वं तया सह अध्युषितानि एतानि दृश्यमानानि कान्ताराणि अरण्यानि इदानीम् एकाकी अहं विलोकयामि। अतः परम् अस्मादधिक किं वस्तु भयानक भीषण स्यात्, अपितु न किमपीत्यर्थ। चिरवासितसीतस्य मे अत्रस्थानभ्रमण नितरां दुःखाकरमिति भाव।

(१८) त्वयेति मधुगन्धिषु मधुन पुष्परसस्य मकरन्दस्य इति यावत्, गन्ध अस्ति एषु इति मधुगन्धीनि तेषु मधुगन्धपूर्णेषु वनेषु अरण्येषु त्वया रामेण इति यावत्, सह निवत्स्यामि त्वां विना राजधान्यामपि स्थातुं नोत्सहे इति भाव एवम् उक्त्वा इति शेष एव असौ सीता हा इति खेदे अरमत, आनन्द प्रकाशितवती न मया अनुभूतपूर्व्व तस्याः स्नेह तादृश स इव पतिव्रतायाः सीतायाः स्नेह इव दृश्यते इति तादृश सीतास्नेह तादृश एव इत्यर्थ। आसीत् बभूव। अत्र एकस्यैव स्नेहस्य उपमानोपमेयत्वारोपात् अनन्वयोऽलङ्कार।

(१९) अकिञ्चिदिति। अकिञ्चित् अपि कुर्व्वाण किञ्चित् अपि दुःखनाशोपाय मिति शेष। न कुर्व्वन इत्यर्थ, क्वचित् प्रसज्यप्रतिषेधेऽपि समास इष्यते, यथाह जगदीश्वर—इदन्तु नेष्यते अमात्य इत्यमात्य अकिञ्चित् कुर्व्वाण असूर्य्यम्पश्य इत्यादि। अकिञ्चित् अतितुच्छमपि वस्तु नञोऽप्राशस्त्य वाचकत्वात् इति पर। सौख्यैः सुखसन्तानैः आलापादिजनिताविच्छिन्नसुखधाराभिरित्यर्थ दुःखानि अपोहति निरस्यति नाशयति इत्यर्थं, प्रियो जन इति शेष। कथमेतत् सम्भवतीत्याह—यो हीति।

* आरमतीवासौ, इतीवारमतीवासौ, रमते सीता इति पाठभेदाः।

राम । तदलमेभिर्दुरासदैः । अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्य्यन्तैरविरलनिविष्टनीलबहलच्छायतरुखण्डमण्डितानि असम्भ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगम्भीराणि मध्यमारण्यकानि । (२)

इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

[१ इह समदशकुन्ताक्रान्तवानीरवीरुत्प्रसवसुरभिशीतस्वच्छतोयाः फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसः निर्झरिण्यः वहन्ति इत्यन्वयः]

यो हि यस्य प्रियः वल्लभो जनः स तस्य किमपि अनिर्व्वचनीयं द्रव्यम् । तत् इति विधेयप्राधान्यात् क्लीवम् उपक्रान्तिपदं किमप्यकृत्य न सन्निधिमात्रेण सुखसम्भारं वितनुते इति अलौकिकत्वम् प्रियजनस्य प्रज्ञा वा । अत्र १ सुखाद्युपकार्य्यस्य प्रियजनानिर्व्वचनीयत्वरूपकारणेन समर्थनात् च अर्थान्तरन्यासोऽलङ्कारः । किञ्चित्सुखोपायकारणाभावेऽपि तत्कार्य्यभूतस्य सौख्ये १ स्यापीदृशस्य निबन्धनात् विभावनापि ।

(२ तदिति । भयानकवनदर्शनेनैव रघुवरस्य विषादाधिक्यमिति मत्वा मनोरमवनप्रदर्शनेन विषादमपनेतुमाह—तदलमिति दुरासदैः दुरधिगमैः दुर्दर्शैः इति यावत्, एभिः दक्षिणा दिशमभिवर्त्तमानैः दीर्घारण्यैः इत्यर्थः अलम् निष्प्रयोजनम्, तत्कथाप्रसङ्गः परित्यज्यतामिति भावः । अथेति आरम्भे । मदकलानाम् । मदकलानां हर्षातिरेकेण मदताम् अव्यक्तशब्दकारिणामिति यावत्, मयूराणां बर्हिणां कण्ठस्येव कोमला स्निग्धा छविः कान्तिरिव छविर्येषां तैः तथोक्तैः । पर्य्यन्तैः परिसरैः प्रान्तैः इत्यर्थः । अवकीर्णानि वेष्टितानि विस्तारितानीत्यर्थः । आविरलेति । अविरलं घनं यथा तथा निविष्टानां स्थितानां नीलबहलच्छायानां नीलबहला श्यामप्राया छाया द्युतिः येषां तेषां नीलप्रधानकान्तीनाम् इत्यर्थः, तरूणां नवीनानां तरूणां खण्डैः समूहैः मण्डितानि भूषितानि तथा असम्भ्रान्तविविधमृगयूथानि असम्भ्रान्तानि अभीतानि हिंस्रजन्तूनां सान्निध्याभावात् अव्याकुलानि इति यावत् विविधानां मृगाणां यूथानि कुलानि येषु तानि, प्रशान्तगम्भीराणि प्रशान्तानि निरुपद्रवाणि तथा गम्भीराणि दुरवगाहानि च मध्यमारण्यकानि जनस्थानमध्यवर्त्तीनि वनानि महानुभावः महान् अनुभावो यस्य सः महाप्रभावो भवान् पश्यतु अवलोकयतु इत्यर्थः । स्निग्धश्यामलवनदर्शनेन आत्मानं विनोदयतु देव इति भावः

अपिच, दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

[२१ अत्र कुहरभाजां भल्लूकयूनाम् अनुरसितगुरूणि अम्बूकृतानि स्त्यानं दधति शल्लकीनां शिशिरकटुकषायः इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः स्त्यायते, इत्यन्वयः ।]

राम । (सबाष्पस्तम्भम्) भद्र ! शिवास्ते पन्थानः, देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः । (क)

(२०) इहेति । इह अत्र मध्यमारण्ये समदशकुन्ताक्रान्तवानीरवीरुत्प्रसवसुरभिशीतस्वच्छतोयाः समदैः मदमत्तैः हर्षेणेति यावत् शकुन्तैः पक्षिभिः आक्रान्ता अध्युषिता या वानीरवीरुधः वेतसलताः तासां प्रसवैः शकुन्ताक्रमणात् च्युतैः पुष्पैः सुरभीणि सुगन्धीनि शीतानि शीतलानि स्वच्छानि विमलानि तोयानि जलानि यासां ताः तथोक्ताः फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसः फलानां भरस्य अतिशयस्य परिणामेन परिपाकेण श्यामानां कृष्णवर्णानां जम्बूनां निकुञ्जेषु लतादिपिहितोदरस्थानेषु स्खलनेन प्रतिघातेन मुखराणि शब्दायमानानि भूरीणि प्रभूतानि स्रोतांसि प्रवाहाः यासां ताः तथोक्ताः निर्झरिण्यः निर्झरिण्यः वहन्ति वेगेन गच्छन्ति । अत्र पद्येऽस्मिन् स्वभाववर्णनात् स्वभावोक्तिरलङ्कारः । मालिनीवृत्तम् ।

(२१) दधतीति । अत्र अरण्ये कुहरभाजां गह्वराणि बिलानि भजन्ति ये ते कुहरभाजः गिरिविवरवर्तिनः तेषां भल्लूकयूनां भल्लूकाश्च ते युवानश्चेति भल्लूकयुवानः तेषां तरुणवयसां भल्लूकानाम् । बलाधिक्यसूचनाय युवशब्दप्रयोगः अनुरसितगुरूणि अनुरसितैः प्रतिध्वानैः गुरूणि महान्ति अम्बूकृतानि सनिष्ठीवनानि रसितानि, थूत्कारशब्दा इति यावत्, थूत्कारवन्ति भल्लूकानां रसितानि इति व्ययम । स्त्यानं वृद्धिं दधति धारयन्ति । किञ्च शल्लकीनां गजभक्ष्याणां लताविशेषाणां शिशिरकटुकषायः शिशिरः शीतलः कटुः तीक्ष्णः कषायः सुरभिः इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः इभैः हस्तिभिः दलितानां अतएव विकीर्णानाम् इतस्ततो विक्षिप्तानां ग्रन्थीनां सन्धिदेशानां निष्यन्दस्य निर्यासस्य गन्धः स्त्यायते समन्तात् प्रसर्पति, हस्तिमदगन्धप्रसारात इति भावः । अत्रापि वस्तुस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः मालिनीच्छन्दः । श्लोकद्वयमिदं महावीरचरिते मालतीमाधवे च दृश्यते ।

(क) सबाष्प इति । सबाष्पस्तम्भं बाष्पस्तम्भेन अश्रुनिरोधेन सह वर्तमानं यथा तथा इत्यर्थः, क्रियाविशेषणम् पन्थानः मार्गाः शिवाः मङ्गलमयाः - सन्तु

शम्बूकः । यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । (इति निष्क्रान्तः) (ख)

रामः । एतत्तदेव हि वनं पुनरद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रताः स्वधर्म्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥

[२२ । अद्य तत् एतत् वनं पुनः दृष्टम्, यस्मिन् पुरा चिरं वसन्तः वयं स्वधर्म्मे रताः आरण्यकाः च सांसारिकेषु सुखेषु च रसज्ञाः गृहिणश्च अभूम, इत्यन्वयः ।]

अपि च, एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि ।
आमञ्जुवञ्जुल-लतानि च तान्यमूनि
नीरन्ध्रनीलनिचुलानि सरित्तटानि ॥ २३ ॥

[२३ । एते त एव विरुवन्मयूराः गिरयः, तानि एव मत्तहरिणानि वनस्थलानि । आमञ्जुवञ्जुललतानि नीरन्ध्रनीलनिचुलानि च तानि अमूनि सरित्तटानि, इत्यन्वयः ।]

—

स्थानं विमानं प्रतिपन्नश्च प्राप्तः हि आरोहेत्यर्थः पुण्येभ्यः पवित्रेभ्यः लोकेभ्यः भुवनेभ्यः पुण्यान् लोकान् गन्तुमित्यर्थः । क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः इति चतुर्थी ।

(ख) यावदिति । पुराणब्रह्मवादिनं प्राचीनं वेदवक्तारम् अभिवाद्य प्रणिपत्य । यावदवधारणे । शाश्वतं नित्यं पदं स्थानं ब्रह्मलोकमित्यर्थः, अनुप्रविशामि गच्छामि ।

(२२) एतदिति । अद्य तत् एतत् वनं जनस्थानारण्यं पुनः भूयो दृष्टं, वनवाससमये प्रथमं एतद्द्वितीयवारमवलोकितमिति भावः । यस्मिन् अरण्ये पुरा पूर्वं चिरं दीर्घकालं चतुर्द्दशसमा इत्यर्थः वसन्तः कृतनिवासाः वयं स्वधर्म्मे स्वे धर्म्मे वानप्रस्थोचिते धर्म्मे रताः स्थिताः आरण्यकाः अरण्यसदो वानप्रस्था इत्यर्थः, च सांसारिकेषु संसारसम्बन्धिषु सुखेषु च रसज्ञाः आस्वादज्ञाः तादृशसुखमुपभुञ्जानाः गृहिणः गृहस्थाश्रमिणश्च अभूम बभूविम । पितृनिदेशप्रतिपालनानुरोधेन अरण्यसमाश्रयणात् वानप्रस्थत्वं, सीतासहवासेन च गृहस्थाश्रमित्वमिति भावः । अत्र वनवासरूपं किञ्चित् कार्य्यं प्रकुर्वतां रामादीनां दैवात् आरण्यकत्वादिकार्य्यकरणात् विशेषालङ्कारभेदः, तदुक्तं "किञ्चित् प्रकुर्वतः कार्य्य"मित्यादि दर्पणे । वसन्ततिलकावृत्तम् ।

(२३) एत इति । विरुवन्मयूराः विरुवन्तः केकाध्वनिं कुर्व्वन्तः मयूराः कलापिनः येषु ते तथोक्ताः एते त एव पूर्वं दृष्टाः गिरयः पर्वताः मत्तहरिणानि मत्ताः मदेन कामाभिमुख्यभावेन हरिणाः मृगाः येषु तानि तानि एव वनस्थलानि वनभूमयः । आमञ्जु,

मेघमालेव यश्चायमारादपि विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥ २४ ॥

[(२४)। यः च अयम् आरात् अपि मेघमाला इव विभाव्यते सः अयं गिरिः प्रस्रवणः, यत्र गोदावरी नदी, इत्यन्वयः ।]

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततश्यामलानोकहश्री-
रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥

[२५। अस्य एव महति शिखरे गृध्रराजस्य वासः आसीत्। तस्य अधस्तात् तेषु पर्णोटजेषु वयमपि रताः । यत्र गोदावर्याः पयसि विततश्यामलानोकहश्रीः अन्तः कूजन्मुखरशकुनः रम्यः वनान्तः, इत्यन्वयः ।)

वञ्जुललतानि आनम्रवञ्जुललतानि अतिमनोहरा वञ्जुललता वेतसलता, यद्वा अशोकवृक्षा लताश्च येषु तानि मनोहरवानीरलताकीर्णानि, नीरन्ध्रनीलनिचुलानि नास्ति रन्ध्रम् अन्तरं यथा तथा नीरन्ध्रा घनसन्निविष्टा निरवकाशा इत्यर्थः तथा नीला श्यामवर्णा निचुला स्थलवेतसा येषु तानि, अमूनि सरित्तटानि सरितां नदीनां तटानि तीरभूमयः वर्त्तन्ते इति शेषः। सर्वत्र वर्त्तन्ते इति एकक्रियया सह अन्वयात् एकधर्माभिसम्बन्धेन तुल्ययोगिताऽलङ्कारः । वसन्ततिलकावृत्तम् ।

(२४) मेघेति यश्चायम् पुरोवर्त्तीत्यर्थः आरात् समीपे अपि 'आराद्दूरसमीपयो'रित्यमरः, मेघमाला मेघानां जलधराणां माला श्रेणी इव पयोधरपङ्क्तिसदृश इत्यर्थः विभाव्यते लक्ष्यते, सोऽयं प्रस्रवणो नाम गिरिः शैलः, यत्र गोदावरी नदी सागरं प्रवहतीति शेषः। मेघमालेव इत्युपमा। आरादपि इत्यपिशब्देन दूरतस्तथा विभावनस्यानुपपत्तिसिद्धा अर्थापत्तिः।

(२५) अस्येति। अस्य प्रस्रवणस्य एव महति विपुले शिखरे शृङ्गे गृध्रराजस्य गृध्राणां राजा इति गृध्रराजः जटायुः तस्य वासः आसीत्। तस्य शृङ्गस्य अधस्तात् अधःप्रदेशे वयमपि तेषु पर्णोटजेषु पर्णानाम् उटजेषु पर्णशालासु रताः सुखिताः उटजस्य पर्णशालात्वेऽपि पुनः पर्णशब्दः प्राचुर्यद्योतनार्थम्। यत्र गोदावर्याः सरितः पयसि सलिले विततश्यामलानोकहश्रीः वितता विस्तीर्णा प्रतिबिम्बिता इत्यर्थः, श्यामलानां श्यामैः पल्लवैः शोभमानानाम् अनोकहानां द्रुमाणां श्रीः शोभा यस्य सः, अन्तः कूजन्मुखरशकुनः अन्तः अभ्यन्तरे कूजन्तः [illegible] मुखराः शकुनाः शब्दायमानाः पक्षिणो यत्र सः रम्यः रमणीयः वनान्तः वनप्रदेशः [illegible] स्वभावोक्तिः। मन्दाक्रान्तावृत्तम्।

तदत्रैव सा पञ्चवटी, यत्र चिरनिवासेन विविधविस्रम्भातिप्रसङ्ग-साक्षिणः प्रदेशाः, प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता प्रतिवसति, तत् किमिदमापतितमद्य रामहतकस्य ? सम्प्रति हि । (अ) चिराद्वेगारम्भी* प्रसृत इव तीव्रो विषरसः

कुतश्चित् संवेगात्प्रचलित इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
र्घनीभूतः शोको विकलयति सम्मूर्च्छयति च † ॥ २६ ॥

[२६ । घनीभूत शोक चिरात वेगारम्भी प्रसृत तीव्र विषरस इव कुतश्चित् संवेगात निहित शल्यस्य शकल इव हृन्मर्मणि रूढग्रन्थि स्फुटित व्रण इव विकलयति सम्मूर्च्छयति च इत्यन्वय ।]

(अ) तदिति । अत्रैव अस्मिन्नेव प्रदेशे यत्र पञ्चवट्याम चिरनिवासेन चिर दीर्घ काल व्याप्य निवास इति चिरनिवास । इतीतितत्पुरुष । तेन अतिदीर्घकालावस्थानेन हेतुना विविधविस्रम्भातिप्रसङ्गसाक्षिण विविधाना नानाविधाना विस्रम्भाणा रहोनिर्वर्त्तीना विलब्धकल्पनाम स्वच्छन्दविहाराणामिति यावत अतिप्रसङ्गस्य अत्याहत अतिशयस्येति यावत, साक्षिण उपद्रष्टार प्रदेशा स्थानानि सन्ति इति शेष तदिति । तत तस्मात अद्य राम हतकस्य दुर्भाग्यस्य रामस्य मम इत्यर्थ इद किम आपतितम उपस्थितम, दीर्घकालवासेन सीतया सह यत विविधान विहारान प्रियालापाश्च अकरवम, इदानी तेषा विहारादीना सस्मरणाम वनभागस्य च दर्शन प्रियाहीनस्य मे नितरामकल्याद स्यादिति भाव ।

(२६) चिरादिति घनीभूत निविडत्वमापन्न शोक प्रियाविच्छेदजन्य दुःख चिराद्बहुकालादनन्तर वेगारम्भी वेगेन जवेन आरम्भ प्रक्रिया स विद्यते अस्य । यद्वा वेग वेदनातिशय आरम्भयति उत्पादयतीति, वेगेन उदयच्छमान सन इत्यर्थ । अनेन विषविशेषव्यावृत्ति । प्रसृत शरीरावयवेषु सञ्चरित तीव्र अत्यन्त दुःसह इत्यर्थ , विषरस इव विषद्रव इव, रसशब्देन विषस्योत्कर्षो विवक्षित । कुतश्चिदपि यस्मात कस्माचित अपि कारणात कुतोऽपि निमित्तवशात संवेगात सघट्टनात चलित कम्पित शल्यस्य अस्त्रविशेषस्य अन्तःशरीर प्रविष्टस्य इति भाव शकल खण्ड इव । हृन्मर्मणि हृदयादि जीवस्थाने रूढग्रन्थि रूढ उत्पन्न ग्रन्थि यस्य स हृदयरसमुख इत्यर्थ , स्फुटित विदीर्ण व्रण दुर्भेम् विस्फोट इति यावत्, इव विकलयति विह्वलयति सम्मूर्च्छयति च विलुप्तचैतन्य

* चिराद्वेगारम्भीति पाठान्तरम् । † सा न तत्र इव इति क्वापि पाठ ।

तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि । (निरूप्य) अहो ! अनवस्थितो भूमिसन्निवेशः । तथाहि । (१)

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥

करोति च । अत्युत्कटो नितराम् अतुल्यः सीताविरहजशोकः पञ्चवटीदर्शनेन पुनः नवतामापन्न इति भावः । अत्र शोकस्य प्रसरणं तीव्रविषयप्रसरणाच्चित्तान्तःस्थसम्भावनाया इत्यपेक्षान्वयत्वात् उत्प्रेक्षा । पर तु विकलीकरणसम्भेदः धर्मसाधर्म्येण तीव्रविषसादृश्यात् शोक प्रत्ययात् मालोपमा भवत । वयन्तु प्रकृते सम्भावनाया एव शोकस्य अधिकत्वप्रतीतिर्वैचित्र्यात् उत्प्रेक्षापक्षपातिनः । विकलीकरणसम्भेदः नाक्रिययोर्यौगपद्यात् क्रियासमुच्चयमाह । ये तु विकलीकरणमूर्च्छयोः कार्य्यकारणभावात् यौगपद्यं न विवक्षन्ति तथा दीपकमेव मतम् क्रियाद्वयस्य एककर्तृकत्वात् । शिखरिणीवृत्तम् ।

(१) ननु शोकोद्दीपकत्वात् एतेषां दर्शनं न कर्त्तव्यमित्याह—तथापि इति । तथापि शोकोद्दीपने सत्यपि पूर्वसुहृदः पूर्वपरिचितान् तान् भूमिभागान् पश्यामि अवश्यमेव विलो कयामि । भूमिसन्निवेशः भूमीनाम् अवान्तराणां भूभागानां सन्निवेशः अवस्थानम् अनवस्थितः विपर्य्यस्तः अवस्थान्तरमुपयात इत्यर्थः ।

(२७) अनवस्थितत्वं समर्थयति—पुरा इति । पुरा प्राक् सीतया सह अवस्थानसमय इत्यर्थः, यत्र सरितां नदीनां स्रोतः प्रवाहः आसीदिति शेषः अधुना इदानीं तत्र पुलिनम् तोयो त्थितसैकतम् वर्त्तत इति शेषः । क्षितिरुहां वृक्षाणां यो घनविरलभावः निबिडत्वं विरलत्वञ्च इत्यर्थः विपर्य्यासं वैपरीत्यं यातः प्राप्तः । यत्र वृक्षा घना आसन् इदानीं तत्र न विरलाः यत्र च विरलाः इदानीं तत्र निबिडाः सञ्जाताः इत्यर्थः । बहोः दीर्घात् कालात् समयात् परं दृष्टं बहुकालमदृष्टं दृष्टम्, ल्यब्लोपे पञ्चमी । यद्वा पूर्वं दृष्टमवान्तरबहुविप्रकृष्टकालं दृष्टम् अनन्तरमपि पश्यामीति पञ्चमी । वनमिदमपरमन्यत् वनमिव मन्ये अनुमिनोमि । ननु इदं पूर्वपरिचितं वनमेव इति निश्चयः किं कारणमिति आह—शैला नामिति । शैलानां गिरीणां निवेशः अपरिवर्त्तितमवस्थानम् इदमस्य तत् पूर्वदृष्टं वनमिति बुद्धिं ज्ञानं प्रत्यभिज्ञामिति शेषः, द्रढयति दृढां करोति निश्चयज्ञानं जनयति इत्यर्थः । अत्र पूर्वार्द्धप्रतिपाद्यस्य तृतीयपादार्थं प्रति हेतुत्वोपगमात् वाक्यार्थहेतुकं काव्यलिङ्गम्, तद्भिन्न स्यापि वनस्य तद्भिन्नत्वसम्भावनाया इवशब्देन प्रत्यायनात् उत्प्रेक्षा शैलनिवेशरूपस्य तेन पूर्वानुभूत वनाभेदरूपस्याप्यस्य साधनादनुमानञ्च पूर्वार्द्धार्थस्यातिशयोक्तिमूलकम् मिथः

हन्त ! परिहरन्तमपि मामित पञ्चवटीस्नेहो बलादपकर्षतीव ।
(सकरुणम् ।) (ख)

यस्यां ते दिवसास्तया सह मया नीता यथा * स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥ २८ ॥

[२८ । यस्यां तया सह ते दिवसा मया नीता यथा स्वे गृहे दीर्घाभिः यत्सम्बन्धि कथाभिः एव सततम् आस्थीयत सम्प्रति नाशितप्रियतमः पापः एकः रामः तां पञ्चवटीम् अद्य कथं विलोकयतु असम्भाव्य वा कथं गच्छतु इत्यन्वयः]

(ख) हन्तेति पञ्चवटीस्नेहः पञ्चवटीं प्रति स्नेहः अनुरागः परिहरन्तमपि पञ्चवटीं परित्यज्य गच्छन्तमपि माम् अपकर्षतीव परावर्त्तयतीव मां बलेन तद्दर्शनाय प्रेरयतीव इति भावः सकरुणं सशोकम्

(२८) यस्यामिति यस्यां पञ्चवट्यां स्वे गृहे यथा अयोध्यायामिव तया सीतया सह मया ते अरण्यवासकालीनाः पूर्वमनुभूता इति यावत्, दिवसाः नीताः यापिताः निजप्रवत्तवासबोधकादिभिः स्वगृहतुल्यायां यस्यां पञ्चवट्यां दिवसाः अतिवाहिता इति भावः । न केवलं यामिन्यो नीताः किन्तु दिवसा अपि नीता इति दिवसपदेन व्यज्यते राज्यतन्त्रालोचनगुरुजनाराधनादिवाधितप्रणयपारतन्त्र्याभावात् स्वगृहात् वैलक्षण्यं पञ्चवट्या इति गम्यम् । तथा दीर्घाभिः घटनानां बाहुल्येन दीर्घकालव्यापिनीभिः यत्सम्बन्धिकथाभिः यस्याः पञ्चवट्याः सम्बन्धिन्यः कथाः वार्त्ताः ताभिः यत्पञ्चवटीविषयकालापैरित्यर्थः, सततं सर्वदा आस्थीयत स्थितं वनवासात् प्रतिनिवृत्त्य सीतया सह यत्कथाप्रसङ्गेनैव मया कालः अतिवाहित इति भावः यत्कथाभिः इत्यनुक्त्वा यत्सम्बन्धिकथाभिः इत्युक्तेः पञ्चवटीपरिसरवर्त्तिनामपि रामणीयकत्वं व्यज्यते । एवकारेण दाराव्यापारप्रतिषेधः सूच्यते । नाशितत्वमपि दैवाधीनं चेत् कथञ्चित् सह्यत एव, न तु तथा, किन्तु मदधीन एव नाश इति दुःखातिशयो व्यज्यते सम्प्रति अधुना नाशितप्रियतमः नाशिता विसर्जिता निर्वासनेन नाशं प्रापिता इत्यर्थः, प्रियतमा सीता येन स तथोक्तः अत एव पापः दुरात्मा रामः एकः केवलः सीताशून्यः इति यावत्, अद्य तां पञ्चवटीं कथं केन प्रकारेण वा विलोकयतु, सीताद्याकारविह्वलत्वात् कथं द्रष्टुं शक्नुयादित्यर्थः । सीतायाः तित्सहृद्दीपकत्वात् तस्याः दर्शनं

* पर्णावति पाठान्तरम्

(प्रविश्य) शम्बूकः। जयति देवः। देव! भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह,— "परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे च * महर्षयस्तदेहि, सम्भावयास्मान्; अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसी"ति। (ञ)

राम। यथाज्ञापयति भगवान्।

शम्बू। इतस्तर्हि देवः प्रवर्त्तयतु पुष्पकम्। (क)

राम। भगवति पञ्चवटि! गुरुजनानुरोधात् क्षणं क्षम्यतामतिक्रमो रामस्य। (ख)

सर्वथा शोकबहिर्भूतमिति भावः। तथा चमत्कारस्य असमान्य अवस्थानेन अनतिक्रान्त्य इत्यर्थः कथं वा गच्छतु अन्यता स्यात्। इयमपि स्वारामन भावः। सा हि पूर्वं सीतासहावस्थान काले अनन्तसुखसन्तानहेतुरासीत्, केवलावस्थानेनापि तामनतिक्रान्त्य अन्यत्र प्रस्थानम सतीवर्गाद्विनमितं फलितार्थः। अथवा प्रियावियोगेऽपि एतच्छ्लोकप्रयुक्तमनुरागप्रकाशन विशिष्टवचनरूपं पुष्पं नाम सन्ध्यङ्गमुक्तम्। शार्दूलविक्रीडितं वृत्तम्।

(ञ) जयतीति। मत्तः मम मुखात् श्रुतभवत्सन्निधानः श्रुतम् आकर्णितं भवतः सन्निधानं तत्सामीप्यम् अत्र उपस्थितिरित्यर्थः येन सः। परिकल्पितविमानावतरणमङ्गला परिकल्पितानि आयोजितानि विमानात् पुष्पकात् अवतरणकालोचितधान्यदूर्वादीनि यया सा, वत्सला स्नेहवती लोपामुद्रा मातृदेवी प्रतीक्षते, भवदागमनम् आशास्ते इत्यर्थः। सर्वे महर्षयः मुनयश्च प्रतीक्षन्ते इत्यर्थः। सम्भावय आगमनेन सम्मानय। प्रजविना प्रकृष्टवेगवता पुष्पकेण स्वदेशम् अयोध्याम् उपसङ्गम्य प्राप्य अश्वमेधाय अश्वमेधं क्रतुं समापयितुमित्यर्थः, क्रियार्थोपपदस्यादिना चतुर्थी। सज्जः योग्यः इत्यर्थः भविष्यसि।

(क) इत इति। प्रवर्त्तयतु चालयतु, गमयतु इति यावत्।

(ख) भगवतीति। भगवति माहात्म्यवतीत्यर्थः, बहुविधतपस्विमुनिजननिवासात् अस्या षडैश्वर्यशालित्वमिति ज्ञेयम्। गुरुजनानुरोधात् गुरुजनः माननीयो जनः अगस्त्यप्रमुख इत्यर्थः, तस्य अनुरोधः छन्दानुवर्त्तनम् इत्यर्थः, तस्मात् क्षणम् अतिक्रमः असम्भाव्यगमनरूपः न्याय्यस्य आचारस्य उल्लङ्घनं भवता क्षम्यताम्।

---

* आगस्त्यायना इति पाठभेदः

वास. । देव ! पश्य पश्य—

कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु * कुम्भीनसाः ॥ २९ ॥

[२९ । कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूकमौकुलिकुलः अयं क्रौञ्चावतः गिरिः, एतस्मिन् प्रचलतां प्रचलाकिनां कूजितैः उद्वेजिताः कुम्भीनसाः पुराणचन्दनतरुस्कन्धेषु उद्वेल्लन्ति, इत्यन्वयः]

अपिच—एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः † क्षोणीभृतो दक्षिणाः ।
अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥ ३० ॥

[३० । कुहरेषु गद्गदनदद्गोदावरीवारयः मेघालम्बितमौलिनीलशिखराः एते ते दक्षिणाः क्षोणीभृतः, अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः उत्तालाः गभीरपयसः ते इमे पुण्याः सरित्सङ्गमाः वर्त्तन्ते इत्यन्वयः]

(२९) कूजदिति । कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूकमौकुलिकुलः कुञ्जाः लतादिपिहितोदरस्थानानि एव कुटीराः इति कुञ्जकुटीराः, तेषु कूजन्तः विरुवन्तः ये कौशिकाः दिवाभीताः पेचकाः तेषां घटानां समूहानां ये घुत्काराः घुदित्यव्यक्तशब्दाः तैः विद्यन्ते येषु ते कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवन्तः तथोक्ताः कीचकस्तम्बाः वेणुविशेषगुच्छाः, तेषाम् आडम्बरेषु प्रपञ्चेषु मूकानि शब्दमवस्थितानि कौशिकत्रासेन इति शेषः, मौकुलिकुलानि काकसमूहाः यस्य सः तादृशः अयं क्रौञ्चावतः नाम गिरिः शैलः । एतस्मिन् क्रौञ्चावते गिरौ प्रचलतां इतस्ततः परिधावतां प्रचलाकिनां मयूराणां कूजितैः केकाभिः उद्वेजिताः भयमापादिताः कुम्भीनसाः सर्पाः पुराणचन्दनतरुस्कन्धेषु पुराणानां प्रवृद्धानां चन्दनतरूणां स्कन्धेषु प्रकाण्डेषु उद्वेल्लन्ति कम्पन्ते आकुलीभवन्तीत्यर्थः । "पुराणरोहिणतरुस्कन्धेषु" इति पाठे रोहिणतरुः वटवृक्षः । अत्र कौशिकादीनां स्वभावतो घुत्कारादिवर्णनायां वैचित्र्यात् स्वभावोक्तिरलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

---

* रोहिणतरुस्कन्धेष्विति पाठान्तरम् । † मेघालग्न इति पाठभेदः ।

इति निष्क्रान्ताः सर्वे । (ग)

इति पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः ॥ २ ॥

(३०) एते इति । कुहरेषु गह्वरेषु गद्गदनदद्गोदावरीवारयः, गद्गदम् अविस्पष्टं नदन्ति ध्वनन्ति गोदावर्याः वारीणि जलानि येषां ते तथोक्ताः गोदावरीतरङ्गध्वानापूरितकन्दराः, मेघालम्बितमौलिनीलशिखराः मेघे पयोदे आलम्बिताः आश्रिताः इत्यर्थः, मौलयः शिरोभागाः येषां तानि, अत एव नीलानि श्यामलानि शिखराणि शृङ्गाणि येषां ते तथोक्ताः, य एते दृश्यमानाः, ते अमिताः दक्षिणाः दक्षिणदिगवस्थिताः क्षोणीभृतः पर्वताः शोभन्ते इति शेषः । अन्योऽन्येति—अन्योऽन्यप्रतिघातेन परस्परप्रतिरोधेन सङ्कुलम् उत्सङ्कुलं यथा तथा चलतां कल्लोलानां तरङ्गाणां कोलाहले कलकलशब्दे उत्तालाः करालाः दुर्धर्षाः इति यावत् । गम्भीरपयसः अगाधसलिलाः पुण्याः पवित्राः ते इमे पुण्यसरित्मिलिताः, नदा इव द्रष्टव्याः सरित्सङ्गमाः सरितां नदीनां सङ्गमाः संभेदाः जलसङ्गमाः इत्यर्थः, राजन्ते इति शेषः । शार्दूलविक्रीडितं वृत्तम् ।

(ग) इतीति । सर्वे पुष्पकविमानस्थिता रामवासन्ती च ।

तृतीयोऽङ्कः ।

(ततः प्रविशति नदीद्वय तमसा मुरला च ।)

तमसा । सखि मुरले ! किमसि सम्भ्रान्तेव ? । (क)

मुरला । भगवति तमसे ! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं, जानास्येव यथा वधूत्यागात् प्रभृति—(ख)

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।

पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ १ ॥

[१ । गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणः रसः पुटपाकप्रतीकाशः, इत्यन्वयः]

(क) सखीति । मुरला नाम काचिन्नदी दाक्षिणात्यजनपदवर्तिनी या गोदावरीमनुप्रविशति । सम्भ्रान्ता व्याकुला इत्यर्थः ।

(ख) भगवतीति । प्रेषिता प्रहिता सरिद्वरां सरित्सु नदीषु वरां श्रेष्ठां तामिति । वधूत्यागात् वध्वाः स्नुषायाः जानक्याः त्यागात् वर्जनात्, प्रभृतिशब्दयोगात् पञ्चमी । आरभ्य ।

(१) अनिर्भिन्न इति । गभीरत्वात् गाम्भीर्यात्, पक्षे गाढत्वात्, अनिर्भिन्नः नास्ति निर्भिन्नः बहिः प्रकाशो यस्य सः, बहिरप्रकाशितलिङ्गः, पक्षे अविदीर्णः, अतएव अन्तर्गूढघनव्यथः अन्तः अभ्यन्तरे मनसि इत्यर्थः, गूढा प्रच्छन्ना बहिःप्रकाशमनापन्ना इत्यर्थः, घना गाढा व्यथा वेदना यस्य सः तथोक्तः, पक्षे गूढा प्रच्छन्ना घना निबिडा व्यथा सन्तापो यत्र सः । रामस्य करुणः रसः इष्टजनवियोगजन्यः शोकस्थायिभावकरुणः, न तु करुणाख्यः वीरशृङ्गारयोरन्यतरस्यैव नायकस्य नाटकप्रकृतित्वात् प्रधानरसत्वात् । प्रियावियोगजः शोकसम्भारः इत्यर्थः । पुटपाकप्रतीकाशः पुटपाकेन तुल्यः । पुटं तन्निकृत्य पाकः औषधादीनां सन्तापनं तेन प्रतीकाशः तुल्यः, निभसङ्काशः । 'स्युरुत्तरपदे त्वमी । निभसङ्काशनीकाशप्रतीकाशोपमादयः' इत्यमरः । यथा पुटपाकोपरि गौरमृत्प्रलेपे विहित अवहिःपकम् औषधम् अन्तःसन्तापेन क्वथितं भवति, किन्तु बहिस्तोऽपि तापस्य चिह्नं नहि ...

---

* अनिर्भिन्नगभीरत्वादिति विद्यासागरः ।

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तानेन सम्प्रत्यतितरां परिक्षीणो * रामभद्रः, तमवलोक्य कम्पितमिव मे हृदयम्, अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः तेषु च निसर्गधीरस्यापि एवंविधायामवस्थायाम् अतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य ; तद्भगवति गोदावरि ! तत्र त्वया सावधानया भवितव्यम् । (ग)

दृश्यते, तथा रामचन्द्रस्यापि प्रियावियोगहेतुकः शोकः अन्तर्विपच्यमानो महतीं वेदनां तनोति, किन्तु प्रगाढधैर्यशालित्वात् वेदनायाः किञ्चिदपि चिह्नं बहिर्न प्रकाशत इति भावः । अत्र कटचरदि पुटपाकसाम्यादि सर्व्वस्यैव शब्दतः प्रत्ययात् पूर्णोपमालङ्कारः ।

(ग) तेन इति । तेन पुटपाकप्रतीकाशेन इत्यर्थः च किञ्च तथाविधेष्टजनकष्टविनिपातजन्मना तथा तादृशी विधा प्रकारो यस्य स तथाविधः तादृशः । यः इष्टजनः दयितजनः, तस्याः सीतायामित्यर्थः, यद्वा तस्याः यः कष्टस्य क्लेशस्य विनिपातः क्लेशोपगमः अनिष्टसंघटनमित्यर्थः तस्मात् जन्म उत्पत्तिर्यस्य तेन सीतानिर्वासनसम्भवेन इत्यर्थः प्रकर्षगतेन परां काष्ठां प्राप्तेन दीर्घशोकसन्तानेन दीर्घं महान्तं द्वादशसंवत्सरव्यापी इत्यर्थः । शोकस्य इष्टविरहजनितदुःखस्य सन्तानः अविच्छिन्नः प्रवाहः तेन । बहुकालव्याप्यनिरवच्छिन्नशोकपरम्परया इत्यर्थः । सम्प्रति अधुना अतितरां नितान्तं रामभद्रः परिक्षीणः कार्श्यमुपगतः तं रामभद्रम् अवलोक्य दृष्ट्वा कम्पितमिव नानाविधदुर्घटनमाशङ्क्य विचलितमिव मे लोपामुद्रायाः इत्यर्थः । हृदयं चित्तम् । प्रतिनिवर्त्तमानेन अगस्त्याश्रमात् गतेन । नियतमेव निश्चितमेव । वधूसहनिवासविस्रम्भसाक्षिणः वध्वा भार्य्यया सीतया इत्यर्थः, सह निवासे एकत्रावस्थाने यो विस्रम्भः प्रणयः वा केलिकलहः 'विस्रम्भः केलिकलहे विश्वासे, प्रणयेऽपि च' इति मेदिनी। तस्य साक्षिणो द्रष्टारः प्रदेशाः स्थानानि द्रष्टव्याः विलोकयितव्याः । तेन किमित्याह—तेषु इति । तेषु प्रदेशेषु निसर्गधीरस्यापि स्वाभाविकधैर्य्यशालिनोऽपि रामभद्रस्य एवंविधायामवस्थायां सीताविरहेण एकाकित्वमनुभवन्त्यां दशायाम् । अतिगम्भीराभोगशोकक्षोभसंवेगात् अतिगम्भीरः दुर्निवारः आभोगः प्रसरः यस्य सः अतीव विस्तृत इत्यर्थः, यः शोकः तेन यः क्षोभः चित्तविप्लवः तस्य संवेगात् प्रतिघातात्, वेगातिशयात् इत्यर्थः, पदे पदे स्थाने स्थाने, महान्ति प्रभूतानि, प्रमादस्थानानि प्रमादः बुद्धिविपर्य्ययः धैर्य-

* नितरां परिक्षीणः, एवं परिक्षीयमाण इति च क्वचित् पाठः ।

वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति ॥ २ ॥

[२ शीकरक्षोदशीतैः पद्मकिञ्जल्कगन्धान् आकर्षद्भिः स्वैरं स्वैरं प्रेषितैः वीचीवातैः रामभद्रस्य जीवं तर्पय इति इत्यन्वयः ।

तमसा । उचितमेव दाक्षिण्यं स्नेहस्य, सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य सन्निहितः । (घ)

मुरला । कथमिव ? (ङ)

तमसा । श्रूयताम् ।—पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य गते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदना आत्मानम् अतिदुःख-

श्रुतिः इति यावत । तस्य स्थानानि पदानि कारणानि गङ्गीयानि आवर्त्तान्ते पञ्चाभिरिति शब्द । सततम् रामभद्रस्यानर्थघटनायाः सम्भावनासत्त्वादित्यर्थः । तत्र तेषु रामस्य अनर्थ-स्थानेष्वित्यर्थः सावधानया अवहितचित्तया अवधान मनसो विषयान्तरविमुखता । रामस्य विपन्निवारणविषये एकाग्रचित्तया इत्यर्थः भवितव्य भूयेत

(२) ननु जलप्रवाहस्वरूपत्वात् सावधानत्वेऽपि किं स्यादित्याह —वीचीति शीकरक्षोदशीतैः शीकरक्षोदेन जलबिन्दुचर्णेन शीतैः शीतलैः तरङ्गतुषारसंस्पर्शशीतलैः तथा पद्मकिञ्जल्क-गन्धान् पद्मानां कमलानां किञ्जल्कानां केशराणां गन्धान् सौरभ्याणि आकर्षद्भिः आहृत्य वहद्भिरित्यर्थः तथा स्वैरं स्वैरं प्रेषितैः मन्दं मन्दं प्रेरितैः वीचीवातैः स्वकीयतरङ्गवायुभिः मोहे मोहे सकृत्सकृन्मूर्च्छितावस्थायां जीवं जीवनं तर्पय प्रीणय यदा यदैव रामस्य मूर्च्छा भवेत्, तदा तदैव तादृशैस्तरङ्गवायुभिस्तस्य चैतन्यं प्रतिपादयेत्यर्थः । इति इत्यन्तं गोदावरी-मभिधाय प्रेषितास्मीति पूर्वेणान्वयः शीकरक्षोदेत्यनेन शैत्यं, पद्मकिञ्जल्कगन्धान् इत्यनेन सौरभ्यम्, आकर्षद्भिः इत्यनेन मान्द्यञ्च इति वायोर्गुणत्रयमुक्तम् । सुरभिशीतलमन्दवाता अपि विरहिणामनर्थकारिण इति न शङ्क्यम् । विरहिणां चैतन्यदशायामेव दुःसहा एते मूर्च्छितानां तु प्राणप्रतिष्ठापनकरा एव आनिलीतत्त्वम् ।

(घ) उचितमिति । दाक्षिण्यम् औदार्यम् स्नेहेन प्रियजनं प्रत्यानुकूल्यमित्यर्थः । रामं प्रति भगवती लोपामुद्रा यत् तदानुकूल्यं कर्तुमिच्छति, तत्तु न्याय्यमेव, किन्तु तस्याः विशेषप्रयोजनं नास्तीति भावः । कुत इत्याह—तु इति । तु किन्तु मौलिक एव प्रकृत एव न तु कृत्रिम इत्यर्थः, रामभद्रस्य सञ्जीवनोपायः चैतन्यप्रतिपादनहेतुः सन्निहितः निकटवर्त्ती स्थितः । सन्निहिता सीता, सैव सञ्जीवयिष्यतीति भावः ।

(ङ) कथमिति कथमिव, कीदृशः सञ्जीवनोपायः सन्निहित इत्यर्थः ।

संवेगादुद्राप्रपाते निक्षिप्तवती, तदैव तत्र दारकद्वयं प्रसूता, भगवतीभ्यां पृथ्वीभागीरथीभ्याम् अभ्युपपन्ना रसातलञ्च नीता। स्तन्यत्यागात् परेण च तद्दारकद्वयं तस्याः प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती। (च)

मुरला (सविस्मयम्।)

ईदृशानां विपाकोऽपि जायते परमाद्भुतः * ।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥ २ ॥

[२। ईदृशानां विपाकः अपि परमाद्भुतः जायते यत्र एवंविधः जनः उपकरणीभावम् आयाति, इत्यन्वयः]

तमसा। इदानीन्तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानागमनं रामभद्रं सरयूमुखादुपसृत्य भगवती भागीरथी यदेव भगवत्या

(च) श्रूयतामिति । किमिति पृच्छन्तीं मुरलां प्रत्याह वाल्मीकितपोवनोपकण्ठात् वाल्मीकेः तपोवनस्य आश्रमस्य उपकण्ठात् निकटात् परित्यक्ता सीतामिति शेषः प्राप्तप्रसववेदना प्राप्ता उपस्थिता प्रसववेदना यस्याः सा अत एव अतिदुःखवेगात् नितान्तकष्टप्रतिघातात् आत्मानं स्वदेहम्। तदैव निक्षेपानन्तरमेव तत्र गङ्गास्रोतसि दारकद्वयं दारकयोः द्वयं बालकयुगलं, प्रसूता प्रसूतवती कर्तरि क्तः। पृथ्वीभागीरथीभ्यां पृथिवीगङ्गाभ्याम् अभ्युपपन्ना प्राप्ता अनुगृहीता सतीत्यर्थः, रसातलं पातालं नीता बालकाभ्यां सह सीतेति शेषः। स्तन्यत्यागात् स्तन्यस्य दुग्धस्य त्यागो यस्मिन् वयसि तत् स्तन्यत्यागः वयः तस्मात् परेण अनन्तरं वयस्यन्तरम् प्राप्येत्यर्थः। परेणेति करणे तृतीया, यद्वा अपवर्गे। तस्याः सीतायाः तद्दारकद्वयम् महर्षेः प्राचेतसस्य वाल्मीकेः समीपे इत्यर्थः। सम्बन्धमात्रविवक्षया षष्ठी। गङ्गादेवी स्वयम् आत्मना न त्वन्यद्वारेत्यर्थः।

(छ) ईदृशानामिति । ईदृशानां इयमिव दृश्यन्त इति ईदृशाः तेषां सीतासदृशानां विपाकः दशाविपर्यासः अपि परमाद्भुतः परमम् अत्यन्तम् अद्भुतं विस्मयावहं जायते। कथमित्याह— यत्र इति। यत्र दशाविपर्यासे एवंविधः गङ्गापृथ्वीसदृशः जनः उपकरणीभावम् उपक्रियते अनेन इति उपकरणम् उपकारसाधनम् अनुपकरणस्य उपकरणस्य भाव इति उपकरणीभावः अभूततद्भावे च्विः। तम् उपकारकत्वात्मकम् उपयोगिताम् साहाय्यकारकत्वमित्यर्थः आयाति प्राप्नोति। अत्र विपाकस्य परमाद्भुतत्वरूपवाक्यार्थं प्रति उत्तरार्द्धप्रतिपाद्यार्थस्य हेतुत्वप्रतीतेः काव्यलिङ्गमलङ्कारः। विपाकस्य न परमाद्भुतत्वस्य विरोधात् उत्तरार्द्ध पर्यालोचनाय तत्परिहारात् विरोधाभासश्च।

* पापमाद्भुत इति पाठान्तरम्

लोपामुद्रया स्नेहादामन्त्रितं तदेवागत्य सीतासमेता केनचिदिव यत्का-र्यान्तरव्यपदेशेन गोदावरीं विलोकयितुमागता । (झ)

मुरला । सुविचिन्तितं भगवत्या, राजधानीस्थितस्य खलु तैस्तै र्जगतामभ्युदयिकैः कार्य्यैर्व्यापृतस्य नियताश्चित्तविक्षेपाः, असहायस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थं इति, तत् कथ-मिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात् ? (ञ)

तमसा । उक्तमेव भगवत्या भागीरथीदेव्या,—वत्से देवयजनसम्भवे सीते ! अद्य खलु आयुष्मतोः कुशलवयोर्द्वादशस्य जन्मसंवत्सरस्य संख्या-मङ्गलग्रन्थिरभिवर्त्तते तदात्मनः पुराणश्वशुरम् एतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व । न च त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावाद्वनदेवता

(झ) [illegible] शम्बूकस्य [illegible] शम्बूकस्य [illegible] इतिधानाश्रमान[illegible] [illegible] इत्यर्थः । तेन हेतुना सम्भावितजनस्थानागमनम् सम्भावितम् उत्प्रेक्षितम् अनुमितमिति यावत्, जनस्थाने आगमनं यस्य तं [illegible] सरयू अयोध्योपकण्ठवाहिनी नदी तस्याः [illegible] उपसृत्य आकर्ण्य परिज्ञाय इति यावत् । तदेव रामस्य [illegible] । सीता[illegible] [illegible] निमित्ता [illegible]सहिता [illegible]व्यपदेशेन [illegible] [illegible] [illegible] [illegible] तेन कुशाचारेण [illegible] । प्रकृत्यादिभ्य इति तृतीया [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] नाम सन्ध्यङ्गमुक्तम् ।

(ञ) सुविचिन्तितमिति साधु चिन्तितम् सम्यक् विवेचितम् । राजधानीस्थितस्य अयोध्यास्थितस्य तस्मै [illegible] [illegible] [illegible] आभ्युदयिकैः [illegible] मङ्गलाय [illegible] तैः उन्नतिसाधकैः कार्य्यैः [illegible] व्यापृते [illegible] रामभद्रस्येति शेषः, चित्तविक्षेपाः हृदयक्षोभाः नियताः निश्चिताः [illegible] । राजधानीस्थितस्य रामभद्रस्य [illegible] [illegible] [illegible] । पुनः [illegible] असहायस्य [illegible] शोकमात्रद्वितीयस्य केवलशोकसहचरस्य [illegible] रामभद्रस्य महान् [illegible] तद्दु [illegible] इति [illegible] [illegible] भगवत्या सुविचिन्तितमित्यर्थः । [illegible] पञ्चवटीप्रवेश[illegible] । आश्वासनीय स्यात् सान्त्वयितुं शक्यः स्यादित्यर्थः ।

अपि दृष्टयान्ति किं पुनर्मेध्यों इति। अहञ्च आज्ञापिता—तमसे! त्वयि प्रकृष्टप्रेमैव वधूर्वत्सा जानकीति अतस्त्वमेवास्याः प्रत्यनन्तरीभवेति—साहमधुना यथादिष्टमनुतिष्ठामि। (झ)

मुरला। अहमप्येनं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि। (ञ)

(झ)। उत्पन्नमिति। उत्पन्नमेवेति एवशब्द अयोगव्यवच्छेदनाय। किमुत्पन्नमित्याह—यदित्यादि। आयुष्मन्तो आयुः प्रशस्तं विद्यते ययो तौ आयुष्मन्तौ तयो द्वादशसंवत्सरस्य द्वौ च दश चेति द्वादश द्वाभ्यामधिका वा दश इति द्वादश। द्व्यष्टन संख्यायामबहुव्रीह्यशीत्योः इति आत्। द्वादशानां पूरणः इति द्वादशः। तस्य पूरणे डट् इति डट्। द्वादश संवत्सर इति द्वादशसंवत्सर तस्य जन्मवर्षावधिद्वादशपूरणीभूतवत्सरस्येत्यर्थः। सङ्ख्या मङ्गलग्रन्थि मङ्गलग्रन्थि मङ्गलार्थे वयसो वत्सरसमाप्त्यर्थे मङ्गलजननाय ग्रन्थि, वर्ष-समाप्त्युपलक्षितग्रन्थिमद्गुणग्रन्थिमिल्यर्थ तस्य सर्वपदवाच्येनाकारमपि स्वकर्मोचितमनुष्ठानविधिरित्यर्थः। "वत्सरे वत्सरे शिशूनां जन्मनक्षत्रे शान्त्यादिकं कृत्वा, मङ्गलार्थं कर्णे पञ्चसूत्रादिना ग्रन्थिं कुर्वन्ति। स तु वर्ष वर्धयनं नित्यतौलपदेश' इति वीरराघव। अभि वर्धते वाल्मीकिनेति शेष। तस्मात् तदनुष्ठानभूतस्य देवतापूजनस्य विषयत्वादित्यर्थः। आजन्म त्वया तवेत्यर्थ। पुराणश्वशुर प्राचीनश्वशुर परम्परया श्वशुरमित्यर्थ एतावन्न प्रयतन्त्र आद्य मानवस्य वैवस्वतमनोरपत्यस्य। मनुश्चपरा वैवस्वतमनुसुतपूर्व इक्ष्वाकुवंशप्रभवत्वात् दशरथपुत्रत्वाद्वा रामचन्द्रो जात इति ज्ञ यम। प्रसवितार जनयितारम अपहतपाप्मानम अपहतो नाशित पाप्मा पाप येन त निरस्तसमस्ताविद्यादिदोषगन्धम् इत्यर्थ। सवितार देव जगत् सृष्ट्यादिलीलाशालिनं सूर्यं देवम्। उपतिष्ठस्व पूजय। देवपूजार्थे आत्मनेपदम्। ननु एवमवगतमर्थं मम मामवलोक्य यदि रामाय निवेदयेय तदा महाननर्थपातो भवेदित्याह न चेत्यादि। न चास्य दृष्टाल्लोक्यनेनान्वय अवनिपृष्ठचारिणीम अवने भूमे पृष्ठ उपरिभागे चरति या ता भूमिगता मतीम अलौकिकप्रभावात् मदीयवरप्रभावेन इत्यर्थ मत्वा जानता। इति उत्पन्नमिति पूर्वेणान्वय। अतएव वनदेवतयापि सीताया साक्षाद्दर्शनं सम्भवति। अह तमसा, प्रकृष्टप्रेमा परमप्रीतिशालिनी वधू स्नुषा। प्रत्यनन्तरी समीप अनुचरी भव इत्यर्थ। सा अहं आज्ञापिता अह तमसा इत्यर्थ। यथादिष्टम आदिष्टम आदेशमनतिक्रम्येति सीताया सहचारिणी भवामीत्यर्थ। अनुतिष्ठामि आचरामि सीताया सहचारिणी भवामि

(ञ) अहमपि। एनं वृत्तान्तं सीतया सार्द्धं भागीरथ्या आगमनम् [illegible] मि कथयामि

तमसा । तदियं गोदावरीह्रदान्निष्क्रम्य ।—(ट)

परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्त्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥ ४ ॥

[४ । परिपाण्डुदुर्बलकपोलसुन्दरं विलोलकबरीकम् आननं दधती करुणस्य मूर्त्तिः अथवा शरीरिणी विरहव्यथा इव जानकी वनम् एति इत्यन्वयः ।]

मुरला । इयं हि सा ।—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ५ ॥

[५ । शरदिजः घर्मः केतकीगर्भपत्रम् इव हृदयकुसुमशोषी दारुणः दीर्घशोकः बन्धनात् विप्रलूनं मुग्धं किसलयम् इव परिपाण्डु क्षामम् अस्याः शरीरं ग्लपयति, इत्यन्वयः ।]

(इति परिक्रम्य निष्क्रान्ते ।)

विष्कम्भकः ।

(ट) तदिति । तदियं सा जानकी इत्यन्वयः तदियं सैव आकल्पस्य जानकीत्वस्य विशेषण-मेतत् । निष्क्रम्य निर्याय ।

(४) सीता विशिनष्टि परिपाण्डु इति—परिपाण्डुदुर्बलकपोलसुन्दरं परिपाण्डुभ्यां शोका-भिभवात् रक्तहरिद्रकरभोजनादिविरहेण किञ्चित् शुभ्राभ्यां दुर्बलाभ्यां कृशाभ्यां च कपोलाभ्यां गण्डाभ्यां सुन्दरं मनोज्ञम्, विलोलकबरीकमाननम् विलोला चञ्चला, संयमनाभावात् इतस्ततः विक्षिप्ता इति यावत्, कबरी केशवेश वेणी इत्यर्थः, यत्र तत् । नद्यृतश्चेति कः । विलम्बिवेणीकम् आननं मुखं दधती धारयन्ती इयं जानकी करुणस्य करुणविप्रलम्भस्य मूर्त्तिः आकृतिः इव, अथवा शरीरिणी मूर्त्तिमती विरहव्यथा वियोगवेदना इव वनमरण्यम् एति आगच्छति । अत्र जानक्याः करुणमूर्त्तितादात्म्यसम्भावनायाः शरीरिविरहव्यथातादात्म्य-सम्भावनायाश्च इवशब्देन प्रत्यायनात् वाच्या उत्प्रेक्षालङ्कारः । मञ्जुभाषिणीवृत्तम् । एतदनुरूपोक्तिर्यथा शाकुन्तले—

'वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति ॥

(५) किसलयमिति । शरदिजः शरत्कालसमुत्पन्नः, 'प्रावृट्शरत्कालदिवां जे' इति सप्तम्याः अलुक् । "सप्तम्यां जनेर्डः" इति डप्रत्ययः । घर्मः ऊष्मा सन्ताप इत्यर्थः, "घर्मः स्यादातपे ग्रीष्मेऽप्युष्मस्वेदाम्बुनोरपि" इति मेदिनी । केतकीगर्भपत्रम् केतक्याः केतकीपुष्पस्य

नेपथ्ये। **प्रमादः प्रमादः ।** (ठ)

(ततः प्रविशती पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता) । (ड)

सीता। **अम्महे, जाणामि पिअसही मे वासन्दी वाहरदि ।** (ढ)

[(ढ) अहो ! जानामि प्रियसखी मे वासन्ती व्याहरति, इति छाया ।]

(पुनर्नेपथ्ये)

सीतादेव्याः स्वकरकलितैः शल्लकीपल्लवाग्रै-

रग्रे लोलः करिकलभको यः पुरा पोषितोऽभूत् ।

सीता। **किं तस्स ? (ण)**

[(ण) किं तस्य ? इति छाया ।]

(पुनर्नेपथ्ये)

बध्वा सार्द्धं पयसि विहरन् सोऽयमन्येन दर्पा- *

दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

[६ । अग्रे लोलः यः करिकलभकः सीतादेव्याः स्वकरकलितैः शल्लकीपल्लवाग्रैः पुरा पोषितः अभूत्, अयं सः बध्वा सार्द्धं पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् सन्निपत्य अभियुक्तः, इत्यन्वयः ।]

गर्भ एव अभ्यन्तरवर्त्ति एव दलमिव, हृदयकुसुमशोषी हृदयं कुसुममिव इति हृदयकुसुम- "मुपमितं व्याघ्रादिभि" रिति समासः । हृदयकुसुमं शोषयति इति हृदयकुसुमशोषी । किञ्च । कुसुमशोषणवत्सन्तापकः दारुणः तीव्रः दीर्घशोकः दीर्घकालव्यापि भर्त्तृविरहदुःखं, वृन्तात् छिन्नात् विप्रलूनं छिन्नं मुग्धं रम्यम्, किसलयं पल्लवम् इव स्थितं, परिपाण्डु पाण्डुवर्णं कौमुदीच्छायमिति यावत्, क्षामं कृशम्, अस्याः सीतायाः शरीरं, ग्लपयति मलिनीकरोति । ग्लापयति इति वैकल्पिकं रूपम् मानितोक्तम् । अत्र हृदये कुसुमत्वारोपात् दीर्घशोके आतपत्वाद्यारोपस्य अवगत प्रत्ययात् एकदेशविवर्त्ति परम्परितम्, वृन्तलूनकिसलयसाम्यस्य शरीरे पाण्डुत्वादिधर्म्मैश्च प्रतीतरुपमा । पुनः वृन्तलूनगर्भपत्रस्य शरीरे वर्णस्य च दीर्घशोके ग्लपनसाधर्म्यात् साम्यप्रतीतेः उपमान्तरम् ।

(ठ) प्रमाद इति । प्रमादोऽनवधानता विधातुरित्याशयः । अथवा प्रमादो अनिष्टापातः । अथुमे विपत्तिः ।

(ड) तत इति । पुष्पावचयव्यग्रा पुष्पाणां कुसुमानाम् अवचये चयने सयत्ने व्यग्रा आसक्ता इत्यर्थः । सकरुणौत्सुक्यं करुणेन शोकेन औत्सुक्येन उत्कण्ठया च सह वर्त्तमानं यथा तथा आकर्णयन्ती शृण्वती प्रमादशब्दमिति शेषः ।

(ढ) अहो इति । जानामि मम पूर्वपरिचितस्वरश्रवणादिति भावः । व्याहरति भाषते ।

(६) सीतेति । अग्रे लोलः अग्रे समीपे लोलः चञ्चलस्वभावः चपलः यः करिकलभकः

* वेगादिति पाठान्तरम् ।

सीता। (ससम्भ्रमं कतिचित् पदानि गत्वा।) **अज्जउत्त ! परित्ताहि परित्ताहि मम तं पुत्तअं। (स्मृतिमभिनीय सवैलक्ष्यम्।) हद्धी हद्धी ताइं ज्जेव चिर-परिचिदाइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणीं अणुबन्धन्ति। हा अज्जउत्त !** (इति मूर्च्छति)। (त)

[(त) आर्यपुत्र ! परित्रायस्व परित्रायस्व मम तं पुत्रकम्। हा धिक् हा धिक्, तान्येव चिरपरिचितानि अक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र ! इति सम्।]

तमसा। (प्रविश्य) **वत्से ! समाश्वसिहि समाश्वसिहि।**

(नेपथ्ये) **विमानराज, अत्रैव स्थीयताम्।** (थ)

सीता। (समाश्वस्य सहाध्वसोल्लासम्) **अम्महे ! जलभरिदमेहत्थणिद-गम्भीरमंसला कुदो णु एसा भारदी णिग्घोसभरन्तकण्णविवरं मंपि मन्दभाइणीं झत्ति उस्सावेदि ?** (द)

[(द) अहो ! जलभृतमेघस्तनितगम्भीरमांसला कुतो नु एषा भारती निर्घोषभ्रियमाण-कर्णविवरा मामपि मन्दभागिनीं झटिति उच्छ्वासयति, इति सम।]

हस्तिशावक, सीतादेव्या स्वकरकल्पिते स्वकरेण निजहस्तेन कल्पिते आहृते, एतेन करिशावकं प्रति वत्सलातिशयो व्यज्यते। शल्लकीपल्लवार्थैः शल्लकीनां तदाख्यानां गजप्रियाणां पल्लवैः अङ्गुरिकसलयैः, तद्भक्षणैरिति भावः। कोमलत्वद्योतनार्थम् पल्लवशब्दस्य प्रयोगः। पुरा वनवास-काले यो वत्सो वर्धितोऽभूत्। अथ दृश्यमानः स करिकलभकः वध्वा स्वकीयभार्यया सार्धं सह पयसि जले विहरन् क्रीडन् अन्येन अपरेण केनचित् उद्दामेन उच्छृङ्खलेन उद्धतेन इति यावत्, द्विरदपतिना हस्तियूथपेन दर्पात् बलगर्वात् सन्निपत्य कुतोऽपि स्थानादागत्य अभियुक्तः अभिभवाय आक्रान्तः। अत्र सीतादेव्याः पुत्रस्वरूपस्य विनाशसम्भावनया प्रमाद एवेति भावः। मन्दाक्रान्तावृत्तम्।

(त) ससम्भ्रममिति। ससम्भ्रमं सत्वरम्। चिरपरिचितानि दीर्घकालोच्चारणेन अभ्यस्तानि अक्षराणि आर्यपुत्र इत्येव वर्णाः। अनुबध्नन्ति अनुसरन्ति मम मुखात् प्रसरन्तीत्यर्थः। चिरा-भ्यासवशात् सोऽयं देशः इति च हेतोः आर्यपुत्र इति अक्षराणि निसर्गात् एव मम मुखात् निर्गच्छन्ति इति भावः।

(थ) विमान इति। विमानराज इति पुष्पकस्य सम्बोधनम्। रामस्योक्तिरेषा।

(द) समाश्वस्य इति। समाश्वसोल्लासम् साध्वसेन भयेन उल्लासेन हर्षोच्छ्वासेन च सहेति

तमसा। (सस्मितास्रम्।) अयि वत्से! (४)

किमव्यक्तोऽसि निनदे कुतस्त्येऽपि त्वमीदृशी। *
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं † स्थिता॥ ७॥

[७। अव्यक्ते कुतस्त्ये अपि निनदे त्वं स्तनयित्नोः निनदे मयूरी इव किं ईदृशी चकितोत्कण्ठितं स्थिता, इत्यन्वयः।

तथोक्तं, क्रियाविशेषणम्। स्वरश्रवणेन रामोऽयं न वेत्ति सम्प्रति स चेत्तदागत्य परित्यक्ताया मम दर्शनेन क्रुद्धः स्यादिति भयेनोत्कम्प्य, यद्वा रामचन्द्रस्यात्र आगमनेन तस्य प्रजारञ्जनव्रते यदि काचित् त्रुटिः स्यादित्याशङ्कया भीतिः, असाधारणपतिव्रतताया अस्याः पतिमुखनिःसृतवाक्यश्रवणेन तच्चरणदर्शनलालसया च उल्लास युग्मं एवेति बोध्यम्। जलभरेति, जलेन भृतस्य पूर्णस्य मेघस्य स्तनितमिव गर्जितमिव गम्भीरा मन्द्रा मांसला प्रभृता स्थूलेति यावत्। एषा भारती वाणी कुतः कस्मात् स्थानादुत्पन्ना सतीत्यर्थः निनादयति, निर्घोषस्य ध्वनिना भ्रियमाणकर्णविवरं यस्यास्तां तथोक्ताम्। झटिति द्रुतम् उच्छ्वासयति सञ्जीवयति। मृतप्रायां मन्दभागिनीं मां हर्षेण उल्लासयतीत्यर्थः। मामपीत्यपिशब्देन अस्य दुःखातिशयेन कृशाङ्गीत्वं व्यज्यते।

(४) सस्मितेति। चिरानुभूतेऽपि स्वरे संशय इति विस्मयेन स्मितम्, आगतेऽपि रामे परस्परसाक्षात्कारो न जायते इति दुःखेन च अश्रु नाभ्रा सहेति सस्मितास्रम्।

(७) किमव्यक्तेऽसीति। अव्यक्ते अपरिस्फुटे अज्ञायमानस्वरूपे इत्यर्थः, कुतस्त्ये कुतोऽपि निमित्तादुत्पन्ने अज्ञातहेतुके इति यावत्। कुतो भवतीत्यर्थे "अव्ययात्त्यप्" इति त्यप्प्रत्यय इति कालापाः। "अव्ययात् त्यप्" इति त्यप्। निनदे ध्वनौ "शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।" इत्यमरः। स्तनयित्नोः मेघस्य ध्वनौ इति शेषः। "अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः" इत्यमरः। मयूरीव ईदृशी एवंविधा चकितं सम्भ्रान्तम् उत्कण्ठितम् उत्सुकञ्च यथा स्यात्तथा स्थिता असि भवसि। मेघध्वनिमाकर्ण्य मयूरी यथा चकिता उत्कण्ठिता च भवति, तथा त्वमपि इमम् अपरिस्फुटं विमानराजस्यैव स्वीयतामित्यं न कस्यापि कण्ठस्वरं श्रुत्वा चकितैव समुत्कण्ठिता व्याकुला च सञ्जातासि इत्यर्थः। अत्र प्रकृष्टकारणाभावेऽपि चकितोत्कण्ठितत्वकार्योत्पत्तेर्विभावनालङ्कारः। स च सीताया मयूर्या रामे स्तनयित्नौ तच्छब्दे च मेघनिनादस्य साम्यप्रत्ययात् सकलोपादानात् पूर्णोपमया सङ्कीर्यते तथा त्वमेव राजर्षि-तन्वीतिवत् मयूरी असि त्वमु असि इति प्रथममध्यमपुरुषभेदात् उपमागतभग्नप्रक्रमत्वदोषः, स च 'निनदे चाभ्यव्यक्ते' इति पाठेन समाधेयः। पद्यावक्त्रं छन्दः।

---

* "अपरिस्फुटनिनादे" "कुतस्त्ये प्रीतिरीदृशी" इति पाठान्तरम्।

† "चकितोत्कण्ठिता" इति पाठभेदः।

सीता। भअवदि ! किं भणासि अपरिप्फुडेत्ति ? मए उण सरसंजोएण पच्चभिआणिदं अज्जउत्तो ज्जेव वाहरदि। (न)

[(न) भगवति ! किं भणसि अपरिस्फुटेति ? मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातम्, —आर्यपुत्र एव व्याहरति, इति ममन् ।]

तमसा। श्रूयते तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा जनस्थानमागत इति। (प)

सीता दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ। (फ)

[(फ) दिष्ट्या अपरिहीनराजधर्मः खलु स राजा।]

(नेपथ्ये) यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम्।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

८। यत्र द्रुमा मृगा अपि मे बन्धवः प्रियासहचरः (अहं) यानि चिरम् अध्यवात्सम्। बहुनिर्झरकन्दराणि एतानि तानि गोदावरीपरिसरस्य गिरेः तटानि, इत्यन्वयः ।]

(न) भगवतीति भगवति तमसे ! अव्यक्त इति तमसोक्तवाक्यस्यार्थमादाय सीताया प्रश्नः, अपरिस्फुट इति। स्वरसंयोगेन कण्ठनादस्य सम्यक्कर्णविवरप्रविष्टेनेति यावत्, मया प्रत्यभिज्ञातम् अहं जानामीत्यर्थः । अनुभूतस्य पुनरनुभवः प्रत्यभिज्ञेति नैयायिकाः । आर्यपुत्रः रामचन्द्र एव व्याहरति भाषते इति न तु अन्य इति परिसंख्या आर्थी।

(प) श्रूयते इति। तपस्यतः तपस्यां कुर्वतः शूद्रस्य शम्बूकस्य दण्डधारणार्थम्, दण्डस्य शिरश्छेदरूपस्य धारणं विधानमित्यर्थः । तस्मै इदं इति दण्डधारणार्थम्, अर्थेन सह नित्यसमासः सर्वलिङ्गता च। ऐक्ष्वाकः इक्ष्वाकोरपत्यं पुमानिति इक्ष्वाकुवंशीयः, राजा नृपतिः रामः जनस्थानम् आगत इति श्रूयते लोकपरम्परया आकर्ण्यते इत्यर्थः ।

(फ) दिष्ट्येति। दिष्ट्या इति तृतीयान्तप्रतिरूपकमव्ययम्, भाग्येनेत्यर्थः । स राजा रामः । अपरिहीनराजधर्मः राज्ञो धर्मः राजधर्मः न परिहीनः राजधर्मः यस्य स तथोक्तः, अपरित्यक्तराजकर्त्तव्य इत्यर्थः ।

(८) यत्रेति। येषु गिरितटेषु द्रुमाः वृक्षाः अपि मृगाः हरिणाः अपि मे मम बन्धवः सुहृदः आसन् इति शेषः ।

सीता (दृष्ट्वा ।) हा कधं पहादचन्दमण्डलापाण्डुरपरिक्खाम-दुब्बलेण आआरेण, अय्य * सोम्मगम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तो ज्जेव ता मं धारेहि † । (ब)

(इति तमसामाश्लिष्य मूर्च्छति ।)

[(ब) हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलाकारेण, अय सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञात आर्यपुत्र एव तस्मात् धारय इति मम ।]

तमसा । (धारयन्ती) वत्से ! समाश्वसिहि समाश्वसिहि ।

एवञ्च सुचिरवासिनः छायादानगात्रकण्डूयनादिना उपकारपरायणतया मृगद्रुमादि अपि सुहृद्वृन्दरूपतां गता इत्यर्थः । प्रियासहचर प्रियायाः सीतायाः सहचर सीतासहित इत्यर्थः । यानि गिरितटानि चिरं बहु कालं व्याप्य अत्राश्रमे अधिष्ठितवानस्मि 'उपान्वध्याङ्वसः' इति कर्मत्वम् । तानि पूर्वदृष्टानि एतानि दृश्यमानानि बहुनिर्झरकन्दराणि बहवः निर्झराः जलप्रवाहाः कन्दराः गुहाश्च येषु तानि गोदावरीपरिसरस्य गोदावरी परिसरः पर्यन्तभूमिः यस्य स तथोक्तः तस्य उपान्तस्थितगोदावरीकस्य "पर्यन्तभूः परिसरः" इत्यमरः । गिरेः प्रस्रवणाख्यपर्वतस्य तटानि प्रस्थानि विद्यन्ते इति शेषः एव द्रुमा अपि इत्यादिषु अपिशब्देन का कथा तत्रत्यानां मुनिप्रभृतीनां सचेतनानामित्यर्थान्तरस्य समानन्यायेन आगमात् अर्थापत्तिरलङ्कारः । वसन्ततिलकं वृत्तम् ।

(ब) हा इति । ह कथमित्येकमव्ययम् अत्यन्तखेदसूचकम् । प्रभातेति । प्रभाते उषसि यत् चन्द्रमण्डलं शशिबिम्बं तदिव आपाण्डुरं म्लानं इत्यर्थः परिक्षामं कृशं दुर्बलं सामर्थ्यशून्यञ्च तेन आकारेण शरीरेण उपलक्षितः, प्रकृत्यादिभ्य उपसंख्यानमिति उपलक्षणे तृतीया । अनुभावः तेजोविशेष एव अनुभावमात्रं, सौम्यं शान्तं गम्भीरं स्थिरं यत् अनुभावमात्रं, तेन प्रत्यभिज्ञातः । अयं परिदृश्यमानः जनः स आर्यपुत्र एव इति केवलानुभावेन प्रतीयते इत्यर्थः । पूर्वं न आकृतिवैसादृश्यात् सोऽयं नवेति सन्देहोऽभवत् किन्तु पूर्वदृष्टप्रभावावलोकनात् स एवायमिति निश्चय इति भावः । तत् तस्मात् रामस्य ईदृक् दुरवलोकनीयावस्थादर्शनेन मूर्च्छया भुवि पतनाघातसम्भवात् इतो इत्यर्थः । मां धारय सखि तमसे । त्वं मामवलम्बस्व । मूर्च्छोत्पत्तिं सम्भाव्यैव पतनभयात् प्राक् तमसां धारयितुम् आदिष्टवतीत्यर्थः

* "अय्य सो गम्भीराणुभाव" इति पाठान्तरम्

† "ता धारेदु मं पिअसही" "भअवदि तमसे धारेहि मं" इति पाठभेदौ ।

(नेपथ्ये) अनेन पञ्चवटीदर्शनेन—

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः ।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥ ८ ॥

[८ । अन्तर्लीनस्य अद्य उद्दाम ज्वलिष्यत दुःखाग्ने धूमस्य उत्पीड इव मोह मां प्राक आवृणोति, इत्यन्वय ।]

(नेपथ्ये) हा प्रिये जानकि ।

तमसा । (स्वगतम्) इदं तदाशङ्कितं गुरुजनेनापि । (भ)

सीता । (समाश्वस्य) हा । कहं एदं ? (य)

[(य) हा कथमेतत् इति सम् ।]

(पुनर्नेपथ्ये) हा देवि । दण्डकारण्यवासप्रियसखि । विदेहराजपुत्रि । (इति मूर्च्छति) (र)

सीता । हद्धी हद्धी, मं मन्दभाइणिं उद्दिसिअ * आमोलन्तणेत्तणीलुप्पलो मुच्छिदो ज्जेव अज्जउत्तो । हा हा कहं धरणीपिट्ठे णिरुस्सासणीसहं विपल्हत्थो । भअवदि तमसे । परित्ताहि परित्ताहि, ओवावेहि अज्जउत्तम् । (इति पादयो पतति) (ल)

[(ल) हा धिक् हा धिक् मां मन्दभागिनीमुद्दिश्य आमीलन्नेत्रनीलोत्पलो मूर्च्छित

---

(८) अन्तर्लीनेति अन्तर्लीनस्य अन्त हृदये लीनस्य कालेन प्रच्छन्न स्थितस्य अद्य अधुना अनेन पञ्चवट्या दर्शनेन हेतुना उद्दामम् अनर्गलम् अत्युत्कटमिति यावत्, ज्वलिष्यत सन्दीपिष्यमाणस्य उद्बोधकदर्शनादुद्बोधनीयस्य बाहुल्याविष्कारभाविलादिति भाव । दुःखाग्ने दुःखम् अग्निरिव तस्य धूमस्य उत्पीड राशिरिव मोह मूर्च्छा मां प्राक पूर्वप्रकाशात् पूर्वम् आवृणोति आच्छादयति । यथा वह्नेः धूम पूर्वविकाशात पूर्वं तत्स्थानम् आच्छादयति तथा दुःखजनितोऽयं मोह दुःखस्य पूर्वविकाशात प्राक मामावृणोति इत्यर्थ । अत्र दुःखे अग्निसाम्यस्य समासगतत्वात लुप्ता मोहे धूमोत्पीडसामान्य इवशब्दवाच्यत्वात वाच्या उपमा । इत्त पथ्यावक्त्रम्

(भ) इति । हा प्रिये जानकि त्वं क्वासि इति शेष ।

(भ) इदमिति । गुरुजनेनापि अरुन्धतीप्रभृतिनापि पूज्यजनेन इत्यर्थ । तत् रामस्य मूर्च्छापातादिकम् आशङ्कितम् तर्कितमित्यर्थ ।

(र) इति । दण्डकारण्यवासे तत्रावस्थानकाले इत्यर्थ, प्रियसखि सहचरीभावेन महोपकारकत्वादिति भाव

---

* 'आइरिअ' इति पाठभेद ।

एव, हा हा! कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्य्यस्तः, भगवति तमसे! परित्रायस्व परित्रायस्व, जीवय आर्य्यपुत्रम्, इति सम।]

तमसा। त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिम्।
प्रियस्पर्शो हि पाणिस्ते तत्रैव नियतो भवः * ॥ १० ॥

[१०। ननु कल्याणि! त्वमेव जगत्पतिं सञ्जीवय, पाणिः ते हि प्रियस्पर्शः, तत्र एव भवः नियतः, इत्यन्वयः।]

सीता। जं भोदु, तं भोदु, जधा भअवदी भणादि। (ब)

[(ब) यद्भवतु तद्भवतु, यथा भगवती भणति, इति सम।]

(ससम्भ्रमं निष्क्रान्ता।)

(ख) हा इति। आमीलितं नीलोत्पलं नेत्र नीलोत्पले इव इति नेत्रनीलोत्पले आमीलिते नेत्रनीलोत्पले यस्य स तथोक्तः ईषन्मुद्रितनयनेन्दीवरः। धरणीपृष्ठे धरण्याः पृथिव्याः, पृष्ठमुपरिभागः तस्मिन्। निरुत्साहनिःसहं निरुत्साहम् शोकाभिभवात् उत्साहस्य अभावं सत्वभङ्ग इत्यर्थः, तेन हेतुना निःसहं दुर्व्वहं शोढुम् अशक्ततया विवशं यथा स्यात्तथा विपर्य्यस्तः पतित इत्यर्थः। निर्गतः उत्साहो यस्मात् तत् यथा तथा निरुत्साहं तच्च तत् निःसहञ्चेति निरुत्साहनिःसहं, कर्म्मधारयः सुप्सुपेति वा समासः।

(१०) त्वमिति। ननु भो कल्याणि! मङ्गलस्वभावे सीते। त्वमेव तवैव कर्त्तव्यमेतदित्येवकारार्थः। जगत्पतिं जगतः पतिं पृथिवीपालं रामचन्द्रं सञ्जीवय मूर्च्छापनोदनेन प्रत्युज्जीवय सचेतनं कुर्वित्यर्थः। अत्र श्रुतिः—"प्राणोदवात स्वधया सहैकम्" एकं जगतः प्रलीनत्वादसहायम् अतो निर्व्यापारं तत्परं ब्रह्म स्वधया "त्वं स्वधा स्वाहा" इति स्वधायास्त्वदभिन्नया लक्ष्म्या प्राणोदजीवत इति। हि यतः ते तव पाणिः, करः प्रियः प्रीतिकरः स्पर्शः यस्य स तथोक्तः भवतीति शेषः। रामस्य चैतन्यसम्पादनं तवैव सुकरं नान्यस्य इति भावः। अतः तत्रैव तस्मिन्नेव नान्यस्मिन्नित्यर्थः। पाणिना प्रियाङ्गस्पर्श एव भवः सञ्जीवनं नियतः स्थिरः। तव करस्पर्शेन रामस्य निरतिशयसुखोदयो भविष्यति, तेनैव च स लब्धसंज्ञो भविष्यति, अतोऽनन्यकर्म्मा सती तदङ्गस्पर्शे एव निरता भूया इति सरलार्थः। तवैव इत्येवकारेण अन्यव्यपोहनस्य प्राधान्यात् प्राधान्यं परिसंख्या, भवस्य च नियतत्वरूपसामर्थ्येन जगत्पतेः सञ्जीवनसमर्थनात् अर्थान्तरन्यासश्च। अत सा मन्दभागिनीमित्यादेः परित्रायस्व परित्रायस्वेत्यस्य च प्रत्युत्तरस्वरूपम् उक्तम्।

(ब) सीतेति। यद्भवतु रामचन्द्रानुमतिमन्तरेणापि तदङ्गस्पर्श सम्पृष्ट कृतो

* "तवैव विनतो भव", "तवैव नियता भव" इति पाठभेदौ।

(ततः प्रविशति भूमौ निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामभद्रः ।)

सीता । (किञ्चित् सहर्षम् आत्मगतम् ।) जाणे पुणोवि पच्चागदं विअ जीविदं तेल्लोक्कणाहस्स * । (घ)

[(घ) जानामि पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य, इति छाया ।]

राम । हन्त भोः ! किमेतत् ? । (ङ)

प्रश्च्योतनं नु हरिचन्दनपल्लवानां
　　निष्पीडितेन्दुकरकन्दलजो नु सेकः ।
आतप्तजीवनमनःपरितर्पणो † मे
　　सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥ ११ ॥

११ । हरिचन्दनपल्लवानां प्रश्च्योतनं नु, निष्पीडितेन्दुकरकन्दलजः सेकः नु, मे हृदि आतप्तजीवनमनःपरितर्पणः असौ सञ्जीवनौषधिरसः प्रसिक्तः नु, इत्यन्वयः ।]

वा भवतीत्यर्थः । ईदृशे काले तव विवेचनीयं नास्तीति भावः । यथा भगवती ऐश्वर्यशालिनी तमसा भणति ब्रवीति तथा करोमि पाणिना प्रियस्याङ्गं स्पृशामीत्यर्थः । ससम्भ्रमं सम्भ्रमेण त्वरया सह वर्त्तमानं यथा स्यात्तथा । "सम्भ्रमस्त्वरया वेगे" इति मेदिनी ।

(घ) जाने इति । त्रिलोकनाथस्य त्रिभुवनपते रामस्य जीवितं चैतन्यं पुनरपि प्रत्यागतम् इव अहं जानामि वेद्मि, श्वासप्रश्वासादिदर्शनादिति भावः । लक्ष्मीरूपिणी सीता नारायणावतारं रामं जगदीश्वरमिति जानात्येव आत्मगतकथनेनान्यैरश्रव्यत्वान्न मानुषव्यवहारहानिः । ननु कथमनयोः लक्ष्मीनारायणयोरपि मानुषव्यवहार इति ? सत्यं जगति स्त्रीपुरुषविग्रहधारिणोः जगदीश्वरयोरपि मानवाचारः सजातीयविग्रहायाः प्रायफलजनकत्वादिति ।

(ङ) हन्त इति । हन्त इति हर्षसूचकमव्ययं 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इत्यमरः । किमेतदित्यस्य प्रश्च्योतनमिति श्लोकेनान्वयः ।

(११) प्रश्च्योतनमिति । एतत् स्पर्शनं किं ? हरिचन्दनपल्लवानां हरिचन्दनस्य देवतरोः पल्लवानां किसलयानां प्रश्च्योतनं क्षरितो रसः निर्यास इति यावत्, नु किम् । अतिशैत्यकर-त्वात् स्पर्शनमिदं तथा वितर्कयामि इत्यर्थः । "नु पृच्छायां वितर्के च" इत्यमरः । पुनश्च:

* तेल्लोक्कस्स इति पाठान्तरम् ।

† जीवनतरो, जीवितपुन परितर्पणोऽयं इति च पाठान्तरम् ।

स्पर्शः पुरा परिचितो नियतं स एष
　　सञ्जीवनश्च मनसः परिमोहनश्च ।
सन्तापजां सपदि यः प्रतिहृत्य मूर्च्छा-
　　मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

[१२ पुरा परिचितः मनसः सञ्जीवनः परिमोहनश्च नियतं एष स स्पर्शः; यः सपदि सन्तापजां मूर्च्छां प्रतिहृत्य पुनः आनन्दनेन जडतां आतनोति इत्यन्वयः

मवतात वितकमुचक पल्लवप- अधिकशन्यद्योतनार्थम निष्पीडितन्दकरकन्दलेन इन्दो चन्द्रस्य करा किरणा तेषां कन्दला नवाङ्कुरा अङ्कुरा कन्दलन विषु कपालेऽप्यथरागी नवाङ्कुर" इति मेदिनी निष्पीडिता मर्दित य इन्दुकरकन्दलो तस्मात् जायते य स तथाक्तः महितसुधाकरमुप्रवाहगालः । सक द्रर्तकरयसार इत्यथ, न कि मम हृदयं निसक्त इत्यथः आतमति मानम विवहाापत मनम यन जीवन मनसिमत्र तयो परितपया हामकर शीतलतासम्पकत्वात् प्रीतजनक इत्यथ सञ्जीवनौषधि सञ्जीव्यते अनया इति सञ्जीवनी सा चासौ ओषधि त ओषधि फलपाकान्ता इत्यमर । कर्मधारये पूर्वपदस्य पुवद्भाव तथा रम रत मम हृदयं प्रसिक्त धारया पातित नु किम् एतेषाम् अन्यतम विना कथमकस्मात्मम एतादृश इति भाव । अत्र स्पर्शे इन्दुचन्दन-पत्रवादीनां प्रयासमादिमत्रयात निश्चयाभावात शुद्धसन्देहालङ्कार 'सन्देह प्रकृतेऽन्यस्य संशय प्रतिभोत्थित शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा' इति लक्षणात् इन्दुकरेषु निष्पीडनासम्बन्धेऽपि तत्सम्बन्धोक्त्या अतिशयोक्तिश्च वसन्ततिलक छन्दः

(१२) स्पर्श इति पुरा पूर्व माता ना मह एकत्रनिवासदशायाम् इति यावत परिचित सस्तुत हृदयङ्गमा इति मनस चित्तस्य सञ्जीवन समुल्लासन आनन्दसम्पादक इत्यर्थः । परिमोहन आनन्दातिशयेन वह्वलताकारी नियत निश्चितम् एव अनुभूयमान स स्पर्श पूर्वानुभूतसीताकरसम्पर्क इत्यथ य स्पर्श सन्तापजां विरहवेदनासमुत्पादितां मूर्च्छा वैचित्त्य प्रतिहृत्य विनाश्य सपदि तत्क्षणं स्पर्शसमय एवेत्यथ सद्य सपदि तत्क्षणे इत्यमर । आनन्दनेन निरतिशयाह्लादविधानेन जडतां इन्द्रियाणां निश्चलतां विषयान्तरविज्ञानशून्यता मित्यर्थं, पुन भूय आतनोति विस्तारयति मामानन्दपरवशं निश्चेष्टमपि करोतीत्यर्थ । अत्र प्रथमोक्तश्लोके सन्देहान्त अत्र श्लोके च निश्चयात् संशयानन्तर निश्चयस्य एकाश्रयत्वात् प्रकृतस्पर्शे च तादृशसंशयस्य आदौ अभवत् प्रत्ययोन निश्चयान्त सन्देहो व्यज्यते ननु निश्चय संशयनिश्चययो रेकाश्रयत्व तदभावात् सन्तापजनकत्वासम्भवेऽपि तत्सम्बन्धोक्त्यातिशयोक्तिरलङ्कारश्च यच्छन्दस्य परवाक्यापादानात विधेयाविमर्शोऽप्यत्र न च पर्वाद्धे पूर्वं ततश्च तायनरवा पठित्वा समाधेयम् छन्द पूर्ववत्

सीता। (ससाध्वसोत्कम्पमपसृत्य।) एत्तिअं ज्जेव दाणिं मे बहुदरं। (ग)

[(ग) एतावदेव इदानीं मे बहुतरम्। इति मम]

राम। (उपविश्य) न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि ? (ङ)

सीता। हद्धी हद्धी किं त्ति मं अज्जउत्तो मग्गिस्सदि ? (च)

(च) हा धिक् हा धिक्, किमिति मामार्यपुत्रो मार्गिष्यति ? इति मम।]

राम भवतु, पश्यामि। (इति चतुर्दिशमवलोकयति) (छ)

सीता। भअवदि तमसे ! ओसरह्म, जइ दाव मं पेक्खिस्सदि, तदो अव्भणुण्णादसण्णिधाणेण अहिअदरं मम महाराओ कुविस्सदि। (ज)

[(ज) भगवति तमसे ! अपसराम, यदि तावन्मां प्रेक्षिष्यते, तदा अनभ्यनुज्ञातसन्निधानेन अधिकतरं मम महाराज कोपिष्यति। इति मम]

(ग) सखीति। ससाध्वसोत्कम्पम्, साध्वसेन रामो मां प्रत्यभिज्ञातवान् इति भयेन उत्कम्पेन सह वर्त्तमानं यथा तथा अथवा रामस्य गात्रस्पर्शात् सात्त्विकं, तेन उत्कम्पं शरीरचञ्चलता, साध्वसञ्च उत्कम्पश्च ताभ्यां सह वर्त्तमानं यथा तथा, अपसृत्य दूरं गत्वा वक्ष्यमाणमाहेत्यन्वयः। इदानीं निर्वासनदशायामपि रामेण यत् करस्पर्श… एतावदेव मम स्पर्शेन सुखानुभवस्वीकरणार्थं लाभेन अधिकतरं … सर्वंसहमप्यापणामहवासादिसुखानामत्यन्तासम्भवादिति भावः।

(ङ) नेति। वत्सलया स्नेहवत्या सीतादेव्या न खलु अभ्युपपन्नः अनुगृहीतः किम् ? अनुगृहीत एव मम दृशो दशामालोक्य सहानुभूतहृदया सुखस्पर्शेन पाणिना सन्तापं सम्मृष्टवत्येव, अत्र काकुस्वरोच्चारितेन नञा प्रश्नोऽवगम्यते, न खलु अभ्युपपन्नः किं अपि तु अभ्युपपन्न एव अन्यथा कथमेतादृशसुखजनकस्पर्श इति भावः। १८ इष्टजनाभिसन्धानात्मकमतिबलं नाम सन्ध्यङ्गमुक्तम्

(च) हेति हा धिगिति शोकद्योतकमव्ययम्। विषादेन द्विरुक्तिः, यस्मात् सततं सञ्चारिणा आम्र स इदानीमामन्विष्यति इति शोकहेतुरिति भावः। मार्गिष्यति अन्विष्यति। रामस्याकारावलोकनात् सीताया अयं वितर्कः।

(छ) भवत्विति। भवतु सीतया अभ्युपपत्तिः तदभावो वा अस्तु इत्यर्थः। पश्यामि समन्तात् निरूपयामीत्यर्थः। अत्र वनान्तर्गतमागत्य निवसन्तं सर्वं न अदृश्यमानोऽपि सीतावाक्यसामञ्जस्याय अनुसन्धेयः।

(ज) भगवतीति अपसराम स्थानादस्मादन्यत्र याम, अस्मादेकत्वं पाक्षिकं

तमसा। अयि वत्से! भागीरथीवरप्रभावात् वनदेवतानामपि अदृश्या संवृत्तासि। (ग)

सीता। आं अत्थि एदं। (घ)

[(घ) आं अस्ति इदम्। इति सम्]

रामः। ननु प्रिये जानकी! (ङ)

सीता। (समन्युगद्गदम्) अज्जउत्त! असरिसं क्खु एदं वअणं इमस्स वुत्तन्तस्स। [साश्रम्।] अहवा किं त्ति वज्जमई जम्मान्तरेसु वि पुणो असम्भाविददुल्लहदंसणस्स मं एव्व मन्दभाइणीं उद्दिसिअ वच्छलस्स एव्वंवादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं, अहं एदस्स हिअअं जाणामि, मम एसो त्ति। (च)

[(च) आर्य्यपुत्र! असदृशं खलु एतद्वचनमस्य वृत्तान्तस्य। अथवा किमिति वज्रमयी जन्मान्तरेषु अपि पुनरसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्य वत्सलस्य एवंवादिन आर्य्यपुत्रस्य उपरि निरनुक्रोशा भविष्यामि, अहमेतस्य हृदयं जानामि ममापि एष इति। इति सम्]

बहुवचनम्। न अभ्यनुज्ञातं न अनुमोदितं इत्यनभ्यनुज्ञातं तथोक्तं सन्निधानं समीपोपगमनम् अनभ्यनुज्ञातसन्निधानं तेन समीपस्थितिहेतुना इत्यर्थः। नृपतिरयं प्रजानुरञ्जनाय मां वनवासिनीं कृतवान्, अधुना यदि तस्यानुमतिमन्तरेणाहं समीपवर्त्तिनी भवामि तदा नूनमेवार्य्यपुत्रो मां प्रति कोपिष्यति प्रजापालनत्रुटिसम्भवात्। तदपसरणमेव मम वरमिति भावः।

(ग) अयीति। भागीरथीवरप्रभावात् गङ्गादेव्या वरदानमहिम्ना। त्वं वनदेवतानामपि किं पुनर्मनुष्यस्य रामस्य इत्यपिशब्दार्थः, अदृश्या अनवलोकनीया असि भवसि। ततः रामदर्शनादनिष्टपातशङ्का न कार्य्या इत्यपसरणे नास्ति प्रयोजनमित्यर्थः।

(घ) आम् इति। स्वीकारार्थकमव्ययम्, भागीरथीवरमाहात्म्यं अङ्गीकृत्य इत्यर्थः। अतः भागीरथीवरेण ममादृश्यत्वमस्तीति अतएव अहं नापसरामीत्यर्थः।

(ङ) ननु इति। अनुनयविशेषसूचनार्थं पुनः ननु प्रिये जानकीत्युक्तम्। "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः।

(च) समन्यु इति। मन्युना शोकेन प्रणयकोपेन वा गद्गदं अस्फुटस्वरः तेन सह वर्त्तमानं यथा स्यात्तथा, आहेति क्रियाया विशेषणं "मन्युर्दैन्ये क्रतौ क्रुधि" इति कोषः। "गद-

राम । (सर्वतो विलोक्य सनिर्वेदम्) हा ! न काचित् अत्र । (छ) *

सीता भअवदि तमसे ! तहा णिक्कारणपरिच्चाइणोवि एदस्स एदिणा एव्वंविधेण दंसणेण कोदिसो मे हिअआणुबन्धोत्ति ण आणामि । (ज)

[(ज) भगवति तमसे तथा निष्कारणपरित्यागिनोऽप्येतस्य एतेन एवंविधेन दर्शनेन कीदृशो मे हृदयानुबन्ध इति न जानामि । इति सम्]

मन्मदपोऽाद्ये वसव्य गदगद विद । गद्गद स्वरभङ्ग इद वचन 'प्रिय जानकी' ति स्नेहसूचक वाक्य मम्य व्यापारस्य नकृतकनिवासनरूपनिष्ठुराचरणस्य असदृश निर्वासिताया म निन्दासूचकसम्बोधनमेव युज्यते न तु प्रिय इति अननुरूप, माहात्म्यभङ्गप्रसङ्गात् महात्मना हि मनोवाक्कर्म्मसु तुल्यताचरणाय आचरणानुरूप ब्रुवत इति। प्रजानुरञ्जनार्थमेव अकारणमपि मम निर्वासन कृतम्, अन्यथा कथमधुना मा प्रतीदृक्स्नेहाविर्भावो दृश्यते। पक्षान्तरमाह—अथवा वज्रमयौ पाषाणादिनिर्मितामिवात्यन्तकठिना, आर्य्यपुत्र तथा पश्चन्नपि हृदयस्याविदीर्णत्वादिति भाव जन्मान्तरव्वपि अन्यानि जन्मानि जन्मान्तराणि मयूरव्यंसकादयश्चेति समास। नयु पुन भूय असम्भावित अघटनीयमत एव दुर्लभ दर्शन यस्या सा ता तथोक्तां मन्दभागिनी दुर्भाग्यां मामेव उद्दिश्य विषयीकृत्य इत्यर्थ। भागीरथीवरभङ्ग्या अधुनाऽभाग्यं पृथक्स्यादागमनायासस्य जन्मान्तरेऽपि ममैषा अदृश्यता निरस्यति भवति सम्भाव्य एतदुक्तमिति भाव। वनमन्यस्य स्नेहवर पथवादिन उक्तसकाहसम्बोधनकारिण आर्य्यपुत्रस्य रामस्य उपरि निरनुक्रोशा निर्दया अथवा निरनुक्रोशपदेन रामस्य मा अवस्था दृष्टा मया मुक्तकण्ठ रोदितव्य तत् किमेव कठिना भवामीत्येव व्यज्यते अनुक्रोशति मुक्तकण्ठ रोदित्यनेनेति अनुक्रोश इत्यमरव्याख्या 'कृपादयानुकम्पा स्यादनुक्रोश' इत्यमर भविष्यामि। मामुद्दिश्यैवं प्रियवादिन राम प्रति मम निर्दयव्यवहार कथमपि नैव सम्भवेदित्यर्थ। अह अस्य रामस्य हृदय चित्ताभिप्रायमित्यर्थ जानामि एष राम, मम मनोगतभाव जानातीत्यर्थ। भावानुभाव उभयोर्म्मनोभावम् विद्व अत आवयो कोऽपि क प्रति विद्वेषी न स्यात्, यत्तु मां प्रत्यनेन निष्ठुराचरण कृत तन्मम दुरदृष्टवशादेवेति सम्भावयामि इति भाव। गङ्गावरे इत्य धातोर्ज्ञानसामान्यार्थत्वात् यथा सीताया स्वरूपतो रामेण अज्ञान तथा तद्वाक्यश्रवणनिषेधोऽपि अनुसन्धेय, अतएव समीपे वदन्त्या अपि सीताया वाक्यस्य रामेण अश्रवणमुपपन्नम्।

(छ) सर्व्वत इति। सर्व्वत सर्व्वासु दिक्षु विलोक्य इत्यन्वय। सनिर्वेद निर्वेदेन

* "कथमेव न काचिदपि", "न किञ्चिदत्र" इति पाठभेदौ

तमसा। जानामि वत्से! जानामि। (भ)

तटस्थं नैराश्यादपि च कलुषं विप्रियवशात्
वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भितमिव।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढ़करुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव॥ १२॥

[(१२) तव हृदय नैराश्यात तटस्थम्, अपि च विप्रियवशात कलुषं, दीर्घे अस्मिन वियोगे झटिति उत्तम्भितम इव, सौजन्यात् प्रसन्न करुणे गाढकरुण अस्मिन क्षणे प्रेम्णा द्रवीभूतम् इव, इत्यन्वय।]

'तत्रभवानापदीव्यादेशि निर्वेद व्यावमाननेति दर्पणोक्ते व्यावमानेन सह वर्त्तमानमिति समिव्यदमाहिकस्य विशेषणम। सीतामुद्दिश्यैव विप्रलभादपि तां निर्वेतुमशक्यत्वेन आत्मनो निर्वेद। अत अस्मिन स्थाने कापि कापि न नाम्नीत्यर्थ। अतएव कुतो मे प्रिया सेति भाव'।

(ञ) भगवतीति। निष्कारणपरित्यागिनोऽपि, विना हेतु मा वने निर्व्वासयतोऽपि एतस्य रामस्य एवंविधेन अतर्कितोपनतेन शोकविह्वलत्वावलोकनेन मम हृदयस्य चित्तस्य कीदृश किम्भूत अनुभव अवस्था इत्यर्थ। तमह न जानामि सम्यक् अवधारयितु न शक्नोमि इत्यर्थ।

(भ) जानामीति। हे वत्से सीते। जानामि, जानामि त्वदीय हृदयमिति शेष, अवधारणे द्विरुक्ति। जानाम्येव इत्यर्थ।

(१२)। किमिव मे हृदयावस्था त्व जानासीति आकाङ्क्षायां तामेव विवृणोति—तटस्थमिति। तव हृदयं चित्त नैराश्यात् पुन समागमसम्भावनाविरहात तटस्थं उदासीनं रत्यादिभावविवर्जनात्स्पृष्ट समागमकारणानुसन्धानादौ निरुद्यममित्यर्थ। आसीदिति शेष। अपिच किञ्च विप्रियवशात निष्कारणपरित्यागरूपस्य शोकस्य हेतो कलुष क्रोधाविष्ट क्षुभित मिति यावत आसीदिति शेष। तत दीर्घे निरवधौ अस्मिन् वियोगे विरहदशायां झटिति द्राक् घटनेन घटनया वा सहसोपपन्नेन पुन सन्दर्शनेनेत्यर्थ। उत्तम्भित इव विस्मयात स्तिमितं निश्चलमिव अंकुशमित्यर्थ। अनन्तकालव्यापिविरहदशामध्ये अकस्मात राममुखावलोकनेन सीताया अन्त करणं किंकर्त्तव्यविवेकहीनमिव जातमिति भाव। तथा सौजन्यात् अकार परित्यागिनोऽपि भर्त्त वं हसूचकसम्बोधनादिना 'हा प्रिये जानकी' त्यादिना विप्रह हेतो तथापि हृदय प्रसन्न अपगतकालुष्य सत् सम्पृष्ट जात, तथा दयितकरुणे प्रि

राम । देवि !

प्रसाद इव मूर्त्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति * मां त्वं पुनः क्वासि नन्दिनि ॥ १४ ॥

[(१४) स्नेहार्द्रशीतलः ते स्पर्शः मूर्त्तः प्रसाद इव अद्यापि मां आनन्दयति, हे नन्दिनि ! त्वं पुनः क्वासि ? इत्यन्वयः ।]

सीता । पदे कवु दे अगाधदंसिदसिणेहसंभारा आणंदणिस्सन्दिणो

प्रकाशकविलापादिना गाढकरुणा गाढा निविडा करुणा दया समवेदनेत्यर्थः यस्य तत् प्रबलया पश्चात् स्वप्रहाणेच्छया तत्र (वित्त) स्पृष्टमित्यर्थः । तया जायमानैर्विविधैर्भावैः स्पृष्टं तव हृदयं अस्मिन् नग इदानीं प्रेम्णा स्नेहेन अर्णवे गाढानुरागेण द्रवीभूतं अनुरागप्रवाहरूपं गलितमिव । अत्र तटस्थ नै राग्यादित्यनेन नान्यत्र चिरपरिचिताम्यरण्यानीति वाक्ये सीताया अवस्था प्रतिपादिता । तथा कलुष विप्रियत्वादित्यनेन असदृश स्वस्वमुख्य इत्यादिवाक्याभिमतावस्था प्रतिपादिता । वियोग दीर्घ इ स्मन् इत्यनेन कथं प्रभातचन्द्रमण्डलत्यादिविवक्षितावस्था प्रतिपादिता कथमित्यस्य विस्मयार्थकत्वात् प्रसन्न सौजन्यादित्यनेन अथवा किमिति वज्रमयी-त्याद प्रतिपादितावस्था दर्शिता तथा दयितकरुणगाढकरुणमित्यनेन हा धिक् इदं मां मन्दभागिनी व्याहरतीत्यादिवाक्याववक्षितावस्था प्रतिपादिता । द्रवीभूत प्रेम्णेत्यनेन उत्सुक गति उत्कण्ठित स्थितमित्याद वाक्यप्रतिपादितावस्थोक्ता । अत्र हृदये घटमानभिन्नत्वस्य द्रवीभूतत्वस्य च सम्भावनाया इवशब्देन प्रतिपादनात् भावाभिमानि वाच्य क्रियोत्प्रेक्षा आश्रयम् । कलुषत्वप्रसन्नत्वादीनां विरुद्धानां वस्तूनामेकत्रवर्णनात् विप्रलम्भवैचित्र्याय विरोधस्यावभासनात् विरोधाभासश्च । करुणे गाढकरुणत्वस्य पदार्थस्य हृदयस्य द्रवीभूतत्वं प्रति हेतुत्वोपगमात् काव्यलिङ्गमनिर्मीतप्रेक्षोज्जीवकम् शिखरिणी नाम वृत्तम् ।

(१४) प्रसाद इति हृदं व सीते । स्नेहार्द्रशीतलः स्नेहेन प्रेम्णा आर्द्रः क्लिन्नः अत एव शीतलः तापशान्तिकरः ते तव स्पर्शः मूर्त्तः शरीरी प्रसादः अनुग्रह इव अद्यापि न केवलं स्पर्शक्षणे स्पर्शाभावदशायामपीत्यपेरर्थः । मां आनन्दयति प्रीणयति । पुनः किन्तु हे नन्दिनि ! आनन्दविधायिनि ! त्वं क्व कस्मिन् स्थाने असि वर्त्तसे । तवायमनुग्रहः स्पर्शरूपेणानुभूयते त्वन्तु मया न दृश्यसे । अत्र प्रसाद इव मूर्त्त इति गुणोत्प्रेक्षा, सा च भावाभिमानिनी, तथा शीतलत्वं प्रति स्नेहार्द्रपदार्थस्य हेतुत्वेन निरूपणात् पदार्थहेतुकं काव्यलिङ्गं, स्पर्शरूपाधारा-भावेऽपि आनन्दनक्रियारूपाधेयसम्भवात् विशेषालङ्कारश्चेति मतम्, तदेतेषामङ्गाङ्गिभावेन सङ्करः ।

* "अद्यापि वाह्लयति मां" इति विद्यासागरधृत पाठः ।

सुदा मए अज्जउत्तस्स उल्लावा, जाणं पच्चएण णिक्कारणपरिच्चाअसल्लि-दोवि बहुमदो मे जम्मलाहो। (ञ)

[(ञ) एते खलु ते अगाधदर्शितस्नेहसम्भारा आनन्दनिष्यन्दिन श्रुता मया आर्यपुत्रस्य उल्लापा, येषा प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो, मे जन्मलाभ। इति समम्]।

राम.। **अथवा कुत: प्रियतमा ? नूनं सङ्कल्पाभ्यासपाटवोपादान * एष रामस्य भ्रम:।** (ट

(नेपथ्ये) **प्रमाद: प्रमाद:।** (सीतादेव्या श्वशुरकुलितरित्यर्द्ध पठ्यते)। (ठ)

राम (सकरुणौत्सुक्यम्।) **किं तस्य वत्सस्य ?** (ड)

(ञ) एते इति। स्नेहस्य अनुरागस्य सम्भार अतिशय अगाध अप्रमेय यथा स्यात्तथा दर्शित प्रकटित स्नेहसम्भार येषु ते तथोक्ता आनन्दनिष्यन्दिन सुखस्राविण आर्य पुत्रस्य रामस्य उल्लापा उच्चैर्विलापवाक्यानि, मया श्रुता इत्यन्वय। येषां उल्लापाना प्रत्ययेन विश्वासेन सर्वदैव ते श्रुतिमधुरा आर्यपुत्रस्योल्लापा इति विश्वासेन शल्य सञ्जातमस्य इति शल्यित शल्यितम्। निष्कारणेन अनिमित्तेन य परित्याग वर्जन तेन शल्यित स तथोक्त जन्मलाभ मम जीवन बहुमत श्लाघ्यतया मन्यते दूषित क्लेशबहुलमपि जीवित आहृत, न त्यक्तु शक्यते इति भाव।

(ट) अथवेति। कठोरगर्भाया सीताया श्वापदसङ्कुल गभीरारण्य निर्वासनात् सन्दिग्धजीविताया नाप्यत्रागमनसम्भावनेति विवेकादयाह—अथवेति। सङ्कल्पस्य सीता विषयकमनोव्यापारस्य "सीता एव सखीति एवमत्रास्ति" इत्यादिरूपस्य मनोवृत्तेरित्यर्थ। "सङ्कल्प कर्म मानस"मित्यमर। अभ्यासेन पुन पुनरावर्त्तनेन यत् पाटव नैपुण्य 'सा मे प्रियात्रास्ति एवमेवं वदतीत्या'दिधारणाया पटुत्व तदेव उपादान कारण यस्य स तथोक्त भ्रम भ्रान्ति जायते। पुन पुन सीताविषयकचिन्ताया परिशीलनेन एवंविध भ्रम अनायासेन समुत्पन्न इत्यर्थ। सीतागोचरचिन्ताया सातत्यात् सर्वत्र तामेव पश्यामि तदालापमेव शृणोमीति भाव।

(ठ) नेपथ्य इति। प्रमाद इत्यस्यार्थ प्रागवर्णित पठ्यते वासन्त्या इति शेष।

(ड) सकरुण इति। उत्सुकस्य भाव औत्सुक्य करुणौत्सुक्याभ्या सहितं यथा तथा आहेति शेष। किं तस्येति। तस्य करिशावकस्य कि किमनिष्ट म

---

* पाटवोत्पाद इति क्वचित्।

(पुनर्नेपथ्ये) ('वत्सा साईं मित्यूत्तराईं पठति ।)

सीता । को दाणीं अहिउज्जिस्सदि ? (ढ)

[(ढ) क इदानीमभियाज्यते ? इति सम]

राम । क्वासौ दुरात्मा यः प्रियायाः पुत्रकं वधूद्वितीयमभिभवति ?

(इति उत्तिष्ठति) (ण)

(प्रविश्य) सम्भ्रान्ता वासन्ती । कथं देवो रघुनन्दनः । (त)

सीता । कहं पिअसही मे वासन्ती । (थ)

[(थ) कथं प्रियसखी मे वासन्ती ! इति सम]

वासन्ती जयति जयति देवः ।

राम [निरूप्य कथं देव्याः प्रियसखी वासन्ती । (द)

वासन्ती । देव । त्वर्य्यतां त्वर्य्यताम्, इतो जटायुगिरिशिखरस्य*

(ढ) इदानीं मि सहायतया वनवाससमये को जन अभियोक्यते निर्योक्यते मतपुत्रक-करिशावकस्य साहाय्यसम्पादनाय प्रयत्न मयेति भाव अहो मम प्रियप्राणितस्य तस्य रक्षार्थं कमपि प्रेषयितुं न शक्नोमीति महत कष्टमिति भाव ।

(ण) क्वासाविति असौ दुरात्मा क कुत्र वर्त्तत इति शेष वधूद्वितीय वधू भार्य्या काचित् करिणी द्वितीया ययो पूरणी सहचारिणी न यावत यस्य त, वत्सा साईं मित्यन्तर्निर्णीत यावत् य प्रियाया सीताया पुत्रक पुत्रनिर्विशेषेण प्रतिपालित अभिभवति आक्रामति । तमह गत्वा व्यापादयामीत्यर्थ इति एवमुक्त्वा उत्तिष्ठति तत्साहाय्यार्थमिति शेष ।

(त) सम्भ्रान्तेति । सम्भ्रान्ता प्रियसख्या सीताया पुत्रकस्य करिशावकस्य साहाय्यका भावेन उद्विग्नचित्ता वासन्ती प्रविश्य रङ्गभूमिमिति शेष । कथमिति विस्मयद्योतकमव्ययम् । देव राजा रघुनन्दन कथमत्रागच्छति इति आश्चर्यम् ।

(थ) कथमित्यादि । अत्रापि कथमित्यस्यार्थ पूर्व्ववत । अहो मे मम प्रियसखी वनवाससहचरी वासन्त्यपि अत्र वर्त्तत इत्याश्चर्य्यमित्यर्थ ।

(द) निरूप्येति । निरूप्य दृष्ट्वा राम वासन्तीयमिति निश्चित्य आहेति शेष । कथमित्यादि वाक्य कथ्य

(ध) त्वरेति त्वर्य्यता सत्वर गम्यताम् । त्वरतेर्भावे लोट् सम्भ्रमे द्विर्वचनम् । तत्र

---

*जटायुशिखरदिग्भागेन' इति विद्यासागरधृत पाठ

दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य्य सम्भावयतु देव्याः पुत्रकं देवः । (ध)

सीता । हा ताद जटाऊ ! सुण्णं तुए विणा जणट्ठाणं । (न)

[(न) हा तात जटायो ! शून्यं त्वया विना जनस्थानम् । इति छाया]

राम । अहह ! हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः । (प)

वासन्ती । इत इतो देवः ।

सीता । भअवदि ! सच्चं एव्व वणदेवदावि मं ण पेक्खदि । (फ)

[(फ) भगवति ! सत्यमेव वनदेवतापि मां न प्रेक्षते ' इति छाया]

गमने हेतुमाह—इत इति । इत अस्मात् प्रदेशात् जटायुगिरिशिखरस्य जटायुना तदभिधानेन खगराजेन अध्युषितपूर्व्वं यद्गिरिः पर्व्वतस्य शिखरं शृङ्गं तस्य दक्षिणेन दक्षिणदिग्वर्त्तिना सीतातीर्थेन सीताया तीर्थं जलावतार इति सीतातीर्थं "तीर्थं योनौ जलावतारे" चेति हलायुधः । येन जलावतारेण सीतादेवी गोदावरीमवगाहते स्म, स सीतातीर्थमिति प्रसिद्धि गतः । तेन सीताया अवतरणस्थानेन । गोदावरीं तदभिधानां नदीं अवतीर्य्य अवरुह्य गोदावरीजलप्रदेशं गत्वा इत्यर्थः देव्याः सीतायाः पुत्रकं कृत्रिमपुत्रं तं करिपोतं देवः राजा भवान् । "राजा भट्टारको देव" इत्यमरः । सम्भावयतु साहाय्यदानेनानुगृह्णातु इत्यर्थः ।

(न) हा ताद इति । श्वशुरबन्धुत्वेन प्रयुज्यत्वात् जटायुषः स तात इति सीतया सम्बोध्यते । "पूज्ये पितरि वत्से च तातशब्दः प्रयुज्यते ।" अद्य त्वया विना तद्विरहित जनस्थानमिदं शून्यं रिक्तमिव प्रतिभाति ।

(प) अहहेति । अहहेति शोकसूचकमव्ययम् । एते कथोद्घाताः कथानां 'जटायुगिरिशिखरस्ये'त्यादिना पदानां उद्घाताः उपन्यासाः उच्चारणानीति यावत् । हृदयमर्म्मच्छिदः हृदयस्य मर्म्माणि जीवस्थानानि छिन्दन्तीति तथोक्ताः मर्म्मविदारकाः । जटायुगिरिशिखरं, गोदावरी सीतातीर्थं सीतापालितकरिपोतः इत्येतेषां नामश्रवणात् सीतायाः पितृसखस्य जटायुषो अकुण्ठपराक्रमस्य तस्य अपि रावणेनापहरणं इत्यादि वस्तुनः स्मृतावाविर्भावात् शोकोदयात् कथोद्घातानां मर्म्मच्छेदकत्वमिति भावः ।

(फ) भगवतीति । न केवलं मनुष्याः वनदेवता अपि इत्यपेरर्थः । समीपस्थो रामः, समीपोपस्थिता वनदेवता वासन्ती च कथं आत्मानं नैव पश्यतीति परिज्ञाय विस्मिता सीता तमसां पृष्टवती—भगवतीति ।

तमसा। अयि वत्से! सर्वदेवताभ्यः प्रकृष्टमैश्वर्यं भागीरथीदेव्याः * तत् किमाशङ्कसे? (ब)

सीता। तदो अणुसरह्म। (भ) [इति परिक्रामतः]

[(भ) ततोऽनुसराव इति सम्]

राम। [परिक्रम्य] भगवति गोदावरि! नमस्ते। (म)

वासन्ती। [निरूप्य] देव, देव! मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण। (य)

राम। विजयतामायुष्मान्। (र)

(ब) अयीति। भागीरथीदेव्या गङ्गायाः सर्व्वदेवताभ्यः सर्व्वेभ्यः देवेभ्यः सर्वाभ्यः देवीभ्यश्च ऐश्वर्यं अणिमादिशक्तिः प्रभाव इति यावत्। प्रकृष्टं उत्कृष्टं समधिकमित्यर्थः, वर्त्तत इति शेषः। तत् तस्मात् त्वं किं कथं आशङ्कसे अन्यो मां पश्यतीति भयाकुला भवसि। उत्कृष्टैश्वर्य्यशालिन्या भागीरथ्या वाक्ये सन्देहो न कर्त्तव्यः, विश्वासमेव विधेहि, न खलु कस्यापि दर्शनाशङ्केति भावः। ऐश्वर्य्यन्तु—'अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वञ्च वशित्वञ्च तथा कामावसायिते'ति। अत्र प्रस्तुतोत्कर्षाभिधानरूपोदाहृतिरुक्ता।

(भ) तदिति। तत् तस्मात् गङ्गावरस्य निःसन्देहादन्यादर्शनीयत्वात्। अनुसराव आवां रामवासन्त्यौ अनु पश्चात् गच्छाव। इति एवमुक्त्वा परिक्रामतः, सीता तमसा इति च शेषः।

(म) परिक्रम्येति। परिक्रम्य गोदावरीसमीपं गत्वा इत्यर्थः। गां जलं ददातीति गोदा नदी तासु वरी श्रेष्ठा इति गोदावरी स्वार्थेऽण् स्त्रियामीप्, तस्याः सम्बोधने गोदावरि इति। "स्वर्गेषु पशुवाग्वज्र दिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं चिह्न-शेफसोः" इत्यमरः।

(य) निरूप्येति। निरूप्य स्थिरीकृत्य देव देव इति हर्षे द्विरुक्तिः, "विषादे-विस्मये हर्षे खिन्नेऽवधारणे द्व्युक्ती"ति कोषः। विजयिना जयशीलेन तेन वारणजयकारिणा वधूद्वितीयेन पत्नीसहचरेण देव्याः सीतायाः पुत्रकेण करिशावकेन मोदस्व हृष्य आनन्दमनुभव इत्यर्थः।

(र) विजयतामिति। आयुष्मान् आयुर्विद्यतेऽस्य इति प्रशंसायां मतुप्। प्रशस्त

* "मन्दाकिनीदेव्याः" इति पाठभेदः।

सीता । अम्महे ईदिसो एसो संवुत्तो ! (ल)

(ल) अहो ईदृश एष संवृत्त । इति सम ।

राम । देवि । दिष्ट्या वर्द्धसे । (व)

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण

व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णपूरात् । *

सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता

यत् कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ १५ ॥

[(१५) अयि सुतनु ! उद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण यन ते कर्णपूरात् लवली पल्लवः व्याकृष्टः, स अयं तव पुत्रः मदमुचां वारणानां विजेता तरुणे वयसि यत् कल्याणं तस्य भाजनं जातः, इत्यन्वयः ।]

---

* जीवित देव्याः पुत्रक एव विजयतां मत्सदृशविजयी भवतु विजयतामिति विपत्याख्या जि' विन्यासमिदम् ।

(ल) अम्महे इति इदृश अलग्नालौन्यथ एव कविज्ञायक

(व) दिष्ट्येति तृतीयान्तमव्ययं आनन्दसूचकमेतत् दिष्ट्या भाग्येन वर्द्धसे वृद्धिं गतासि, विजयिपुत्रसम्पत्त्या त्वं समृद्धिमापन्नासीत्यर्थः अनाचरीभूतामपि जानकीं लक्षी-कृत्य राम एतत् इत्यादिवाक्यं उक्तवान्

(१५) कथमसौ सीता वर्द्धते तत् हेतुमुपन्यस्यति येनोद्गच्छत इत्यादि अयि सुतनु शोभना तनुः शरीरं यस्याः सा सुतनुः तस्याः सम्बोधनं सहीलातं इत्थं । "स्त्रिया मूर्त्तिस्तनुस्तनू" इत्यमरोक्तेर्ह्रीणार्थेऽपि तनुशब्दो दृश्यते इह शोभनाङ्गि उद्गच्छ विसकिसलयस्निग्धदन्ताङ्कुरेण उद्गच्छन्तौ आविर्भवन्तौ बिसस्य मृणालस्य यानि किसलयानि पल्लवानि तद्वत् स्निग्धौ मसृणौ दन्ताङ्कुरौ दन्ताग्रभागौ यस्य स तेन इत्थंभूतेन बालाङ्कुरेणोन्मल-प्रदाददानप्रयोर्येण येन करिकलभकेन ते तव कर्णपूरात् कर्णाभरणात् लवलीपल्लव लवलीलताविशेष तस्याः पल्लवः किसलयः कर्णाभरणीकृत लवलीपल्लवमित्यर्थ अवयवावयवि भावसम्बन्धः अपादानत्वाविवक्षाद् व्याकृष्ट नीत्वान गृहीत्वा मुखाग्रेण भक्षणाय गृहीत सः पूर्वपरिचितः अयं समीपवर्त्ती करिशावक तव पुत्र कृतकपुत्र । मदमुचां मद दानवारि मुञ्चन्तीति मदमुचः क्विप्, तेषां मदस्राविणां वारणानां मातङ्गानां दुर्जयाना-मिति भाव । विजेता अभिभविता जात इति शेष । अतरुणे वयसि यौवने काले यत्

---

* "कर्णमूलात्" इति पाठ क्वचित् ।

सीता । अविउत्तो दाणीं अय्यं दीहाउ इमाए सोम्मदंसणाए होदु । (ञ)

[(ञ) अवियुक्त इदानीमय दीर्घायुरनया सौम्यदर्शनया भवतु । इति सम्]

राम । सखि वासन्ति । पश्य पश्य कान्तानुवृत्तिचातुर्य्यमपि अनुशिक्षितं वत्सेन । (ट)

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत् * पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत् स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ १६ ॥

(१६) यत् स्नेहात लीलोत्खात मृणालक ण्डकवलच्छेदेषु पुष्यत्पुष्करवासितस्य पयसः गण्डूषसंक्रान्तयः सम्पादिताः, शीकरिणा करेण सेकः कामं विहितः, विरामे पुनः अनराल नालनलिनीपत्रातपत्रं धृतम् । इत्यन्वयः

कल्याणं मङ्गलमालितया अवुजयकरणात अजाय मङ्गलं प्राथितमा लब्धया प्रार्थनीयलेन अक्लिकल वम् यत वलयालिङ्गस्वरूप मङ्गलमिति भाव । तस्य तादृशस्य कल्याणस्य भाजनं पात्रं जात सदृश । मङ्गलमालोलुय्य सर्व्वथा अभिनन्दनीय इत्यर्थ । अत्र सकलकल्याणार्थेति समासगता उपमा चतुर्थपादार्थ प्रति तृतीयपादार्थस्य हेतुत्वप्रत्ययात् वाक्यार्थहेतुक काव्य-लिङ्गालङ्कार द्वितीयपादे पशुस्वभाववर्णनात् स्वभावोक्तिश्च वृत्त मन्दाक्रान्ता नाम ।

(ञ) अवियुक्त इति । अय दीर्घायु दीर्घं दीर्घकालस्थायि आयुर्जीवनकालो यस्य स अय पुरोवर्त्ती मम पुत्रक अनया दृश्यमानया सौम्यदर्शनया सौम्य मधुर दर्शनं यस्या, तथाभूतया सुन्दरदेहया निजदयितया अवियुक्त अविरहित चिर मिलित इति यावद्भवतु । आशीर्व्वादान्तरमुक्त्वा सीताया निजकृताशीर्व्वादेन सुतरा वियोगवेदना परिव्यक्ता, सर्व्व-सुखापेक्षया मिलनसुखस्यैव तद्वचसा समुत्कर्षप्रत्ययात ।

(ट) सखीति । कान्तानुवृत्ति चातुर्य्य कान्तादा पत्न्या अनुवृत्तिश्छन्दानुवर्त्तनम् तस्मिन् विषये यत चातुर्य्य नैपुण्य ेदपपि वत्सेन सीताया कृतकपुत्रक तदपि अनुशिक्षित मधिगतमित्यर्थ अनयो करिदम्पत्यो क्रीडावलोकनेन सीताविरहितस्य रामस्य मनसि महत्कष्टमासिदिति बोध्यम् । पश्य पश्येति हर्षे विस्मये वा द्विरुक्ति ।

(१६) लीलेति । कान्तानुवृत्तिचातुर्य्यमेव विवृणोति—लीलेति । यत् यस्मात्

* "पुष्यत्पुष्कर" इति पाठान्तरम् ।

सीता । **भअवदि तमसे ! अम्हं दाव ईदिसो जादो, दे उण ण आणामि कुसलवा एत्तिएण कालेण कीदिसा विअ होन्ति । (स)**

[(स) भगवति तमसे ! अस्य तावदीदृशो जात, तौ पुनर्न जानामि कुशलवौ एतावता कालेन कीदृशौ इव भवत । इति सम

उद्दात् प्रिया प्रत्यनुरागातिशयाद्ध तौ । उद्दात इति परत्रापि वाक्य योज्यम् । लीलोत्खात मृणालकाण्डकवलच्छेदेषु लीलया विलासेन अवहेलया वा उत्खाता उन्मूलिता इति यावत्, ये मृणालाना बिसाना काण्डा नालान एव कवला ग्रासा "ग्रासस्तु कवल पुमान" इत्यमर । तेषा छेदेषु खण्डेषु अवसानेषु सतषु इत्यर्थ मृणालनालकवलदानादनन्तरमित्यर्थ । यद्वा मृणालकाण्डकवलाना छेदेषु खण्डेषु भक्षणाय प्रियायै दत्तेषु इत्यर्थ । पुष्यन्ति विकसि-तानि यानि पुष्कराणि पद्मानि "पुष्कर खेऽम्बुपद्मयो" रिति मेदिनी । तै वासितस्य सुगन्धीकृतस्य पयस. जलस्य गण्डूषसङ्क्रान्तय गण्डूषस्य य वता परिमाणेन मुखपूरणा भवेत तत्परिमाणस्येत्यर्थ । "गण्डूषो मुखपूरण" मिति हलायुध । सङ्क्रान्तय सञ्चारा जलसञ्चारिणगण्डूषकं क्रमणानीत्यर्थ । सम्पादिता कृता अथवा पुष्यति उपचयवति पुष्कर गण्डादे 'पुष्कर करिहस्ताग्रवाद्यभाण्डमुखेषु च'ति विश्व: । वासितस्य सम्भ्रातवासस्य पयस गण्डूषसङ्क्रान्तय, लीलोत्खातमृणालग्रासे निज-मुखपूर्ण जल विकीर्णमिति तात्पर्य्यार्थ । एव शीकरिणा शीकरा जलकणा विद्यन्ते यस्मिन तेन "शीकरोऽम्बुकणा स्मृता" इत्यमर । जलबिन्दुवर्षिणा इत्यर्थ, करेण शुण्डेन सीक करिणा शरीरशैत्यसम्पादनार्थं जलनिषेप काम पर्याप्त यथा तथा विहित सम्पादित कृत इति यावत । एतेन धारायन्त्रविमुक्तजलकणस्नानसमाधिर्व्यज्यते । विरामे सेकावसाने जलातिवर्षणेन प्रिया-सन्तापमुपशमय्य इत्यर्थ । पुन भूयोऽपि सौरकरतापत्राणाय अनरालनालनलिनीपत्रातपत्रम् अनरालम् अवक्र सरलमिति यावत, नाल दण्डो यस्य एत तथोक्त अनुदक यत नलिनीपत्र पद्मपलाश तदेव आतपत्र छत्र धृत करिणीमस्तकोपरि विततम् एतदेव प्रियाचित्तानुवर्तन विधानं पुष्कमिति बोध्यम् । अत्र यथायथवस्तुवर्णनात स्वभावोक्तिरलङ्कार "स्वभावोक्तिरसौ चारुयथावत् वस्तु वर्णनं" इति लक्षणात् । नलिनीदलातपत्रमिति निरङ्गरूपकञ्च, सदनयो सङ्कर: । मध्यालङ्कारौ तु छेकानुप्रासवृत्त्यनुप्रासौ । अत्र प्रकृतवस्तुन तिर्य्यग्गतत्व वसन्ततिलकम् । शार्दूलविक्रीडित छन्दम् ।

(स) भगवतीति । अस्य एष मे कनकपुत्र करिपोत ईदृशो जात यौवनोचित बलवत्वादिसकलगुणसम्पन्न । एत एतावता इयता कालेन शकुन्तादिलाभ इतो वा

तमसा यादृशोऽयं तादृशौ तावपि । (छ)

सीता ईदिसी अहं मन्दभाइणी जाए ण केवलं णिरन्तरं अज्जउत्तविरहो पुत्तविरहोवि । (च)

[(च) ईदृशी अहं मन्दभागिनी, यस्या न केवलं निरन्तरमार्य्यपुत्रविरहः पुत्रविरहोऽपि ।]

तमसा । भवितव्यता इयमीदृशी । (क)

सीता । किंवा मए पसूदाए, जेण तादिसं पि मम पुत्तकाणं ईसिविरलकोमलधवलदसणुज्जलकवोलं अणुबद्धमुद्धकाअलिविहसिदं णिबद्धकाअसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिदं अज्जउत्तेण । (ख)

[(ख) किं वा मया प्रसूतया येन तादृशमपि मम पुत्रयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धकाकशिखण्डकममलमुखपुण्डरीकयुगलं न परिचुम्बितमार्य्यपुत्रेण । इति सम् ।]

तौ मद्गर्भजौ कुशलवौ कीदृशौ जातौ कालोचितसौम्याकारत्वबलशालित्वादिगुणविशिष्टौ जातौ नवेति न जाने न वेद्मीत्यर्थः । अत्र न जानामीति वाक्यस्य तौ पुनरिति वाक्यान्तरे प्रवेशात् गर्भितत्वदोषः स च सहविह्वलायाः सीतायाः उक्तित्वाददोष इति ।

(छ) यादृश इति । अयं कनिष्ठावकः यादृशः तौ अपि न कुशलवौ तादृशावेव जातौ यथायं यौवनकालोचितबलशाली जातः तावपि तथैवेति कालधर्मत्वात् न तौ असमानौ इति भावः ।

(च) ईदृशीति अहं ईदृशी एवम्प्रकारा मन्दभागिनी दुरदृष्टशालिनी अस्मीति शेषः । यस्या मम न केवलं निरवधि आर्य्यपुत्रविरहः आर्य्यपुत्रस्य रामस्य विरहः वियोगः, पुत्रविरहोऽपि पुत्रयोः कुशलवयोरपि विरहः प्रसवात् परं तयोरदर्शनात् इत्यर्थः । पतिपुत्रयोः दीर्घकालव्यापकविरहदुःखात् अहं मन्दभागिनी न काचित् मादृशी दुःखशीला जगति वर्त्तत इति भावः ।

(क) भवितव्यतेति ईदृशी त्वया निरन्तरमनुभूयमाना इयं भवितव्यता अवश्यम्भाविता नियतिरित्यर्थः । दुर्भाग्यवशादेव तवायं पतिपुत्रविरहो जातः न त्वन्यस्मात् लौकिककारणान्तरात् अतः नायं शोचनीय इति भावः ।

(ख) किं वेति । प्रसूतया प्रसूतं प्रसवः अस्ति अस्या इति प्रसूता । अर्श आदित्वादच् ; यद्वा अकर्म्मकविवक्षया कर्त्तरि क्तः निष्फलप्रसवकारिण्या मया किं वा फलं जातमिति

तमसा। अस्तु देवताप्रसादात् । (ग)

सीता। भअवदि तमसे' एदिणा अपच्चसंसुमरणेण उस्ससिद-पण्हुदत्थणी ताणं अ पिदुणो सण्णिधाणेण खणमेत्तं संसारिणी म्हि संवुत्ता। (घ)

[(घ) भगवति तमसे। एतेन अपत्यसंस्मरणेन उच्छ्वसितप्रस्नुतस्तनी तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिणी अस्मि संवृत्ता इति सम]

शेष । मयेति गम्यमानक्रियान्तरापेक्षया करणत्वात् तृतीया। यत् ईषद्विरलकोमलधवल-दशनोज्ज्वलकपोलं येन हेतुना ईषत् मनाक् विरला अनतिसंश्लिष्टा कोमलाः सुकुमाराः धवला कुन्दकोरकवत् शुभ्रा य दशना दन्ता तैः उज्ज्वलौ द्योतमानौ कपोलौ गण्डौ यस्य तत् तथोक्तम्। ईषदविरलसुकुमारशुभ्रदन्तद्योतमानगण्डम् अनुबद्धेति, काकली सूक्ष्म कलम् "काकली तु कले सूक्ष्मे" इत्यमरः । ईषत्कलम् इति काकली 'कोरीषदर्थे' इति कादेशः ततः स्त्रियां ङीप्। काकली च विहसितञ्च काकलीविहसिते, अनुबद्धे निरन्तर प्रवृत्ते मुग्धे सुन्दरे काकलीविहसिते यस्मिन् तत् अनुबद्धमुग्धकाकलीविहसितम्। अव्यक्त सूक्ष्ममधुरास्फुटध्वनिसुन्दरस्मितम्। निबद्धकाकशिखण्डकं निबद्धौ धृतौ काकशिखण्डकौ काकपक्षौ 'जुल्फी' ति ख्यातौ येन तत्तथोक्तम्। शिखण्डशब्देनैव इष्टसिद्धौ काकशिखण्डक इत्यत्र काकशब्दस्य निष्प्रयोजनत्वम्। काकपक्ष शिखण्डक इत्यमरः अमलमुखपुण्डरीकयुगलं सुभ्रे पुण्डरीके इव मुखपुण्डरीके तयोर्युगलं निर्मलमुखपद्मद्वयम् आत्मपुत्रयोः पत्या रामेण न परिचुम्बितं पत्युः सुखस्पर्शवत्स्वननलालनपालनादिना सन्तानप्रसवस्य साफल्यं भवति अन्यथा तु मया प्रसूतयोः तदभावात् सन्तानप्रसवः केवलं दुःखहेतुः निरर्थकश्चेति भावः ।

(ग) अस्त्विति। देवताप्रसादात् देवतानां प्रसादात् अनुग्रहात् अस्तु। तव पत्या पुत्रयोः मुखपङ्कजद्वयं परिचुम्बितम् अस्तु भवतु, आशिषि लोट् देवतासन्निधौ एतदङ्कामयी यदचिरात् न पुत्रयोः रामेण सङ्गतः स्यादिति भावः ।

(घ) भगवतीति एतेन अधुनातनेन अपत्यस्मरणेन अपत्ययोः दारकयोः स्मरणेन चिन्तया हेतुना तद्विषयकालापेन इत्यर्थः । उच्छ्वसितप्रस्नुतस्तनी उच्छ्वसितौ दुग्धभारेण स्फीतौ प्रस्नुतौ पयः क्षरन्तौ स्तनौ यस्याः सा तथोक्ता। तया पुत्रयोः पितुः रामचन्द्रस्य सन्निधानेन समीपावस्थानेन हेतुना क्षणमात्रं किञ्चित्कालमात्रमेव संसारिणी गृहस्था अस्मि भवामि पतिपुत्रवत्सलादीनां एकत्रावस्थानमेव गार्हस्थ्य देवात् यथासम्भव तदत मे क्षणकाल जातम् इत्याशयः सीतायाः विषादो व्यज्यते

तमसा। किमत्र उच्यते ? प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य। परञ्चैतदन्योऽन्यसंश्लेषणं पित्रोः। (ङ)

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥ १७ ॥

(१७) [दम्पत्योः अन्तःकरणतत्त्वस्य स्नेहसंश्रयात् अपत्यमिति अयम् एकः आनन्दग्रन्थिः बध्यते ॥ इत्यन्वयः ।]

वासन्ती। इतोऽपि देवः पश्यतु। (च)

(ङ) किमत्रेति। अपत्यसम्मरणेन सीतायाः प्रसृतस्तनत्वमेव समर्थयति—किमत्रो-च्यत इति। अत्र अस्मिन् अपत्यस्नेहविषये किम् उच्यते मयेति शेषः। नास्ति किमपि वक्तव्यं नव्यकाधिक्यं स्वल्पपत्यस्नेह एवैव सर्वेष्वेव भवतीति भावः। "न चापत्यसमः स्नेह" इति वचनात् प्रसवः अपत्यं स्नेहस्य प्रकर्षः पर्यन्तस्थितिर्यावत्। प्रकर्षपर्यन्तः: प्रकर्षस्य उत्कर्षस्य पर्यन्तः चरमसीमा, शेषावधिरित्यर्थः। सर्वं वाक्यमितिसूत्रा-र्थेतन्मतसमर्थनाय न किञ्चिदप्यन्यदस्तीत्यर्थः। परम् अन्यच्च ब्रवीमि एतत् अपत्यमित्यर्थः। पित्रोः: मातापित्रोः अन्योऽन्यसंश्लेषणम् अन्योन्यस्य परस्परस्य संश्लेषणं संयोजकं, पित्रोः दृढबन्-धनमित्यर्थः।

१७। तमसेव विवृणोति—अन्तरिति। दम्पत्योः पतिपत्न्योः अन्तःकरणतत्त्वस्य हृदय-वस्तुनः स्नेहसंश्रयात् स्नेहस्य प्रीतेः संश्रयात् अधिष्ठानात् अन्योऽन्यं प्रति प्रणयसम्बन्धप्रापकत्वात् हेतोः अपत्यमिति सन्तानरूपः अयम् एष एकः अद्वितीयः सकलविलक्षणः आनन्दग्रन्थिः सुख-मर्यादा बध्यते विधात्रेति शेषः। यथा अस्माकं ग्रन्थिमतीत्यतः आम्रफलको बाल इति बोधः तद्वदत्रापि स्नेहसम्बन्धफलकानन्दग्रन्थिरिति। आनन्दग्रन्थिरित्यत्र आनन्दपदेन अन्यान्तर-व्यावृत्तिः। दम्पत्योरनपत्यावस्थायां उभयत्रैव उभयानुरागः निरन्तरं वर्त्तते, किन्तु अपत्यं जाते तु एव समानान्तरेण तत्र विभज्यते अत एव द्वयोरानन्दजनकतापत्यस्य इत्यर्थः, यथा पृथगवस्थितं किमपि मौक्तिकादिकं एकस्य कृत्वा सूत्रेण माल्यं बध्यते, तथा विधात्रा मातापित्रोरन्तःकरणद्वयं एकत्र सन्धाने संयोज्य वा इमतेव दृढं बध्यते इति तात्पर्यः।

अत्रापत्ये आनन्दग्रन्थित्वारोपस्य प्रकृतस्नेहाधिक्यप्रतिपादनोपयोगित्वेन परिणमनात् परि-णामालङ्कारः। "विषय्यात्मतयारोप्ये प्रकृतार्थोपयोगिनि। परिणामो भवेत्तुल्या तुल्याधि-करणो द्विधे"ति विश्वनाथः।

(च)। इत इति। इतोऽपि दिशि देवः महाराजः रामः पश्यतु अवलोकयति-नव्यामानन्दसौकामावाक्यार्थं कर्म।

करतलमृदुताण्डवोत्सवान्ते
स्वयमचिरोद्गतमुग्धलोलबर्हः । *
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

(१८) [अचिरोद्गतमुग्धलोलबर्हः कदम्बे उच्छिखः मणिमुकुट इव वधूसखः स एष शिखण्डी करतलमृदुताण्डवोत्सवान्ते स्वयं नदति ॥ इत्यन्वयः ।]

सीता। (सकौतुकावेगम्) एसो सो । (क)

(क) [एष स इति मम ।]

(१८) करतलेति । अचिरोद्गतमुग्धलोलबर्हः अचिरम् उद्गतानि यौवनारम्भात् नवीनपत्राणि मुग्धानि मनोहराणि लोलानि चञ्चलानि बर्हाणि पिच्छानि यस्य स तथोक्तः । "लोलश्चञ्चलतृष्णयोः ।" "पिच्छबर्हे नपुंसके" इति चामरः । उच्छिखः उद्गता शिखा चूडा यस्य स तथोक्तः । अत एव मणिमुकुट इव मणिमयः मुकुट शाकपार्थिवादित्वान्मध्यपदलोपी समासः । चन्द्रकावलिरञ्जितशिखाविशिष्टत्वात् पद्मरागमणिनिर्मितमुकुटधारीव । अथवा उच्छिखः उद्गतप्रभापटलः यः मणिमुकुटः स इव प्रतीयमानः । सः सीतया पूर्वं वर्धितः एषः अयं पुरोवर्ती शिखण्डी कलापी मयूर इति यावत् । वधूसखः वध्वाः सखा इति "राजाहःसखिभ्यष्टच्" इति समासान्तष्टच् आगामिवाक्ये । करतलमृदुताण्डवोत्सवान्ते करतलेन अतिमृदुना मर्दनेन तालवादनेन यः ताण्डवोत्सवः नृत्योत्सवः तदन्ते "ताण्डवं नटनं नाट्यं लास्यं नृत्यञ्च नर्तने" इत्यमरः । तण्डुना 'गवाम्नरेण प्रोक्तं इति तण्डुमुनिप्रोक्तं' ताण्डवम् । तस्य अन्तं अवसाने नृत्योत्सवसमाप्य इत्यर्थः । कदम्बे नीपवृक्षे स्थित्वा आत्मना न तु अन्यप्रेरणया नदति विरौति । मयूरो नु न रौति इति स्वयंपदेन बोध्यमिति कश्चित् । अत्र उच्छिखस्य शिखण्डिनः मणिमुकुटत्वसम्भावनया उत्प्रेक्षालङ्कारः । उच्छिख-चन्द्रकः मणिमुकुट इव सः शिखण्डी इति व्याख्याने तूपमैव, मेचकादिभिरीषज्ज्वलद्धर्म-साम्यात् शिखण्डिनः मणिमुकुटसादृश्यप्रतीतिरिति बोध्यम् । नदतिशब्दस्य श्रुतिप्रसिद्धत्वात् अत्र हरिणशावकादावपि नदधातुना अन्यार्थे प्रयोज्यत्वात् नियार्थतादोष । न च समधिक इति पाठेन निरसनीयः । वृत्तं पुष्पिताग्रा—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रे"ति लक्षणात् ।

(क) एष इति । सः मया पोषितपूर्वः एष मयूर इत्यर्थः । हर्षोक्तिरियम् ।

---

* "अनुदिवसमवर्धयत् प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हम् ।" इति पाठान्तरम्

राम। मोदस्व वत्स। मोदस्व। वयमद्य वर्त्तामहे। (ञ)

सीता। एव्वं भोदु। (झ)

[(झ) एवं भवतु इति सम।]

राम। भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ १८ ॥

(१८) [भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः प्रचलितचतुरभ्रूताण्डवैः मण्डयन्त्या मुग्धया। करकिसलयतालैः सुतमिव नर्त्यमानं त्वां वत्सलेन मनसा स्मरामि। इत्यन्वयः]

(ञ) मोदस्वेति। मोदस्व आनन्दं कुरु यथेच्छं विहर इत्यर्थः। आमोदे हेतुमाह—वयमिति। यतः वयम् अद्य वर्त्तामहे तव सन्निधौ तिष्ठामः प्रियजनसन्निधाने एव आमोदावसरः अतो निर्भयं मोदस्वेति भावः।

(झ) एवमिति। एवं त्वामोक्तप्रकारं भवतु अयं नृत्यतु इत्यर्थः।

(१८) भ्रमिष्विति। भ्रमिषु मयूरस्य वर्त्तुलं क्रमेण मण्डलाकारभ्रमणेषु चक्रवत्सञ्चरणेषु आरब्धेषु सत्सु इत्यर्थः। कृतपुटान्तर्मण्डलावृत्ति कृता विहिता पुटयोः नेत्रावरणचर्म्मणोः अन्तः मध्ये मण्डलेन मण्डलाकारेण आवृत्तिः आवर्त्तनं वर्त्तुलाकारभ्रमणमिति यावत्। मयूरस्य मण्डलाकारसञ्चरणानुसारादिति भावः, यत् तत्तथोक्तं, रचितावरणमध्यमण्डलभ्रमणं चक्षुः नेत्रं प्रचलितचतुरभ्रूताण्डवैः प्रचालनं तिर्य्यक्सञ्चारितं पश्चादेव ऊर्द्ध्वं च प्रसारिते चतुरे इङ्गितादिकरणनिपुणे च भ्रुवौ तयोः ताण्डवैः नटनैः मण्डयन्त्या अलङ्कुर्वत्या मयूरभ्रमणानुसारेण चक्षुर्विक्षिपन्त्या इत्यर्थः। मुग्धया सुन्दर्य्या नृत्यदर्शनानन्दनिमग्नचित्तया इति यावत्, सीतया करकिसलयतालैः करौ हस्तौ किसलये पल्लवे इव ते करकिसलये तयोः तालैः नृत्यगीताद्यनुबन्धकालक्रियामानं "तालः कालक्रियामानम्" इत्यमरः। पाणितलद्वयाघातजनितध्वनिभिरित्यर्थः, सुतं पुत्रम् इव नर्त्यमानं कारिततालनर्त्तनत्वात् वत्सलेन स्नेहाढ्येन मनसा स्मरामि अहं चिन्तयामि मम प्रियतमापालितपूर्व्वस्य कृतकपुत्रस्य तव दर्शनात् स्मृतिपथमुदितं दृष्टपूर्व्वं नृत्यं इदानीं मे अनुभवाविभवतीति भावः। अत्र पूर्व्वतनताण्डवसहजताण्डवानुभवात् प्राक्तनमयूरताण्डवस्मृतेः स्मरणालङ्कारः, स च मयूरे सुतसाम्यादेः प्रतीतेः उपमासङ्कीर्णः। करकिसलयसामान्यं समासगतत्वात् लुप्तोपमा समासोक्तिश्च। वृत्तं मालिनी नाम।

हन्त तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते ।—(ञ)

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत् ।

सीता । [निरूप्य साश्रम । सुट्ठु पच्चभिञ्जाणिदं अज्जउत्तेण । (ट)

(ट) सुष्ठुप्रत्यभिज्ञातमार्य्यपुत्त्रेण । इति सम

राम । स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

(२) [कतिपयकुसुमोद्गम य कदम्ब प्रियतमया परिवर्द्धित आसीत एष अय गिरिमयूर देव्या (तम्) स्मरति, यत अत्र स्वजन इव प्रमोदम एति इत्यन्वय

(ञ) तिर्य्यञ्चोऽपीति । हन्त इति हर्षसूचकमव्ययम "हन्त हर्षेऽनुकम्पायां वाक्या रम्भविषादयो' रित्यमर तिर्य्यञ्चोऽपि पशव पक्षिणः तेऽपि परिचयं सम्मानं सन्निधानं स्यात् परिचय ' इति यादव पूर्व्वदर्शनादिजन्यज्ञानविशेषमित्यर्थ अनुरुध्यन्त अनुस्मरन्ति । तिर्य्यग्जातीयमयूरोऽप्यय तत्पूर्व्वपरिचयानुरूप स्थान प्रति स्नेहवशात तदतीव चिरमित्यत भाव. ।

(ट) निरूप्येति निरूप्य स एवायं मया परिवर्द्धित कदम्ब इति निश्चित्य तत्कालीना मन्दस्मरणात शोकोदयात साश्रु सबाष्पम आह सुष्ठु आर्य्यपुत्रेण रामेण मम सम्यक प्रत्यभिज्ञात स एवाय कदम्ब इति स्वीकृतमित्यर्थ

२० । मयूरस्य परिचयानुरूपव्यवहार विवृणोति—कतिपयेति कतिपयकुसुमोद्गम कतिपयानि कियन्ति अल्पानि इत्यर्थ । कुसुमानि पुष्पाणि तेषा उद्गम उत्पत्तिर्यस्मिन स तथोक्त । तरुणत्वात् विकसिताल्पकुसुम य कदम्ब तदाख्य वृक्ष प्रियतमया देव्या सीतया परिवर्द्धित जलसेचनादिना वृद्धि प्रापित आसीत एष अयं गिरिमयूर सीताया कृत्रिमापत्यरूप. पार्व्वत्य मयूर अथवा गिरिप्रियो मयूर गिरिमयूर शाक पार्थिवादित्वात् मध्यपदलोपी समास । पुत्रस्नेहेन प्राक् सीतया प्रतिपालित अयं गिरिचर मिव स्त्रीत्यर्थ. । स्मरति त आत्तरामेव । कदम्ब इदानीमपि प्रत्यभिजानाति । यत यस्मा-देतौ. अत्र अस्मिन् कदम्ब स्वजन इव तस्मिन् स्वजन इव प्रमोद आनन्दमेति प्राप्नोति आत्मीयजनदर्शनादिव एतत्कदम्बतरुदर्शनादधिकमानन्दमनुभवतीत्यर्थ सीतया स्वहस्तेन परिपालितत्वादनयोः कदम्बमयूरयो। भ्रातृकल्पतया जाता तत्पूर्व्वपरिचयवशात्या अस्मिन् कदम्ब मयूर. समधिकानन्दमनुभवति, अद्यापि इम परित्याग न च स्थानान्तर जिगमिषति इति भाव । अत्र गिरिमयूरस्य स्वजनवत्प्रमोदरूपेण हेतुना देवीस्मरणानुमानात् स्मरणस्येन्ना [illegible] लक्षीकरणानुमानालङ्कार । एत पुष्पिताग्रा ।

वासन्ती । अत्र तावदासनपरिग्रहं करोतु देवः । (ढ)

एतत्तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयशिलातलं ते ।
अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
माता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

(२१) एतत्तदेव कदलीवनमध्यवर्त्ति कान्तासखस्य ते शयनीयशिलातलम् । यत् अत्र स्थिता माता बहुशः तृणं एभ्यः अदात् ततो हरिणकैः न विमुच्यते स्म ॥ इत्यन्वयः ।]

राम । इदं तावदशक्यमेव द्रष्टुम् । [इति अन्यतो गच्छन्नुपविशति] (ण)

सीता । सहि वासन्दि ! किं तुए किदं अज्जउत्तस्स मम अ एदं दंसअन्तीए । हद्धी ! हद्धी ! सो एव्व अज्जउत्तो तं एव्व पञ्चवटी-वणं, सा एव्व पिअसही वासन्दी ते एव्व विविहविस्सम्भसक्खिणो

—— -

(ढ) अत्रेति तावत् अवधारणे 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः । देव राजा भवानिति शेषः आसनपरिग्रहं उपवेशनमित्यर्थः करोतु अत्रोपविशतु इत्यर्थः

(२१) एतदिति । एतत्तदेव एतत् पुरतो दृश्यमानं तत् पूर्वमध्युषितं । कदलीवनमध्यवर्त्ति कदलीवनस्य रम्भावनस्य मध्यवर्त्ति रम्भावनपरिवेष्टितमित्यर्थः, कान्तासखस्य कान्तायाः सखा इति 'राजाहःसखिभ्यष्टच्' इति टच्, कान्तासखस्य तस्य प्रियासहचरस्य सीतासहितस्येति यावत् । ते तव शयनीयशिलातलं शयनार्थं पाषाणं एतत् इति शेषः । यत् यस्मात् सीता देवी जानकी अत्र अस्मिन् शय्याभूते शिलातले स्थिता उपविष्टा सती एभ्यः हरिणकेभ्यः मृगपोतेभ्यः अल्पार्थे कः बहुशो बहुवारान् तृणं शष्पं अदात् व्यतारीत् ददौ । ततः तस्मात् हेतोः हरिणकैः मृगपोतैः न विमुच्यते स्म एतत् शिलातलं न परित्यक्तम् । अद्यापि ते घासदानलालसया स्थानमेतत् विहाय गन्तुं न शक्नुवन्तीति भावः । वसन्ततिलकं वृत्तम् ।

(ण) । इदमिति । तावत् वाक्यालङ्कारे । इदं शयनीयशिलातलं द्रष्टुं अव-लोकयितुं अशक्यं मया न पारणीयमित्यर्थः । अस्य दर्शनेन तत्कालकृतसीतासहवासजनितलीला-स्मृताविर्भावात् महान् मे शोको जायते इति भावः । इदम् वाक्यं ब्रुवन् अन्यतः अन्य-स्मिन् स्थाने उपविशति राम इति शेषः ।

गोदावरीकाणणुद्देसा, ते एव्व जादणिव्विसेसा मिअपक्खिपादवा, सो एव्व चाहं मम उण मन्दभाइणीए दीसन्तं पि सव्वं एव्व एदं णत्थि, ता ईदिसो जीअलोअस्स परिवत्तो । (ढ)

[(ढ) सखि वासन्ति ! किं त्वया कृतमार्य्यपुत्रस्य मम च एतद्दृश्यमाना हा धिक् हा धिक्, स एव आर्य्यपुत्रः, तत् एव पञ्चवटीवनम् सा एव प्रियसखी वासन्ती त एव विविध विस्रम्भसाक्षिणः गोदावरीकाननोद्देशाः त एव जातनिर्विशेषा मृगपक्षिपादपाः सैव चाहं मम पुनर्मन्दभागिन्या दृश्यमानमपि सर्वमेतत् नास्तीति ईदृशो जीवलोकस्य परिवर्त्तः । इति सम]

वासन्ती । सखि सीते ! कथं न पश्यसि रामस्य अवस्थाम ? (ण)

— — — —

(ढ) सखीति किं त्वया कृत एतत् [illegible] दृश्यमाना त्वया किं कृतं आर्य्यपुत्रस्य का अवस्था कृता, पूर्व्वं कृतकार्य्ये भाग्यवत्या त्वया आर्य्यमत्य्येव आकार्यो कृतो इति भावः । विविध [illegible] गोदावरीकाननोद्देशाः गोदावर्य्याः काननस्य वनस्य उद्देशाः प्रदेशाः [illegible] जातनिर्विशेषाः निर्गतो विशेषः भेदः येषां ते निर्विशेषाः, अभिन्ना इत्यर्थः जाताः पुत्रस्य निर्विशेषाः न तथा [illegible] अपत्य निर्विशेषा इत्यर्थः । मृगपक्षिपादपाः पशुपक्षिवृक्षाः दृश्यमानमपि प्रत्यक्षीभूतमपि एतत् सर्व्वं पञ्चवटीगोदावरीतीरस्थकाननादिकं [illegible] इदानीं एतत् सर्व्वं पश्यन्त्या मम नास्ति पूर्व्वं वत् कोऽपि सम्बन्धः [illegible] मदपि [illegible] प्रतीयते इति भावः । इत्थं निर्व्विण्णा सीता आत्मानं सान्त्वयति — [illegible] एतत् [illegible] इति । ईदृशः एवं प्रकारः जीवलोकस्य [illegible] प्राणिवर्गस्य परिवर्त्तः दशाविपर्य्यासः भवतीति शेषः [illegible] सुखिनः [illegible] दुःखिनोऽपि सन्तः प्राप्नुवन्तीत्यर्थ विधम एव जगति प्राणिनां [illegible] इति भावः । [illegible] सुखसाधनीभूतानां पञ्चवटीप्रभृतीनां [illegible], तथा नास्तीव मास्तीवेति प्रतीयमानानामपि [illegible] एव जीवलोकस्य परिवर्त्तः इत्यनेन पूर्व्ववाक्यस्य समर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः

(ण) सखीति भागीरथीप्रभावाददृश्यां सीतां दृष्ट्वा वासन्ती कथयति [illegible] इति बोध्यम् । हे सीते त्वं यदि रामस्येदृशीं दशां दृष्टवती तदा [illegible] प्रिय वाक्यादिभिः रामं समाश्वासय [illegible] रामस्यावस्था [illegible] पश्यसीत्यर्थः [illegible]

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि ते स्वेच्छाद्दश्यो नवं नवमेव च ।
विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशां प्रिय ॥ २२ ॥

२२ [सततमपि ते स्वेच्छाद्दृश्य य कुवलयदलस्निग्धैः अङ्गैः नवं नवम् एव नयनोत्सवं ददौ विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः कथम् अपि स इति उन्नेतव्यः तथापि दृशां प्रियः ॥ इत्यन्वयः]

सीता पेक्खामि सहि पेक्खामि । (त)

[(त) प्रेक्षे सखि प्रेक्षे इति संस्कृतम्]

तमसा पश्यन्ती प्रिय भूयाः । (थ)

(२२) रामस्यावस्थामेव विशिनष्टि कुवलयेति सततं निरन्तरमपि ते तव स्वेच्छया यथेच्छं दर्शनकामनामात्रेण इत्यर्थः दृश्यः द्रष्टुं शक्यः ननु दुर्लभदर्शनः इति भावः यः रामः कुवलयदलस्निग्धैः कुवलयस्य नीलोत्पलस्य दलानीव स्निग्धानि मसृणानि तैः उपमानानि सामान्यवचनैरिति समासः अङ्गैः शरीरैः नवं नवम् अननुभूतपूर्वं नतु दृष्टपूर्वं नयनोत्सवमित्यर्थः नयनोत्सवं नयनयोः नेत्रयोः उत्सवम् आनन्दं ते ददौ, अधुना स स दृश्यमानः [illegible] प्रतिक्षणं नेत्रविषयतां व्यक्तः स इत्यध्याहार्यम् [illegible] शुचा शोकेन विरहजनितशोकेन विकलकरणः विकलेन्द्रियः [illegible] पाण्डुच्छायः पाण्डुवर्णकान्तिः छाया मूर्तिः [illegible] प्रभातचन्द्रवद्धवलच्छविरित्यर्थः तथा परिदुर्बलः अत्यन्तक्षीणबलः स एव रामचन्द्र इति कथमपि कष्टेनापि उन्नेतव्यः प्रत्यभिज्ञातव्यः अनुमातव्यः तथापि एवं कान्त्याद्यपायेऽपि शोकेन अन्याकारमापन्नोऽपीत्यर्थः । दृशां नेत्राणां प्रियः प्रीतिदायकः । [illegible] सर्वावस्थास्वपि नयनाह्लादकरोऽयमिति भावः । अत्र कथमपि उन्नेतव्यत्वस्य दृशां प्रियत्वरूपकार्यस्य अनुभूतपूर्वसौन्दर्यविरहसौन्दर्याभाव पर्यवसन्नस्य सत्त्वेऽपि दृशां प्रियत्वकार्योत्पत्तिवर्णनात् विभावनाभेद इति निपुणाः । समासोपमालङ्कारश्च । हरिणीवृत्तम्

(त) पेक्खामि इति । प्रेक्षे प्रेक्षे आयुष्मन्तमिति शेषः अवधारणे द्विरुक्तिः । अहं रामं पश्याम्येव इत्यर्थः ।

(थ) पश्यन्तीति । हे पति व्रतम् सीते प्रिय दयित राम पश्यन्ती ईक्षमाणा भूयाः चिरं स्वामिनमवलोकयन्ती स्थेयाः अनेन सह ते पुनर्मिलनं भवत्विति आशीर्वादेन तमसा सीतां सान्त्वयामासेत्यर्थः ।

* पाण्डु सोऽयम्, इति पाठभेदः ।

सीता। हा देव ! एसो मए विणा, अहं वि एदेण विणात्ति सिविणेवि केण सम्भाविद आसी। ता मुहुत्तअं पि जम्मन्तरादो विअ लद्धदंसणा बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तं। (द) (इति पश्यति)

[(द) हा देव, एष मया विना अहम् एतेन विना इति केन सम्भावितम् आसीत्, तत् मुहूर्तकम् अपि जन्मान्तरात् इव लब्धदर्शना बाष्पसलिलान्तरेषु प्रेक्षे तावत् वत्सलम् आर्य्यपुत्रम् ॥ इति छाया]

तमसा (सस्मितं परिष्वज्य) (ध)

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिना ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः ॥ २१ ॥

[२१। आनन्दशोकप्रभवं अतिपूरैः विलुलितं बाष्पं अवसृजन्ती तृष्णया उत्तानदीर्घा स्नेहनिष्यन्दिनी धवलबहलमुग्धा दुग्धकुल्या इव ते दृष्टिः हृदयेशं स्नपयति ॥ इत्यन्वयः ।]

(द) हा देवेति। एष राम मया विना स्वप्नेऽनुभवति अहमपि एतेन रामेण विना दुःखमनुभवामीत्यर्थः । इति एतत् आवयोः परस्परविरहदुःखानुभवनं केन जनेन स्वप्नेऽपि सम्भावितं चिन्तितं न केनापि चिन्तितमासीदित्यर्थः । आवयोः परस्परस्योपरि ऐहिक प्रकृष्ट प्रेम आसीत् न खलु कदापि विरहसम्भवः सर्वैरेव सम्भाव्यते इत्यर्थः अथवा स्वप्ने खलु अलौकिका असम्भाव्या घटना अनुभूयन्ते वियुक्तयोरावयोर्जीवितधारणस्य सम्भावना स्वप्नेऽपि जनानामनुभवपथं नायाता किमुत जागरे इत्यर्थः । तत् तस्मात् इदानीमतिदुर्लभदर्शनत्वात् मुहूर्त्तमपि अल्पकालमपि मम न बहुसमयव्यापक-दर्शनावकाशत्वादिति अल्पकालमपीति भावः। जन्मान्तरादिव अन्यत् जन्म इति जन्मान्तरं तस्मादिव लब्धं प्राप्तं दर्शनं रामस्येति शेषः यया सा तथोक्ता अहं बाष्पसलिलान्तरेषु नयनजलस्य पतनोद्गमयोरवकाशेषु वत्सलं मां प्रति निरतिशयप्रेमशालिनम् आर्य्यपुत्रं रामं प्रेक्षे पश्यामीत्यर्थः । अथवा दर्शनमात्रस्यैव वर्त्तमानत्वादिति भावः जन्मान्तरादिति ल्यब्लोपे कर्मण्यधिकरणे चेति पञ्चमी जन्मान्तरं प्राप्येव इत्यर्थः ।

(ध) सेति। सस्मितं सप्रेमाश्रु यथा स्यात्तथा। पारिभाषिक आलिङ्गनं कपोतीमुनीतीत्यादिना यत्र, बलात्मावगाढ इति नामकम्

वासन्ती।

> ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
> स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
> कलमविरलं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः
> पुनरिदमयं देवो रामः स्वयं वनमागतः॥ २४॥

[२४। मधुश्च्युतः तरवः पुष्पैः फलैश्च अर्घ्यं ददतु, स्फुटितकमलामोदप्रायाः वनानिलाः प्रवान्तु। रत्युत्कण्ठाः शकुन्तयः अविरलं कलं क्वणन्तु। अयं देवो रामः स्वयं पुनः इदं वनम् आगतः। इत्यन्वयः।]

२३। विलुलितमित्यादि। अतिपूरे प्रवले उत्क्रामे प्रवाहैरिति यावत्। विलुलितं विगलितं विकीर्णमित्यर्थः। आनन्दशोकप्रभवं आनन्दात् पतिदर्शनाह्लादात् शोकात् दीर्घकालव्यापकविरहदुःखाच्च प्रभवः उत्पत्तिर्यस्य तम्। यद्वा प्रभवत्यस्मादिति प्रभवः कारणं, आनन्दशोकौ प्रभवौ यस्य तथोक्तं युगपदानन्ददुःखहेतुकमित्यर्थः। वाष्पं अश्रुप्रवाहं अवसृजन्ती पातयन्ती मुञ्चन्तीत्यर्थः। तृष्णाशोत्तानदीर्घा तृष्णया अत्युत्कटदर्शनेच्छया, उत्तानदीर्घा उत्ताना विस्तारिणी स्फीता, दीर्घा दूरं प्रसारिता च सा तथोक्ता। तथा स्नेहनिष्यन्दिनी स्नेहः निष्यन्दते इति णिनिः। प्रेमवर्षिणी प्रणयातिशयप्रकाशिनीत्यर्थः। अथवा स्नेहस्य निष्यन्दः क्षरणं स विद्यते यस्याः सा मत्वर्थीय इनिः। धवलबहलमुग्धा धवलबहला श्वेतप्राया कज्जलानुलेपविरहादत्यन्तधवला मुग्धा मनोहारिणीति धवलबहलमुग्धेति विशेषणसमासः। एवंप्रकारा ते तव दृष्टिः अयं, दुग्धकुल्येव क्षीरस्य कृत्रिमा सरिदिव "कुल्याल्पा कृत्रिमा सरि"दित्यमरः। धावल्यातिशयात् क्षीरपूर्णा कृत्रिमा नदीव श्वेततमेत्यर्थः। इदर्थेश प्राणवल्लभं पतिं रामं स्नपयतीव सिञ्चतीव आर्द्रीकरोतीवेत्यर्थः। आदन्तत्वात् पुगागमे "ग्ला स्नावनुवमां च" इति वैकल्पिको ह्रस्वः। दर्शनौत्सुक्येन विस्फारिता धवलांशुजालं विकिरन्ती प्रेमार्द्रा तव दृष्टिः प्रियं प्रति प्रेरिता तमाप्लावयतीव, अन्ये तव नेत्रात् काऽपि श्वेतप्रभा निःसृत्य रामचन्द्रे निपत्य दुग्धधारेव तं स्नपयति इत्युत्प्रेक्षा, दृष्टौ काचित् नायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कारः, दुग्धकुल्येवेत्यत्र धावल्यसाम्यादुपमा, तदेषां सङ्करः। शब्दालङ्कारश्छेकानुप्रासः। वृत्तं मालिनीति।

(२४) वासन्ती रामस्य राजोचिताम् अभ्यर्थनां सम्पादयति—ददत्विति। मधुश्च्युतः मधूनि श्च्योतन्ति क्षरन्तीति मधुश्च्युतः, क्विप्प्रत्ययः। मकरन्दवर्षिणः। एतेन मधुपर्कदानमपि प्रतिपादितम्। तरवः वृक्षाः पुष्पैः कुसुमैः फलैश्च अर्घ्यं पूजार्थद्रव्यं ददतु। एवं सर्वत्रेति बोध्यम्। पुष्पाणि सुमिष्टानि फलानि च रामाय अर्घ्यरूपेण कल्पयन्तु इत्यर्थः। तथा

राम:। एहि सखि वासन्ति! नन्वित: स्थीयताम्। (न)

वासन्ती। (उपविश्य साश्रम्) महाराज! अपि कुशलं कुमार-लक्ष्मणस्य? (प)

राम:। (अश्रुतिमभिनीय।) (फ)

स्फुटितकमलामोदप्राया: स्फुटितानि विकसितानां कमलानां पद्मानां आमोदस्य अति-निर्हारिण: गन्धस्येति यावत्, "आमोद: सोऽतिनिर्हारी"त्यमर:। प्राय: प्राचुर्यं बाहुल्यमिति यावत्, येषु ते तथोक्ता: विकसितारविन्दमकरन्दगन्धवन्त: वनानिला: वनवायवः प्रवान्तु, प्रवहन्तु, अभ्यागतस्य रामचन्द्रस्य श्रमापनोदार्थं वीजयन्त्विति भाव:। तथा रत्युत्कण्ठा: रतौ क्रीडायां उत्कण्ठा: औत्सुक्यं येषां ते तथोक्ता:, यद्वा रत्या रामा-गमनप्रसूतेन प्रीतिभरेण उत्कण्ठा: उन्नमितग्रीवा शकुन्तय: पक्षिण: अविरलं निरन्तरं कलम् अव्यक्तमधुरं क्वणन्तु कूजन्तु। अत्र श्रवणसुखोत्पादनाय मागधा इव जयशब्देनोपश्लोकय-न्त्वित्यर्थ:। इयं वनभूमि: महाराजं रामचन्द्रम् अतिथिमासाद्य फलपुष्पवनानिलपक्षिकूजिता-दिभिरुपहारै: परिचरन्त्वित्यर्थ:। यत: अयं देव: राजा राम: स्वयं आत्मना ननु पूर्ववत् पितृसत्यपालनार्थमित्यर्थ:। स्वेच्छया इति यावत्। अनन्यप्रेरित: सन् पुन: भूय: इदं वनम् आगत: उपस्थित: अतोऽस्याभ्यर्थना सर्वथा कर्त्तव्या इति भाव:। अत्र काव्य-लिङ्गमलङ्कार: पूर्ववाक्यानां रामागमनरूपवाक्यार्थस्य हेतुत्वेनोपादानात्। यथा कश्चित् राजा राजधानीमागतस्य कस्यचित् राज्ञ: अभ्यर्थना करोति, तथा वनाधिदेवता वासन्ती अपि त्रिलोकीश्वरं रामं निजसम्पत्तिभि: फलपुष्पादिभि: सेवितुम् तद्वनायुपस्थिता: आदिश-तीति वस्तु व्यज्यते। हरिणी वृत्तम्।

(न) एहीति। सखि वासन्ति! एहि त्वं आगच्छ, ननु इत: अस्मिन् स्थाने स्थीयतामुपवि-श्यतां त्वयेति शेष:। ननु-शब्दोऽयं अनुनयार्थक:। "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमर:।

(प) उपविश्येति। साश्रम् अश्रुणा सह वर्त्तते यत् तत् साश्रं सजलनयनं यथा तथा आहेति शेष:। अपि: प्रश्ने, अहं पृच्छामि कुमारलक्ष्मणस्य कुशलं मङ्गलमिति। अत्र रामस्य प्रत्यक्षत्वात् सीतायाश्च निर्वासनश्रवणात्तस्या निधनेन नास्ति कुशलप्रश्नावकाश:, किन्तु पूर्वसंस्तुतानां रामसीतालक्ष्मणानां मध्ये केवलम् अदृश्यस्य लक्ष्मणस्यैव कुशलविविदिषया वासन्त्या इदमभिहितमिति रामसीतयो: कुशलजिज्ञासामकृत्वा केवललक्ष्मणकुशलप्रश्ने न दुष्टिरिति विभाव्यम्।

(फ) अश्रुतिमिति। अश्रुतिं वासन्तीवाक्यस्य अश्रवणम् अभिनीय अनवगततया नाटयित्वा राम: वचनमाहेति शेष:।

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत् ।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ २५ ॥

[२५ । मैथिली करकमलवितीर्णैः अम्बुनीवारशष्पैः यान् तरुशकुनिकुरङ्गान् अपुष्यत्, तेषु दृष्टेषु प्रस्तरोद्भेदयोग्यः द्रव इव कोऽपि मम हृदयस्य विकारः भवति । इत्यन्वयः ।]

वासन्ती । महाराज ! ननु पृच्छामि,—अपि कुशलं कुमारलक्ष्मणस्य ? (व)

रामः । [स्वगतम्] अये महाराजेति निष्प्रणयमामन्त्रणपदं, सौमित्रिमात्रे च बाष्पस्खलिताक्षरः कुशलप्रश्नः, तथा मन्ये विदितसीतावृत्तान्तेयमिति । [प्रकाशम् ।] आं, कुशलं कुमारस्य । [इति रोदिति ।] (भ)

---

(२५) किमित्याह—करेति । मैथिली सीता करकमलवितीर्णैः पाणिपद्मेन दत्तैः अम्बुनीवारशष्पैः जलतृणधान्यबालतृणैः करणैः, यान् तरुशकुनिकुरङ्गान् वृक्षपक्षिमृगान् अपुष्यत् अवर्द्धयत् । अत्र जलसेकेन तरून्, नीवारैः पक्षिणः, शष्पैश्च मृगान् अपुष्यदिति यथासङ्ख्यान्वयो बोध्यः । तेषु तरुशकुनिकुरङ्गेषु दृष्टेषु मयावलोकितेषु सत्सु प्रस्तरोद्भेदयोग्यः प्रस्तरस्य पाषाणस्य उद्भेदे विदारणे, आर्द्रीकरणे इत्यर्थः । योग्यः शक्तः द्रव इव वेगवान् प्रवाह इव कोऽपि अनिर्वचनीयः मम हृदयस्य मनसः विकारः शोकेन चेतसोऽन्यथाभावः भवतीति शेषः । शोकक्षोभेण वज्रवत् कठिनमपि मे हृदयं तापाधिक्यात् हिमसङ्घात इव द्रवीभावमापद्यते इत्यर्थः । अत्र अम्बुप्रभृतिपदार्थानां क्रमान्वयेन तरुप्रभृतिपदार्थैः सह यथोद्देशमन्वयात् यथासङ्ख्यमलङ्कारः । तथा हृदयस्य द्रवीकरणे योग्यः विकारः इति वाच्येन द्रवइव इति वाच्यत्वेन उत्प्रेक्षणात् उत्प्रेक्षालङ्कारश्च, अनयोः मिथो नैरपेक्ष्येण तिलतण्डुलवत् संसृष्टिः । प्रस्तरोद्भेदयोग्य इति विशेषणोपादानात् हृदयं पाषाणवत् कठिनमिति व्यञ्जना व्यज्यते । वृत्तं मालिनीनाम ।

(व) महाराजेति । पूर्व्वोक्तं रामेण न श्रुतमिति मत्वा वासन्ती पुनः वदति—महाराजेति । अपिः प्रश्ने । ननु भोः रामचन्द्र कुमारलक्ष्मणस्य कुशलं त्वां पृच्छामि, त्वया तत्र श्रूयते इत्यर्थः ।

(भ) स्वगतमिति । स्वगतं आत्मगतम् आहेति शेषः । अये इति विषादसूचकं

वासन्ती। अयि देव! किमिति दारुणो दारुणः खल्वसि! (म)

सीता। सहि वासन्दि! किं तुमं सि एव्वंवादिणी? पिआरुहो क्खु सव्वस्स अज्जउत्तो, विसेसदो मम पिअसहिए। (य)

[(य) सखि वासन्ति! किं त्वमसि एववादिनी? प्रियार्हः खलु सर्व्वस्य आर्य्यपुत्र, विशेषतो मम प्रियसख्याः। इति यम्।]

वासन्ती।

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।

सम्बोधनपदम्। महाराजेति महाराज इत्य क्रमानुपूर्व्विक निष्प्रणय सहरहित आमन्त्रणपद सम्बोधनपदम्। महाराजेति साधारणप्रयोज्यमामन्त्रणकरणात् सख्या वासन्त्या न प्रणयभाव प्रकाश्यते, रामचन्द्र-रामभद्र इत्याकारामन्त्रणपदमेव स्नेह द्योतयतीति भाव। सौमित्रिमाते च सौमित्रिरिव सौमित्रिमात तस्मिन् कैवर्ण्य लक्ष्मणे ननु सीताया, बाष्पस्खलिताक्षर बाष्पेन अश्रुणा स्खलितानि अविस्पष्टमुच्चारितानि अक्षराणि यथा यस्मिन् स तथोक्तः, बाष्पावरुद्धकण्ठतया विशीर्णवर्ण इत्यर्थ। कुशलप्रश्न मङ्गलजिज्ञासा। तथा तेन हेतुना अह मन्ये निश्चिनोमि इय वासन्ती विदितसीतावृत्तान्ता विदित ज्ञात सीताया वृत्तान्त वननिर्व्वासनरूप यया सा तथोक्ता इति। प्राणसमप्रियसख्याः निर्व्वासनात् मयि तत्सम्बन्धजनितस्नेहस्य अभाव जात, अतएव निष्प्रणयमामन्त्रणं वासन्त्या इत्यर्थ। निर्व्वासिताया कठोरगर्भाया सीताया व्याघ्रादिभिर्भक्षिताया वा तस्या मृत्युनिश्चयेन शोकातुरतया वासन्त्या लक्ष्मणविषयककुशलजिज्ञासार्थाम् अश्रुरुद्धकण्ठतया वाक्य न प्रकाश्यते इति भाव। आम् इति स्वीकारे अव्ययम्। स्मरणार्थ वा। लक्ष्मणस्य कुशलप्रश्न गृहीत्वा स्थिता वैत्यर्थ। रोदिति शोकाविर्भावादिति भाव।

(म) अयीति। हे देव राम। त्व किं कथम् इति एव दारुणो दारुण अतिकठिन अतिनृशंसकर्मा इत्यर्थ, असि भवसि। दारुणो दारुण इति अतिशयार्थे द्विभाव।

(य) सखीति। अयि सखि वासन्ति! त्व किं कथ एववादिनी आर्य्यपुत्र प्रति कठोरभाषिणी असि भवसि, एतन्न वक्तव्यमिति भाव। कथमित्याह—प्रियार्ह प्रियस्य प्रीतिकरवाक्यस्य अर्ह योग्य। प्रियम् अर्हतीति वा प्रियार्ह। अथ आर्य्यपुत्र सर्व्वस्यैव जनस्य प्रियवचनेनाराधनीय इत्यर्थ। मम प्रियसख्याः वासन्त्या विशेषत विशेषेण प्रियार्हः, अतया तु निरतिशयप्रियवचनेनाय समाराधनीय। अत युक्तमुक्तमिति भाव।

इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमिहोत्तरेण ॥ २६ ॥

[२६ । त्वं मे जीवितम्, त्वं मे द्वितीयं हृदयम् असि, त्वं मे नयनयोः कौमुदी, त्वं मे अङ्गे अमृतम् इत्यादिभिः प्रियशतैः मुग्धां अनुरुध्य तामेव ? अथवा शान्तम्, इह उत्तरेण किम् ? इत्यन्वयः ।]

[इति मूर्च्छति ।]

---

(२६) रामस्यातिदारुणत्वे हेतुमाह—त्वमिति । हे विदेहराजपुत्रि ! त्वं मे मम जीवितं जीवनम् असि तद्वत् प्रियतमत्वात् । तथा त्वं मे द्वितीयं हृदयम् असि एकमेवावयोः हृदयं द्विधा स्थितमित्यर्थः । तथा त्वं मे नयनयोर्नेत्रयोः कौमुदी चन्द्रिका असि । कौ पृथिव्यां मोदते जनः यस्या इति कौमुदी । ज्योत्स्नावदानन्दजनकत्वादित्यर्थः । तथा त्वं मे अङ्गे शरीरे अमृतं सुधा असि । तद्वज्जराप्रतिबन्धेन नित्ययौवनवहेत्यर्थः । तव स्पर्शः ममाङ्गे अमृतधारां सिञ्चतीवेति भावः । अत्र प्राणाः प्राणा एव, हृदयं हृदयमेव, कौमुदी कौमुद्येव, अमृतम् अमृतमेव, त्वन्तु प्राणा हृदयं कौमुद्यमृतमेतत् सर्व्वम्, इति प्राणाद्यपेक्षया वैलक्षण्यमपीति सूच्यते । देवताया ऋतस्य अपि शातुं वक्तुं चाशक्यत्वादाह—इत्यादिभिरिति । इत्यादिभिः एवम्प्रकारैः प्रियशतैः प्रियाणां प्रियवचनानां ननु प्रियानुष्ठानानामिति भावः । शतैः बाहुल्यैः । अत्र शतशब्दोऽनन्तवाची—'शतं सहस्रमयुतं सर्व्वमानन्त्यवाचक'मित्युक्तेः । एवंविध-चाटुवाक्यसमूहैरित्यर्थः । मुग्धां सरलां अप्रबुद्धचित्तां बालामिति यावत् । तव क्रौर्य्यमजा-नन्तीमिति वा । इयं सरलचित्ता इत्येव त्वं तां प्रतीदृक् नृशंसाचरणं कृतवान् अन्यथा प्रागेव आत्मप्रतिकारं अनया स्यादिति भावः । अनुरुध्य सन्तोष्य चाटुवाक्यैः तस्याः चित्तम् रञ्जयित्वा इत्यर्थः । तामेव त्वां प्रति नितान्तविश्वस्तां त्वदायत्तचित्तामित्यर्थः । ननु विरहासहत्वेन विप्रियकारिणीमित्यवधारणार्थः । निर्वासितवान् इति वाक्यशेषः । ईदृशनिर्द्दय-स्यास्य दयोत्पादनायमेव वासन्त्या एवमभिप्रायेण उक्तमिति भावः । दुःखातिशयेन वक्तुमशक्यतया वाक्यशेषो न कृत इति बोध्यम् । पाषाणकठिनस्यास्य दयोद्रेकः स्यान्न वेत्याशङ्क्याह—अथवेति । अथवा किम्वा शान्तं मम वचनं इहैव विरतं स्यात् अत्रैव वाक्यसमाप्तिर्भवतु । इह तव सन्निधाने उत्तरेण वाक्यसमापकेन परवर्त्तिवाक्येन किं किं फलं साध्यमित्यर्थः, गम्यमानसाधनक्रियापेक्षया करणे तृतीया । अतीतघटनायाः पुनः पर्य्यालोचनस्य निष्फलत्वादिति भावः । अत्र त्वं जीवितमित्यादिवाक्ये निरङ्गकेवलं रूपकं, हृदयस्य द्वितीयत्वासम्बन्धात् असम्बन्धे सम्बन्धरूपातिशयोक्तिश्च । तामेव इत्यस्मात् परं तां निर्वासितवान् इति वक्तुमिष्टस्य वाक्यांशस्य वस्तुनः रामस्य निर्द्दयत्वादिरूपविशेषप्रतिपत्त्यर्थं

रामः । स्थाने खलु वाक्यनिवृत्तिर्मोहश्च । सखि ! समाश्वसिहि, समाश्वसिहि । (र)

वासन्ती । [समाश्वस्य ।] तत् किमिदमकार्य्यमनुष्ठितं देवेन । (ल)

सीता । सहि वासन्दि ! विरम, विरम । (व)

[(व) सखि वासन्ति । विरम, विरम । इति सम् ।]

रामः । लोको न मृष्यतीति । (श)

वासन्ती । तत् कस्य हेतोः ? (ष)

रामः । स एव जानाति किमपि । (स)

अनुक्तत्वाभिधेयानामवत्वेन चाक्षेपालङ्कारश्च । तदेतेषामङ्गाङ्गिभावेन सङ्करः । वसन्ततिलक वृत्तम् ।

(र) स्थाने इति । स्थाने योग्ये अवसरे वाक्यनिवृत्तिः । वासन्त्या वाक्यस्य निवृत्तिः रोधः, मोहो मूर्च्छा च युज्यते एव इत्यर्थः । अत्यन्तशोकोदयादिति भावः । अथवा वाक्यनिवृत्तिर्मोहश्च स्थाने युक्त इत्यर्थः । "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः । स्थाने इति अव्ययपदम् ।

(ल) तत् किमिति । तदिति अव्ययं पद, तत् तदा किं भोः, अथवैकं पदं प्रश्नबोधकम् । ननु पृच्छामि देवेन राज्ञा भवता अकार्य्यं कर्त्तुमयोग्य निन्दनीयं सीतानिर्वासनरूपं कार्य्यम् अनुष्ठितम् अध्यवसितम् । भवादृशानां नैतदुचितमित्यर्थः ।

(व) विरम इति । सखि वासन्ति ! त्वं विरम विरम विरता भव, कर्कशवाक्येन आर्यपुत्रस्य तिरस्कारादित्यर्थः । विरमेति "व्याङ्परिभ्यो रमः" इत्यात्मनेपदम् । निषेधस्यात्यन्तताबोधनार्थं द्विरुक्तिः ।

(श) लोक इति । लोकः जनः न मृष्यति न सहते । मम गेहे सीतायाः अवस्थानं लोकः न क्षमते इत्यर्थः । इति अस्मात् हेतोः । "इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इत्यमरः । मया अकार्य्यमिदमनुष्ठितमित्यर्थः ।

(ष) तदिति । तत् सीतायाः गृहावस्थानासहनम् । कस्य हेतोः केन कारणेन । प्रजानामनभिमतं किं कारणमित्यर्थः । केन हेतुना पतिव्रताया अपि सीतायाः गृहावस्थानं प्रजाभिर्नानुमोदितमित्यर्थः ।

(स) स एव इति । स एव लोक एव प्रजापुञ्ज एव किमपि अनिर्वचनीयं कारणं जानाति । सीताया गृहावस्थानं प्रजाभिः कथं न क्षम्यते तत्कारणं त एव ॰ ।

तमसा। उचितस्तदुपालम्भः। (छ)

वासन्ती।

अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्।
किमभवद्विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥ २७ ॥

[२७। अयि कठोर! ते यशः प्रियम् किल, ननु अतः परम् किं घोरम् अयशः अस्ति? (हन्त) हे नाथ! हरिणीदृशः तस्याः विपिने किमभवत् कथय। बत कथं मन्यसे। इत्यन्वयः ॥]

सीता। तुमं ज्जेव्व सहि वासन्दि दारुणा कठोरा अ, जा एव्वं अज्जउत्तं पदित्तं पदीवेसि। (ज)

[(ज) त्वमेव सखि वासन्ति! दारुणा कठोरा च, या एव आर्य्यपुत्रं प्रदीप्तं प्रदीपयसि। इति छाया।]

(छ) उचित इति। तदुपालम्भः तस्य लोकस्य उपालम्भः तिरस्कारः उचितः न्याय्यः। अमूलकनिन्दाप्रचारेण कृतापराधः प्रकृतिवर्ग एव दण्डनीयः न तु निरपराधा सीता इति भावः।

(२७) अयीति। अयि भो कठोर! निष्ठुर! ते तव यशः कीर्त्तिः प्रियं हृद्यं, ननु पोष्यवर्गप्रतिपालनादिकं, किल सम्भावनायाम्। अयं भावः—प्राणसमायाः पतिव्रतायाः प्रियायाः परित्यागेनापि प्रकृतीनामनुरञ्जनेनानुपमं यशः स्यादिति मत्वा त्वया सीता निर्वासिता, किन्तु त्वया तन्नासादितम्, एतेन कीर्त्त्यर्जनप्रयासस्ते वृथैव जातः। ननु भो राजन्! अतःपरं प्रियतमधर्म्मपत्नीनिर्वासनोत्पन्नाकीर्त्तेः परं अधिकं गुरुतरं घोरं दारुणम् अयशः अकीर्त्तिः किम् अस्ति अपितु नास्त्येव। अनेन नृशंसेन कर्म्मणा ते यादृशी अकीर्त्तिरुत्पन्ना ततोऽधिकतराकीर्त्तिर्न सम्भवेदित्यर्थः। अयशसः कारणमाह—हे नाथ हे जगत्पते! हरिणीदृशः हरिण्याः कुरङ्ग्याः दृशौ इव दृशौ यस्याः तथोक्तायाः चपलनेत्रायाः सरलायाः सीतायाः विपिने निबिडारण्ये किम् अभवत् असहायायाः तस्याः किं वृत्तं कावस्था जातेति यावत्, बत खेदे, अहो कथं मन्यसे तत्र त्वं किं सम्भावयसि तत्कथय त्वमेव ब्रूहि। जगतां नाथोऽपि त्वं गर्भभरालसां निरपराधां पतिव्रतां पत्नीं सहायविरहिते घोरे अरण्ये परित्यज्य कमपि तस्याः रक्षणोपायं न कृतवान्, अहो ते नैष्ठुर्य्यं विचारमूढत्वञ्चेति भावः। अत्र यशःकामनया कृतेन सीतानिर्वासनेन यशो नाभूत् प्रत्युत घोरं अयश एवेति कारणस्य वैफल्यं अनर्थस्य च उत्पत्तिः इति विषमालङ्कारः। स च हरिणीदृश इति लुप्तोपमया संसृज्यते। वृत्तं द्रुतविलम्बितं, 'द्रुतविलम्बितमाह नभौ भरौ' इति वचनात्।

(ज) त्वमेवेति। अतिदारुणा कठोरा च असि। आर्य्यपुत्रस्य पुनः पुनः शोकोद्दीपनेन

तमसा । प्रणय एवं व्याहरति शोकश्च । (क)

राम । सखि ! किमत्र मन्तव्यम् ? (ख)

वत्सैकहायनकुरङ्गविलोलदृष्टे-

स्तस्याः परिस्फुरितगर्भभरालसायाः ।

ज्योत्स्नामयीव मृदुबालमृणालकल्पा *

क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

[२८ वत्सैकहायनकुर॰ विलोलदृष्टेः परिस्फुरित-गर्भभरालसायाः तस्याः ज्योत्स्नामयी मृदुबालमृणालकल्पा अङ्गलतिका नियतं क्रव्याद्भिः विलुप्ता । इत्यन्वयः]

दारुणा निर्दया । तथा एतादृशदशादर्शनेनापि निर्दयव्यवहारात् कठोरा कठिनहृदया च भवसि । या त्वम् एव उक्तप्रकारं विलपन्तीं कथयन्तीं परिदेवयन्तीत्यर्थः, प्रदीपयसि शोकाग्निं नैति शेषः । निष्ठुरतरं पीडयसीत्यर्थः ।

(क) प्रणय इति । प्रणयः त्वां प्रति वासन्त्याः प्रकृतिमन्त्रः एव शोकश्च तव निर्वासनात् खेदश्च एव रामनिर्भर्त्सनरूपं वाक्यं व्याहरति ब्रवीति । न तु स्वेच्छया वासन्ती एवं वदतीत्यर्थः । त्वयि प्रकृष्टप्रेमवशात् शोकोदयाच्च ते प्रियसखी वासन्ती इत्थं कर्कशवाक्यैः रामं निर्भर्त्सयतीति भावः । अत्र प्रणयशोकयोर्व्याहरणासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कारः, स च तुल्ययोगितासङ्कीर्णः ।

(ख) सखीति । अत्र सीतायाः दुर्दशाविषये किं मन्तव्यं किं चिन्तनीयमस्ति अपितु किमपि नास्तीत्यर्थः । यत् यत् युष्माभिरवधारितं मया प्रागेव तत्सर्वं निश्चित-मित्यर्थः ।

(२८) तत् किमित्याह—वत्सैकेति । वत्सैकहायनकुरङ्गविलोलदृष्टेः, एकः हायनः वर्षः यस्य स एकहायनः । "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः" इत्यमरः । तस्य भीत एव हरिणः एकवर्षवयस्कः यः कुरङ्गः हरिणः तस्येव विलोले विशेषेण चपले दृष्टी नेत्रे यस्याः सा तथोक्तायाः भयचकितहरिणीवत्पलायमानायाः निसर्गचपलमपि हरिणनयनं शैशवदशायां भयोत्पन्नं सविशेषचपलं भवति, अतस्तत्र एकहायनेति विशेषणम्, सार्थकम् । तथा परिस्फुरितगर्भभरालसायाः परिस्फुरितेन व्यक्तस्पन्देन गर्भस्य भरेण भारेण गौरवेण इति यावत्, अलसा मन्थरा मन्दगमना तस्याः प्रकृष्टगर्भ-

---

* मृदुमुग्ध इति पाठान्तरम् ।

सीता। अज्जउत्त ! धरामि एसा धरामि। (ग)

[(ग) आर्य्यपुत्र ! ध्रिये एषा ध्रिये। इति सम्।]

राम। हा प्रिये जानकि ! क्वासि। (घ)

सीता। हद्धी हद्धी ! अज्जउत्तो वि पमुत्तकण्ठं * रोइदि। (ङ)

[(ङ) हा धिक् हा धिक् ! आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रोदिति। इति सम्।]

तमसा। वत्से ! साम्प्रतिकमेवैतत्, कर्त्तव्यानि खलु दुःखितैर्दुःखनिर्वापणानि। यतः—(च)

भारवशात् चलितुमसमर्थाया इत्यर्थः। तस्याः सीतायाः ज्योत्स्नामयीव ज्योत्स्नया निर्म्मिता इव अत्यन्तविशदा सुकुमारा चेत्यर्थः। तथा मृदुबालमृणालकल्पा मृदु कोमलं बालं अपरिणतं नवजातमिति यावत्। यत् मृणालं बिसं तस्मादीषदूना इति मृदुबालमृणालकल्पा अतिकोमलनवीननलिननालतुल्या इत्यर्थः। अङ्गलतिका क्षुद्रा लता इति लतिका अङ्गं लतिका इव इति अङ्गलतिका देहवल्ली कृशत्वात्लतिकासाम्यम्। क्रव्याद्भिः मांसभोजिभिः राक्षसादिभिः नियतं निश्चितं विलुप्ता भक्षिता। हिंस्रैः निशाचरैर्व्याघ्रादिभिर्व्वा सा नूनं खादिता, मयैत्यवधारितमित्यर्थः। एवं प्रकारेण उपायापायशङ्काभ्यां कार्य्यसम्भवरूपप्रमादाभ्यां प्रतिपादिता। अत्र ज्योत्स्नामयी वेत्यत्रोत्प्रेक्षा, वत्सेकहायनकुरङ्गविलोलदृष्टे तथा मृदुबालमृणालकल्पा अङ्गलतिका इत्यत्र च लुप्तोपमा। वसन्ततिलकं वृत्तम्।

(ग) आर्य्यपुत्र इति। एषा इयमहं सीता ध्रिये अवतिष्ठे, नतु म्रियेऽहम्। अहं क्रव्याद्भिर्न व्यापादिता इत्यर्थः।

(घ) हा प्रिये इति। हे जानकि ! जनकनन्दिनि ! त्वं क्व कुत्र असि वर्त्तसे कुत्र गता वा असि।

(ङ) हा धिक् इति। हा धिक् इत्यव्ययम्। "हा विषादशुगर्त्तिषु।" "धिङ्निर्भर्त्सननिन्दयो" रिति चामरः। आर्य्यपुत्र अपि ईदृग्धैर्य्यवान् रामचन्द्रोऽपि का कथा स्वभावचपलानां इत्यपेरर्थः। प्रमुक्तकण्ठं प्रमुक्तं अप्रतिबद्धं कण्ठं यस्मिन् तत् यथा तथा, रोदिति, उच्चैरारटति। नितान्तधैर्य्यगाम्भीर्य्यशाली आर्य्यपुत्रोऽपि यत् प्राकृतजनवत् उच्चैः रोदिति तदस्य अस्य दुर्निवारं शोकावेगं जायते तच्च मम अतिशयेन कष्टमुत्पादयति इति भावः।

(च) वत्से इति। साम्प्रतिकमेवैतत् एतत् प्रमुक्तकण्ठरोदनं साम्प्रतिकमेव युक्तमेव

* पदच्चो इति पाठभेदः।

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते ॥ २९ ॥

[२९। तडागस्य पूरोत्पीडे परीवाहः प्रतिक्रिया, तथा शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते। इत्यन्वयः।]

विशेषतो रामभद्रस्य बहुतरप्रकारकष्टो जीवलोकः। (छ)

"युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः। रोदनस्य युक्ततामाह—दुःखितैरिति। दुःखितैः सन्तप्तैः जनैः दुःखनिर्वापणानि दुःखानि निर्वाप्यन्ते प्रशाम्यन्ते एभिरिति दुःखनिर्वापणानि निर्वापणे साधनानि इत्यर्थः, कर्त्तव्यानि विधेयानि। दुःखितैर्जनैः रोदनादिना दुःखस्य लाघवं कर्त्तव्यमित्यर्थः। मुक्तकण्ठरोदनस्य शोकलाघवहेतुता कथमित्याह दृष्टान्तोपन्यासेन समर्थयितुमाह—यत इति। यतः यस्मात् हेतोः।

(२९) पूरोत्पीड इति। तडागस्य सरोवरस्य 'पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः' इत्यमरः। पूरोत्पीडे पूरेण वृष्टिवर्द्धितजलप्रवाहेण उत्पीडः मर्दः, पूरस्य जलौघस्य उत्पीडः पूरोत्पीडः तस्मिन् इति वा। जलाधिक्यातिशये जाते इत्यर्थः। परीवाहः प्रणाल्या खननादिना जलनिःसारणं प्रतिक्रिया प्रतीकारः, प्रणालीखननेन अतिरिक्तजलसमूहः बहिः सार्य्य दीर्घिकादिकं रक्ष्यते, अन्यथा वर्द्धितोऽम्बुराशिः तटभूमिं विदार्य्य विनाशं सवेगं प्राप्नुयादिति भावः। एवं हृदयं चित्तं शोकेन अभीष्टविनाशजन्यदुःखेन क्षोभे विचलने जाते अथवा शोक-क्षोभे शोकाधिक्यप्रयुक्तप्रकृतिविपर्य्यासे प्रलापैः परिदेवनैः 'प्रलापः परिदेवनम्' इत्यमरः। प्रमुक्तकण्ठरोदनैरित्यर्थः। तदुपायान्तरैरित्येवकारार्थः। धार्य्यते रक्ष्यते स्थिरीक्रियते। अन्यथा शोकावेगेन पूर्णं हृदयं सञ्चितमनःदुःखभावसहनेऽक्षमं विदीर्णं भवति। अतः प्रलापादिभिः शोकस्य लाघवमापाद्य हृदयं अवस्थापयितव्यमिति फलितम्। तत सीताशोकेन राघवस्य रोदनं युक्तियुक्तमेवेति भावः। अत्र तडागस्य रक्षणं हृदयस्य च सन्धारणमिति एक एव धर्मः गम्य-मानो वाक्यद्वये पृथङ्निर्द्दिष्टः प्रतिवस्तूपमालङ्कारः 'प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्द्दिश्यते पृथक्' इति विश्वनाथः। स च प्रलापैरेवेत्यत्र एवकारेण उपायान्तरव्यपोहनस्य अर्थतः प्रतीत्या अर्थापत्तिसङ्कीर्णः। शोकक्षोभे हृदयस्य प्रलापे साधारण्यादप्रस्तुतात् सामान्यात् रामस्य प्रलापे हृदयसन्धारणस्य प्रस्तुतस्य गम्यत्वात् अप्रस्तुतप्रशंसा च।

(छ) विशेषत इति। बहुतरप्रकारकष्टः बहुतराः प्रकाराः विधा येषां तत् बहुतरप्रकारं नानाविधं कष्टं क्लेशः यत्र स तथोक्तः जीवलोकः संसारः जगदिति यावत्। जीवलोकः रामभद्रस्य अन्यापेक्षया विशेषतः आधिक्येन नानाप्रकारकष्टदायक इत्यर्थः

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
　　प्रियाशोको जीवं कुसुममिव घर्मः क्लमयति । †
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
　　स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ ३० ॥

[३० । अभियुक्तेन मनसा इदं विश्वं विधिवत् पाल्यम्, घर्मः कुसुममिव प्रियाशोकः जीवं क्लमयति । स्वयं त्यागं कृत्वा विलपनविनोदोऽपि असुलभः, तत् अद्यापि उच्छ्वासः भवति, ननु रुदितं लाभः हि ॥ इत्यन्वयः ।]

राम । कष्टं भोः कष्टम् । (ज)

(३०) जीवलोकस्य बहुतरकष्टत्वं दर्शयति—इदमिति । इदं विश्वं जगत् अभियुक्तेन अभिनिवेशवता सावधानेनेति यावत्, विधिवत् यथाशास्त्रं पाल्यं रक्षणीयम् । अन्यथा नानादोषात्-पातः स्यात् । एतच्च तस्य दुष्करं यतः प्रियाशोकपीड्यमानहृदयोऽयं महता यत्नेन शोकं लघूकृत्य दुस्तरामिमां जगतीरक्षां करोति । घर्मः निदाघतापः सुकोमलं कुसुममिव पुष्पं यथा तथा प्रियाशोकः प्रियायाः सीतायाः शोकः निरन्तरमनुभूयमानविरहदुःखम् । जीवं जीवनं क्लमयति म्लपयति अवसादयतीति यावत् । एवं स्वयमात्मना त्यागं परिवर्जनं कृत्वा विलपनविनोदः विलपनेन उच्चै रोदनेन यो विनोदः सीताविरहशोकापनोदनं स्वस्य लघूकरणमित्यर्थः । असुलभः दुर्लभः । आत्मनैव कृतसीतापरित्यागः तदर्थं रुदन्तं मां विलोक्य लोकः किं वक्ष्यतीति महती लज्जैव तत्र परिपन्थिनीति रोदितुमपि न शक्नोतीति भावः । तत् तस्मात् अन्यतः शोकप्रकाशकरोदनासम्भवात् । अद्य अस्मिन् अहनि अस्माकं समीपे उच्छ्वासः शोकप्रकाशः भवति, रुदितं शोकप्रकाशस्वरूपं रोदनं लाभो हि लाभ एव भवति रामस्येति शेषः । एवंविधक्लेशबहुलं जीवनं यापयतोऽपि अस्य इदानीमपि प्राणधारणं यस्माद्भवति तस्माद् तौ उच्चैः क्रन्दनं महोपकार एव इति भावः । ननु अवधारणे । अत्र प्रियाशोकघर्मस्य जीवकुसुमस्य म्लपनसाधर्म्येण साम्यादुपमा प्रतीतेः, रुदितस्य लाभतया परिणतेः परिणामश्चेति वदन्ति । शिखरिणी वृत्तम् । 'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी'ति लक्षणात् ।

(ज) कष्टमिति । भोः वासन्ति । कष्टं कष्टं अतीव कष्टं दुःखं अनुभवामी-त्यर्थः । इदानीमनिर्वचनीयासह्यकष्टमनुभवामीति यावत् । कष्टं कष्टमिति अतिशयार्थे द्विरुक्तिः ।

† म्लपयति इति पाठान्तरम् ।

दलति हृदयं गाढोद्वेगो द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ ३१ ॥

[३१। गाढोद्वेगं हृदयं दलति द्विधा तु न भिद्यते, विकलः कायो मोहं वहति चेतनां न मुञ्चति। अन्तर्दाहः तनूं ज्वलयति, भस्मसात् न करोति। मर्मच्छेदी विधिः प्रहरति, जीवितं न कृन्तति॥ इत्यन्वयः।]

सीता। एवम्मेदम्। (भ)

[भ] एवमिदम्। इति सम।]

---

(३१) तत्कष्टप्रकारमेव विवृणोति—दलतीति। गाढः अतितीव्र उद्वेगः सीता-विरहदुःखं हृदयं दलति विदारयति। गाढोद्वेगमिति पाठे गाढः उद्वेगो यस्मिन् तत् हृदयस्य विशेषणं, तत् दलति अन्तर्विदीर्णं भवति। तु किन्तु द्विधा न भिद्यते द्विधा द्विप्रकारेण न भिन्नं भवतीत्यर्थः। तेनोद्वेगेन न द्विखण्डीक्रियते वा। हृदयस्य द्विधा भिन्नत्वे मेऽत्यन्तदुःखं भवेत् इति भावः। तथा विकलः शोकेन वक्लीकृतः कायः देहः, मोहं मूर्च्छां वहति भजते, क्वचित् क्वचिदिति शेषः। किन्तु चेतनां चैतन्यं न मुञ्चति एकान्ततः सर्वथा न परिहरतीत्यर्थः। तथा सति नेहकष्टस्यानुभवः स्यादिति भावः। तथा अन्तर्दाहः अन्तः हृदयाभ्यन्तरे दाहः शोकसन्तापः तनूं देहं ज्वलयति, किन्तु भस्मसात् कार्त्स्न्येन भस्मतां न करोति न नयति, भस्मत्वं न प्रापयतीति भावः। तथा कृते दाहाभावात् शोकस्योपशमः स्यादिति भावः। तथा मर्मच्छेदी मर्म कर्मादिकस्य च हृदयमर्मविदारकः अत्यन्तदुःखद इति यावत्, विधिः दैवं 'विधिर्विधाने दैवे च' इत्यमरः। प्रहरति आहत्य पीडयति, किन्तु जीवितं प्राणान् न कृन्तति न छिनत्ति। निरन्तरं ममर्मा मर्मपीडामनुभवामि प्राणास्तु न यान्ति प्राणापाये सकलक्लेशानामेवावसानं स्यादिति भावः। सर्वप्रकारसुखलेशरहितस्य नानाविधदारुणशोकदुःखनिपीडितस्य मम जीवनान्मृत्युरेव सर्वथा श्रेयानिति फलितार्थः। अत्र दलति हृदयं द्विधा न भिद्यते इत्यादिषु वाक्येषु हृदयदलनादिरूपकथितवस्तुसद्भावानां द्विधा भेदनादीनां वस्तूनां व्यपोहनात् परिसंख्यालङ्कारः। गाढोद्वेगादिप्रयुक्तहृदयदलनादिरूपकारणसत्त्वेऽपि द्विधा भेदनादिकार्यस्याभाववर्णनात् विशेषोक्तिरिति केचित्। हरिणी छन्दः।

(भ) एवमेतदिति। त्वया 'दलति हृदयं' मित्यादि यदुक्तं तदिदं एवम् इत्थमेव, सत्यमेवेत्यर्थः। मयापि इदं अनुभूयते इति भावः।

राम । हे भवन्तः पौरजानपदाः ! (अ)

न किल भवतां स्थानं देव्या गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते ते भावाः परिभ्रमयन्ति माम्
इदमशरणैरद्याप्येवं प्रसीदत रुद्यते ॥ ३२ ॥

(३२ । देव्याः गृहे स्थानं भवतां न अभिमतं किल, ततः शून्ये वने तृणमिव परित्यक्ता, न चापि अनुशोचिता । (इदानीं) चिरपरिचिताः ते ते भावाः मां परिभ्रमयन्ति । अशरणैः इदं रुद्यते, अद्यापि एवं (यूयं) प्रसीदत ॥ इत्यन्वयः ।]

(अ) हे भवन्तः पौरजानपदा इति । पुरे भवाः पौराः पुरवासिनः जनपदे भवाः जानपदाः देशवासिनः प्रजावर्गाः । भवच्छब्दप्रयोगात् प्रजावर्गं प्रति विरागः सूच्यते ।

(३२) न किलेति । देव्याः सीतायाः गृहे मम वेश्मनि स्थानम् अवस्थितिः वास इति यावत्, भवतां युष्माकं न अभिमतं मनसाऽननुमोदितं किल । रक्षोगृहोषितायाः सीतायाः गृहे भवन्तो नानुमतवन्त इति मया दुर्मुखात् श्रुतम् । ततः तस्माद्धेतोः शून्ये विजने वने विपिने तृणमिव असारशुष्कघासादिद्रव्यमिव त्यक्ता निर्वासिता सा सीतेति शेषः । न च अनुशोचितापि परित्यक्तायाः अस्याः कृते मया पश्चात्तापोऽपि न कृत इत्यर्थः । तदर्थम् अनुतापप्रकाशेऽपि यदहं भवतां विरागभाजनं स्यामिति भयमिति भावः । किन्तु इदानीम् अधुना । चिरपरिचिताः अत्र पञ्चवट्यां पूर्वावस्थानेन संस्तुताः दीर्घकालनिवासेन सीतासहवासे साक्षिणः ते ते भावाः पदार्थाः मारुतकाननपर्वतनगादयः । 'पदार्थो भाव उच्यते' इत्यमरः । मां परिभ्रमयन्ति सीतास्मरणजनकतया व्याकुलीकुर्वन्ति मोहयन्तीति यावत् । अत एव अशरणैः नास्ति शरणं रक्षिता येषां तैः तथोक्तैः । 'शरणं गृहरक्षित्रो'रित्यमरः । रक्षकरहितैः उपायशून्यैरित्यर्थः । अस्माभिरिति शेषः । इदं रुद्यते इत्थं विलप्यते । अद्यापि अस्मिन्नपि काले एवम् अनेन प्रकारेण मम रोदनबाधा भवत्वित्यर्थः । प्रसीदत यूयं प्रसन्ना भवत । सीतापरित्यागानन्तरं मम तापशान्तये युष्माभिः कोऽपि सान्त्वनाप्रयोगः न कृतः किन्तु अधुना अवसरं लब्ध्वा तच्छोकलाघवाय मया किञ्चित् रुद्यते तत् अनुमन्यतां युष्माभिरिति भावः । यद्वा इदानीमपि प्रसीदत सीता मृता न चेत् युष्मदनुग्रहात् प्रत्यानीयते इति व्याख्येयम् । अत्र सीतायास्त्यागरूपकारणे सति अनुशोचनरूपफलानुत्पत्ते-र्विशेषोक्तिरलङ्कारः । स च तृणमिवेत्युपमया सङ्कीर्यते । अशरणैः रुद्यते इति वाक्यमध्ये

तमसा। अतिगम्भीरमापूरणं * शोकसागरस्य। (ट)

वासन्ती। देव! अतिक्रान्तं धैर्य्यमवलम्ब्यताम्। (ठ)

रामः। सखि! किमुच्यते धैर्य्यमिति? (ड)

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
लुप्तं सीतेति नामापि † न च रामो न जीवति॥ ३३॥

[३३। देव्या शून्यस्य जगतः द्वादशः परिवत्सरः सीतेति नामापि लुप्तम्। रामः च न जीवति इति न॥ इत्यन्वयः।]

अयाप्येव प्रमोदते इति वाक्यानुप्रवेशादपि चमत्काराधिक्यात् उपमानस्य लिङ्गतया न गर्भिततादोषः, 'गर्भितत्वं गुणः क्वापि'। इपमाकाराः... तमसिव सीता त्यक्ता इत्यत्र न चोपमानमभग्नप्रक्रमतादोषः 'लिङ्गसंख्या नभेदेऽपि उपमानोपमेयता विभक्तिः पृथगेकैव उपमानोपमेययोः'रिति दण्ड्याचार्य्याक्तेः, स हि ... इत्यादि स्वयमुदाजहार इति। वृत्तं हरिणी नाम।

(ट) अतीव। शोकसागरस्य शोक एव सागरः दुस्तरत्वात् समुद्रः। तस्य आपूरणं परिपूर्णता आभोग इत्यर्थः अतिगम्भीरं अतलस्पर्शं अतिगभीरमित्यर्थः वा

(ठ) देवेति अतिक्रान्तं अतीतं सीतानिर्वासनादिविषयं धैर्य्यं चित्तस्य स्थिरता अवलम्ब्यतां आश्रीयतां, गतस्य शोचना नास्ति। सत्वाश्चित्तमवष्टम्भयेत्यर्थः। अन्यथा केवलं कष्टानुभव एव फलमिति भावः

(ड) सखीति। किमुच्यते धैर्य्यमवलम्ब्यतामिति त्वया किमुच्यते। धैर्य्यावलम्बनस्य पराकाष्ठा मया दर्शिता ... भावः। नाहं मत्त्वातमाद्य वर्त्तिन इति तात्पर्य्यम्

(३३) आत्मनः धैर्य्यावलम्बनं दर्शयति ... देव्या सीतया शून्यस्य विरहितस्य जगतः विश्वस्य ... द्वादशः द्वादशानां पूरणः 'तस्य पूरणे डट्'। परिवत्सरः संवत्सरः वर्त्तते इति शेषः। सीतानिर्वासनसमयादारभ्य द्वादश वत्सरा गता इत्यर्थः। अतएव सीतेति नामापि का कथा तस्याः सौन्दर्य्यसौशील्यादीनामित्यपेरर्थः। आख्यापि लुप्तं प्रणष्टम्। दीर्घकालातिक्रमात् इदानीं केनापि तस्याः नाम नोच्चार्य्यते इति भावः। तथापि रामः न जीवति न प्रतीयते इति न अपितु जीवत्येव, 'सम्भाव्यनिषेधनिवर्त्तने द्वौ नञौ' इति जीवनाभावस्य सम्भावनायामपि तदभावात्

* अवगूरणम् इति विद्यासागरधृतः पाठः। (अवगूरणम् आवर्त्तः)।

† प्रत्यस्तमिव नामापि इति पाठान्तरम्।

सीता। **मोहिदह्मि अज्जउत्तस्स एदेहिं वअणेहिं। (ढ)**

[(ढ) मोहितास्मि आर्यपुत्रस्य एतैर्वचनैः। इति सम्।]

तमसा। **एवं वत्से। (ण)**

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः।
एतास्ता मधुनो धारा श्च्योतन्ति सविषास्त्वयि॥ ३४॥

[३४। स्नेहार्द्राः शोकदारुणाः एताः वाचः प्रियतमाः न। एताः सविषाः मधुनः धाराः त्वयि श्च्योतन्ति॥ इत्यन्वयः।]

राम। **अयि वासन्ति! मया खलु—(त)**

जीवनाभावोऽन्याय्य इति व्यज्यते म तादृग्विहितो ... एवमहमपि प्राणान् धारयामि ननु तस्या शोकेन मृत नैव किं मम ... कृतमीमांसितचरितो ... जन्म जनना? सीताशोकेन यद्धनापि जीवामि तदेव निरतिशयधैर्यं ममेति भाव अत जीवनधारणरूपकार्यभङ्ग्या गम्यमानप्रस्तुत ... अप्रस्तुतप्रशंसालङ्कार ... भङ्ग्या गम्यस्याभिधीयते' इति लक्षणात् स च विस्मृतमिवति ... नस्यापि ... रामजीवनाभाव प्रयोजकस्य सत्त्वेऽपि तदभाववर्णनात् विशेषोक्ति च मम गत

(ढ) मोहितास्मीति। आर्यपुत्रस्य रामस्य एतैः करुणप्रकारैर्दृष्ट्या शून्यस्यत्यादिर्वचनै वाक्यै मोहितास्मि मोहं प्रापितास्मि आत्मानं प्रति अनुरागदर्शनादानन्देन तस्य च निरतिशय शोककातरत्वबुद्ध्या दुःखेन च अहं मोहमुपगतेति भाव

(ण) एवमिति। हे वत्से सीते एवं त्वयोक्तं सत्यमिति स्वीकारोयमित्यर्थ।

३४। मोहितास्मीति सीतावाक्य समर्थयति नैता इति स्नेहार्द्रा स्नेहेन प्रेम्णा आर्द्री सिक्ता शोकदारुणा शोकेन दारुणा निष्ठुरा हृदयविदारका एता रामोक्ता वाच वाक्यानि न प्रियतमा न एकान्ततो हृद्या भवन्तीति भाव यत एता वाच सविषा विषयुक्ता मधुन क्षौद्रस्य धारा त्वयि श्च्योतन्ति क्षरन्ति यथा मधुधारा माधुर्यस्वभावत्वात् प्रियत्वादपि विषमिश्रतया सद्योविनाशिन्यो भवन्ति—तथा तव पत्युरिमा वाच अतिगाढप्रेमनिष्यन्दिन्य अपि दुःसहशोकाविर्भावकत्वात् तव हृदये कामपि वेदनां जनयन्त्य मोहं वितनितुमारभन्ते इति सरलार्थ। अत एवात्र बिम्बप्रतिबिम्बभावेन असम्भवद्वस्तुसम्बन्धरूपा निदर्शनालङ्कार। तथा स्नेहार्द्रा अपि शोकदारुणा इति विरोधाभासश्च।

(त) अयीति मया इति शोकव्यक्तियाया कर्तृपदम्। अयीति कोमलामन्त्रणे सम्बोधन खलु वाक्यालङ्कारे निश्चये वा

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः ।
तथैव तीव्रो हृदि शोकशङ्कु-
र्म्मर्माणि कृन्तन्नपि किं न सोढः ॥ ३५ ॥

[३५ । अन्तः प्रत्युप्तं तिरश्चीनम् अलातशल्यं यथा सविषः दंशश्च तथा तीव्रः, मर्म्माणि कृन्तन् हृदि निषक्तः शोकशङ्कुः मया किं न सोढः ॥ इत्यन्वयः ।]

सीता। एव्वं म्हि मन्दभाइणी पुणोवि आआससआरिणी अज्जउत्तस्स । (थ)

[(थ) एवमस्मि मन्दभागिनी पुनरप्यायासकारिणी आर्य्यपुत्रस्य । इति सम ।]

राम । एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मम संस्तुतबहुतरप्रियवस्तुदर्शनादुद्दामोऽयमावेगः * । तथाहि—(द)

(३५) यथेति। अन्तः हृदये प्रत्युप्तं निखातं तिरश्चीनं वक्रं अलातशल्यं ज्वलदग्निमुखं निर्भं दुःसहयन्त्रणाप्रदं शल्यं यथा, सविषः विषसम्पृक्तः अन्तः शरीरे विषविसर्पणम् इत्यर्थः । दंशः सर्पादिदंशनं यथा, तथा तद्वत् तीव्रः अन्यः मर्म्माणि जीवस्थानानि कृन्तन् छिन्दन् सन् हृदि हृदये प्रविष्टः शोकशङ्कुः निशितायसकीलसदृशः शोकः मया किं न सोढः अपितु सोढ एव। धर्म्मोपमा श्रौती। तथा शोकशङ्कुरिति रूपकं अर्थापत्तिश्चेति। तदिदेषां सङ्करः। उपेन्द्रवज्रेन्द्रवज्रमिश्रणादुपजातिवृत्तम् ।

(थ) एवमीति। मन्दः भागः मन्दभागः स अस्ति अस्याः इति मन्दभागिनी दुर्भाग्या पुनः भूयः अपि आर्य्यपुत्रस्य रामस्य आयासकारिणी क्लेशदायिनी भवामीति शेषः । मत्कृते एवासौ दारुणं दुःखमनुभवतीत्यर्थः ।

(द) एवमिति। एवं इत्थं, निष्कम्पस्तम्भितान्तःकरणस्यापि निर्व्विकारम् अचलं यस्मिन् तत् यथा स्यात्तथा स्तम्भितं पर्य्यवस्थापितं अन्तःकरणं हृदयं येन स तथोक्तस्तस्य बहुविषयसम्पादितधैर्य्यस्य इत्यर्थः । मे मम अयं आवेगः शोकक्षोभः संस्तुतबहुतरप्रियवस्तु-दर्शनात् संस्तुतानां परिचितानां बहुतराणां नानाविधानां बहूनां पदार्थानां हरितशाद्वल-चित्रकुरङ्गकुसुमादीनां दर्शनात् अवलोकनात् उद्दाम अनियन्त्रितः दुर्व्वार इति यावत्, जात इति शेषः ।

* अयायमावेग इति विद्यासागरधृत पाठः

लोलोल्लोलक्षुभितकरणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मयाधीयते तं तमन्तः।
भित्त्वा भित्त्वा प्रसरति बलात् कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः॥ २९ ॥

[२९। मया लोलोल्लोलक्षुभितकरणोज्जृम्भणस्तम्भनार्थं य यः यत्नः कथमपि अन्तः आधीयते। कोऽपि चेतोविकारः अप्रतिहतरयः तोयस्य ओघः सैकतं सेतुम् इव तं तं भित्त्वा भित्त्वा बलात् प्रसरति॥ इत्यन्वयः।]

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुक्खसंजोएण पप्फुरिदणिअदुःखं विअ आकम्पिदं मे हिअअं। (ध)

[(ध) एतेन आर्य्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंयोगेन प्रस्फुरितनिजदुःख-मिवाकम्पितं मे हृदयम्। इति क्रम।]

---

(२९) शोकस्य उद्दामत्वं दर्शयति—लोलोल्लोलेति। लोलोल्लोलक्षुभितकरणोज्जृम्भण-स्तम्भनार्थं लोलात् चञ्चलादुल्लोलं अतिचञ्चलं यथा तथा क्षुभितानि आलोडितानि व्याकुलानि यानि करणानि इन्द्रियाणि तेषाम् उज्जृम्भणस्य उद्रेकस्य उत्कृष्टचलनस्य इति यावत्, स्तम्भनार्थं निरोधार्थं; करण इत्यत्र करुण इति पाठे लोलोल्लोलं अतिचपलं यथा तथा क्षुभितः उद्विग्नः य. करुणः प्रियजनवियोगजन्यदुःखातिशय. तस्य उज्जृम्भणं अतिवृद्धिः तस्य स्तम्भनं निवारणं तदर्थम्। अतिप्रवृद्धस्य शोकावेगस्य निरोधार्थमित्यर्थः। मया अन्तः हृदये यो यो यावान् यत्नः प्रयासः कथमपि कष्टेन आधीयते क्रियते। कोऽपि अनिर्वचनीयप्रभावः दुर्वारप्रसर इत्यर्थः। चेतोविकारः हृदयावेगः। अप्रतिहतरयः अनिवारितवेगः तोयस्य जलस्य ओघः पूर. राशिरिति यावत्, सैकतं सिकतारचितं वालुकामयं सेतुं आलिम् इव तं तं यत्नं भित्त्वा भित्त्वा ध्वंसं सम्पाद्य विफलीकृत्य इत्यर्थः, बलात् प्रसह्य प्रसरति बहिर्व्याप्तो भवतीत्यर्थः। प्रिया-विरहदुःखस्य कथञ्चिदपि दूरीकरणार्थं सर्व्व एव मे प्रयत्नो व्यर्थो भवतीत्यर्थः। उत्कृष्टजलौघ-वेगनिरोधने सैकतसेतुबन्धनमिव उद्दामशोकावेगविजृम्भितकरणस्य स्तम्भने मे प्रयासः अकिञ्चित्-करो भवतीति भावः। अत्र तोयप्रवाहेण सह विकारस्य सेतुना च सह यत्नस्य साम्यादिः प्रत्ययात् उपमालङ्कारः, स च शोकस्तम्भनहेतौ सत्यपि तद्विरुद्धकार्य्यस्य भित्त्वा प्रसरणस्य निबन्धात् एवंविध-विशेषोक्त्यनुप्राणितः। मन्दाक्रान्ताछन्दः— 'मन्दाक्रान्ता म्भौ न्तौ त्गौ ग्समुद्रर्त्तुस्वराः।'

(ध) एदिणेति। एतेन दृश्यमानेन दुर्वारदारुणारम्भेण, दुर्वारः निवारयितुमशक्यः अतएव दारुणः तीव्रः आरम्भः उपक्रमः यस्य स तथोक्तः; तेन आकस्मिकदुःखसम्पर्केण

वासन्ती । [स्वगतम्] कष्टमभ्यापन्नो देवस्तदन्यतः क्षिपामि तावत् । [प्रकाशम्] चिरपरिचितानामेतेषां जनस्थानभागानामवलोकनेन आत्मानमानन्दयतु † देवः । (न)

राम । एवमस्तु (प) । [इति उत्थाय परिक्रामति ।]

सीता । सन्दोवणाओ ज्जेव दुक्खस्स पिअसहीविणोदणोवाआओ त्ति मण्णेदि । (फ)

[(फ) सन्दीपना एव दुःखस्य प्रियसखीविनोदनोपाया इति मन्यते । इति सम्]

वासन्ती । देव, देव !

इत्यर्थः । दुःखसंक्षोभेण शोकावेगेन । प्रस्फुरितनिगूढदुःखं प्रस्फुरितं उत्तरलीभूत नवीभूय प्रकाशितमिति यावत्, दुःखं यस्य तत् तथाक्तं मे मम हृदयं आकम्पितं इव वेपते इव । अत्रोत्प्रेक्षालङ्कारः स च पदार्थहेतुककाव्यलिङ्गानुप्राणित ।

(न) कष्टमिति । देव कष्टं क्लेशं अभ्यापन्नः प्राप्त । अथवा कष्टं कृच्छ्रं दुःखम् । देवः रामः अभि सर्व्वताभावेन आपन्न नितान्तदुःखपीडनात् विपन्न इत्यर्थः । तत् तस्मात् रामस्य दुःखक्षोभ-संभितत्वाच्चेतो अन्यत अन्यस्मां दिशि, अन्यस्मिन् विषये वा, क्षिपामि आक्षयामि, रामस्य दृष्टिमिति शेष । अथवा क्षिपामि रामम् अन्यत्र नयामि । तावत् इति वाक्यालङ्कारे । प्रकाश यथा स्यात्तथा आहेति शेष । 'सर्व्वश्राव्य प्रकाशं स्या'दिति दर्पण । चिरपरिचितानां पूर्व्वसंस्तुतानां एतेषां पुरोवर्त्तिनां जनस्थानभागानां जनस्थानस्य एकदेशानां अवलोकनेन दर्शनेन आत्मानं चित्तं विनोदयतु आनन्दयतु इत्यर्थ ।

(प) एवमिति । एवमस्तु, त्वया यदुक्तं तदेव भवतु । तवाभिमतमेवाहं करोमीत्यर्थ । इति एवमुक्त्वा परिक्रामति पादविक्षेप करोति ।

(फ) सन्दीपणा ज्जो इति । प्रियसखीविनोदनोपाया प्रियसख्या वासन्त्या विनोदनस्य आनन्दोत्पादनस्य उपाया अथवा जनस्थानदर्शनादिप्रकारा इत्यर्थ । दुःखस्य कष्टस्य सन्दीपना एव उद्दीपका एव भविष्यन्ति इति शेष । मया इति मन्यते । अथवा जनस्थानादर्शनं रामस्य चित्तविनोदनोपाय इति यत् प्रियसखी मन्यते तत्तु तस्या भ्रान्तिरेव, पूर्व्वव्यापारस्मृत्युद्बोधकत्वात् तदवलोकनं दुःखजनकमेवास्य भविष्यतीति भाव । अस्मिन् पक्षे "प्रियसखी" इति कर्त्तृपदम् । अत्र विनोदनोपायेभ्य दुःखसन्दीपनरूपविरुद्धकार्य्योत्पत्तेर्विषमालङ्कार ।

---

† चिरपरिचितानेतान् जनस्थानभागानवलोकयतु देव इति पाठान्तरम्

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीरोधसि । ‡
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥ ३७ ॥

[३७ । त्वं तन्मार्गदत्तेक्षणः अस्मिन् एव लतागृहे अभवः । सा गोदावरीरोधसि हंसैः कृतकौतुका चिरं अभूत् । आयान्त्या तया त्वां परिदुर्मनायितमिव वीक्ष्य कातर्यात् अरविन्दकुड्मलनिभः मुग्धः प्रणामाञ्जलिः बद्धः ॥ इत्यन्वयः ।]

(३७) वासन्ती रामचित्तविनोदनाय तस्य दृष्टिमन्यत्र चालयितुमभिप्रैति—अस्मिन्निति । त्वं तन्मार्गदत्तेक्षणः तस्याः सीतायाः मार्गे पथि दत्ते निक्षिप्ते ईक्षणे नेत्रे येन स तथोक्तः । कदा सा आगमिष्यति इत्यौत्सुक्येन तस्याः प्रत्यागतिपथं विलोकयन् अस्मिन् एव सम्मुखवर्त्तिन्येव नान्यस्मिन्नित्येवकारार्थः । लतागृहे वल्लीनिकुञ्जे अभवः आसीः । अथवा अस्मिन्नेव लतागृहे तन्मार्गदत्तचक्षुस्त्वम् अभवः इत्यन्वयः । सा तु गोदावरीं गतायाः सीतायाः विलम्बनसहमानः सदागमनप्रतीक्षया तत्पथप्रेरितनेत्र आसीरित्यर्थः । किन्तु सा जानकी गोदावरीरोधसि गोदावर्य्याः नद्याः रोधसि तीरे 'कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु' इत्यमरः । हंसैः कृतकौतुका कृतं कौतुकं जलक्रीडादिना कौतूहलं यस्याः सा तथोक्ता सती । 'कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहल'मिति चामरः । 'रम्यवस्तुसमालोके लोलता स्यात् कुतूहल'मित्यालङ्कारिकाः । चिरं दीर्घकालम् अभूत् स्थितवती, हंसानां नानाविधक्रीडावलोकनकौतुकात् विलम्बते इत्यर्थः । ततः आयान्त्या गोदावरीतीरादागच्छन्त्या तया सीतया त्वां भवन्तं परिदुर्मनायितमिव परिदुःखितं मनो यस्य स परिदुर्मनाः स इवाचरति इति परिदुर्मनायितः 'कर्तुः क्यङ् सलोपश्चे'ति क्यङन्तात् क्तप्रत्ययः । कालविलम्बात् खेदाकुलितचित्तमिव वीक्ष्य दृष्ट्वा कातर्य्यात् दुःखाकुलचित्ततया, विलम्बवशात्त्वत्कोपाशङ्काजनितभयविह्वलतया वा । निजापराधं बुद्ध्वा अतिदीनभावेनेत्यर्थः । अरविन्दकुड्मलनिभः पद्मकोरकसदृशः मुग्धः मनोहरः । प्रणामाञ्जलिः प्रणामाय रामस्य दुःखजननापराधात् स्वापकर्षज्ञापनाय इत्यर्थः, अञ्जलिः करतलद्वयसंयोजनरूपः बद्धः रचितः कृतः । उक्तञ्च 'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी' । अजानत्या मया विलम्बं कृत्वा अपराधः कृतः, तं क्षमस्व नाथ इति कृत्वा शिरसि अञ्जलिपुटं न्यधादित्यर्थः । अस्मिन्नेव इत्येवकारेण स्थानान्तरव्यपोहनप्रत्ययात् परिसंख्या, परिदुर्मनायितमिव इत्यत्र उपमानगर्भा उत्प्रेक्षा क्यङः उपमावाचकत्वात् इवशब्दस्य च सम्भावनार्थत्वात् । निभशब्दादुपमान्तरञ्च । स्वभावोक्तिरित्यपि परे । शार्दूलविक्रीडितं वृत्तम् ।

‡ हंसैरति इति पाठान्तरम् ।

सीता । दारुणासि सहि वासन्दि! दारुणासि, जा एदेहिं हिअअमम्मगूढसल्लघट्टणेहिं पुणो पुणो मं मन्दभाइणीं अज्जउत्तं वि सन्दावेसि । (ब)

[(ब) दारुणासि सखि वासन्ति । दारुणासि, या एतैर्हृदयमर्मगूढशल्यघट्टनैः पुनः पुनर्मां मन्दभागिनीमार्यपुत्रमपि सन्तापयसि । इति छाया ।]

राम: । अयि चण्डि जानकि ! इतस्ततो दृश्यसे इव, न चानुकम्पसे । (भ)

हा हा देवि ! स्फुटति हृदयं ध्वंसते * देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥ ३८ ॥

[३८ । हा हा देवि ! हृदयं स्फुटति, देहबन्धः ध्वंसते, जगत् शून्यं मन्ये, अविरतज्वालम् अन्तर्ज्वलामि । सीदन् विधुरः अन्तरात्मा अन्धे तमसि मज्जतीव । मोहः विष्वक् स्थगयति, मन्दभाग्यः कथं करोमि ॥ इत्यन्वयः ।]

(इति मूर्च्छति ।)

(ब) दारुणा इति । हृदयस्य मर्मणि जीवस्थाने इत्यर्थः, यत् गूढं निखातं शल्यं शङ्कुः तत्घट्टनैः एतैः तत्तत्स्थानप्रदर्शनैः पुनः पुनः मां आर्यपुत्रञ्च सन्तापयसि । अतएव त्वं दारुणासीति मयोच्यते । विरक्तिर्दैन्ये ।

(भ) राम । चण्डीति । अयि चण्डि, अतिमात्रकोपने, कठिने इत्यर्थः । 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः । एतेन ईदृशीमवस्थां गतेऽपि मयि कथं न ते अकारणपरित्यागजन्यकोपोपशम इति व्यज्यते । जानकि जनकपुत्रि ! जानकीत्युक्त्या परमदयालुजनकराजपुत्र्यास्तवेदं निष्ठुरत्वं नोचितमिति व्यज्यते । मया पुनस्त्वं दृश्यसे त्वन्तु मयि न अनुकम्पसे वाचादिभिः मधुरालापादिभिः शोकविधुरं मां न सान्त्वयसि अतस्त्वमतीवकोपना इत्यर्थः । प्रजारञ्जनानुरोधेन मया त्वं निर्वासिता त्वन्तु तदपराधेनैव मां प्रति कोपकलुषा भवसीति न युक्तम् इति भावः । भागीरथीवरप्रभावात् निखिलजनादृश्यापि सीता रामेण 'दृश्यसे' इति यदुक्तं तत् नियतसीताभावचिन्तया भ्रम भ्रान्तिरेवेति बोद्धव्यम् । अतएव इवशब्देन सम्भावना कृता ।

(३८) हा हेति । हाहेति खेदसूचकमव्ययम् । हे देवि सीते हृदयं – स्फुटति

---

* ध्वंसती इति विद्यासागरधृतः पाठः ।

सीता। हद्धी हद्धी पुणोवि पमूढो अज्जउत्तो। (म)

[(म) हा धिक्! हा धिक्! पुनरपि प्रमूढ आर्य्यपुत्रः। इति सम्।]

वासन्ती। देव! समास्ससिहि, समास्ससिहि।

सीता। हा अज्जउत्त! मं मन्दभाइणीं उद्दिसिअ सअलजीअलोअमङ्गलाधारस्स जम्मलाहस्स दे वारं वारं संसइदजीविददारुणो दसापरिणामो त्ति हा हदम्हि। (य)

[(य) हा आर्य्यपुत्र! मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारस्य ते जन्मलाभस्य वारं वारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि। इति सम्।]

(इति मूर्च्छति।)

तव शोकेन विदीर्य्यते। देहबन्ध शरीरावयवसन्धिस्थानं संसते विशीर्णो भवति; मांसपेश्यादिसहितानि हस्तपदादीनि शिथिलबन्धानि गलितानीव भवन्तीत्यर्थः। इदं जगत् भुवनं शून्यं विजनं सर्वथा वास्तवपदे शून्यपदस्य अभावानुयोगिरूपार्थे प्रसिद्धत्वात्। मन्ये अनुभवामि। अविरतज्वालं अविरता अविश्रान्ता ज्वाला शिखासन्ततिर्यस्मिन् कर्म्मणि तद्यथा स्यात्तथा अन्तःहृदये ज्वलामि सन्तापमनुभवामीत्यर्थः। अविरतज्वालमितिपदं जगदित्यस्य विशेषणं वा। इदं जगत् अविरतज्वालं अग्निपरीतमिव मन्ये इत्यर्थः। तथा सीदन् क्लेशपरम्परानुभवेन नितरां दीन विधुर शोकेन कातर मे मम अन्तरात्मा जीव अन्ध अन्धयति अन्धं करोति यत् तत् अन्धं तस्मिन् अन्धे अन्धतरसे गाढ़े इति यावत्, तमसि अन्धकारे मज्जतीव लीयते इव, शोकान्धकारावच्छन्नविकाशो मे जीवात्मा इति भाव। तथा मोहः मूर्च्छा विष्वक् समन्तात् स्थगयति आच्छादयति। 'समन्ततस्तु परितः सर्व्वतो विष्वगित्यपी'त्यमरः। मम चैतन्यशक्तिरोधापनेन वस्तुदर्शनं प्रतिबध्नातीत्यर्थः। मन्दभाग्यः दुर्भाग्यः अहं कथं केन प्रकारेण करोमि प्राणधारणमिति शेषः। कथं किं करोमीति वा, नितान्तासमर्थतया किमपि प्रतिकर्त्तुं न शक्नोमीत्यर्थः। यद्वा कथं करोमि किं करोमि हृदयस्फोटादि निवारयामि, उत तदानयनार्थं लोकाननुनयामि, अथवा तन्निग्रहस्य त्यागमेष्यामि इति भाव। अत्र एकस्मिन् शोकरूपकार्य्ये बहूनां कारणानां सद्भावात् समुच्चयालङ्कारः, एवं मन्दभाग्यः कथं करोमीति वाक्यार्थं प्रति पूर्वपूर्ववाक्यार्थानां हेतुत्वेनोपादानात् काव्यलिङ्गालङ्कारः। अन्धे तमसि मज्जतीव, जगदिदं शून्यं मन्ये इत्युभयत्र वाच्योत्प्रेक्षा इति एतेषां सङ्करः। मन्दाक्रान्ताछन्दः।

(म) हद्धीति। पुनरपि भूयोऽपि आर्य्यपुत्रः रामः प्रमूढः मोहं प्राप्तः।

(य) अज्जउत्तेति। मन्दभागिनीं दुर्भाग्यां माम् उद्दिश्य लक्षीकृत्य सकलजीवलोक-

तमसा। वत्से! समाश्वसिहि समाश्वसिहि, पुनस्त्वत्पाणिस्पर्श एव सञ्जीवनोपायो रामभद्रस्य। * (र)

वासन्ती। कथमद्यापि नोच्छ्वसिति, हा प्रियसखि सीते! क्वासि, सम्भावयात्मनो जीवितेश्वरम्।

सीता। (ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति) (ल)

वासन्ती। दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः। (व)

राम। आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून्।

मङ्गलाधारस्य सकल जीवलोक जगत् तस्य यन्मङ्गल तस्य आधारस्य आश्रयस्य सर्व्वदा निखिलमाविना हितानुष्ठानात् त्रिभुवनशुभकरस्य इत्यर्थ । तै तव, जन्मलाभस्य लब्धस्य जन्मन इदमिति भावो द्रव्यवत् प्रकाशते इति न्यायात्। भाव भाव भूयोभूय । संशयितजीवित दारुण जीवति नवेति सन्देहकोटिमापन्न जीवितं प्राणा यस्मिन् स तथोक्त अतएव दारुण भयङ्कर, विशेषणयो अन्यतरस्य विशेष्यत्वविवक्षया कर्म्मधारयनिर्व्वाह । दशापरिणाम दशाया अवस्थाया परिणाम विपाक परिवर्त्तनमिति यावत्। इति हेतो माशुद्धिस्य पुन पुन मूर्च्छोपगमात्मेवोरित्यर्थ । हता विनष्टा अस्मि भवामि । प्राणेश्वरस्य रामस्य अर्थ माश उभयकरमोऽनुत्पादयता दैवेनाहं नाशितास्मीत्यर्थ ।

(र) वत्सेति। पुन भूय पूर्व्ववदित्यर्थ, त्वत्पाणिस्पर्श तव पाणिना करेण, पाणिर्ना स्पर्श रामाङ्गे संयोग एव सञ्जीवनोपाय सञ्जीवनस्य प्रत्युज्जीवनस्य उपाय हेतुरित्यर्थ । तव करस्पर्शेनैव रामस्य मूर्च्छापगमिष्यतीत्यर्थ ।

(ल) कथमिति। अद्यापि अस्मिन् क्षणेऽपि कथ केन हेतुना न उच्छ्वसिति संज्ञां लभते। क्वासि, आत्मन. स्वस्य जीवितेश्वरं प्राणनाथं रामं सम्भावय सम्भावित कुरु। करस्पर्शेन चेतय इत्यर्थ.। सीता प्राक् तमानया इति अध्याहार्य्यम्। ससम्भ्रमं सत्वर उपसृत्य रामसान्निध्यं गत्वा हृदि ललाटे च स्पृशति रामस्येति शेष ।

(व) दिष्ट्या ति। दिष्ट्यति हर्षसूचकमव्यय, प्रत्यापन्नचेतन प्रत्यापन्ना पुन प्राप्ता चेतना संज्ञा येन स तथोक्त, प्रतिलब्धसंज्ञ रामभद्र रामचन्द्र जात इति शेष । विदितप्रयत्नमन्दिरेव यत् राम, सचेतनोऽभवत्तदस्माकं महत् भाग्यमिति भाव ।

* जीवनोपाय इति विद्यासागरधृत पाठ

संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरविधं तनोति मोहम् ॥ १८ ॥

[१८। संस्पर्श पुनरपि अकस्मात् अन्तर्वा बहिरपि वा शरीरधातून् अमृतमये प्रलेपे आलिम्पन् इव जीवयन् आनन्दात् अपरविध मोह तनोति ॥ इत्यन्वय.।]

(आनन्दनिमीलिताक्ष एव) सखि वासन्ति! दिष्ट्या वर्द्धसे। (अ)

वासन्ती। देव कथमिव? (ब)

राम। सखि! किमन्यत्, पुनः प्राप्ता जानकी। (स)

---

(१८) आलिम्पन्निति। संस्पर्श कोऽपि अनिर्वचनीय करसंयोग। पुनरपि भूयोऽपि अकस्मात् अतर्कितं यथा स्यात्तथा अन्तर्वा अन्तःस्थितान् बहिरपि वा बहिःस्थितान् अपि सकलानेव शरीरधातून् "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातव" इति सुश्रुत। शरीरस्य देहस्य धातून् पुष्टिजनकान् तस्य दोषमज्जास्थिप्रभृतीन् देहोपचयकरपदार्थान् अमृतमये सुधाद्रव्ये अमृतस्वरूपेरित्यर्थ, चिन्मय इत्यादिवदत्र स्वार्थिको मयट्। प्रलेपे प्रकृष्टो लेप लेपो प्रलेपा तैः लेपसाधनद्रव्ये लेपने आलिम्पन् इव अमृतरसधाराभिर्निषिञ्चन् इव जीवयन् समुल्लासयन् चैतन्यं सम्पादयन्नित्यर्थ। आनन्दात् आह्लादसमुत्पादनात्, हेतौ ल्यब्लोपे वा पञ्चमी। अपरविध अपरा अन्या विधा प्रकारो यस्य स तथोक्त तं अन्यप्रकार दु खजन्य मूर्च्छातिरिक्तं मोह मूर्च्छा जडतां तनोति विस्तारयति कुरुते इत्यर्थ। अत्र मोहस्यापरविधत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कार। आलिम्पन्निवेति क्रियोत्प्रेक्षा च, तदनयो. सङ्करः। प्रहर्षिणीवृत्तम्, 'प्रहर्षिणी म्नौ ज्रौ ग् त्रिकदशकौ।'

(अ) आनन्देति। आनन्दनिमीलिताक्ष एव आनन्देन अश्रुजन्येन आह्लादेन निमीलिते मुद्रिते अक्षिणी नेत्रे यस्य स तथोक्त सन् एव, राम. आहेति शेष। दिष्ट्या वर्द्धसे भाग्येन वृद्धिं गतासि। अवस्थाविशेषविशेषस्य प्राप्तौ नाटकादौ 'दिष्ट्या वर्द्धसे' इत्यादि प्रयोग दृश्यते। अत्र हृदि ललाटे चैव्यादिना दृष्टाभिप्रायानुसरणात्मकाक्षेप एव।

(ब) देव इति। हे देव। कथमिव, कथमहं दिष्ट्या वर्द्धे। यदुक्तं त्वया दिष्ट्या वर्द्धसे इति तस्य क अभिप्राय इत्यर्थ.।

(स) किमन्यदिति। अन्यत् अपरं किं प्रष्टव्यमित्यर्थ। रामः खलु हृदि ललाटे च सीतायाः करस्पर्शेन सीतागमनमिति निश्चित्य हर्षप्रकर्षात् वासन्तीं प्रति दिष्ट्या वर्द्धसे इत्युक्तवान्। वासन्ती पुन तामपश्यन्ती कथं रामवचनं प्रतीयात्, अतएव देव कथमिवेत्युक्तवत् इति सन्दर्भार्थः।

वासन्ती। अयि देव रामभद्र! क्व सा?

राम.। (अर्धसुखमभिनीय) पश्य ननु इयं पुरत एव। (ङ)

वासन्ती। अयि देव! किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं मां दहसि। (च)

सीता। ओसरिदुमिच्छामि, एसो उण चिरसब्भावसोम्मसीअलेण अज्जउत्तप्फंसेण दीहदारुणं वि सन्दावं झत्ति हरन्तेण * वज्जलेवोवणद्धो विअ सिज्जन्तपोसहविपज्जत्थो वेवदि अवसो विअ मे हत्थो। (छ)

[(छ) अपसर्तुमिच्छामि, एष पुनश्चिरसद्भावसौम्यशीतलेनार्यपुत्रस्पर्शेन दीर्घदारुणमपि सन्तापं झटिति हरता वज्रलेपोपनद्ध इव सिध्यत्स्वेदविपर्यस्तो वेपते अवश इव मे हस्तः। इति छाया।]

(ङ) पश्येति। ननु भो वासन्ति! त्वं पश्य, इयं जानकी पुरत एव, ननु दूरतः इत्येवकारार्थः। वर्त्तते इति शेषः।

(च) अयीति। मर्मच्छेददारुणैः, मर्म्मणः जीवनस्थानस्य छेदेन कर्त्तनेन निरतिशयव्यथनेन इति यावत्, दारुणाः दुःसहाः तैः, येषां श्रवणेन हृदयादिजीवनस्थानानि छिन्नानीव भवन्ति तैरित्यर्थः। यद्वा मर्म्मच्छेदवत् हृदयाद्यवयवघातवत् दुःसहैः। एभिः 'पुन प्राप्ता जानकी'त्येवमादिभिः प्रलापैः अनर्थकवाक्यैः प्रियसखीदुःखदग्धामपि प्रियसख्याः सीतायाः दुःखेन वियोगजन्येन कष्टेन दग्धां सन्तप्तामपि मन्दभागिनीं दुर्भगां मां किमिति कथमेव पुनः पुनः दहसि सन्तापयसि। सीता अत्र न विद्यते, तथापि 'नन्वियं पुरत एव' इत्यादि प्रलापश्रवणात् तस्याः विरहदुःखं द्विगुणीभूय वर्द्धते इति भावः।

(छ) ओसरिदुमिति। अपसर्त्तुमिच्छामि अन्यतो गन्तुम् अभिलषामि चिरसद्भावसौम्यशीतलेन चिरसद्भावः चिरं सद्भावः सुप्सुपेति समासः, दीर्घकालानुरागः तेन सौम्यः मधुरः शीतलश्च तेन आर्यपुत्रस्पर्शेन भर्त्तृपरामर्शेन दीर्घदारुणमपि दीर्घश्चासौ दारुणश्चेति खञ्जकुब्जादिवत् समासः। दीर्घः बहुकालव्यापी अतएव दारुणः सुदुःसह इति यावत्, तं तथोक्तं सन्तापं विरहव्यथां झटिति शीघ्रं स्पर्शसमकालमेवेत्यर्थः। हरता दूरीकुर्व्वता, सता। वज्रलेपोपनद्ध इव दीर्घकालस्थायित्वात्तुल्यद्रव्यविशेषेण उपनद्ध

---

* सीहवन्तेण इति क्वचित् पाठः।

राम । सखि ! कुतः प्रलापाः ? (ख)

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधर-

चिरं स्वेच्छास्पर्शैरमृतशिशिरैर्यः परिचितः । *

सीता । अज्जउत्त ! सो ज्जेव दाणिं सि तुमम् ? (ग)

[(ग) आर्यपुत्र । स एव इदानीमसि त्वम् ? इति छाया ।]

राम । स एवायं तस्यास्तुहिनकरकौपम्यसुभगो †

मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ ४० ॥

[४० । पूर्वं परिणयविधौ कङ्कणधर यः गृहीतः, अमृतशिशिरैः स्वेच्छास्पर्शैः यः चिरं परिचितः, तुहिनकरकौपम्यसुभगः ललितलवलीकन्दलनिभः, स एव अयं तस्याः पाणिः मया लब्धः ॥ इत्यन्वयः ।]

(इति गृह्णाति ।) (घ)

इव बद्ध इव संयोजित इवेति यावत्, मे मम हस्तः करः स्थितम् साध्विसभावोद्रेकात् घर्माक्तः सन् निःसहविपर्यस्तः निःसहः कातरः यथा आत्मना विपर्यस्तः जडतामापन्नः स्वभावप्रच्युत इत्यर्थः । रामशरीरोपरिपतित इति वा, अतएव अवशः इव स्पन्दनादि-स्वव्यापारे अक्षमः सन् इव वेपनं कम्पते । वज्रलेपलक्षणन्तु हठसंहितायां द्रष्टव्यम् । उक्तिरियं स्वगतवद्बोध्यम् ।

(ख) किमिति मर्मच्छेददारुणैरेभिः प्रलापैरिति वासन्तीवाक्यस्य उत्तरमाह—सखि कुत इति । कुतः कस्मात् हेतोः प्रलापाः । 'पुनःप्राप्ता जानकी'त्यादि मे वचनानि त्वया कथम् अनर्थकानि मन्यन्ते । न हि प्रलपामि सत्यमेव पुनः प्राप्ता जानकीति भावः ।

(ग) गृहीत इत्यादि श्लोकार्द्धोक्तविशेषणसाम्यात् सीता रामरूपमर्थं वृत्वा आह—अज्जउत्तेति । इदानीम् अधुनापि त्वं स एव असि बाल्ये मां प्रति ये स्नेहानुरागादयः आसन् अधुनापि तव तथैव विद्यन्ते न किञ्चिदन्यत् लक्ष्यते, मम तु दुर्भाग्यादेवेयं दुर्दशा वर्तते । अत्र ते नास्ति कोऽपि दोषलेश इति भावः ।

(४०) पुनःप्राप्ता जानकीति स्ववचनस्य सत्यतां प्रतिपादयितुमाह—गृहीत इति । पूर्वं पुरा बाल्यकाले इति यावत्, परिणयविधौ विवाहकर्मणि । कङ्कणधरः कङ्कणस्य मङ्गल-सूत्रस्य धरः धृतवैवाहिकमङ्गलसूत्रः । 'कङ्कणं करभूषायां सूत्रमङ्गलवीरपी'ति मेदिनी ।

* सुधासूतेः पादैः इति च क्वचित् ।

† तुहिनगिरिवारीव्य इति पाठभेदः ।

सीता। हद्धी हद्धी अज्जउत्तप्फंसमोहिदाए प्पमादो क्खु मे संवुत्तो। (छ)

[(छ) हा धिक्। हा धिक्। आर्य्यपुत्रस्पर्शमोहिताया प्रमाद खलु मे संवृत्त। इति छम्।]

राम। सखि वासन्ति। आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि, तत्त्वं तावदेना धारय। (च)

य पाणि कर मया गृहीत धृत। तथा य पाणि कर अमृतशिशिरे सुधावदतिशीतले तथा सुखकरे सन्तापहरेव इति यावत्, स स्पर्शे खलु इच्छया इच्छामात्रेण इत्यर्थ। ये स्पर्शा ते अनियन्त्रणे स्पर्शैरिति यावत्। चिर दीर्घकाल व्याप्य परिचित सस्तुत आसी दिति अर्थ। सीताया पाणिग्रहण राम विशेषेण अवगत इति भाव।

प्रकारान्तरेण राम स्वाभिमतार्थमुपसंहरति—स एवायमिति। तुहिनकरकौपम्यसुभग तुहिनानां हिमानां करकाणां वर्षोपलाना च यत् औपम्य सादृश्य 'अवश्यायस्तु नीहार स्तुषारस्तुहिन हिमम्। वर्षोपलस्तु करका' इति अमर। तेन सुभग सुन्दर शीतल-त्वोपमत्वात् सन्तापहर सुखस्पर्श इति यावत्। तथा, ललितलवलीकन्दलनिभ ललितेन सुकुमारेण लवल्या लताविशेषस्य कन्दलेन नवाङ्कुरेण सदृश। निभसमाद्य। 'कन्दल विद्यु कपालेऽप्युपराग नवाङ्कुरे' इति मेदिनी। अयम् एव स एव पूर्वपरिचित एव मत्करः स्पर्शव्यापारार्थ। तस्याः सीतायाः पाणिः हस्त मया लब्ध गृहीत। अनुभूतपूर्वस्पर्श हस्तादिलक्षणयुक्त वाम अद्य सीताया एव कर मया लब्ध इत्यर्थ। अत्रोपमालङ्कार। पूर्वार्धे एकार्थाभिधानात् सीतापाणिरामहस्तयोः कार्यागमनादर्थेन च। 'प्राप्ते सभावादिकार्थे संयो-ज्यैकार्थभावन'मिति लक्षणात्। शिखरिणी वृत्तं 'शिखरिणी रसी नसौ भलौ गस्तुद्रा', इति लक्षणम्।

(च) सखीति। राम इति उक्त्वा सीताया कर गृह्णाति अस्त।

(छ) हेति आर्य्यपुत्रस्पर्शमोहिताया आर्य्यपुत्रस्य स्पर्शेन मोहिताया विलुप्त संज्ञाया, सात्त्विकभावोदयेन मोहमुपगताया मे मम प्रमाद अनवधानता संवृत्त जात। अधुना अपहिता विलापे स्मृयामि तदा आर्य मम कर धर्तु प्रस्थ यास्यतीति भाव। 'प्रमादोऽनव-धानता'ऽमर। प्रमाद अनिष्टमिति वा, अतः आर्य्यपुत्रभूतलताया मे अपहरणमस्य जातमिति।

(च) सखीति। आनन्दनिमीलितेन्द्रिय आनन्देन सीतास्पर्शजन्य नतानि

वासन्ती। कष्टमुन्माद एव। (छ)

सीता। (ससम्भ्रममाक्षिप्यापसर्पति।) (ज)

राम। हा धिक् प्रमादः, हा धिक् प्रमादः। (झ)

करपल्लवः स तस्याः सहसैव जडो जडात् परिभ्रष्टः।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन्॥ ४१॥

[४१। जड प्रकम्पी स्विद्यन् तस्या करपल्लव, जडात् परिकम्पिन स्विद्यत मम करात् सहसा परिभ्रष्ट॥ इत्यन्वय।]

मुद्रितानि स्वस्वविषयग्रहणे असमर्थानि इन्द्रियाणि करचरणादीनि यस्य स तथोक्त, अहं साध्वसेन भयेन, यद्वा हर्षातिशयसमुद्भूतेन वैक्लव्येन। प्रकारजेन भयेन इति वा। 'भीतिर्भी साध्वसं भय'मित्यमर। बहुकालात् पर भाग्येन मया सीता प्राप्ता यदि सा पुनरपसरेदिति भिया इत्यर्थ। परवान् परतन्त्र अभिभूत अस्मि भवामि। "परतन्त्र पराधीन परवा-न्नाथवानपी"त्यमर। तत् तस्मात् भयाभिभूतेन मया दृढं धर्त्तमशक्तत्वाद्धेतो एना मया शिथिलभावेन धृता सीता त्वं धारय दृढम् आदरात्। बहुकालात् पर दुर्लभ प्रियास्पर्शसुख-मनुभवतो मे सर्व्वाण्येव इन्द्रियाणि नितरामवशानि संवृत्तानि तस्मात् नाहं प्रियतमां धार-यितुमलमस्मि इति भाव।

(छ) कष्टमिति। उन्माद एव मतिभ्रम एव जात रामस्येति शेष। अतएव कष्टम् एतादृग्धैर्य्यवतोऽप्यस्य यत् उन्मत्तता तदतीव दुःखाय इति भाव। उन्मत्तो यथा अप्रत्यक्षी-भूतमपि जन प्रत्यक्षवद्वदति तथायमपि सर्व्वथासम्भावितागमनामपि सीतां प्रत्यक्षीकृत्येव स एवाय पाणिस्तस्या इत्यादि वाक्य व्याहरतीति उन्माद एवास्य प्रकाश्यते इति।

(ज) ससम्भ्रममिति। ससम्भ्रमं सत्वरम् आक्षिप्य रामधृतं करं निरस्य अपसर्पति दूरं गच्छति सीतेति शेष.।

(झ) हा धिगिति। हा धिक् इत्यव्ययम् आतिशय्ये विरक्तिं। प्रमाद' ममैवानवधान-तेत्यर्थ। अन्यथा कथं करमाकृष्यापसर्त्तुं शक्नुयादिति भाव।

(४१) स्वीयप्रमादमेव समर्थयितुमाह—करपल्लव इति। सर्व्वत्र सात्त्विकभावोदया दिति हेतुरवगन्तव्य। जड अवश व्यापारयितुमशक्य' प्रकम्पी अत्यर्थं कम्पमान, स्विद्यन् घर्म्माक्त तस्या सीताया स' धृतपूर्व्वः करपल्लव, करकिसलय जडात् अवशात् दृढभावेन ग्रहणाक्षमात् प्रकम्पिन अतिशयं वेपमानात् स्विद्यत स्वेदाक्तात् मम करात् सहसा हठात् परिभ्रष्ट विच्युत स्खलित इति यावत्। अनेन श्लोकेन उभयोरपि समानः सात्त्विकविकार

सीता। हद्धी हद्धी अज्जवि अणवत्थिदत्थिमिदमूढघुम्मन्तमणो य पज्जवत्थवेदि अत्ताणअं। (ञ)

[(ञ) हा धिक् हा धिक्। अद्यापि अनवस्थितस्तिमितमूढघूर्णमनो न पर्यवस्था पयत्यात्मानम्। इति छाया।]

तमसा। [सखेदहासकौतुक निर्वर्ण्य]। (ट)

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा।
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव॥ ४२॥

[४२। वत्सा प्रियस्पर्शेन सस्वेदरोमाञ्चितकम्पिताङ्गी मरुन्नवाम्भःप्रविधूतसिक्ता स्फुटकोरका कदम्बयष्टि इव जाता॥ इत्यन्वयः।]

प्रादुर्भूत इत्यवगम्यते। अत 'स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मता' इति सात्त्विका गुणा। अत करस्य परिरम्भणं प्रति जड़त्वादीनां हेतुत्वावगमात् काव्यलिङ्गमलङ्कार। परस्परस्पर्शेन द्वयोरपि सात्त्विकभावो जात इति वस्तुना वस्तुध्वनि। आर्य्या जाति।

(ञ) हद्धीति। अद्यापि अधुनापि अनवस्थितस्तिमितमूढघूर्णमन अनवस्थिते चञ्चले करस्पर्शनात् व्याकुलतया अस्थिरे। स्तिमिते निष्पन्दे मूढे अलसे विषयग्रहणासमर्थे क्वापि दिशि सीता द्रक्ष्यति निर्णेतुमक्षमे इति यावत्। घूर्णती सीताञ्च दर्शयितुमत आवर्त्तमाने मनसे मनः यस्य स तथोक्तः सन् आत्मान चित्त न पर्यवस्थापयति प्रकृतिस्थं कर्तुं न शक्नोति। मदलम्भस्य पुनरलाभात् रामस्य मनः कदाचिच्चञ्चलं कदा वा निश्चलं कदाचिद्वा मूढे विषयग्रहणासमर्थे कदाचिद्वा आवर्त्तमाने जाते इति भाव। युगपत् अतसूचा मनसावस्थानासम्भवात् अवमिदंन तनुमाविश्वा बोध्य।

(ट) सखेदेति। स खेदेन प्रेम्णा हासेन कौतुकेन हर्षेण च सह वर्त्तमानं यथा तथा निर्वर्ण्य सीतां दृष्ट्वा आहेति शेष। कन्यासदृशाया सीताया दुःखदर्शनात् खेद, सीता स्वयमेव रामाङ्गं स्पृष्ट्वा करमाकष्टमपसरतीति हास, पुन स्पर्शनेच्छायां सत्यामपि न शक्नोतीति कौतुकम्, एवं तमसाया स हासकौतुकानि युगपज्जातानि इति बोध्यम्।

(४२) तमसा सीतायाकारमाविर्भावमवलोक्य निर्दिशति—सस्वेदेति। वत्सा जानकी प्रियस्पर्शसुखेन प्रियस्य भर्त्तु रामस्य स्पर्शेन यत् सुखम् आनन्द तेन हेतुना सस्वेदरोमाञ्चित-कम्पिताङ्गी स्वेदो घर्माम् अस्य तद्रूप इति रामाच स जात एषामिति रोम [illegible] रञ्चा-ञ्चिताश्चितम्। स्फुटैन वर्षजलेन सह वर्त्तत इति सस्वानि, [illegible] तानि

सीता। [स्वगतम्] **अम्महे! अमसेण अत्ताणएण लज्जाविदम्हि भअवदीए तमसाए, किंत्ति किल एसा मणिस्सदि एसो दे परिच्चाओ एसो अ हिअआसङ्गोत्ति। (ठ)**

[(ठ) अम्महे! अवशेन एतेनात्मना लज्जापितास्मि भगवत्या तमसया, किमिति किल एषा मंस्यते—एष ते परित्याग एष च हृदयासङ्ग इति। इति सम्।]

राम। [सर्वतोऽवलोक्य] **हा कथं नास्त्येव, ननु अकरुणे वैदेहि। (ड)**

रोमाञ्चितानि पुलकितानि कम्पितानि वेपमानानि च अङ्गानि करचरणाद्यवयवा यस्याः सा तथोक्ता सती, घर्म्मजलाप्लुतपुलकाञ्चितसकम्पगात्रीत्यर्थः। मरुन्नवाम्भःप्रविधूतसिक्ता मरुता वायुना नवैरम्भोभिः प्रथमैर्व्वार्षिकैर्जलविन्दुभिः यथाक्रमं प्रतिधूता कम्पिता सिक्ता आर्द्रीकृता च सा तथोक्ता वायुना आकम्पिता नवोदकेन सिक्ता इत्यर्थः। स्फुटकोरका स्फुटा विकसिता कोरकाः कुड्मला यस्याः सा तथोक्ता। स्फुटोद्गतमुकुला कदम्बयष्टिः कदम्बशाखा इव जाता वर्त्तते च। कदम्बयष्टिरिवेत्यत्र यष्टिपदं काठिन्यद्योतनाय उपमालिङ्गसाम्यनिर्व्वाहाय चेति मन्तव्यम्। यथा वायुना कम्पिता वर्षोदविन्दुसिक्ता विकसितकलिका कदम्बशाखा शोभते प्रियस्पर्शजन्यानन्देन इयं सीतापि तथेति स्फुट एवात्रोपमालङ्कारः। स च मरुन्नवाम्भःप्रतिधूतसिक्तेति यथासंख्यालङ्कारेण सङ्कीर्य्यते। वृत्तमुपजातिः, सा चेन्द्रवज्रोपेन्द्रवज्रामिश्रणरूपेति।

(ठ) अम्महे—इति। अवशेन जडेन एतेन आत्मना स्वीयेन अवयवेन चेतुना भगवत्या तमसया लज्जापितास्मि लज्जां प्रापितास्मि सलज्जीकृतास्मीति यावत्। अनेन रामेण त्वं निर्द्दयं परित्यक्ता, त्वन्तु अखिन्नोऽद्यगुरक्ता यदस्यास्पर्शमात्रेण रोमाञ्चितगात्री विवशा च जाता इति भावः। एष अयं ते परित्यागः निर्वासनम् एष च ते हृदयस्य आसङ्गः आसक्तिः प्रियं प्रत्यनुराग इति यावत्। न खलु परित्यक्तायाः अकारणपरित्यागिनं भर्त्तारं प्रति ईदृगनुरागो युज्यते मानावलम्बनस्यैवोचित्यात्। कथं वा निर्व्वासितापि त्वं तत्समीपं गता कथं वा प्रतिनिवृत्तेति युवयोः परित्यागानुरागयोरकिञ्चित्करत्वमेवेति भावः। इति एतत् एषा तमसा किं मंस्यते मनसि करिष्यति। आवयोरिमामवस्थामवलोक्य तमसा बालविलसितमित्युपहसिष्यतीति भावः।

(ड) हेति। सर्व्वतः सर्व्वासु दिक्षु विलोक्य हा कष्टं आहेति शेषः। कथमिति सम्भावनार्थमव्ययम्। नास्त्येव अस्मिन् स्थाने सीता न विद्यत एव। नन्वित्यनुनये, ननु भो अकरुणे निर्द्दये, वैदेहि विदेहराजपुत्रि! त्वं क्वासीति वाक्यार्थसम्बन्धः।

सीता। सच्चम् अकरुणह्मि, जा एव्वंविधं तुमं पेक्खन्ती धरेमि ज्जेव जीविदम्। (ढ)

[(ढ) सत्यमकरुणास्मि, या एवंविधं त्वां पश्यन्ती धराम्येव जीवितम्। इति छम्।]

राम। क्वासि देवि! प्रसीद, न मामेवंविधं परित्यक्तुमर्हसि। (ण)

सीता। अइ अज्जउत्त विवरीदं विअ एदं। (त)

[(त) अयि आर्य्यपुत्र! विपरीतमिवेदम्। इति छम्।]

वासन्ती। देव! प्रसीद प्रसीद, स्वेनैव लोकोत्तरधैर्य्येण संस्तम्भयातिभूमिगतविप्रलम्भमात्मानं, कुतोऽत्र मे प्रियसखी सीता! (थ)

(ढ) सच्चमिति। अकरुणा निर्दयास्मि सत्यम् एतत् युक्तमुक्तं त्वया। या अहम् एवंविधं शोकविधुरं त्वां प्रेक्षमाणा पश्यन्ती जीवितं प्राणान् धरामि एव बिभर्म्मि एव न तु त्यजामि इत्येवार्थः। अत एवाकरुणास्मीत्यर्थः। भर्त्तुरेवंविधदशादर्शनात्प्राणत्याग एव श्रेयानिति भावः।

(ण) क्वासीति। हे देवि सीते, त्वं क्व कस्मिन् स्थाने असि वर्त्तसे। एवंविधम् ईदृशं शोकार्त्तं मां परित्यक्तुं न अर्हसि युज्यसे। पतिव्रतायास्तवाधुना शोकातुरमस्मदर्थं मां विहायान्यत्र गमनमनुचितमिति भावः।

(त) अइ इति। आर्य्यपुत्र! एतत् त्वया यत् उक्तमेवंविधं मां परित्यक्तुं नार्हसीति वचनं तदेतत् विपरीतमिव विप्रतिषिद्धमिव भाति। नाहं त्वां त्यक्तवती त्वमेव मामत्याक्षीरिति तव वचनं न युक्तमिति भावः। विपरीतमिवेत्यत्र इव-शब्देन प्रियं प्रति पतिव्रतायास्तस्या विनयनम्रता सूच्यते, वास्तवं विपरीतमेवैतद्वचनं तथापि विपरीतमिव इत्युक्तम्।

(थ) देवेति। देव! महाराज! त्वं प्रसीद। प्रसीद प्रसीद इति अनुनये द्विर्व्वचनम्। स्वेनैव स्वेन स्वकीयेन एव नतु कस्याप्युपदेशजनितेन इत्येवकारार्थः। लोकोत्तरधैर्य्येण लोकेभ्य उत्तरम् अधिकम् इति लोकोत्तरं सर्व्वलोकातिगं यत् धैर्य्यं निर्विकारचित्तत्वं तेन। अतिभूमिं गतः भूमिं सीमानम् अतिक्रम्य गतः वर्द्धितः परसीमागत इत्यर्थः। विप्रलम्भः अदर्शनविप्रलम्भः प्रियावियोगजन्यशोक इत्यर्थः। स च तयोक्तम् आत्मानं चित्तं संस्तम्भय धैर्य्यमापाद्य प्रकृतिस्थं कुरु इति यावत्। अथ धैर्य्यावलम्बनमन्तरेण शोकाच्च स्थिरता नोपायान्तरेण सम्भवेदिति भावः।

राम। व्यक्तं नास्ति, कथमन्यथा वासन्ती अपि तां न पश्येत्। अपि खलु स्वप्न एष स्यात्? न चास्मि प्रसुप्तः, कुतो वा रामस्य निद्रा! सर्वथा स एवैष भगवान् अनेकवारपरिकल्पनानिर्म्मितो * विप्रलम्भः पुनः पुनरनुबध्नाति माम्। (द)

(द) व्यक्तमिति। व्यक्तं स्पष्टं निश्चितमित्यर्थः, नास्ति सीतेति शेषः। निश्चितमेवात्र सीता न वर्त्तते। अन्यथा सीताया विद्यमानत्वे वासन्ती अपि अतिमात्रात्मग्राहिणी अनर्दवता वासन्ती अपि, आस्तां तावदन्य साधारणो जन इत्यपेरर्थः। अत्र भ्रान्तिमदतया अनदैवताया प्रमितिप्रकर्षं विभाव्य वासन्तीत्युक्तम्। कथं न पश्येत् द्रष्टुं न शक्नुयात्। तत् सीता नास्त्यत्रैवेति भाव। एव योग्यानुपलम्भेन सीताया नास्तित्व निश्चित्य पूर्व्वस्पर्शनस्य भ्रमरूपत्व मीमांसते,—अपि खलु स्वप्न एष स्यात्, अपि सम्भावनायां, खलु वाक्यालङ्कारे, एष सीताकरस्पर्शानुभवः स्वप्नः स्वाप्निकज्ञानं स्यात्किमिदिति सम्भावना। यद्वा एष सीतास्पर्शः स्वप्नः स्यात् स्वप्नावस्थोत्पादित किम्। स्वप्नावस्थाया हि "सन्ध्ये सृष्टिराह हि" इति सूत्रप्रामाण्यात् तत्पुरुषानुभाव्यतत्तत्पदार्थसृष्टिः परमात्मकर्तृकाभ्युपगम्यते। विस्तर-स्तत्त्वमीमांसाया द्रष्टव्य। स्वप्नं प्रति सुप्तं कारणत्वादाह—न चास्मीति। अहं सुप्त निद्रित च न अस्मि। तदुपपादयति—कुत इति। रामस्य ममेत्यर्थः, स्वप्नः निद्रा कुतः कस्मात् सम्भवेत् "अनिद्रः सततं राम" इति सीतावियोगे रामस्य निद्रा नास्तीति प्रसिद्धमेवेति भाव। अत एव कथ मे स्वप्न, निद्रितावस्थायामेव स्वप्नदर्शनं भवेत्; 'स्वप्नो निद्रामुपेतस्य विषयानुभवो हि य'। मतान्तरेत्यर्थः। पर्य्यवसितमाह—सर्व्वथेत्यादिना। स प्रागनुभूत एव नतु नूतन इत्येवकारार्थः। भगवान् अघटनघटनापटुत्वात् माहात्म्यशाली। अनेकवारपरिकल्पनानिर्म्मित. अनेके वाराः ताम् व्याप्य या परिकल्पना चिन्ता तया निर्म्मित उत्पादित' विप्रलम्भ वचनं विसंवाद इति यावत्, "विप्रलम्भो विसंवादः" इत्यमरः। "वचनं चातिसन्धान व्यलीकं स्यात् प्रतारणम्। विप्रलम्भो विसंवादो विप्रलापश्च कीर्त्तित" इति हलायुध। पुन पुन वारंवारं माम् अनुबध्नाति अनुसरति। इयं सीतेति बहुवार प्रवञ्चित आसमित्यर्थः। मम वासन्त्याश्चानुपलम्भाभिज्ञाया अभावेन स्वप्नानुपपत्तेश्च सर्व्वप्रकारेणापि सीतास्पर्शनं भ्रमरूपमिति भावः। मुहु सीतासमागमविषयकभावनया तदङ्गस्पर्शादिरालापादीनाञ्च ध्यानेन अलीकमपि सीताङ्गस्पर्शादिकं प्रत्यक्षमिवानुभूयते। पूर्व्वजः संस्कारः पुनः पुनश्चिन्तावशात् चाक्षुषमनन्तरेणापि अनुभवपदवीमवतरतीति

---

* "परिकल्पनानिर्म्मितः। परिकल्पितनिर्म्मित" इति पाठभेदौ।

सीता। मए ज्जेव दारुणाए विप्पलद्धो अज्जउत्तो (थ)

[(थ) मयैव दारुणया विप्रलब्ध आर्य्यपुत्र। इति सम्]

वासन्ती। देव! पश्य पश्य। (न)

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथः
पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वहन्
अन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः॥ ४१॥

[४१। जटायुषा विघटित पौलस्त्यस्य अयं कार्ष्णायस रथः, पश्य पुरतः पिशाचवदनाः कङ्कालशेषाः एते खराः, इतः अरिः खड्गच्छिन्नजटायुपक्षतिः (सन्) ज्वलन्तीं सीतां वहन् अन्तर्व्याकुलविद्युदम्बुद इव द्याम् अभ्युदस्थात्॥ इत्यन्वयः।]

कल्पनाया अचिन्त्यशक्तित्वम्। अत एव वस्तुतः अपरप्यासन्नाया अपि सीताया स्पर्शसुखं मम हृदये कल्पनाशक्त्या प्रादुर्भूतमिति फलितार्थः।

(थ) मए ज्जेवेति। दारुणया निर्दयत्वात् क्रूरया मया एव अदृश्यरूपया गतत्वेन केनचित् कारणेन आर्य्यपुत्र राम विप्रलब्ध प्रतारित। नाथ कल्पनावशादुत्पन्नो विप्रलम्भ। मम कारुण्यवशादेवास्यैवंविधावस्था जाता, अयन्तु मामपश्यन् स्वप्नादि नानाकारेण जल्पते इति भाव।

(न) देवेति। पश्य पश्य देव राजन् त्वं पश्य अवलोकय वक्ष्यमाणश्लोकोक्तवाक्य कर्म। पश्य पश्येति विस्मये द्विरुक्त।

(४१) पौलस्त्यस्येति। जटायुषा जटायुनामकपक्षिराजेन, अत्र प्राकृते सान्त उकारान्तश्च जटायुशब्दो दृश्यते। तत्र प्रमाणम्—"जटायुश्च जटायुषे"ति द्विरूपकोषः। विघटित भग्न अयं दृश्यमान., उद्देश्यसमर्पकमिदं, पौलस्त्यस्य पुलस्त्यस्यापत्य पौलस्त्य तस्य पुलस्त्यनप्तु रावणस्य कार्ष्णायसं कृष्णेन अयसा कालवर्णेन लौहेन निर्म्मित इति कार्ष्णायस रथ स्यन्दन विधेयसमर्पकमिदं, पुरतो वर्त्तते। पुरत अग्रे अवस्थित एते दृश्यमाना. पिशाचवदना. पिशाचानां वदनानि इव वदनानि येषां ते तथोक्ता उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च। पिशितमाचामन्ति अश्नन्ति वा इति पिशाच, पृषोदरादित्वात् साधु। कङ्कालशेषा. अस्थिपञ्जरमात्रावशिष्टा. खरा अश्वतरा रावणरथवाहा. पतिता वर्त्तन्ते, तान् पश्य। तथा खड्गच्छिन्नजटायुपक्षतिः खड्गेन असिना छिन्ना कर्त्तिता जटायो नराजस्य पक्षति, पक्षमूलं येन स, तथोक्तः, जटा पक्षमूलमिव आयुर्यस्य, यथा जटायु।

सीता। [ससम्भ्रमम्] अज्जउत्त ! तादो वावादीअदि, अहम्पि अवहरिआमि। परित्ताहि, परित्ताहि। (प)

[(प) आर्य्यपुत्र। तातो व्यापाद्यते, अहमप्यपह्रिये, परित्रायस्व, परित्रायस्व। इति सम]।

राम। [सवेगमुत्थाय] आः पाप ! तातप्राणसीतापहारिन् ! क्व यासि ? (फ)

वासन्ती। अयि देव राक्षसकुलप्रलयधूमकेतो ! अद्यापि ते मन्युविषयः ? (ब)

भग्नादित्यात कुप्रत्यय। पक्षस्य मूलं पक्षति। यस्य न छिन्ना जटायोः पक्षतिर्येन स तथोक्त अयि तव मनु रावण स्फुरन्ती ज्वलन्ती दीप्यमाना कातरका सीता यस्य धारयन् चलव्याकुलविद्युत् चल मध्य व्याकुला चपल स्फुरन्ती विद्युत् तडित् यस्य स तथोक्त। अनेन रावणस्पर्शदोषा नासीति सूचितम्। अम्बुद इव मेघ इव इत अस्मात् स्थानात् द्याम् आकाशम् अभ्युदस्थात् उत्पपात अत्राभिपूर्वकस्य तिष्ठतेरुत्पतनार्थेऽवाचकत्वदोष। केचित् 'अभि' 'उदस्थात्' इति पदद्वयमामनन्ति। अभि आविद्यमाना भी यस्मिन् कर्म्मणि तद्यथा तथा, 'उदस्थात्' इति क्रियाया विशेषणम्। एतन्मते नास्ति अवाचकत्वदोषावसर। पुरा किल सन्न्यासिवेशधारी रावण जानकीं गृहीत्वा रथेनाकाशमार्गेण गन्तुमारेभे, जटायुस्तदवलोक्य युद्धेन रावणस्य रथं बभञ्ज, रावणस्तु कपटयुद्धेन तस्य पक्षद्वयं छित्त्वा सीतां हृतवान् इति रामायणी वार्ता। ब्रह्मणश्चतुर्थमानसपुत्रस्य पुलस्त्यस्य पुत्रो विश्रवा तस्य पुत्रो रावण इति रामायणं द्रष्टव्यम्। अत्र पिशाचवदना इति लुप्तोपमा अम्बुदरित्यादिना सीताया विद्युत्-सादृश्यस्य रावणस्य अम्बुदसादृश्यस्य च प्रत्ययात् उपमा। वृत्त शार्दूलविक्रीडितम्।

(प) अज्जउत्तेति। तात अस्मत्पितुः दशरथस्य मित्रत्वेन पितृकल्प जटायु व्यापाद्यते हन्यते रावणेनेति शेष, अहञ्च अपह्रिये। अतएव हे आर्य्यपुत्र ! त्वं मां तातं जटायुञ्च परित्रायस्व, सम्भ्रमे द्विरुक्ति। अतिमुग्धा सीता वासन्तीवाक्यं श्रुत्वा रावणस्य अतीतमपि घटितं तात्कालिकमिव मन्यमाना भयकम्पिताङ्गी विपत्प्रतीकारक्षमं रामं सम्बोध्य जटायुष आत्मनश्च त्राणं याचते स्म इत्यर्थ। अत्र विस्मृतिनामा व्यभिचारिभावो निर्दिष्टः।

(फ) आः इति। आः कोपार्थमव्ययम्। पाप दुर्जन दारापहरणात् पापस्वभाव ! तातप्राणसीतापहारिन् ! तातस्य जटायो प्राणा तान् सीताञ्च हर्त्तुं शीलमस्य स तातप्राण-सीतापहारी तत्सम्बोधने। क्व यासि कुत्र गच्छसि। तातं निहत्य सीताञ्च हृत्वा पदात् पदमपि गन्तुं न शक्नोषीति क्रोधवशात् आक्षेपेण रामस्योक्ति। अत्र रोषसम्भ्रमवचनरूपं तोटकनाम सन्ध्यङ्गमुक्तम्।

सीता। अहो उम्मत्तिह्मि संवुत्ता। (अ)

[(अ) अहो! उन्मत्ताऽस्मि संवृत्ता। इति सम्]

राम। अन्वर्थ एवायमधुना प्रलापो वर्त्तते। (म)

उपायानां भावादविरतविनोदव्यतिकरै *
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः।

(ब) अयीति। राक्षसकुलप्रलयधूमकेतो धूमः केतुरस्य इति धूमकेतुः 'अग्न्युत्पातौ धूमकेतु' इत्यमरः। राक्षसानां कौणपानां कुलं वंशः तस्य प्रलयः विनाशः धूमकेतुः उत्पातग्रहविशेषः तस्य सम्बोधनं, यद्वा राक्षसकुलप्रलये धूमकेतुरपि राक्षसकुलदाहे प्रलयानलसदृश इत्यर्थः। यथा धूमकेतोर्नाम कस्याचिदुत्पातग्रहस्योदये जगति मारीभयादि नानाविधम् अमङ्गलं स्यात्, तथा रामचन्द्रस्य उत्पत्त्या निखिलस्य राक्षसकुलस्य क्षयरूपममङ्गलमभूत् इति भावः। आतताविरामचन्द्रे राक्षसकुलममङ्गलसूचनामवादीति रामायणे द्रष्टव्यम्। यद्यपि अधुनापि निखिलराक्षसकुलक्षयः सम्भाव, न राक्षसान्तकस्य तव मन्युविषय, मन्यौ क्रोधस्य 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। विषयं पात्रम् अयीति शेषः। अधुना नास्त्येव ते क्रोधावकाश इति काकुः अवगन्तव्या। अत्र राक्षसकुलप्रलयधूमकेतुरिति निरङ्गं केवलरूपकमलङ्कारः।

(अ) अहो इति। अहम् उन्मत्ता उन्मादरोगग्रस्ता संवृत्ता जाता अस्मि भवामि। कथमन्यथा अतीतविषयं श्रुत्वा आर्य्यपुत्र मम्बोध्य परित्रायस्व इत्यादि प्रलपामीति भावः। उन्मादं विना चिरातीत राक्षसजटायुसंवादं वर्त्तमानत्वप्रतीतिरसम्भवात उन्मत्ताऽस्मीति सीतोक्तिरिति।

(म) अन्वर्थ इति। अन्वर्थः अनुगतः अर्थः यस्य सः तथोक्तः यथार्थः सार्थक अर्थविशिष्ट इति यावत्, एव अधुना इदानीं प्रलापः वर्त्तते। इदानीं सत्यमेवाहमुन्मत्त इवा असम्बद्धं जल्पामि इत्यर्थः। यद्वा इदानीं प्रलापः राक्षसादिकमेव अन्वयः अर्थः प्रयोजनम् अनुगम इत्यर्थः। अखिलराक्षसान्तरं प्रलाप एव नितरामप्रयोजनीय इत्यर्थः। अथवा "हा पाप! तातप्रियसीतापहारिन्" इत्यादि मदवचनापन्यासः पूर्व्वम् अन्वर्थ एवासीत् तदानीं तद्व्यापारस्य वास्तवत्वात्, अधुना तादृशवाक्यप्रयोगः प्रलाप एव निरर्थक एव 'प्रलापोऽनर्थकं वचः' इत्यमरः। भवतीति शेषः। तद्घटनायाः अतीतत्वादिति भावः। अन्वर्थ इत्यत्र अन्य एवायमधुना विपर्य्यासो वर्त्तते इति क्वचित् पाठः। तत्र अन्य एव पूर्व्वसीतावियोगादिभिन्न एव विपर्य्यासः सीतावियोगरूपविपर्य्यास इति व्याख्येयम्।

---

* विनोदव्यतिकरः इति क्वचित् पाठः

वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्

कथं तूष्णीं सह्यो निरवधिरिदानीन्तु विरहः † ॥ ४४ ॥

[४४ उपायानां भावात् अविरतविनोदव्यतिकरैः वीराणां विमर्दैः जगति जनितात्यद्भुतरसः मुग्धाक्ष्याः स वियोगः रिपुघातावधिः खलु अभूत् । इदानीं तु निरवधिः विरहः कथं तूष्णीं सह्यः । इत्यन्वयः]

(४४) प्रलापस्य उपपत्तिमिव दर्शयितुमाह—उपायानामिति । उपायानाम् उपेयस्य सामाग्र्ये यथा एभिर्विध्युपायाः साधनानि तेषां सीतोद्धारसाधनसेनासमुद्रसेतुबन्धादीनां भावात् सत्त्वात् विद्यमानत्वात् च अविरतविनोदव्यतिकरैः अविरतं निरन्तरं यः विनोदः विरहदुःखापनोदः तस्य व्यतिकरः सम्पर्कः येषु तैः । युद्धादिव्यापारेषु चित्तव्यासङ्गात् विस्मृतवियोगदुःखैरित्यर्थः । वीराणां शूराणां कपिराक्षसानां, जाम्बवद्धनूमत्सुग्रीवादीनां वा, विमर्दैः संग्रामव्यापारैः जगति भुवने जनितात्यद्भुतरसः जनितः उत्पादितः अत्यद्भुतरसः अतिशयात् अद्भुतः अद्भुतनामा रसः येन स तथोक्तः । यद्वा जनितः अत्यद्भुतरसः वीररसमयरसो येन स तथोक्तः । वीररसादद्भुतरसस्योत्पत्तिरिति रसविदः । तदुक्तं 'हास्यो भवेत् शृङ्गारात्करुणश्च रौद्रकर्मणः । अद्भुतश्च तथा वीराद्वीभत्साच्च भयानकः' इति । मुग्धाक्ष्याः मुग्धे मनोहरे अक्षिणी यस्याः सा तथोक्ता तस्याः जानक्याः सीतायाः वियोगः विरहः, रिपुघातावधिः रिपूणां शत्रूणां घातः विनाशः अवधिः अन्तः सीमेति यावत्, यस्य स तथोक्तः अभूत् आसीत् । खलु निश्चये । तदानीं वियोगः रावणसंहारपर्यन्त एव आसीदित्यर्थः । रावणवधानन्तरमेव सीताप्राप्तेः सम्भावनीयत्वादिति भावः । तु किन्तु इदानीं एतत्कालवर्त्ती विरहः सीतायाः वियोगः निरवधिः असीमः अनन्तकालस्थायी पुनर्म्मेलनासम्भवादिति भावः । अतएव कथं केन प्रकारेण तूष्णीं मौनं यथा सह्यः सोढुं शक्यः स्यात्, तदानीं सीतोद्धारसाधनादीनां विद्यमानत्वात् युद्धादिकार्य्यव्यासक्तचित्तत्वात् विरहस्य च रावणवधावधिकत्वाद्विलापादिकमकृत्वा तूष्णीमासम्, अधुना तु तत्समागमाशालतायाश्छिन्नमूलत्वात् विलपनादिभिरेव चित्तं विनोदयामि नतु तूष्णीं स्थातुं शक्नोमीति भावः । अत्र पूर्व्वविरहापेक्षया वर्त्तमानविरहस्य आधिक्यवर्णनात् व्यतिरेकः विरहगतनिरवधित्वस्य पदार्थतया हेतुत्वात् काव्यलिङ्गमलङ्कारः । वियोगशब्दे विद्यमाने पुनर्विरहपदोपादानात् “[illegible]” इत्यादिवत् पुनरुक्ततादोषः । स तु मया इति समाधेयः । शिखरिणी वृत्तम् ।

† अयं त्वप्रतिविधः प्रविलयः, इति च पाठान्तरम् ।

सीता । **णिरवधिम्हि हा हदम्हि मन्दभाइणी ।** (य)

[(य) निरवधिरिति हा हतास्मि मन्दभागिनी । इति मम ।]

(इति रोदिति ।)

राम । **हा कष्टम् !** (र)

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्य्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि भोः ‡ ॥४५॥

[४५ । यत्र मे कपीन्द्रसख्यमपि व्यर्थं, हरीणां वीर्य्यं वृथा, जाम्बवतः अपि प्रज्ञा वृथा, यत्र वायोः पुत्रस्य अपि गतिः न, यत्र विश्वकर्म्मतनयः नलः अपि मार्गं कर्त्तुं न क्षमः, भोः प्रिये सौमित्रेः अपि पत्रिणाम् अविषये तत्र क्व असि ॥ इत्यन्वयः ।]

(य) निरवधिरिति । निरवधिः नास्ति अवधिः अन्तः यस्य स तथोक्तः, यावज्जीवभावी । इति एतेन सूचितमित्यर्थः । मन्दभागिनी दुर्भाग्या हता विनष्टा अस्मि भवामि । अस्य वियोगस्य निरवधित्वात् प्रत्याशा छिन्नेति तात्पर्य्यम् । आर्य्यपुत्रस्यैव मुखात् आवयोर्विरहस्य निरवधित्वश्रवणात् पुनरनयोर्मिलनाशा मे सकलमुच्छिन्ना विलुप्ता अतो दैवेन सर्व्वथा हतास्मि, जीवनात् मरणमेव मे वरमिति भावः ।

(र) हेति । हा कष्टेऽव्ययम् कष्टं अतीव दुःखम् अनुभवामीति शेषः । इदानीमनयोर्वियोगस्याप्रतिविधेयतया तज्जनितकष्टं असह्यमित्यर्थः ।

[(४५) तदेव विवृणोति—व्यर्थमिति । तत्र यस्मिन् प्रदेशे मे मम कपीन्द्रसख्यमपि कपीनां वानराणां इन्द्रः कपीन्द्रः सुग्रीवः तेन वानरपतिना सख्यं मैत्री अपि व्यर्थं विफलम् अधुना तत्साहाय्यस्यानुपकारित्वात् तदन्यत् निष्प्रयोजनं जातमित्यर्थः । तथा यत्र च हरीणां वानराणां वीर्य्यं बलं वृथा मुधा निरर्थकमित्यर्थः । वानराणां बलेनाधुना सीतासमागमस्याभावात्तस्य व्यर्थमिति भावः । यत्र जाम्बवतः अपि तदाख्यस्य भल्लुकपतेः अपि प्रज्ञा बुद्धिः वृथेत्यन्वयः । मनीषी जाम्बवानपि प्रज्ञाबलेन कमप्युपायं कर्त्तुं न शक्नुयादिति भावः । यत्र च वायोः पवनस्य पुत्रस्य हनूमतः अपि न गतिः, गमनोपायः नास्ति । पारावार-दुर्गमेऽपि प्रदेशे गमनागमनयोग्यता विद्यते तस्यापि सीतोद्धारकार्य्यमिदानीं गमना-

‡ मे इति पाठान्तरम् ।

सीता बहु मण्णाविदम्हि तं पुव्वविरहं। (ल)

[(ल) बहुमानिताम्मि तं पूर्वविरहम्। इति सम।]

राम। सखि वासन्ति! सुहृदामिदानीं दुःखायैव रामस्य दर्शनं कियच्चिरं त्वा रोदयिष्यामि§ तदनुजानीहि मां गमनाय। (व)

सीता (सोद्वेगं तमसामवलम्ब्य) भअवदि तमसे! गच्छदि ज्जेव अज्जउत्तो। (श)

[(श) भगवति तमसे! गच्छत्येवार्य्यपुत्र। इति सम्]

मत्वादिति भाव। तथा यत्र च विश्वकर्म्मतनय। विश्वकर्म्मणो देवशिल्पिन तनय सुत नल अपि का कथा अन्यस्याप्यपेरर्थं। मार्ग पश्चात् सेतुप्रभृतिक कर्त्तुं विरचयितुं न चम न क्षम। अगाधसागरे सेतुनिर्म्मातुर्नलस्यापि यत्र गमनोपाय नालोक्यत। सौमित्र अपि इन्द्र विजयिसुरासुरत्रासकारिमेघनादस्यापि निहन्तुरतिद साध्यसाधनस्य लक्ष्मणस्य अपि। अपिशब्दात् ममापि इति केचित् पविश्वा वाचानाम् अविषय अगोचर तत्र क कुत्र प्रदेशे भो प्रिये जानकि। त्वं असि वर्त्तसे लोकान्तर गतायास्तव मर्त्त्यैर्मद्विधैरपि साधनैर्नास्ति पुन प्राप्त्युपायेति वर्त्तमानविरहस्याप्रतिविधेयत्वमिति भाव पूर्व्वविरहाद्वर्त्तमानविरहस्या धिक्यादतिरेकालङ्कारो व्यङ्ग्य। अत्र कपीन्द्रसख्यव्यर्थत्वादीना विधेयविधया उपक्रमणात् सौमित्रेरपीत्यत्र वाक्ये तदभावात् विधयाविमर्शदोषानुप्राणितभग्नप्रक्रमतादोष। सौमित्रेरपि यत्र नो गतमितिरिति च समाधयम्। शार्द्दूलविक्रीडित वृत्तम्।

(ल) बहुमानितेति पूर्व्वविरह रावणापहरणजनितं वियोग बहुमानिताम्मि श्लाघ्यत्वेन स्वीकारितास्मि। पूर्व्वविरहस्तु रावणवधावसान एवासीदिदानीमनुभूयमानस्य विरहस्य निरवधित्वेन ततो दुःसहत्वमित्यर्थं।

(व) सखीति। इदानीं अधुना सुहृदां बन्धूनां रामस्य मम दर्शनं साक्षात्कार दुःखायैव दुःखमुत्पादयितुमेव, नतु पूर्व्ववदानन्दाय भवतीति भाव। दुःखित दृष्ट्वा तदात्मीया अपि दुःखिता भवन्तीत्यवश्यमेव स्वभावसिद्धत्वादिति भाव। तत् तस्मात् रामदर्शनस्य दुःखजनकत्वात् कियच्चिरं कियन्तं कालसमय व्याप्य अहं त्वां रोदयिष्यामि क्रन्दयिष्यामि। अहन्तु निरन्तरदुःखानुभवार्थमेव विधात्रा सृष्ट, तत् यावज्जीव दुःखं सहिष्ये। मत्सम्बन्धादयुष्माकमपि चिरं दुःखसहनं न युक्तमिति भाव। अत गमनाय स्थानान्तर गन्तुं मामनुजानीहि।

(श) सोद्वेगमिति। उद्वेगेन रामस्य गमनवाक्यश्रवणात् चित्तचाञ्चल्येन सह

§ तदिदं कियच्चिरं त्वां रोदयिष्यामीति पाठान्तरम्।

तमसा। वत्से! समाश्वसिहि समाश्वसिहि, नन्वावामपि आयुष्मतोः कुशलवयोर्वर्षवर्द्धनमङ्गलानि * सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः। (ब)

सीता। भअवदि! पसीद, खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि (स)

[(स) भगवति! प्रसीद, क्षणमात्रमपि तावत् दुर्लभं जनं पश्यामि। इति सम।]

राम। अस्ति चेदानीमश्वमेधाय सहधर्मचारिणी मे —(ह)

वर्त्तमानं यथा तथा। आहेति शेष। हं भगवति तमसे! आर्य्यपुत्र राम गच्छति एव, नतु अहमपि विलम्बने इत्येवकारार्थः हेदृशी दग्धभागिनी अहं यत् बहुक्षणं आर्य्यपुत्रं द्रष्टुमपि न शक्नोमीति भाव।

(ब) वत्से इति। ननु इत्यनुनये। आयुष्मतो आयु जीवनकाल विद्यते अनयोरित्यायुष्मन्तौ तयोः दीर्घजीविनयोः कुशलवयोः तदाख्ययोस्तव पुत्रयोः। वर्षवर्द्धन मङ्गलानि वर्षस्य जीवनकालस्य वर्द्धन वृद्धि तस्य मङ्गलानि तन्निमित्तानि जन्मतिथिकर्त्तव्य मार्कण्डेयादिदेवतार्चनमङ्गलसाधनकर्म्माणि सम्पादयितुं निर्व्वाहयितुं भागीरथीपदान्तिकमेव भागीरथ्या गङ्गायाः पदयोः चरणयोः अन्तिक समीप गच्छाव। भागीरथ्याः सम्बन्धेनेतनाग्र वयमुक्ति। रामस्य प्रस्थानेन नवीकृतमपि दुःख कुशलवयोर्दर्शनेन नाशयितुं शक्ष्यसि। अथवा पुत्रमुखचन्द्रावलोकनेन इतोऽप्यधिकमानन्दमनुभवितुं शक्ष्यसीति भाव।

(स) भअवदीति। भगवति तमसे। प्रसीद त्वं मां प्रति प्रसन्ना भव, किञ्चित् विलम्बेनैव गङ्गासमीपं गन्तुमिच्छामि अतस्त्वमनुकम्पया विलम्बमनुमन्तुं मा न गन्तुकामार्थं। विलम्ब हेतुमाह—क्षणमात्रमिति क्षणमात्रमिति अल्पकालमपि व्याप्य दुर्लभ दर्शन अतिकष्टेन दैवताराधनादिनानाविधप्रयाससाध्यदर्शना इत्यर्थ, जनमं च न तथोक्त तं जनं आर्य्यपुत्र मित्यर्थं। पश्यामि प्रेक्षे। आर्य्यपुत्रस्य दर्शनं प्रकृष्टपुण्यपरिपाकजं अतश्चिरकालम् अत न द्रष्टुं अहमद्य विलम्बे, त्वं सम्मर्षयेति भाव अनुरागबाहुल्यात् सीतायाः तृप्ति न जाता तदैवमुक्तवतीयम्।

(ह) अस्तीति। आत्मानं स्वयमेव सान्त्वयितुमाह—अस्तीति। किञ्चेति चार्थं अश्वमेधाय अश्वमेधं यज्ञं कर्त्तुं सहधर्म्मचारिणी सह पत्नी साहि भ या मा

* वर्षवृद्धिमङ्गलं इति विद्यासागरधृत पाठ

सीता । (सातङ्कमात्मगतम्) अज्जउत्त ! का सा ? (च)

[(च) आर्य्यपुत्र का सा ? इति सम् ।]

राम । हिरण्मयी सीतायाः प्रतिकृतिः । (क)

सीता । (सोच्छ्वासं सास्रम्) अज्जउत्तो दाणीं सि तुमं । अम्महे उक्खादिदं दाणीं मे परिच्चाअलज्जासल्लं अज्जउत्तेण । (ख)

[(ख) आर्य्यपुत्र इदानीमसि त्वम् । अहो । उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्य्यपुत्रेण । इति सम्]

तथाका सहधर्म्मिणी भाग्यास्थानगता अस्ति विचार । अश्वमेधनिष्पादनक्षमत्ववती जाया कोऽति भाव

(च) अज्जउत्तेति उत्कम्पेन 'किमनेन पुनरपि दारपरिग्रहः कृत' इति व्याकुलतया इत्यर्थ, अपवार्य रामवचनाकर्णनेन च सह वचनं यत् तथोक्तं रामवाक्यमेव मनपत्थेव इत्यर्थ, आह इति शेष । का तव सहधर्म्मचारिणीत्यर्थ । का किंनामधेया कुतस्त्या वा इत्यर्थ । रामस्य अस्ति च इत्यादिवाक्यश्रवणेन पुनः परिणयसम्भावनया निर्वासिताया अपि सपत्नीभाव सोढुमशक्नुवानाया सीताया उक्तिरियम्, सपत्नीभयन्तु स्त्रीणामाजीवनस्थायीति प्रसिद्धमेवेति भाव ।

(क) हिरण्मयीति हिरण्मयी सुवर्णमयी हिरण्यस्य विकारार्थे मयट् रूपम् । सीतायाः प्रतिकृतिः प्रतिमूर्त्तिः अस्ति च अश्वमेधाय सहधर्म्मचारिणी मे हिरण्मयी सीतायाः प्रतिकृतिः इति रामस्य पूर्ण वाक्यम् मुख्यायाः सहधर्म्मिण्याः सीतायाः निर्वासनात् तदभावसम्भवेन मुख्यालाभे प्रतिनिधिरपि शास्त्रानुमोदितत्वात् सुवर्णमयीं सीताप्रतिमूर्त्तिं प्रतिनिधीकृत्य अश्वमेधयज्ञानुष्ठानमिति बोध्यम्

(ख) अज्जउत्तेति । उच्छ्वासेन उल्लासेन अस्रेण च सह वर्त्तमानं यथा स्यात्तथा आहेति शेष । आर्य्यपुत्र इदानीमसि त्वम् 'स्थापयतु त्वमुपास्थिताऽन्यथा' इत्युक्तरीत्या एतत्कालं यावत् तदिदानीमेव प्रकटितमिति भाव । अहो आनन्दे त्वया अधुना इदानीं मम सुवर्णमयीं प्रतिकृतिं प्रतिनिधीकृत्य इत्यर्थ । उत्खातम् उन्मूलितम् अपरोपितमिति यावत्, परित्याग-लज्जाशल्यं परित्यागेन वनं निर्वासनरूपेण वर्जनेन या लज्जा सैव शल्यं शङ्कु तत्तथाभूतम् । सीता साध्वीति लोके प्रख्यापयितुं दुर्ज्जनप्रवर्त्तितकौलीनाया अपि सीतायाः सुवर्णमयीं प्रतिकृतिं यज्ञे सहधर्म्मचारिणीं कृतवान्, अतएव लज्जायाः किमपि कारणं नास्तीत्यर्थ । दृष्टतया 'मुख्यायाः सीतायाः अभावे तत्प्रतिनिधिरपि अधिकृतः स्यात्, किन्तु रामस्य तत्प्रतिनिधिकरणात् सीतायाः पवित्रता जगति विदिता आसीत्, सीता च

राम । तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि । (ग)

सीता । धन्ना सा, जा अज्जउत्तेण बहुमण्णीअदि, जा अ अज्जउत्तं विनोदयन्ती आसाणिबन्धणं जादा जीअलोअस्स । (घ)

निरतिशयदुःखितापि रामस्यैतद्व्यापारश्रवणादात्मानं सिद्धं मन्यमाना कथञ्चित् समाश्वस्ता जातेति भावः ।

(ग) तत्रापीति । तत्र सीताप्रतिकृतौ अपि बाष्पैः अश्रुभिः दिग्धम् उपचितं चक्षुः नेत्रं विनोदयामि प्रीणयामि निवृतदुःखं करोमीति यावत् । वास्तविकसीतायाः अप्राप्तौ अगत्या स्वर्णमय्याः तस्याः प्रतिकृतावेव दुःखाश्रुपूर्णनयनं विनोदयामीत्यर्थः । एवं च सीताप्रतिकृतेः अश्वमेधसहधर्मचारिणीत्वमानुषङ्गिकम्, मुख्यं तु चक्षुर्विनोदनहेतुत्वमेवेति सूचितम् । अत्र "अस्ति चेदानीमश्वमेधाय सहधर्मचारिणी हिरण्मयी सीतायाः प्रतिकृतिः" । 'तत्रापि बाष्पदिग्धं चक्षुर्विनोदयामि" इति रामस्य क्रमादुच्यमानयोरनयोर्वाक्ययोर्मध्ये स्थाने स्थाने सीतावाक्यसन्निवेशयता कविना चमत्कारातिशयः प्रकटीकृतः । भागीरथ्यादिरक्षिताया सीतायाः वाक्यं रामो न शृणोति, किन्तु तथापि तादृशवाक्यविन्याससङ्घटनात् अथ सीतारामयोः परस्परालाप इव परमा प्रतिभातीति महाकवेरद्भुततरोऽयं वचननैपुण्यमेव प्रतीयते ।

(घ) धन्येति । सा हिरण्मयी सीतायाः प्रतिकृतिः धन्या पुण्यशालिनी धनं लब्धेति धन्या धनगणं लब्धेति यत्प्रत्ययः । प्रशंसनीयेति यावत् । या प्रतिकृतिः आर्यपुत्रेण रामचन्द्रेण बहुमन्यते आद्रियते या खलु चक्षुर्विनोदनहेतुत्वप्रयुक्तबहुमानविषयीक्रियते सा प्रतिकृतिर्धन्येत्यर्थः । या च प्रतिकृतिः आर्यपुत्रं विनोदयन्ती निवृतदुःखं कुर्वती सती जीवलोकस्य प्राणिजगतः आशानिबन्धनं निबध्यते अनेनेति निबन्धनं कारणं आशायाः निबन्धनं आशानिबन्धनं जाता । आत्मापरित्यक्तस्य रामस्य पुनरपि स्वास्थ्यं प्रजापुत्राणां या आशा तस्याः कारणीभूता बभूवेत्यर्थः । यद्वा या हि रामस्य जीवनप्रत्याशाहेतुत्वात् जीवलोकानामपि स्वस्वाभिलषितकल्याणाशानुगता, जीवति रामे जगत् मङ्गलानि पश्यतु इति या रामस्य जीवनदायिनी सा जीवलोकस्य बहुकल्याणाशाहेतुभूतेत्यर्थः । प्रियपत्नीविरहेण रामस्य वा प्राणत्याग-सम्भावनादिनानाप्रकारवैराग्यसम्भावना जीवलोकानां प्राणिनामासीत्, इदानीं हिरण्मयी प्रतिकृतिरसौ बहुमन्यते, अतो जीवलोकानां तदाशङ्कापगमात् रामस्य ... सा जाता इति भावः । अत्र आशानिबन्धनं जातेत्यत्र निबन्धनपदस्य विधेयत्वेऽपि उद्देश्य ... वचनस्य आख्यातस्येति नियमात् जातेति स्त्रीत्वम् । तत्र आख्यातपदस्य प्रधानक्रिय

तमसा । (सस्मितस्नेहास्रं परिष्वज्य ।) अयि वत्से ! एवमात्मा स्तूयते । (ङ)

सीता । (सलज्जमधोमुखी स्वगतम् ।) परिहसिदह्मि भअवदीए । (च)

[(च) परिहसितास्मि भगवत्या । इति सम् ।]

वासन्ती । महानयं व्यतिकरोऽस्माकं प्रसादः । गमनं प्रति पुनर्यथा कार्य्यहानिर्न भवति तथास्ताम् । (छ)

सीता । पडिऊला दाणीं मे वासन्ती संवुत्ता । (ज)

[(ज) प्रतिकूला इदानीं मे वासन्ती संवृत्ता । इति सम् ।]

(ङ) अयीति । सस्मितस्नेहास्रं परिष्वज्य सीतायाः धन्या सेत्यादिवाक्यश्रवणात् कौतुकेन स्मितं ईषद्धास्यम् अपत्यभूतायास्तस्याः दुःखदर्शनात् अस्रं च । तथा ईदृशीं पतिपरायणां सीतां विहाय तत्प्रतिकृतिं बहुमन्यमानः यज्ञमारभते रामचन्द्र इति स्नेहाद्धास्यम् । ततः स्मितञ्च स्नेहश्च हास्रञ्च ते तथोक्ताः तैः सह वर्त्तते यत् तथोक्तं यथा स्यात्तथा परिष्वज्य सीताम् आलिङ्ग्य आह । अयि सीते ! एवम् अनेन प्रकारेण आत्मप्रतिमूर्त्तिप्रशंसनेन आत्मा स्तूयते स्तुतिविषयीक्रियते प्रशस्यते त्वयेति शेषः । स्वप्रतिमूर्त्तिप्रशंसनं निजसौन्दर्य्यादिप्रशंसनमेवेति भावः ।

(च) परिहसिदह्मीति । लज्जया सह वर्त्तमानं सलज्जं, अधः मुखं यस्याः सा अधोमुखी सती । सीता आहेति शेषः । भगवत्या माहात्म्यशालिन्या तमसया परिहसितास्मि उपहसिता भवामि । अन्यथा कथमुच्यते आत्मा स्तूयते इति अतः तमसा मामुपहसतीत्यर्थः । उपहासार्थत्वादिह हसतिः सकर्म्मकः ।

(छ) महानयमिति । अयं व्यतिकरः एवं प्रकारेण मेलनमिति यावत्, अस्माकं सम्बन्धे महान् अतीव प्रसादः अनुग्रहः । आत्मना एव अत्र अस्माभिः सह तव संमेलनं सुतरामनुग्रह-फलमित्यर्थः । पुनः किन्तु गमनं प्रति राजपुरप्रस्थानविषये यथा येन रूपेण आश्रितेन कार्य्यस्य कर्त्तव्यस्य हानिर्लोपः क्षतिरिति यावत्, न भवति तथा तदेव रूपम् आस्ताम् भवतु । अनेनैव यदि कार्य्यहानिः स्यात् तदा नास्माभिस्त्वमवस्थानाय अनुरुध्यसे इति अनुजानीहि मां गमनायेति रामवाक्यस्योत्तरमिदम् ।

(ज) पडिऊलेति । इदानीम् अधुना वासन्ती तन्नाम्नी वनदेवता मे मम प्रतिकूला विरोधिनी रामस्य गमनमनुजानती दर्शनविरतिसम्पादनात् मे अनिष्टं जनयतीत्यर्थः । एतेन रामदर्शने सीतायाः महतीच्छा वर्त्तते इति व्यज्यते इति वस्तुना वस्तुध्वनिः ।

तमसा। वत्से! एहि गच्छाव: (झ)

सीता। (सकष्टम्) एव्वं करेम्ह। (ञ)

[(ञ) एवं कुर्व्व। इति सम्]

तमसा। कथं वा गम्यते, यस्यास्तव—(ट)

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुष:।
मर्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते॥ ४६॥

[(४६) दयिते प्रत्युप्तस्य इव तृष्णादीर्घस्य यस्या तव चक्षुष. आकर्ष. मर्म्मच्छेदपरै यत्नै न समाप्यते॥ इत्यन्वय.।]

(झ) वत्से इति। वत्से सीते। एहि त्वमागच्छ। गच्छाव भागीरथीपदान्तिक याव, यावामिति भाव.।

(ञ) सकष्टमिति। सकष्टं कष्टेन दुःखेन सह वर्त्तते यथास्यात्तथाह। एव कुर्व्व भागीरथीपदान्तिकमेव गच्छाव। यतो नाथ इतो गच्छति तदहं स्थिता किं करोमि, तदुक्तमेवाधुना करोमीति सीताया: कातरोक्तिरियम्।

(ट) कथमिति। कथं केन प्रकारेण वा त्वया गम्यते गन्तुं शक्यते, सम्प्रति तवान्यत्र गमनमतीव कष्टकरमिति भाव। तत्कारणमेव दर्शयति—यस्यास्तवेति; वक्ष्यमाणश्लोकेनान्वय:।

(४६) प्रत्युप्तस्येति। दयिते वल्लभे रामचन्द्रे प्रत्युप्तस्येव निखातस्य इव कीलितस्येवेति यावत्, प्रत्युप्तस्य। तृष्णादीर्घस्य तृष्णया निरन्तरदर्शनाकाङ्क्षया दीर्घस्य दीर्घीकृतस्य प्रसारितस्य, यस्यास्तव चक्षुष. नयनस्य जातावेकवचनम्। मर्म्मच्छेदपरै मर्म्मच्छिद एव पर प्रधानं येषां तैस्तथोक्तै. चक्षुरुत्पाटनजनने हृदयविदारकैरित्यर्थ। यत्नै आयासै: चेष्टाभिरिति यावत्। आकर्ष. आकर्षणं रामावलोकनात् व्यावर्त्तनं न समाप्यते न व्यवसीयते न निवर्त्तते। त्वं रामचन्द्रदर्शने नितरामासक्तं नयनं तस्मान्निवर्त्तयितुं हृदयविदारकप्रयत्न परापि चक्षुषस्तद्दर्शनं विहाय गन्तुं नोत्सहसे इत्यर्थ:। शाठ्येनायासेन हृदयं विदीर्यते नाहमनायासं कुर्व्वत्यापि त्वया रामशरीरात्प्रत्यावर्त्तनाशक्तं निवर्त्तयितुं न शक्यते, तथाभूतया त्वया कथं गम्यते इति पूर्व्वेण सम्बन्ध। एतावता कालेनापि तव चक्षुष: रामदर्शनाकाङ्क्षा न सम्पूर्णा जाता, तदितो गमनमतीव दुःखकरमिति भाव। अत्र दयिते चक्षुष प्रत्युप्तस्य सम्भावनाया इवशब्दवाच्यत्वात् भावाभिमानिनी वाच्या क्रियोत्प्रेक्षालङ्कार। पथ्या [illegible] म।

सीता। णमो णमो अपुव्वपुण्णजणिददंसणाणं अज्जउत्तचरणकमलाणं (ठ)। (इति मूर्च्छति)

[(ट) नमो नमोऽपूर्वपुण्यजनितदर्शनानां आर्य्यपुत्रचरणकमलानां। इति सम।]

तमसा। वच्छे! समास्ससिहि समास्ससिहि। (ड)

सीता। (समाश्वस्य।) किच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दंसणं। (ढ)

[(ढ) कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम्। इति सम।]

(ठ) णमो णम इति। अपूर्व्वपुण्यजनितदर्शनानां अपूर्व्वैः उत्कृष्टैः पुण्यैः सुकृतैः जनितं उत्पादितं दर्शनं साक्षात्कारः येषां ते तथोक्तास्तेषाम्। आर्य्यपुत्रचरणकमलानां चरणानि कमलानीवेति चरणकमलानि आर्य्यपुत्रस्य रामचन्द्रस्य चरणकमलानि तेषाम्। अत्र "चतुर्थ्यर्थे षष्ठी"ति सूत्रेण नमःशब्दयोगे प्रसक्तमानचतुर्थ्यर्थे षष्ठी गौरवाद्युक्तम्। यद्वा प्राकृते चतुर्थीस्थाने षष्ठी, द्विवचनस्य च बहुवचनत्वम्। लुप्तोपमालङ्कारः। प्राक्तनजन्मसञ्चितैरसाधारणपुण्यैरस्य श्रीरामदर्शनस्य लाभात् इह जन्मनि तादृशपुण्यासञ्चयसम्भावनया रामदर्शने पुनर्नैराश्यात् मूर्च्छा इति बोध्यम्।

(ड) वत्से इति। समाश्वसिहि त्वमाश्वस्ता भव, त्वया शोको न कर्त्तव्य इत्यर्थः। आश्वासनार्थे द्विरुक्तिः।

(ढ) कियच्चिरमिति। सीता समाश्वस्य तमसावाक्यात् संज्ञां लब्ध्वा आहेति शेषः। नाटकादौ क्षणे क्षणे मूर्च्छा जायते तत्क्षणादेव समाश्वसितीति कथञ्चित् आशङ्कनीयमेव नापगच्छति, तन्मते मूर्च्छेयं मूर्च्छारोगविलक्षणा कापि दृष्टचित्तचमत्कारिणी कविनोक्तेति। मेघान्तरेण मेघस्य आच्छादकस्य जलदस्य अन्तरेण व्यवधानेन अपसरणेन वा पूर्णिमाचन्द्रदर्शनं पूर्णिमायां तदानन्द-तिथावुदितस्येत्यर्थः। चन्द्रस्य शिवी: दर्शनं कियच्चिरं कियन्तं कालं व्याप्य वा भवेत् अत्यल्पकालमेव भवेदित्यर्थः। यथा शरद्रात्रौ वायुवेगात् मेघं विमुक्तः पुनरपि जलदखण्डेनाच्छिद्यमानः पूर्णचन्द्रः अम्बरः अत्यल्पकालमेव अमेदं स्यात् तथा-नेकविधविरोधिभिरन्तरितदर्शनः प्रभावशालमपुण्यवशेन चन्द्र लब्धसाक्षात्कारः प्राणेशोऽपि मे पुनर्नयनयोरविषयतां यास्यन् अत्यल्पमेव कालं मया दृष्टः। अतएवाप्रस्तुत-विशेषात् प्रस्तुतविशेषस्य गम्यत्वात् अप्रस्तुतप्रशंसालङ्कारः।

तमसा। अहो संविधानकम् । (ग)

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान् ।
आवर्त्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा सलिलमेव तु तत् समग्रम् * ॥४७॥

[४७। एक एव करुणः रसः निमित्तभेदात् भिन्नः पृथक् पृथक् इव विवर्त्तान् आश्रयते। यथा अम्भः आवर्त्तबुद्बुदतरङ्गमयान् विकारान् (आश्रयते), तु तत्समग्रम् एव सलिलम् ॥ इत्यन्वयः ।]

(ग) अहो इति। अहो इति आश्चर्य्येऽव्ययम्। संविधानकं घटनावैचित्र्यं अपूर्व्वरूपकं विस्मयनीयमित्यर्थः। विविधानां घटनावलीनां देशकालाद्यवस्थाभेदेन भिन्नानामपि एकार्थप्रतिपादने प्रवर्त्तयितृत्वम्। यथा भिन्नानामपि शृङ्गारहास्याद्भुतादीनां रसानां भावानां व्यभिचारिणाञ्च अङ्गिनो रसस्य करुणविप्रलम्भस्य अङ्गत्वमित्यर्थः।

[(४७) तदेवाह—एक इति। एक एव करुणः अनुकार्य्यरामादिगतेष्टजनवियोग-दुःखजन्यदुःखातिशयः। करुणविप्रलम्भाख्यः रसः, रस्यते स्वाद्यते इति रसः काव्यानुशीलनाभ्यासवशविशदीभूतवर्णनीयतन्मयीभवनयोग्यसामाजिकमनोमुकुरभाव्यमानतया निर्भरानन्दसंविद्रूप इत्यर्थः। निमित्तभेदात् निमित्तानां कारणानां आलम्बनानां विभावानां व्यभिचारिणाञ्च भेदात् पार्थक्यात् व्यञ्जकविभावादिविच्छित्तिविशेषादिति यावत्, भिन्नः विविधत्वेन प्रतीयमानः सन् पृथक् पृथक् इव नानाप्रकारान् इव विवर्त्तान् परस्परविलक्षण-शृङ्गाराद्यात्मना परिणामान्। "अन्यथात्वपरिणामः स्याद्विवर्त्तः" इति कपिलः। विभिन्नरूपान् परिणामान् आश्रयते अवलम्बते। तत्त्वतः अभिन्नोऽपि बहुधा रूपभेदमापद्यते इत्यर्थः। तत्तदुद्दीपनीबोधिततत्तद्व्यभिचारिसंसर्गेण एकोऽपि करुणविप्रलम्भो भिन्नभिन्नतया प्रतीयते इति निर्गलितार्थः। यथा अस्मिन् नाटके वर्णितः करुणो रसः अवस्थाभेदात् शृङ्गाराद्भुत-हास्यौत्सुक्यनिर्व्वेदशङ्कासूयाद्याकारेण विवर्त्तित इति। तथाहि—सीतायाः 'णए, कोण दाणिं०' इत्यादौ विषादः, 'तादो वाआवदी'त्यादावुन्मादः, 'णिरवधि च' इत्यादौ दैन्यं, 'बहुलपावितजं'त्यादौ मतिः, 'मच्चदि अंग'इत्यादौ औत्सुक्यं, 'पसीद अज्ज'मित्यादौ हर्षः, 'अव्वाविद'मित्यादौ धृतिः, 'परिव्वसिदम्मी'त्यादौ लज्जा, 'पडिवसा' इत्यादौ असूया, 'अमो अज्ज' इत्यादौ निर्व्वेदः, एवमेतैर्व्यभिचारिभिः पृथक् पृथक् संयुक्ततया करुणविप्रलम्भः पृथक् पृथक्

* हि तत् समस्तम् इति पाठान्तरम् ।

राम। अयि विमानराज! इत इतः।

(इति सर्वे उत्तिष्ठन्ति।) (त)

तमसावासन्त्यौ सीतारामौ प्रति। (थ)

अवनिरमरसिन्धुः सार्द्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता।

इव प्रतीयते, वस्तुतस्त्वेक एवेत्यर्थः। अत्र वेदान्तेषु प्रसिद्धमुदाहरणमवतारयति—आवर्त्त इति। यथा अम्भः जलं वायुक्षोभादिनिमित्तवशात् आवर्त्तबुद्बुदतरङ्गमयान् आवर्त्तः अम्भोभ्रमिः बुद्बुदः कुड्मलाकारजलसंस्थानविशेषः तरङ्गः ऊर्म्मिः ते तथोक्ताः तद्रूपाः आवर्त्तबुद्बुदतरङ्गमयाः तान् विकारान् रूपभेदान् अवस्थान्तराणि इत्यर्थः। आश्रयते अवलम्बते प्राप्नोतीत्यर्थः किन्तु तत् समग्रं सकलं आवर्त्तादिकं सलिलं जलमेव। अत्र विकारशब्दः विवर्त्तार्थकः पुनरुक्तिनिरासाय प्रयुक्तः। तथा एक एव करुणो रसः अवस्थाभेदात् रतिहासशोक निर्व्वेदादिरूपतां भजते, परमार्थतस्तु स एकः करुण एवेत्युपमालङ्कारः इति वाच्यम् उपमानितरस्य यथाशब्दस्यान्वयापरिकल्पनाया अन्याय्यत्वादिति। वसन्ततिलकं वृत्तम्। अत्राम्भः यथा इत्युक्त्वा पुनः सलिलमेव इति सलिलशब्दोपादानात् पुनरुक्ततादोषः। तथा "एवमुक्तो मन्त्रिमुख्यै राघवः प्रत्यभाषत" इतिवत् अत्रापि अम्भः यथेत्यम्भःशब्देन प्रक्रम्य सलिलमेवेत्युक्ते भग्नप्रक्रमतादोषश्च। सलिलमेव इत्यत्र पदार्थान्तरतादात्म्याध्यारोपणस्य प्रतीत्या परिसंख्या चार्थी।

(त) अयीति। विमानराज! विमानानां व्योमयानानां राजा इति 'राजाहःसखिभ्यष्टच्' इति टच्। तस्य सम्बोधने रूपम्। सर्व्वेषां व्योमयानानां मध्ये पुष्पकस्य प्राधान्यात् विमानराजेति सम्बोधनमस्येति। इत इत एहीति शेषः। अथवा अस्मिन्नपि पथि त्वया गन्तव्यम्। दैवयानत्वादस्मिन् रामेण सचेतनवद्व्यवहारः कृतः। इति उक्त्वा सर्व्वे उत्तिष्ठन्ति स्वस्वस्थानप्रस्थानायेत्यर्थः।

(थ) तमसावासन्त्यौ सीतारामौ प्रति तमसा सीतां प्रति वासन्ती च रामं प्रति आह इति यथासंख्येनान्वयो बोद्धव्यः।

[(४८) अवनिरिति। अवनिः पृथिवी अमरसिन्धुः अमराणां देवानां सिन्धुः सरित् "देवे नद्यविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्"इत्यमरः। गङ्गा, अस्मद्विधाभिः अस्माकं विधा इव विधा प्रकारो यासां तथोक्ताभिः। अस्माद्दशीभिः सार्द्धं सह, अत्र तमसापक्षे मुरला गोदावरीप्रभृतिभिरित्यर्थः। वासन्तीपक्षे अन्याभिर्देवताभिः सहेत्यर्थः। छन्दसां वेदेषु प्रयुक्तेभ्य-

स च मुनिरनुयातारुन्धतीको वशिष्ठ-
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय ॥ ४८ ॥

[४८ । अवनि अमरसिन्धु अरुन्धतीभि सार्द्धं, छन्दसा य प्रयोक्ता स कुलपति, अनुयातारुन्धतीक स च मुनि वशिष्ठ भूयसे मङ्गलाय त्वयि भद्र वितरतु ॥ इत्यन्वय ।]

(इति निष्क्रान्ता सर्वे ।)

इति छायानाम तृतीयोऽङ्क । (ट)

च्छन्दोभ्य अन्यवामित्यर्थं । य प्रयोक्ता आद्य प्रथम अवतारयिता स च कुलपति मुनीनां दशसाहस्रस्यान्नादिना प्रतिपालनपूर्व्वकमध्यापयिता वाल्मीकिश्च । अनुयातारुन्धतीक अनुयाता अनुगता सहचारिणीत्यर्थं, अरुन्धती यस्य स तथोक्त । नद्युतश्चेति क । यद्वा अनुयाता अनुगता अरुन्धती यमिति बहुव्रीहि । शेषाद्विभाषेति कप् न कपीति ह्रस्वप्रतिषेध । अरुन्धतीसहित स च प्रसिद्ध मुनि मननशील वशिष्ठ भूयसे प्रभूताय मङ्गलाय कल्याणाय त्वयि भद्र क्षेमं वितरतु प्रयच्छतु । अत्र गर्भबीजस्य ऋषिभिर्भद्रवितरणरूपस्योद्भेदना दाक्षेपी नाम सन्ध्यङ्गमुक्तम् । राम मङ्गले जाते तदधीन जगतो मङ्गलं भवतीति भाव । अत्र भद्रवितरणरूपस्य एकस्य क्रियारूपधर्म्मस्य अवनिप्रभृतिषु आशीर्व्वादोपकर्मि प्रकृतेषु सम्बन्धान् तुल्ययोगितालङ्कार । वृत्त मालिनी नाम ।

(ट) अदृश्याया सीतायाश्छायायारूपभूताया इव प्रवेशनादङ्कस्यास्य छायेति नाम कृत कविना ।

इति तृतीयोऽङ्क समाप्त ।

चतुर्थोऽङ्कः ।

ततः प्रविशतस्तापस्यौ । (क)

एका । सौधातके ! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथाहि,—(ख)

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते ॥ १ ॥

[(१) तपोवनमृगः सद्यःप्रसूताप्रियापीतात् अभ्यधिकम् उष्णमधुरं नीवारौदनमण्डं पर्याप्तम् आचामति । सर्पिष्मतः भक्तस्य स्फुरता गन्धेन मनाक् अनुसृतः कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते । इत्यन्वयः ।]

(क) तापस्यौ । तपःशीलौ स्त्रियौ प्रविशतः रङ्गभूमिमिति शेषः ।

(ख) एका तापस्योरन्यतरा तापसी आहेति शेषः । सौधातके ! सौधातकिरिति तापस्योरेकस्याः नामेति बोध्यं, तस्याः सम्बोधनम् । सुधातुरपत्यं पुमान् इति सौधातकिः सुधातुरकङ्च । बाह्वादिभ्यः अपत्यार्थे सुधातृशब्दादिञ् अकङ् चान्तादेश इति । अद्य भूयिष्ठ-सन्निधापितातिथिजनस्य भूयिष्ठं बाहुल्येन सन्निधापितः समुपस्थापितः अतिथिजनः अभ्यागत-लोकः यस्मिन् तथाभूतस्य बहुभिरतिथिभिः समाकीर्णस्य भगवतो ज्ञानसत्यादिपूर्णस्य वाल्मीकेः प्राचेतसस्याश्रमपदस्य आश्रमस्थानस्य समधिकारम्भरमणीयता समधिकेन भूयसा आरम्भेण आतिथ्यसम्पादनार्थमायोजनेन रमणीयता सौन्दर्य्यमिति यावत्, दृश्यतां त्वयावलोक्यताम् । अद्य भगवतः वाल्मीकेराश्रमे अनेके अतिथयः समागताः, तेषामातिथ्यविधानार्थं विशिष्ट उद्योगो विद्यते, अतः आश्रमवासिनः अद्य भोज्यपेयादीनाञ्च प्राचुर्य्यं किञ्चिद्वैचित्र्यमपि परिलक्ष्यन्ते, तदिदमाश्रमपदं चारुतरं प्रतिभाति इति निर्गलितार्थः ।

(१) तामेव विवृणोति—नीवारौदनेति । तपोवनमृगः आश्रमस्थः हरिणः, तपोवनपदेन मृगस्य लोकसन्निधानेऽपि निर्भीकता व्यज्यते । सद्यःप्रसूताप्रियापीतात्—अत्र सद्यःपदं तृष्णाति-शयद्योतनार्थम् प्रसूतेति । कर्त्तरि क्तप्रत्ययः । सद्यः सपदि प्रसूता अपत्यं प्रसूतवती या प्रिया मृगी, प्रसवकष्टेनातिपिपासाकुलेति भावः । सद्यःप्रसूता इति सुप्सुपा समासः, ततः सद्य-

सीता। आअदं अणज्झाअकारणं सविसेसभूदं अज्ज जिम्ह-कुमाराणं *। (ग)

[(ग) आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकुमाराणाम्। इति सम्।]

प्रसूता चासौ प्रिया चेति कर्मधारयः। अत्र पुंवद्भावप्रतिषेधश्चिन्त्यः। "अपूरणीप्रियादिषु" इति निषेधस्य बहुव्रीहिसमास एव विषयः, कर्मधारये तु "पुंवत्कर्मधारयजातीयदेशीयेषु" इति पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते इति दीक्षितः। केचित् शाब्दिकास्तु यत् अपूरणी प्रियादिष्विति पुंवत्प्रतिषेधः, कर्मधारयेऽपि स अबाधः प्रवर्त्तते इति वदन्ति। तथाच क्रमदीश्वरस्य सूत्रं "पुंवन्न प्रियादौ" इति कर्मधारयेऽपि एतत् न निरवकाशमिति। अन्ये तु 'प्रसूतप्रिया' इति पाठमामनन्ति। कातन्त्रमतेऽपि पुंवद्भावप्रसक्तिरस्ति अतः प्रतिषेधश्चिन्तनीय इति दिक्। तया पीतात् आ तृष्णानिवृत्तेः परिपीतात्। ल्यब्लोपे पञ्चमी, पानं प्राप्य इत्यर्थः। भावे क्तः। यद्वा अधिकार्थशब्दयोगे पञ्चमी। अथवा कर्म्मणि क्तः, प्रसूताप्रियापीतात् मधुनः इत्यधिकं अवशिष्टं मधु अत्र आचामति इत्यर्थः किंवा सद्यः प्रसूताप्रियापीतादिति ल्यब्लोपे पञ्चमी, सद्यः प्रसूताप्रियाकर्त्तृकपानाद्धेतोः अभ्यधिकं प्रचुरं यथा भवति तथा स्वयं मधुरसं इत्यर्थः। अत्र सद्यःप्रसूतत्वमुक्तत्वं हेतुः उक्तत्वं हि प्रसववेदनाजनितशरीरखेदपरिहारकम्। प्रिया पीतत्वं च मधुरत्वे हेतुः अतएव मधुरत्वाति प्रयोजनवती, अन्यथा तस्य माधुर्य्याद्यभिधानात् वैयर्थ्यं स्पष्टमेवेति वीरराघवः। अभ्यधिकम् अतिरिक्तं पीतावशिष्टमित्यर्थः। उष्णं ईषत् उष्णम् मधुरं स्वादु च तत् तथोक्तं नीवारौदनमण्डं "मण्डः सारः अन्नमञ्जिकाम् आचामो मस्तु नाम्नायां मण्डः मस्तुसमुद्भवः" इत्यमरः। नीवारौदनस्य नीवार धान्यविशेषः तत्सम्बन्धीौदनसारकल्पः मण्डः घनीभूतद्रवविशेषः तं निष्कासितमिति यावत् पर्याप्तं प्रचुरं यथा तथा आचामति पिबति। अचिरप्रसूततया प्रियायाः पर्य्याप्ताहारस्यावश्यकत्वात् वत्सवत्सः तां प्रथमं पाययित्वा पश्चात् स्वयं पिबतीत्यर्थः अनेन प्रचुरौदनपाकोऽपि गम्यते। मपिपतत इति हितवित्कत्वेत्यर्थः। अस्मिन् अवसरे उदरता प्रसर्पता गन्धेन सौरभ्येण मनाक् ईषत् अनुसृत अनुगत तत्सहित इत्यर्थः। किञ्चित् घृताक्तोदनमधुक्त इत्यर्थः। कर्कन्धूफलमिश्रशाकपचनामोदः कर्कन्धूः फली बदरीफले मिश्रस्य शाकस्य यत् पचनं पाकः तस्य आमोदः गन्धः परिस्तीर्य्यते। अत्र वत्सस्य सद्यः प्रसूतायाः तत्प्रियायाः पर्याप्तमण्डपानरूपेण विलक्षणामोदप्रसाररूपेण कार्य्येण च कारणभूतस्य प्रचुरवस्तुपाक-रूपसङ्घोत्सवव्यापारस्य गम्यमानतया प्रत्ययात् पर्य्यायोक्तालङ्कारः।

(ग) आयदमिति। प्रथमतापसेन सौधातकि इति शब्दोऽभ्य नाम जीर्ण

* आअद अणीअपियाराणं जिम्हकुमाराणं अणज्झाअकारणम् इति पाठान्तरम्

प्रथमः । (विहस्य) अपूर्वः कोऽपि ते बहुमानहेतुर्गुरुषु सौधा-तके । (घ)

सौधा । भो भाण्डायण ! किंणामधेओ एसो महन्तस्स थविर-सत्थस्स धुरन्धरो अज्ज अदिधी आअदो † ? (ङ)

[(ङ) भो भाण्डायन ! किंनामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्य अतिथि-रागतः । इति छाया ।]

भाण्डायन । धिक् प्रहसनम् । नन्वयमृष्यशृङ्गाश्रमादरुन्धतीपुर-

इत्युक्त्वा सौधातकिरिति नाम्ना निर्देशं कुर्वन् कविः नामैकदेशेनापि नाममात्रस्य ग्रहणमिति न्यायात् सौधेत्येकदेशमात्रमुक्तवान् । अद्य जीर्णकूर्चानां जीर्णं श्लथ, कूर्चौ भ्रुवोर्मध्यो येषा-मिति वा "कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे" इति मेदिनी । यद्वा कूर्चं दाढिका इत्यर्थः, पक्वश्मश्रूणामतिवृद्धानामित्यर्थः । आगतं आगमनं सविशेषभूतं विशेषेण सह वर्तते इति सविशेष तद्भूतमिति सविशेषभूतं समधिकम् अनध्यायकारणं अनध्यायस्य स्वाध्यायविरतेः कारणं हेतु जातमिति शेषः । वृद्धानामतिथीनामागमनमद्य सविशेषमनध्यायकारणमित्यर्थः । यस्य कस्यचिदपि आगमनेन स्वाध्यायविरतिर्भवेत् अविज्ञातनाम्नामेषामागमनात् अद्य तेषा-मातिथ्योपकरणसामग्रीसम्पादनादिकार्य्यव्यग्रतया नाद्याध्ययनावसरो वर्त्तते, गुरवोऽपि तेषामभ्यर्थनादिव्यासक्ततया नास्मानध्यापयितुम् अवसरं प्राप्नुवन्ति, इदमाकस्मतीव सुप्रभातमिति भावः । वृद्धानामित्युक्त्वा जीर्णकूर्चानामित्युक्तौ सोपहासेयमुक्तिरिति प्रतीयते ।

(घ) अपूर्व इति । सौधातके ! गुरुषु पूजनीयेषु आयतेषु अतिथिषु ते तव कोऽपि अनिर्वचनीयः बहुमानहेतुः बहुमानस्यादरस्य हेतु कारणं जीर्णकूर्चत्वरूप इत्यर्थः । तथाहि जीर्णकूर्चानामित्यनेन तेषां निर्देशात् पाठप्रतिबन्धकत्वसमुल्लेखस्तत्र तेषु महान्नादर अस्तीति सोल्लुण्ठनोक्तिरियम् ।

(ङ) भो भाण्डायनेति । महतः अतिविपुलस्य स्थविरसार्थस्य वृद्धसमूहस्य "सार्थो वणिक्समूहे स्यादपि वृन्दमात्रके" इति मेदिनी । धुरन्धरः धुरं धरतीति धरते, खश्निपात-नात् । अग्रणी, किंनामधेय किं नामधेयं नाम यस्य सः, किमभिधानः । एषां वृद्धवर्य्याणां मध्ये अग्रणीरयं क इत्यर्थः । अत्रापि स्थविरसार्थस्य धुरन्धर इत्युक्तिरुपहासजनिका माननीयानां वृद्धानां श्रेष्ठोऽयं क इत्येव वक्तुमुचितत्वादिति बोध्यम् ।

---

† इतिहासस्सत्थस्स इति पाठभेदः ।

स्कृताम् महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठः प्रशास्ता किमेवं प्रलपसि ? (च)

सीता। हुं वसिट्ठो। (छ)

[(छ) हुं वसिष्ठः। इति च्छा।]

आत्रेयी। अथ किम् ? (ज)

सीता। मए उण जाणिदं, वग्घो वा विओ वा एसो त्ति। (झ)

[(झ) मया पुनर्ज्ञातं, व्याघ्रो वा वृको वा एष.। इति च्छा।]

आत्रेयी। आः किमुक्तं भवति ? (ञ)

सीता।, तेण परावडिदेण ज्जेव सा वराइआ कल्लाणिआ मड्-मडाइदा *। (ट)

[(ट) तेन परापतितेनैव सा वराकिका कल्याणिका मड्मडायिता। इति च्छा।]

(च) धिगिति। प्रहसनं उपहासं धिक् गर्हितमित्यर्थः। गुरुं प्रत्युपहसनं निन्दितमिति भावः। धिक्शब्दयोगे द्वितीया। कथमित्याह—नन्विति। ननु भो वटो एषः भगवान् माहात्म्यशाली वसिष्ठः सुनामधेय इति अरुन्धतीपुरस्कृताम् अरुन्धत्या वसिष्ठपत्न्या पुरस्कृतास्ताम्, अरुन्धती पुरस्कृता अग्रवर्तिनी येषां तानिति वा। दारान् भार्याः अधिष्ठाय आश्रित्य तन्निवासकौ भूत्वा इति यावत्, प्राप्तः उपस्थितः। महाराजदशरथस्य दारानित्यनेन राजपत्नीत्वेन तेषामपि जनानां माननीयता दर्शिता। तत्कारणात् किं कथं त्वमेवम् अनेन प्रकारेण प्रलपसि उपहासवाक्यं वदसि ? भगवन्तस्य मुनिवरस्य तदधिष्ठितानाञ्च परिहासो न युज्यते इति भावः।

(छ) हुमिति। हुमिति प्रश्नेऽव्ययम्। 'हुं' स्यात् प्रश्नवितर्कयो'रित्यजयः। महतः स्थविरस्यापि पुरस्थरोऽयं किं वसिष्ठ इति निष्कृष्टार्थः।

(ज) अथ किमिति स्वीकृतिसूचकमेकमव्ययम्। हाँ इति भाषा। अयं वसिष्ठ एवेत्यर्थः।

(झ) मए इति। पुनः किन्तु मया ज्ञातं बुद्धम् एष आगतः जनः व्याघ्रः शार्दूलः वा वृकः क्षुद्रकायव्याघ्रविशेषः वा 'वृकः श्वापदकाकयो' रित्यजयः। शुकशूकविक्षुविका: वाक् इति अमरः। 'कोकस्त्वीहामृगो वृक' इत्यमरः। पक्वश्मश्रुयुतदीर्घाकारत्वात् एषः प्रथमं व्याघ्रो वृको वा इति ज्ञातं मयेत्युपहासः

(ञ) आः इति। आः इति कोपार्थमव्ययम्। 'आस्तु स्यात् कोपपी ?।
किमुक्तं स्यादिति भावः। तदिदं वाक्यं गर्हितं खलु। महर्षिं वसिष्ठमपि त्वमुप।

---

* तेन...सा वराकिका कल्याणी मड्मडायिता इति पाठान्तरम्।

भाण्डा। समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः, तं हि धर्मसूत्रकाराः समामनन्ति। (ढ)

(ट) तेन इति। यतः, तेन स्थविरेण परापतितेनैव उपस्थितमात्रेणैव ननु विचित्रितत्या इत्येवार्थः। वराकिका दीना, बृहत्तयात्मरक्षणासामर्थ्यात् भोक्त्रा प्रतिकूलदैवा कल्याणिका वत्सतरी 'कल्याणी माघवर्णी गौ'रिति राजनिर्घण्टः। यद्वा कल्याणिकानामधेया, मड्-मडायिता मड्मड् इति शब्देन चर्विता भक्षिता च। अस्थ्नां चर्वणेन यः शब्दः समुत्पद्यते तस्यानुकरणार्थं शब्दः समुत्पन्नः मड् इति अव्यक्तशब्दस्यानुकरणं ततः इतिशब्दयोगात् मड् इति डाच् प्रत्ययः, मड्मडा करोतीति लोहितादिडाज्भ्यः क्यष् इति क्यष्प्रत्यये मडमडाय इति नामधातोः कर्मणि क्तप्रत्यये सिद्धमिदं पदम्। अतो मया व्याघ्रादिवत् रोमाञ्चदीर्घत्वादागतमात्रेण वत्सतरीभक्षणात् व्याघ्रादित्वेन सन्दिह्यते, नात्र कोऽपि दोष इति भावः।

(ढ) समांस इति। समांसो मधुपर्क इति मांसेन सह वर्त्तते इति समांसः। मधुनः पर्कः संपर्को यत्र स मधुपर्कः, मधुना पृच्यते इति वा मधुपर्कः। "दधि सर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः। प्रोच्यते मधुपर्कस्तु सर्वदेवौघतुष्टये॥" इति। तन्त्रसारमते तु—"आज्यं दधिमधून्मिश्रं मधुपर्कं विदुर्बुधाः" इति। "पितृदेवतातिथिपूजायां पशुं हिंस्यात्।" "मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव च पशुं हिंस्यान्नान्यत्रेत्यब्रवीन्मनुः॥" मांसेन सहितो मधुपर्कः अतिथये देयः इति एतत् आम्नायं आम्नायते अभ्यस्यते इत्याम्नायः आङ्पूर्वकात् म्नातेरिक्तार्थाभावेऽपि घञि रूपम्। तद् बहुमन्यमानाः सादरं अनुवर्तमानाः वेदानुशासनं गृह्णाना इति यावत्। गृहमेधिनः गृहैर्दारैर्मेधन्ते सङ्गच्छन्त इति गृहमेधिनः गृहस्थाश्रमिणः जनाः श्रोत्रियाय अधीतवेदाय ब्राह्मणाय, तल्लक्षणमाह देवलः—"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्"॥ इति। छन्दः अधीते इति श्रोत्रियः। पक्षे छान्दसः। छन्दोऽधीते इत्यर्थे श्रोत्रियन् इति निपात्यते, नकारः स्वरार्थः। श्रुतिमधीते घः, श्रोत्रादेशश्च-समासादित्वादिति व्याख्याताः। यद्वा श्रूयते धर्माधर्मावनेन इति श्रोत्रो वेदः बाहुलकात् त्रः, श्रोत्रं वेत्ति अधीते वा श्रोत्रियः 'तदधीते तद्वेदे'त्यण् इति बोपदेवीयाः। अभ्यागताय अतिथये वत्सतरीं अल्पवयस्कां गोवत्सां महोक्षं महान्तमुक्षाणं इति समासान्तटच्, वृषभं वा, अथवा महाजं महान्तं छागं वा निर्वपन्ति भोज्यार्थं प्रयच्छन्ति, तं हि एवमेव खलु गृहस्थानां धर्मः इति धर्मसूत्रकाराः धर्मशास्त्रप्रणेतारः मन्वादयः समामनन्ति वदन्ति, हि यतः शास्त्रकाराः श्रोत्रियायाभ्यागताय महोक्षमहाजवत्सतरीणामन्यतमदानरूपं धर्मं समामनन्ति, अतएवाभ्यागताय वसिष्ठाय महर्षये समांसो मधुपर्को दत्तः, तेनापि वत्सतरी भक्षिता। मांसाशिन-

सौधा। **भो णिग्गहीदोऽसि। (ड)**

[(ड) भो निगृहीतोऽसि। इति सम्।]

भाण्डा। **कथमिव? (ढ)**

सौधा। **जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा, अज्ज एव्व पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीएण वि दहि-महूहिं एव्व णिव्वत्तिदो महुवक्को, वच्छदरी उण विसज्जिदा। (ण)**

[(ण) येन आगतेषु वशिष्ठमिश्रेषु वत्सतरी विशसिता, अद्य एव प्रत्यागतस्य राजर्षे-र्जनकस्य भगवता वाल्मीकिना दधिमधुभिरेव निर्वर्त्तितः मधुपर्कः, वत्सतरी पुनर्विसृष्टा। इति सम्।]

भाण्डा। **अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते। निवृत्तमांसस्तु तत्रभवान् जनकः। (त)**

छागकारणमिति। अत्र वशिष्ठ—"अथापि ब्राह्मणाय राजन्याय वा अभ्यागताय वा महोक्षं वा महाजं वा पचेदेवमस्यातिथ्यं कुर्व्वन्तीति।" कलौ तु मधुपर्के पशुहिंसा निषिद्धा, प्रमाणन्तु मन्वादौ द्रष्टव्यम्।

(ड) भो इति। निगृहीतः त्वं मया पराजितः असि भवसि। यद्वा निगृहीतः पराभूतः स्वपक्षसमर्थनविधुर इति यावत्, यतो मधुपर्कानुरोधेन जीवहिंसा न शास्त्रार्थः, तथात्वे सर्व्वत्रैव तदनुष्ठानं स्यादिति भावः।

(ढ) कथमिति। कथमिव केन प्रकारेणाहं त्वया पराजितोऽस्मीत्यर्थः। मयैव शास्त्रप्रमाणदर्शनेन तवोपहासवाक्यं दूषितं तथापि अहमेव निगृहीतस्त्वयेति कोऽयमसौ व निपद. तत्र बुध्यते इति भाव.।

(ण) जेणेति। भाण्डायनस्य निग्रहप्रकारं विशेषेणाह—येनेति। येन हेतुना। वशिष्ठमिश्रेषु ब्रह्मर्षिश्रेष्ठेषु वशिष्ठेषु आगतेषु आश्रममुपगतेषु सत्सु। वत्सतरी गोवत्सा विशसिता शसु हिंसायामित्यस्य रूपम्। व्यापादिता निहता समांसमधुपर्कार्थमिति शेषः। किन्तु अद्यैव अधिकं वाचनि नतु हिंसान्तरे। एतेन शास्त्रार्थविकृतिरपाकृता। प्रत्यागतस्य उपस्थितस्य राजर्षेर्जनकस्य भगवता ऐश्वर्यशालिना वाल्मीकिनापि येन वशिष्ठाय समांस-मधुपर्को दत्तस्तेनापि मतस्यैतादृश इत्यपरेयं। सम्यग्विवेकविदा अथान्तमनसा नापीति वा। दधिमधुभिरेव दध्ना मधुभिश्च मधुपर्कः, अत्र मद्यवर्जितान्येवान्यानि यद्वा शेषः। पूर्वोक्तवाक्यविशेषः निर्वर्त्तितः सम्पादितः। पुनः किन्तु वत्सतरी सृष्टा मधुपर्के न हन्तव्यः। न विशसितेति यावत्।

सौधा। किं णिमित्तम्? (थ)

[(थ) किं निमित्तम्? इति सम्।]

भाण्डा। स तदैव सीतादेव्याः तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तथास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य। (द)

सौधा। तदो किंत्ति आअदो? (ध)

[(ध) ततः किमिति आगतः? इति सम्।]

(त) अनिरस्तेति। अनिरस्तमांसानां न निरस्तं मांसं भक्षणया मांसभोजनं यैस्तै तथोक्तानां मांसभोजिनां जनानां, सम्बन्धे षष्ठी। एवं कल्पं मधुपर्के मांसदानरूपं विधिं मन्यन्ते शास्त्रकारा इति शेषः। "समांसो मधुपर्क" इति श्रुतिः मांसाशिदानपरत्वेनावधार्यते न तु मांसाभोजिदानपरतयेति, अतः श्रुत्यन्तरेण मांसदाननिषेधे सत्यपि मांसाभोजिपरतया सा बोध्या। तु परन्तु तत्रभवान् पूज्यः जनकः वैदेहः निरस्तमांसः परित्यक्तमांसभोजनः। अतएव वाल्मीकिना मांसाशिने वशिष्ठाय समांसो मधुपर्को दत्तः परित्यक्तमांसभोजनाय तु जनकाय केवलदधिमधुभिरेव मधुपर्को दत्त इति "समांसो मधुपर्क" इति श्रुतेर्न कश्चित् विरोधः। तत्कथमहं त्वया शास्त्रार्थविचारे पराजितोऽस्मि त्वयैवाविदितशास्त्रतत्त्वेनैवदूषितमित्युपहसित इति भावः। भोजनार्थं मधुपर्कादौ मांसाशिने दत्तस्य मांसस्याभोजने दोषश्रवणात् विच्छेदेन तदुक्तम्। प्रमाणं मन्वादिधर्मशास्त्रे द्रष्टव्यमिति।

(थ) किमिति। किं निमित्तम्? राजर्षेर्जनकस्य मांसत्यागे किं कारणम्। जनकः केन हेतुना मांसं न भुङ्क्ते इत्यर्थः।

(द) स इति। स जनकः तदा एव सीतानिर्वासनसमकाले एव तादृशं तथाविधं अतिघोरतरमित्यर्थः। दैवदुर्विपाकं दैवस्य भाग्यस्य दुर्विपाकं दुर्विलसितं दुष्टपरिणाममिति यावत्, सीतावननिर्वासनरूपमित्यर्थः। उपश्रुत्य लोकपरम्परया आकर्ण्य वैखानसः वानप्रस्थः "वैखानसो वनवासी वानप्रस्थश्च तापस" इति त्रिकः। संवृत्तः जातः। सीतावियोगदुःखात् गृहं परित्यज्य अरण्यतरुमूलमाश्रितवानित्यर्थः। तथा अपि च। चन्द्रद्वीपतपोवने चन्द्रद्वीपाख्यस्य कस्यचिद्द्वीपविशेषस्य प्रदेशस्य वा तपोवने तपसो योग्ये अरण्ये आश्रमे इति यावत्। तपस्तप्यमानस्य "तपस्तपःकर्मकस्येति" आत्मनेपदम्। तपस्या कुर्वतः अस्य जनकस्य कतिपये संवत्सराः कियन्तो वत्सराः अतीता इति शेषः।

(ध) तदो इति। ततः तस्मात् चन्द्रद्वीपतपोवनात् किमिति किं निमित्तं कस्मादेतौ

भाण्डा। चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम्। (न)

सौधा। अवि अज्ज सम्बन्धिणीहिं समं संवुत्तं वे दंसणं ण वेत्ति। (प)

[(प) अपि अद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वेति। इति छाया।]

भाण्डा। सम्प्रत्येव भगवता वसिष्ठेन देव्याः कौशल्यायाः सकाशं भगवती अरुन्धती प्रहिता, यत् स्वयमुपेत्य वैदेहो द्रष्टव्य इति। (फ)

सौधा। जधा एदे त्थविरा परप्परमिलिदा, तधा अम्हे वि बडुएहिं समं मिलिअ अणज्झायमहूसवं खेलन्ता सम्भावेम्ह। (ब)

[(ब) यथा एते स्थविराः परस्परमिलिता, तथा वयमपि बटुकैः समं मिलित्वा अनध्यायमहोत्सवं खेलन्तः सम्भावयामः। इति छाया।]

(इति परिक्रामतः।)

(न) चिरन्तनेति। चिरन्तनप्रियसुहृदं चिरं भव इति चिरन्तनः। चिरमित्यव्ययात् ट्युल् तुट् च। सु शोभनं हृदयं यस्य सः सुहृत्। चिरन्तनं पुरातनं बहुकालीनं प्रियसुहृदं हृद्यबन्धुं प्राचेतसं वाल्मीकिं द्रष्टुं साक्षात्कर्तुम्। जनकः समागत इति वाक्यशेषः।

(प) अपीति। अपि प्रश्ने। अद्य सम्बन्धिनीभिः वैवाहिकीभिः राघवमातृभिः समं सह, अस्य जनकस्य दर्शनं साक्षात्कारः संवृत्तं संजातं नवा इति एतत् पृच्छामीत्यर्थः।

(फ) सम्प्रत्येवेति। सम्प्रत्येव अधुनैव भगवता ऐश्वर्यशालिना वसिष्ठेन महात्मना महर्षिणा। स्वयं आत्मना "स्वयमात्मने"त्यमरः। उपेत्य आगत्य वैदेहः विदेहाधिपतिर्जनकः द्रष्टव्यः अवलोकनीयः इति वक्तुम् एतत् वच कथयितुं देव्याः राज्ञ्याः कौशल्यायाः राममातुः सकाशं समीपं भगवती माहात्म्यवती अरुन्धती तत्पत्नी प्रहिता प्रेषिता। अधुनैवास्य सम्बन्धिनीभिः साक्षात्कारो भविष्यति, न तु इतः प्राक् जात इत्यर्थः।

(ब) यथेति। यथा एते इमे स्थविराः वृद्धा जनकादयः। परस्परमिलिताः अन्योऽन्यं सङ्गताः तथा वयमपि बटवः माणवकाः बटुकैः अन्यैर्बालकैः सह मिलित्वा खेलन्तः क्रीडन्तः। "बालको मानवो बालः शिशवो बटुरित्यपि" इति शब्दरत्नावली। [illegible] नाध्यायमहोत्सवं अध्ययनपाठनिषेधदिने यो महोत्सवः आनन्दः तं सम्भावयामः अ[illegible] अनध्याय-दिवसेष्वपि छात्राणां परमानन्दानुभवः चिरप्रसिद्धः, अधुनापि तथा [illegible] इति [illegible] गीतं [illegible] पादविक्षेपं कुरुतः।

भाण्डा। तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतसवसिष्ठा-वुपास्य सम्प्रति आश्रमबहिर्वृक्षमूलमधितिष्ठति, य एषः।—(भ)

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते।
अन्तःप्रसृप्तदहनो * ज्वलन्निव वनस्पतिः ॥ २ ॥

[(२) अन्तःप्रसृप्तदहनः ज्वलन् वनस्पतिरिव एष हृदि नित्यानुषक्तेन सीताशोकेन तप्यते। इत्यन्वयः।]

(इति निष्क्रान्तौ।) (म)

विष्कम्भकः। (य)

(भ) तदयमिति। तदयं स चासौ अयं चेति तदयं सः अस्माभिः दृष्टपूर्वः अयं पुरोवर्त्तीति तदयम्। ब्रह्मवादी ब्रह्म वेदं वक्तुं शीलमस्य इति ब्रह्मवादी "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापति"रित्यमरः। पुराणराजर्षिः पुराणः पुरातनः प्राचीन इति यावत्, स चासौ राजर्षिश्चेति यो राजा सन् ऋषिवत् आचरति स राजर्षिरिति। जनकः प्राचेतसवसिष्ठौ वाल्मीकिवसिष्ठौ उपास्य अभिवादनादिभिरभ्यर्च्य सम्प्रति आश्रमबहिर्वृक्षमूलं आश्रमात् तपोवनात् बहिः बहिर्देशस्थितवृक्षस्य कस्यचित् तरोर्मूलं तलदेशं अधितिष्ठति, अधिपूर्वात्तिष्ठतेः अधिशीङ्स्थासामित्यादिना अधिकरणस्य कर्मत्वम्। वृक्षमूले तिष्ठतीत्यर्थः। य एष इत्यस्य वक्ष्यमाणश्लोकस्थेन तप्यते इत्यनेनान्वयः।

(२) हृदीति। अन्तः प्रसृप्तदहनः अन्तः अभ्यन्तरे प्रसृप्तः परिव्याप्तः दहनः अनलः यस्य स तादृशः अभ्यन्तरस्थितपावकः, ज्वलन् दीप्यमानः वनस्पतिः शमीतरुः इव वनस्य पतिरिति पारस्करादित्वात् सुट्। "अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः"। "वनस्पतिर्वटाश्वत्थे" इत्यमरः। य एष राजर्षिर्जनकः। हृदि हृदये नित्यानुषक्तेन नित्यं निरन्तरम् अनुषक्तेन लग्नेन विद्यमानेन इति यावत्। सर्वदानुभूयमानेनेत्यर्थः। सीताशोकेन सीतायाः शोकेन तापदाहविरहनिर्वासनजन्यदुःखेन तप्यते सन्तप्यते पीड्यते। यथान्तर्गतवह्निना शमीतरुः अन्तः दह्यते तथायमपि सीताशोकानलेन निरन्तरं सन्तप्यते इत्युपमा। अन्न दृष्टान्तासम्भवे वह्नेर-भावात् अत्र वनस्पतिशब्दः शमीतरुपरः। तेन वनस्पतिविशेषे वक्तव्ये अविशेषस्य वनस्पतिमात्र-स्योक्तत्वात् विशेषाविशेषत्वरूपो दोषः। ज्वलन्निव शमीतरुरिति पाठेन स समाधेयः। अत्र ताप-साधर्म्य एव ज्वलतो वनस्पतेः साम्यादिः जनके प्रत्ययात् उपमालङ्कारः।

(म) इतीति। इत्युक्त्वा निष्क्रान्तौ तौ धातकिमाण्डायनौ राजधूर्तः बहिर्गतावित्यर्थः।

---

* अन्तःप्रदीप्तदहनः इति क्वचित् पाठः।

(ततः प्रविशति जनकः) (२)

जन।

अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन् मर्माणि क्रकच इव मन्युर्विरमति॥ ३॥

(३) अपत्ये यत् तादृक् दुरितम् अभवत्, महता तीव्रेण व्रणितहृदयेन तेन विषक्तः पटुः धारावाही चिरेणापि नव इव क्रकच इव मर्माणि निकृन्तन् मे मन्युः नहि विरमति। इत्यन्वयः।]

---

(१) विष्कम्भक इति। वृत्तानां भूतभविष्यतां कथांशानां संक्षेपेण निदर्शकरूपो नाटकांशविशेषः। तदयमत्र "तदेव सीतादेव्यास्तादृशं देवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः।" इत्याद्यतीतकथांशानां, तथा "संप्रत्येव भगवता वशिष्ठेन" इत्यादि वर्तिष्यमाणकथांशानाञ्च ऋषिकुमाराभ्यां मध्यमपात्राभ्यां सौधातकिभाण्डायनाभ्यां प्रयोजितत्वात् शुद्धो विष्कम्भक इति बोध्यं "मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्या"दिति विश्वनाथोक्तेः।

(२) तत इति। रङ्गभूमिमिति शेषः।

(३) अपत्ये इति। अपत्ये कन्यारूपे तोकें सन्तानभूतायां सीतायामित्यर्थः। यत् तादृक् तथाविधमतिदारुणं दुरितं पापं जन्मान्तरीयपापजन्यनिर्वासनरूप दुःखम्, यद्वा दुरितं व्यसनं निर्वासनरूपः अनिष्टापात इत्यर्थः। अभवत्। महता अतिविपुलेन, तीव्रेण दुःसहेन, तीक्ष्णेन, व्रणितहृदयेन व्रणं सञ्जातोऽस्येति व्रणितं सञ्जातव्रणं हृदयं यस्मात् येन वा, तथोक्तेन निर्भिन्नहृदयेन व्यथयता पीडयता सन्तापयतेति यावत्। तेन दुरितेन दुहितृविपत्पातरूपेणेत्यर्थः। विषक्तः हृदये दृढं निहितः, पटुः प्रबलः हृदयोन्मथने क्षमः। धारावाही धारया अविच्छिन्नप्रवाहेण निशितायभागेण च वहति प्रचरतीति धारावाही निरन्तरमनुभूयमानः सर्वदा वर्तमानः चिरवर्तित्वात् शितधारधारी च। चिरेण प्रतिक्षणमभ्यस्यमानेनैतत्। अपत्ये जातायास्तृतीयायाः शुक्। महता कालेन अतीतेन तदर्थं नूतन इव बहुकालात्ययेऽपि अमन्दीभूत इति भावः, क्रकचः करपत्रम् इव वर-

कष्टम्, एवं नाम जरसा दुःखेन च दुरासदेन भूयः पराकसान्तपनप्रभृतिभिस्तपोभिरात्तरसधातुः अनुपयुज्यमानो न अद्यापि मे दग्धदेहः पतति । 'अन्धतामिस्रा हि असूर्य्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिन' इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनास्पष्टनिर्भासः † प्रत्यग्र इव दारुणो न मे दुःखसंवेगः प्रशाम्यति । अयि मातर्देवयजनसम्भवे देवि सीते ! ईदृशस्ते निर्माणभागः परिणतः, येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते । हा हा पुत्रि !—(ल)

पवम्" इत्यमरः । (करात इति भाषा) मर्म्माणि जीवनस्थानानि निकृन्तन् छिन्दन् विदारयन् इति यावत्, मे मम मन्युः शोकः नहि विरमति न निर्व्वाणं याति । निखिलमपि वस्तुजातं कालेन विलुप्तं भवेत्, अयन्तु सीताशोकः प्रतिदिनं नूतनतामापद्यमान इव मां निरन्तरं भृशं दहति न किञ्चिदप्युपशमं यातीति भावः । अत्र मर्म्मो क्रकचसाम्यादेः इवशब्दस्य प्रयोगात् पूर्णोपमालङ्कारः तथा नव इवेति वाच्या गुणोत्प्रेक्षा इत्यनयोरङ्गाङ्गिभावसङ्करः । शिखरिणी वृत्तम् ।

(ल) कष्टमिति । कष्टमित्यव्ययम् अहो दुःखमित्यर्थः । एवं नाम इत्थंप्रकारेण जरसा वार्द्धकेन दुरासदेन दुरभिभवेन सोढुमशक्येन दुःखेन च सीतावियोगजेनेत्यर्थः । भूयः पुनरपि पराकसान्तपनप्रभृतिभिः पराको द्वादशाहोपवाससाध्यव्रतविशेषः । सान्तपनं द्व्यहसाध्यव्रतविशेषः । पराकश्च सान्तपनञ्च ते पराकसान्तपने ते प्रभृती आदी येषां तैस्तथोक्तैः । "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥" "कुशोदकञ्च गोक्षीरं दधि मूत्रं शकृद्घृतम् । प्राश्यापरेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरन् ॥" इति याज्ञवल्क्यः । तपोभिः नानाविधकृच्छ्रसाध्यवैधोपवासादिव्रतैः । आत्तरसधातुः आत्ताः गृहीताः शोषिताः रसा रक्तादयः द्रवाः धातवः शरीरपोषकाः त्वग्लोममज्जप्रभृतयः यस्य स तथोक्तः । शरीरक्षयकारिणा वार्द्धकेन अतितीव्रेण शोकसन्तापेन विविधैरुपवाससाध्यव्रतैश्च नितरां क्षीणः अपटुश्च अतएव अनुपयुज्यमानः कस्मिन्नपि राज्यशासनादिव्यापारे असमर्थः सर्व्वथा अकर्म्मण्य इत्यर्थः । अयं मे दग्धदेहः, हततद्दग्धमितिवत् निन्दायां दग्धशब्दः । अद्यापि न पतति न विशीर्य्यते न नश्यतीति यावत् । इयैव मे शरीरधारणं क्लेशपरम्परामनुभवतो देहस्य विनाश एवेदानीं श्रेयानिति भावः । ननु देहे तवेदृशी अनास्था

---

† प्रतिक्षणपरिभावनया स्पष्टनिर्भासः इति विद्यासागरसम्मतः पाठः ।

अनियतरुदितस्मितं विराजत्-
कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जु * जल्पितं ते ॥ ४ ॥

पीडामनुभवैव म्रियतामित्याह—अन्धत्यादि । हि यतः ये जना आत्मघातिन आत्मानं घ्नन्ति शीलमेषां ते तथोक्ताः भवन्तीति शेषः । तेभ्यो जनेभ्यः तान् पातयितुं क्रियार्थे चतुर्थी । अन्धतामिस्रा अन्धं करोतीति ण्यन्तात् पचादित्वादच् । तमिस्रस्य समूह इति तामिस्रं ततः अन्धं तामिस्रं येषु ते तथोक्ताः अन्धतमोमया अन्धकारपूर्णा ते प्रसिद्धा असूर्य्या नास्ति सूर्यः सूर्यालोकः येषु ते सूर्य्यालोकशून्याः सर्वालोकरहिता इत्यर्थः, नाम असूर्य्या इति नाम्ना विख्याताः लोकाः भुवनानि नरकविशेषा इत्यर्थः । "लोकस्तु भुवने जने" इत्यमरः । प्रतिविधी-यन्ते निर्दिश्यन्ते विधात्रेति शेषः । ये केचिदिहात्महत्या कुर्वन्ति ते मरणादूर्ध्वं सूर्य्यांशुसम्पर्क-शून्येऽतितिमिरावृते दुर्गमे घोरे कुत्रचित् भुवने आपापक्षयान्निवसन्ति इति भावः । इत्येवम् ऋषयः धर्मशास्त्रप्रणेतारः मुनयः मन्यन्ते वदन्तीत्यर्थः । अत्र वाजसनेयसंहितोपनिषत् प्रमा-णम् ।—"असूर्य्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" इति । सुतरां घोरतरनरकपातभयात् न आत्महत्यामपि कर्तुं शक्यते इति भावः ।

कालेन तथापि शोकक्षयो भविष्यति किं परितप्यसे इत्यत आह—अनेकेति । अनेकसंवत्स-रातिक्रमेऽपि अनेकेषां बहूनां संवत्सराणां वर्षाणाम् अतिक्रमेऽपि अत्यये सत्यपि प्रतिक्षणपरि-भावनास्पष्टनिर्भासः, क्षणे क्षणे इति प्रतिक्षणं प्रतिमुहूर्त्तं या परिभावना परिचिन्तनं तया स्पष्टः सुव्यक्तः निर्भासः अवभासनं प्रकाश इति यावत्, यस्य स तथोक्तः । चिन्ताया नैरन्तर्य्यात् हृदये सर्वदा वर्त्तमान इत्यर्थः । प्रत्यग्र इव नूतन इव दारुणः मर्म्मच्छिदो दुःखसंवेगः दुःखस्य शोकस्य संवेगः उच्छ्रायः न प्रशाम्यति न शान्तिम् आपद्यते न विरमतीत्यर्थः ।

अयि मातः देवयजनसम्भवे यज्ञभूमिसमुत्पन्ने सीते जानकि ! ईदृशः एवम्प्रकारः शोचनीय इत्यर्थः । ते तव निर्व्वासनाय. सृष्टिफलं परिणतः विपर्य्यासं प्राप्तः । त्यागस्य दोषचावहेतुक-त्वादिति भावः । येन निर्व्वासनाशेन हेतुना अन्यथा स्वच्छन्दं सैरम् इच्छानुरूपं मुक्तकण्ठ-मित्यर्थः । आक्रन्दितुमपि रोदितुमपि न शक्यते । सापवादं परित्यक्तायास्तव कृते रोदितुमपि जिह्रेमीत्यर्थः । तदुक्तैः रुदित्वापि दुःखभारं लघु कर्तुं न शक्नोमीति ' ना पुनि इति अत्र मध्यमावलोकिनान्वयः । हा हेति दुःखसूचकमव्ययम् । पुनि

---

* स्खलदसमञ्जसमुग्धजल्पितम् इति क्वचित् पाठः ।

[(४) हा हा पुत्रि । शिशो ते अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रं स्खलदसमञ्जसमञ्जुजल्पितं वदनकमलकं स्मरामि । इत्यन्वयः ।]

भगवति वसुन्धरे ! सत्यमतिदृढासि । (व)

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदुः
माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती तद्वत्तु या दैवतम्
तस्यास्त्वं दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥ ५ ॥

[(५) त्वं वह्निः मुनयः वसिष्ठगृहिणी गङ्गा च, यदि वा रघोः कुलगुरुः देवः स्वयं

---

(४) अनियतेति । (हा हा पुत्रि ।) शिशोः शैशवे स्थितायास्ते तव अनियतरुदितस्मितं रुदितं रोदनं च स्मितं मन्दहास्यञ्च इति रुदितस्मिते अनियते अनिर्दिष्टे अस्थिरे रुदितस्मिते यत्र तत्तथोक्तं, निमित्तं विनैव कदा वा रुदद् कदा वा हसत् च, शैशवे रोदनहास्ययोः किमपि कारणं न विद्यते इति भावः । विराजत्कतिपयकोमलदन्तकुड्मलाग्रं कुड्मलाः कोरका इव तेषां अग्राणि दन्तकुड्मलाग्राणि विराजन्ति शोभमानानि कतिपयानि कियन्ति अल्पानीत्यर्थः । कोमलानि सुकुमाराणि दन्तकुड्मलाग्राणि यस्मिन् तत्तथोक्तं कोमलकुन्दकोरकायमाणमनोहरदन्तैः शोभमानम् । तथा स्खलदसमञ्जसमञ्जुजल्पितं स्खलत् समग्रवर्णोच्चारणसामर्थ्यविरहात् विशीर्णाक्षरम् अस्पष्टवर्णमिति यावत्, असमञ्जसम् असम्बद्धं पूर्वापरसङ्गतिरहितं तथापि मञ्जु मनोहरं श्रुतिमधुरं जल्पितं भाषितं यस्मिन् तत्तथोक्तं वदनकमलकं वदनं कमलमिव तत्, अनुकम्पायां क, सरोजसुन्दरमाननं स्मरामि तत्कथापूर्वकं चिन्तयामि । जातायास्ते मनोहरमाननं ममाधुनापि नेत्रपथारूढमिव प्रतिभाति, त्वं पुनः क्वासीति भावः । अत्र शैशवावस्थायाः स्वतो जातभाववर्णनवैचित्र्यात् स्वभावोक्तिरलङ्कारः । तथा द्वितीयतृतीयपादयोर्लुप्तोपमाद्वयम् इत्येषामङ्गाङ्गिभावेन सङ्करः । अत्रोपचारेऽपि करुणरसाङ्गः शृङ्गारः । पुष्पिताग्रा वृत्तम् । अत्र अनुरूपप्रकृतिरभिज्ञानशकुन्तले यथा—"आलक्ष्यदन्तमुकुलाननिमित्तहासै"रित्यादिः ।

(व) भगवतीति । भगवति वसुन्धरे । वसूनि रत्नानि धारयति या सा वसुन्धरा । संज्ञायां भृतॄवृजिधारिसहितपिदम इति खच्प्रत्ययः । हे भूतधात्रि ! त्वं सत्यं निश्चितं अतिदृढा अतिकठिना असि । अत्र "यो वा बिभर्त्ति धारिण्यै तस्यै भूम्यात्मने नमः" इति प्रमाणं द्रष्टव्यम् । तव वसुन्धरात्वमनुसृत्यैव पुत्रीनाशेऽप्यविचलितत्वात् दृढत्वम् उपालम्भो व्यज्यते ।

(५) वसुन्धराया अतिदृढत्वं समर्थयति—त्वमित्यादि । त्वं विग्रहः शरीरभूता

भास्कर यस्या माहात्म्य विदु, वाक विद्यामिव भवती याम् असूत, या तहत् तु दैवत तस्या दु हतु तथा विशसन दारुणे। त्व किम् अनुष्यथा। इत्यन्वय।]

(नेपथ्ये) इत इतो भगवतीमहादेव्यौ। (अ)

जनक। (दृष्ट्वा) अये! गृष्टिनोपदिश्यमानमार्गा भगवती अरुन्धती। (उत्थाय) कां पुनर्महादेवीत्याह। (निरूप्य) हा! कथं

अतिप्रभाववती भवती, वह्नि अतिप्रभाववान् देव पावक, मुनय तपोबलात् त्रिकालज्ञा वसिष्ठवाल्मीकिप्रभृतय ऋषय। तथा वसिष्ठगृहिणी पतिव्रताग्रणी सर्वज्ञा अरुन्धती, गङ्गा च त्रिलोकपावनी भागीरथी च यदि वा तथा रघो कुलगुरु रघुवंशस्यादिपुरुष देव दीप्तिशाली माहात्म्यवान् स्वय साक्षात् भास्कर सूर्यश्च यस्या सीताया माहात्म्य जानीत कथं अनागुपत्य वा, विर जानन्ति। अत्र त्व च स च ते च सा च सा च स च इति ते, त्वदादीनां मिथ सहोक्तौ यत् पर तच्छिष्यत इति यच्छब्दस्य शेषत्वेनावस्थानात् क्रियापदे प्रथम पुरुषबहुवचनम्। यद्वा विदुरित्यस्य विभक्तिवचनविपरिणामेन योजना। अत्र भूम्यादीनामन्यो इन्यनिरपेक्षप्रामाण्यप्रतिपत्त्यर्थ क्रियैकशेषाकरणादिदमित्यत्र न मध्यमपुरुष प्रयुक्त। अतएव पुरुषवचनविपरिणामेन भिन्नानि वाक्यानि कश्चित् "युगपद्वचने पर पुरुषाणा"मिति कातन्त्रसूत्रेण मध्यमपुरुषप्राप्तौ प्रथमपुरुषविभक्तियोगाच्च्युतसंस्कारत्वदोष वदन्ति, तदेतत् सुधीभिर्विभाव्यमिति। विद्या वागिव वाक भारती "ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती" इत्यमर। विद्याम् इव वाक उपनिषद्वाणी ब्रह्मज्ञानम् इव इति वा। भवती ९ यां सीताम् असूत जनयामास, पृ अयत तव सर्वव्यापित्वेन अहायामपि स्थितत्वादिति मात्रा दित्यर्थ। शुचि गताया निर्दोषत्व प्राप्ताया अग्निपरीक्षया त्वत्समक्ष निर्दोषत्वेनावधारिताया इत्यर्थ। तस्या तादृश्या अलौकिकपुण्यशालिन्या दुहितु कन्याया सीताया तथा तथा तेन प्रकारेण विशसन व्यापादन अविमृश्यापवादेन निर्जने वने असहायाया पूर्णगर्भाया वर्जनेन विनाशनमिति यावत् अयि दारुणे निष्ठुरे त्व किं कथं केन प्रकारेण वा अनुष्यथा सोढवती। निरपराधाया स्वसुताया मापवादवर्जनेन विनाशसहनात् त्वमतीव दृढासीति भाव। अत्र त्वमथितिपदार्थेषु बहुषु प्रस्तुतेषु एकस्या एव वेदनक्रियाया सम्बन्धात् तुल्ययोगिता तृतीयपादे वाचा सह वृत्या विद्यया सह च सीताया साम्यादि इवशब्देन प्रत्ययात् उपमा, अनयो परस्परानपेक्षत्वात् संसृष्टि। शुचि गताया इत्यादिना तादृशविशसनसहनकार्यहेतोर्विरुद्धस्य निबन्धनात् विभावना सहनाभावहेतौ सद्भावेऽपि तद्विपरीतनिबन्धनात् [illegible] इति सन्देहसङ्कर। वृत्तं शार्दूलविक्रीडितम्।

(अ) इत इति। भगवतीमहादेव्यौ अरुन्धतीकौशल्ये। अस्यामस्यां दिशि आगच्छत युवामिति शेष। सम्भ्रमे द्विरुक्ति।

महाराजदशरथस्य धर्म्मपत्नी प्रियसखी मे कौशल्या। क एतत् प्रत्येति सैवेयमिति। (५)

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा।
कष्टं बतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विपाकः॥ ६॥

[६। इयं दशरथस्य गृहे श्रीर्यथा (तथा) आसीत् अथवा उपमानपदेन किम्, सा श्रीरेव एषा। बत कष्टं (सा) दैववशेन दुःखात्मकं अन्यत् इव किमपि भूतं जाता। अहो विपाकः। इत्यन्वयः।]

---

(५) अये इति विषादार्थमव्ययमेतत्। गृष्टिना तन्नामधेयेन कञ्चुकिना उपदिश्यमानमार्गा, उपदिश्यमानः निर्दिश्यमानः मार्गः पन्था यस्याः सा तथोक्ता। महाराजदशरथस्य धर्म्मपत्नी धर्म्मस्य पत्नी अश्वघासादिवत्तादर्थ्यषष्ठीसमासः। सहधर्म्मिणी मे मम प्रियसखी कौशल्या। सा एव दृष्टपूर्व्वा एव इयम् इत्येवं कः को जनः प्रत्येति विश्वसिति न कोऽपीत्यर्थः। शोकेन जरसा च विकृताकारतया सैवेयं कौशल्येति प्रत्येतुं न शक्नोमीत्यर्थः।

(६) आसीदियमिति। इयं एषा पुरोवर्त्तिनी कौशल्या दशरथस्य गृहे भवने श्रीः राजलक्ष्मीर्यथा राजलक्ष्मीरिव आसीत्। सकलसौभाग्यस्य साधयित्री देवता इव परमादरिणी आसीदित्यर्थः। वा अथवा इयं श्रीरेव राजलक्ष्मीरेव आसीत्, अस्याः राजलक्ष्मीत्वमासीत्। उपमानपदेन उपमाद्योतकेन भेदबोधकेन यथाशब्देन "तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वमुपमानत्व"मिति लक्षणादुपमानोपमेययोर्भेदो बोध्यः। किं किं प्रयोजनम् अपितु किमपि नेत्यर्थः। सर्व्वथा राजलक्ष्म्या सहास्याः अभेदात् भेदाभावेन उपमायाः अनवकाशात् उपमावाचकस्य यथाशब्दस्यानवकाशः। बत हा कष्टं दुःखं सा एषा सा दशरथगृहराजलक्ष्मीः एषा कौशल्या दैववशेन प्रतिकूलभाग्यपरिणामात् दुःखात्मकः दुःखमेव आत्मा स्वभावो यस्य तत् तथोक्तं, शेषाद्विभाषा इति कः। "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च" इत्यमरः। दुःखस्वरूपं किमपि अनिर्व्वचनीयम् अन्यत् इव अन्यप्रकारम् इव लोकविलक्षणं भूतं जन्तुविशेषः जाता सम्पन्ना "भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवे त्रिषु त्रिषु" इति मेदिनी। उद्देश्यप्राधान्यात् जातेति क्रदन्तक्रियापदं विधेयेन अन्यदितिपदेन न सम्बध्यते। उद्देश्यविधेययोरुद्देश्यवचनमाख्यातस्येति कारिका। तत्राख्यातस्येति प्रधानक्रियाया इत्यर्थः। अहो विपाकः आश्चर्य्यरूपः दशापरिणामः। इयं राजलक्ष्मीरूपिण्यपि अधुना सैव न वेति परिचेतुमशक्या

अयमपरः पापो दशाविपर्य्यासः। (ख)

य एव मे जनः पूर्वमासीन्मूर्त्तो महोत्सवः।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥ ७॥

[७। य एव मे जनः पूर्व्वं मूर्त्तः महोत्सव इव आसीत्, तस्य एव दर्शनं क्षते क्षारमिव असह्यं जातम्। इत्यन्वयः।]

(ततः प्रविशति अरुन्धती कौशल्या कञ्चुकी च।)

अरु। ननु ब्रवीमि—द्रष्टव्यः स्वयमुपेत्य वैदेह इत्येष वः कुलगुरोरादेशः, अतएवाहं प्रेषिता, ततः कोऽयं पदे पदे महान् अनध्यवसायः? (ङ)

विरूपाकृतिर्जाता, तस्मात् दैववशात् जीवानां दशापरिवर्त्तनं अतीवाश्चर्य्यकरमिति भावः। अत्र यथा श्रीरिति श्रौती उपमा। श्री एवेत्यत्र श्रिया भेदे अभेदाध्यवसायमूलातिशयोक्तिः। द्वितीयार्द्धे तु वाक्योत्प्रेक्षा इत्येवा संसृष्टिः। वसन्ततिलकं वृत्तम्।

(ख) अयमिति। अयं वर्त्तमानः कौशल्यासाक्षात्काररूपः अपरः अन्यविधः सीताविरोगजन्यचिरशोकावस्थाया अन्यप्रकारः इत्यर्थः। पापः पापजनितः पापमिव दुःखशोकयोः कारणमिति भावः। दशाविपर्य्यासः दशायाः अवस्थायाः विपर्य्यासः परिवर्त्तनं मम जातमिति शेषः। अधुना तु शोकार्त्तस्य मे शोकार्त्तायाः कौशल्यायाः दर्शनात् सीतानुबन्धानुबन्धात्तंनादादिभिश्च पूर्व्वावस्थातोऽनिर्वचनीया शोचनीयावस्था जायते इति भावः। यद्वा निरपराधसीतापरित्यागकारिणः रामचन्द्रस्य जननीत्वादस्या दर्शनं नितरां विषादजनकं विसर्जनव्यापारारकञ्च इति फलितार्थः।

(७) दशाविपर्य्यासमेव विवृणोति—य एवेति। य एव कौशल्यारूपः जनः पूर्व्वं सीतायाः निर्व्वासनात् प्राक् दशरथस्य जीवितावस्थायां मे मम सम्बन्धे मूर्त्तः शरीरी महोत्सवः निर्भरानन्दसन्दोहः आसीत्। यस्य जनस्य दर्शने प्राक् हृदयं कोऽप्यनिर्व्वचनीयः आनन्दप्रवाहः समुच्छलितो बभूवेत्यर्थः। इदानीमधुना तस्यैव जनस्य कौशल्याया इत्यर्थः। दर्शनं साक्षात्कारः। क्षते अस्त्रादिभिः छिन्ने अवयवे प्रक्षिप्तः क्षारः लवणमिव असह्यं सोढुम् अशक्यम् अतीव क्लेशदायकं जातं सञ्जातम्। या एव देवी कौशल्या मे सकलसुखनिदानमासीत्, सैवाधुना दुःखकारणमिति दशाविपर्य्यासः। अत्र पूर्व्वार्द्धे कौशल्यारूपे जने मूर्त[illegible] वसथा[illegible]यां इवशब्दाभावेऽपि गम्यत्वात् प्रतीयमानोत्प्रेक्षा, द्वितीयार्द्धे तूपमा च [illegible] दर्शने क्षतक्षारसाहश्यादि इवशब्दवाच्यत्वात् इत्यनयोः संसृष्टिः।

(ङ) नन्विति। ननु इति सम्बोधनार्थकमव्ययम् "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु"

कञ्चुकी । देवि ! संस्तभयात्मानम्, अनुवध्यस्व भगवतो वशिष्ठस्यादेशमिति विज्ञापयामि । (ख)

कौशल्या । ईरिसे काले मिहिलाहिवो दट्ठव्वोत्ति समं ज्जेव सव्वाइं दुक्खाइं समुब्भवन्ति । ण सक्कणोमि उव्वत्तमाणमूलबन्धनं * हिअअं अवत्थाविदुं । (क)

[(क) ईदृशे काले मिथिलाधिपो द्रष्टव्य इति समम् एव सर्वाणि दुःखानि समुद्भवन्ति । न शक्नोमि उद्वर्त्तमानमूलबन्धन हृदयमवस्थापयितुम् । इति सम् ।]

इत्यमर । ननु भो कौशल्ये ! ब्रवीमि अह वदामि त्वामिति शेष । स्वयम् आत्मना उपत्य समीपे गत्वा वैदेह विदेहदेशाधिपति जनक द्रष्टव्य त्वया साक्षात्कर्त्तव्य. इति एष एवप्रकार व युष्माकं कुलगुरो. वशिष्ठस्य आदेश. आज्ञा, अतएव अस्मात् कारणादेव त्वया स्वय साक्षात्कर्त्तव्यत्वादेवेत्यर्थः । अह प्रषिता युष्मत्कुलगुरुणा त्वदन्तिक प्रेरिता । गमनस्य यहातिशयार्थमेवान्य परिजन विहाय तेनाह प्रषिता, एवञ्च एकाकिन्यास्तव गमनानर्हत्वात् सहचर. अप्यह समागतोऽस्मीति भाव । तत. तस्मात् गुरोरादेशस्यानुलङ्घनीयत्वाद्धेतो. पदे पदे प्रतिपदमपि कोऽय कीदृश अय महानध्यवसाय अत्यन्तानुत्साह । अत्यम्यनतिक्रमणीये ईदृशे गुरोरादेश कथं त्वं कतिचित् पदानि गत्वैव स्थाने स्थाने अवस्थाय अत्र गमने अनभिमतं प्रकाशयसीत्यर्थ. । त्वञ्चेत्तदादेश न प्रतिपालयेः, तदा स नितरा कोपिष्यतीति भाव. । ननु ब्रवीमि इति वचनेन प्रागपि बहुश गमनार्थमनुरुद्धमिति बोध्यते ।

(ख) देवीति । हे देवि ! राज्ञि कौशल्ये ! विज्ञापयामि निवेदयामि अहमिति शेषः । आत्मान चित्तं संस्तभ्य पर्य्यवस्थापय हृदयस्य शोकावेग धैर्य्येण स्थगय इत्यर्थः । भगवतः महामहिमशालिन वशिष्ठस्य युष्मत्कुलगुरो. आदेश स्वयमुपेत्य वैदेहदर्शनरूपम् अनुवध्यस्व प्रतिपालय त्वमिति शेष. । इत्यहं विज्ञापयामीत्यन्वय. ।

(क) ईरिसे इति । ईदृशे काले निजवैधव्यसीताविवासनादिनितान्तदुःसमये मिथिलाधिप. राज्ञ. प्रियसुहृत् वैवाहिक. जनक. द्रष्टव्य. मया साक्षात्कर्त्तव्य इति अस्माद्धेतो. । सममेव युगपदेव तुल्यरूपमेव वा सर्व्वाणि सकलानि दुःखानि सीताविवासनात्मवैधव्यजातानि कष्टानि समुद्भवन्ति मनसि प्रादुर्भवन्ति, तस्य दर्शनात् एकदैव सर्वप्रकारदुःखानि हृदये आविर्भूय मां पीडयन्तीत्यर्थ. । अतएव उद्वर्त्तमानम् उच्छिन्नप्रायं मूलबन्धनं मूलस्य

* इति उव्वट्टमाणमूलबन्धनम् इति क्वचित् पाठः ।

अरु। अत्र कः सन्देहः ? (ख)

सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥ ८ ॥

[८। मानुषाणां सद्बन्धुवियोगजानि सन्तानवाहीनि अपि दुःखानि प्रेयसि जने दृष्टे दुःसहानि स्रोतःसहस्रैः इव सम्प्लवन्ते । इत्यन्वयः ।]

कौशल्या। कहं वच्छाए वहूए एवं गदे तस्स राएसिणो मुहं दंसेम्ह ? (ग)

[(ग) कथं वत्सायाः वध्वाः एवं गते तस्य राजर्षेः मुखं दर्शयाम ? इति सम् ।]

प्रकृतस्य यथास्थानस्थापनहेतुभूतस्य बन्धन नियन्त्रणा यस्य तथाभूतं हृदयम् अवस्थापयितुं स्थैर्यमापादयितुं न शक्नोमि। दुःखितस्य सुहृद्दर्शनात्मन्दीभूतमपि दुःखं पुनर्नूतनं सत् नितरां व्यथयति तदहमिदानीं कुलगुरोरादेशादपि जनकं द्रष्टुं नोत्सहे इत्येव मेऽध्यवसाय इति।

(ख) अत्रेति। अत्र अस्मिन् जनकदर्शनेन युगपत् सर्वदुःखोद्भवविषये इत्यर्थः। सन्देहः संशयः कः कोऽपि सन्देहो नास्तीत्यर्थः। अधुना तव जनकदर्शनमतीव दुःखजनकमिति भावः।

(८) जनकदर्शनस्य दुःखजनकत्वमेव प्रतिपादयति—सन्तानवाहीन्यपीत्यादिभिः। मानुषाणां नराणां सद्बन्धुवियोगजानि सतां शोभनानां परमप्रेमास्पदानां बन्धूनां स्वजनानां "बन्धुस्वजना समाः" इत्यमरः। प्रणयास्पदापत्यादीनां वियोगात् विरहात् जायन्ते यानि तानि तथोक्तानि। अत्र सत्पदेन दुःखातिशयः सूच्यते। सन्तानवाहीनि अपि सन्तानेन धारया अविच्छिन्नेनेति यावत्, वोढुं शीलं येषां तानि तथोक्तानि निरवच्छिन्नानि, सत्यपि निरन्तरमनुभूयमानदुःखस्य कालेन लाघवसम्भवेऽपीत्यपरार्थः। दुःखानि प्रेयसि प्रियतमे जने दृष्टे सति, दुःसहानि सोढुम् अशक्यानि असह्यानीति यावत्, सन्ति। स्रोतःसहस्रैरिव स्रोतसां प्रवाहाणां सहस्रैः असंख्यप्रवाहैरिवेत्यर्थः, सम्प्लवन्ते उच्छलन्ति। स्वजनस्यापत्यवियोगादनुभूयमानः प्रबलवेगो दुःखप्रवाहः नितरां स्फीतः सन् असंख्यधारः प्रोच्छलतीति भावः। अतस्तयोक्तं समक्षमेवैतदिति वचनं सत्यमेवेत्यर्थः। अत्र दुःखेषु स्रोतःसहस्रैः सम्प्लवनसम्भावनायाः इवशब्दवाच्यत्वात् वाच्योत्प्रेक्षाभिमानि अर्थात्प्रत्यासन्नालङ्कारः, तथा चन्द्रोदये सागरजलानीविल्पमा व्यज्यते। अनुरूपं यथा कालिदासस्य "स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते" ॥ इति। इन्द्रवज्रा वृत्तं लक्षणमुक्तं प्राक्।

(ग) कथमिति। वत्सायाः स्नेहास्पदायाः वध्वाः स्नुषायाः सीतायाः एवं गते

अरु । एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ ९ ॥

[९ । जनकानां कुलोद्वहः एष वः श्लाघ्यसम्बन्धी । याज्ञवल्क्यः मुनिः यस्मै ब्रह्म पारायणं जगौ　इत्यन्वयः ।]

कौशल्या । **एसो सो महाराअस्स हिअआणन्दो वच्छाए वहूए पिदा राएसो, हद्धी हद्धी सम्भाविदम्हि अणुवट्ठिदमहूसवे दिअहे। हा देव्व ! सव्वं एव्व तं णत्थि । (घ)**

[(घ) एष स महाराजस्य हृदयानन्दो वत्साया वध्वाः पिता राजर्षिः, हा धिक् हा धिक् सम्भाविता अस्मि अनुपस्थितमहोत्सवे दिवसे । हा दैव ! सर्वमेव तन्नास्ति । इति मम ।]

इत्यप्रकारे दशाविपर्य्यये जाते सतीत्यर्थः । तस्य राजर्षेः जनकस्य सम्बन्धिवचयाव वद्दी । तेन राजर्षिणेत्यर्थः　कथं केन प्रकारेण मुखं दर्शयामि । मातापि अहं अकारणमधुत्यामीदृशीमिमं पुत्रं निवर्त्तयितुं नाशकमिति लज्जया जनकं मुखं दर्शयितुं कथं शक्नोमीति भावः ।

(९) एष व इति । जनकानां विदेहानां कुलोद्वहः उद्वहतीत्युद्वहः कुलस्य वंशस्य उद्वहः इत्रधुरन्धरः जनकवंशजातस्य इत्यर्थः । एष पुरोवर्त्ती राजर्षिः जनकः वः युष्माकं श्लाघ्यसम्बन्धी श्लाघ्यः श्लाघाहः आदरणीय इति यावत् । सम्बन्धो वैवाहिकः वर्त्तते इति शेषः । याज्ञवल्क्यः इति नाम्ना प्रसिद्धः वेदपारगामी संहिताकारः मुनिः यस्मै राजर्षये 'क्रियया यमभिप्रैती'ति संप्रदाने चतुर्थी, यस्य शिक्षार्थमित्यर्थः । ब्रह्मपारायणं पारस्य अन्तस्य अयनं गमनमिति पारायणं ब्रह्मणः वेदस्य पारायणं साकल्येन वेदाध्ययनमित्यर्थः, तद्रूपेण गुणेन अनवधिकाश्चर्य्यसत्ययुक्तपरमात्मप्रतिपादकवेदान्तभागमिति　यावत् । 'साकल्यासङ्गवचने पारायणपरायणे' इत्यमरः । जगौ गीतवान् । मुनिः उपयुक्तपात्रं मत्वा यस्मै समग्रं वेदमुपदिदेश　याज्ञवल्क्यः स नूनं पवित्रतमस्तस्य च सम्बन्धितया भवन्तोऽपि माननीयाः गौरविताश्च इति भावः ।

(घ) एष इति । महाराजस्य दशरथस्य मे भर्त्तुः हृदयानन्दः हृदयम् आनन्दयतीति तथोक्तः । आह्लाददायकः । वध्वाः स्नुषायाः सीतायाः पिता जनकः राजर्षिः जनकः । हा धिक् हा धिक् हा कष्टमित्यर्थः । अनुपस्थितमहोत्सवे न उपस्थितः सीताविवासनात् विनष्टः मम महोत्सवः आनन्दातिशयः यस्मिन् स तस्मिन् दिवसे दिने सम्भाविताऽस्मि सम्मानिताऽस्मि जनकराजेन दर्शनदानादिति शेषः । दुःखावसरे आनन्ददायकजनदर्शनमतीव दुःखदायक-

जनक। (उपसृत्य।) भगवति अरुन्धति! वैदेहः सीरध्वजोऽभिवादयते। (ङ)

यया पूतम्मन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।
त्रिलोकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम्॥ १०॥

[१०। पूर्वेषाम् अपि गुरूणां गुरुतमः ते पतिः पवित्रस्य महसः निधिः अपि यया पूतम्मन्यः खलु जगद्वन्द्यां देवीम् उषसम् इव त्रिलोकीमङ्गल्यां भगवतीं त्वाम् अवनितललोलेन शिरसा वन्दे। इत्यन्वयः]

मेवेति भावः। हा देव अदृष्ट! सर्वमेव सकलमेव तत् पुरातनमानन्दजनकं मे दूरं गतम्। क्व वा महाराजो दशरथः, क्व वा सा सम्भावितसम्माना सीता इति भावः। सर्वमेव तन्नास्ति इति सन्दर्भेण दशरथस्य सीतायाश्च अभावेनैव सर्ववस्त्वभावकथनेन दशरथे सीतायाञ्च सर्वत्वप्रतीत्या तयोरत्यर्थं स्नेहो व्यज्यते। केचित् व्याचक्षते—सर्वमेव अस्ति महोत्सवजनकं सकलमेव वस्तु अस्ति, किन्तु तत्र सीतारूपं वस्तु नास्ति इति। अहो भाग्यं यद्राजर्षिं सम्प्राप्त किन्तु तदानन्दजन्यमहोत्सवः क्व गतः। क इदानीं मां सम्भावयिष्यति, महोत्सवकारिणः केऽपि न सन्तीति निष्कर्षः।

(ङ) भगवतीति। वैदेहः विदेहदेशीयः सीरध्वजः सीरः हलं ध्वजः चिह्नं यस्य सः लाङ्गलचिह्नः। सीरध्वजनामा इत्यर्थः। अभिवादयते प्रणमति त्वामिति शेषः। "सीरोऽर्कहलयोः पुंसि" इति मेदिनी।

(१०) अभिवादने हेतुमाह—ययेति। पूर्वेषां प्राचीनानाम् आद्यानां गुरूणां पूज्यानाम् सप्तर्षीणाम् अपि मध्ये गुरुतमः श्रेष्ठः ते तव पतिः भर्ता वशिष्ठः। पवित्रस्य स्वतो विशुद्धस्य लोकपावनस्येति यावत्, महसः तेजसः ब्रह्मवर्चसः निधिः निधीयते अस्मिन् इति निधिः आधारः सन्नपि यया त्वया पूतम्मन्यः पूतं पवित्रम् आत्मानं मन्यते इति पूतम्मन्यः स्वतःविशुद्धस्य लोकपावनस्यापि वशिष्ठस्य यत्सम्पर्कात् संसर्गात् पवित्रतातिशयो जायते इति भावः। तादृशीमतिपवित्रां देवीं उषसम् इव उषःकालाधिष्ठात्रीं देवतामिव 'उषा [illegible] नौ देवते'ति दीक्षितः। प्रातःसन्ध्यादिदेवतामिवेत्यर्थः, जगद्वन्द्यां त्रिलोकपूज्यां [illegible] त्रयाणां लोकानां समाहारः त्रिलोकी समाहारद्विगौ स्त्रियामीप्। त्रिभुव[illegible] त्यां कल्याणसाधनतत्पराम्। उषःविशेषणद्वयमुषसि अपि योज्यम्। भगवतीम् ऐश्वर्यवतीं त्वामिति

अरु । परं ज्योतिस्ते प्रकाशताम्, अयं त्वां पुनातु देवः परोरजा† य एष तपति । (च)

जनक. । आर्य्ये गृष्टे ! अपि कुशलमस्याः प्रजापालमातुः ? (छ)

कञ्चुकी । (स्वगतम्) निर्विशेषमतिनिष्ठुरमुपालब्धाः स्मः । (प्रकाशम्) राजर्षे ! अनेनैव मन्युना चिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां नार्हसि त्वं दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि ‡ दैवदुर्नियोगः कोऽपि, यत् किल समन्तात् प्रवृत्तबीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निपरिशुद्धिमप्यल्पकाः प्रतियन्ति इत्यतो दारुणमनुष्ठितं देवेन । (ज)

शम । अवनितलन्यस्तेन भूमितलस्पर्शचञ्चलेन भूमितलावनामितेन इति यावत्, शिरसा मूर्ध्ना वन्दे अभिवादये अहमिति शेषः । अत्र पवित्रस्य महसः निधिरित्यादिना सूर्य्यस्यापि तपःपयोबोध इति श्लेषात् उषसमिवेत्यनेन उपमासम्भवाश्च श्लेषः उपमा च । वृत्तं शिखरिणीति ।

(च) परमिति । ते तव परम् उत्कृष्टं ज्योतिः तेजः ब्रह्मतेजः प्रकाशताम् आविर्भवतु । ब्रह्मज्योतिःसाक्षात्कारी भवत्वित्यर्थः । तथा परोरजाः रजसः रजोगुणात् परः परवर्त्ती राजदन्तादित्वात् परशब्दस्य पूर्वनिपातः । अयम् एषः जगत्प्रकाशकः देवः सविता य तपति जगत् विकाशयतीत्यर्थः । त्वां पुनातु पवित्रीकरोतु । अरुन्धत्या अभिवादनादिना प्रीताय जनकायाभीष्टतमम् आशीर्व्वादद्वयं दत्तम् । वचनमिदमरुन्धत्याः ब्रह्मज्ञानपराकाष्ठां द्योतयतीति ।

(छ) आर्य्येति । गृष्टिरिति कञ्चुकिनो नाम । अपि प्रश्ने । प्रजापालमातुः प्रजाः पालयतीति प्रजापालः तस्य मातुः जनन्याः कौशल्यायाः कुशलं किम् ? वर्त्तते इति शेषः । कौशल्याया राममातुर्व्यनुक्ता प्रजापालमातुरित्युक्त्या प्रजानामनुरञ्जनार्थं निरपराधां सकलदोषरहितां परिपरायणामपि धर्म्मपत्नीं यः अक्लेशेन त्यक्तवान् अपवादं त्यक्तुमर्हति स खलु नितराम् अवक्षेयः तन्मातृत्वसम्बन्धात् कौशल्यापीति व्यज्यते । यद्वा अनेन कुशलप्रश्नेन एवं दुःखिनी कियच्चिरं जीविष्यति इत्यपि व्यज्यते ।

(ज) स्वगतमिति । स्वगतम् आत्मगतम्, आहेति क्रियायाः विशेषणमिदम् । निर्विशेषमिति । निर्नास्ति विशेषो यस्मात् तत्तथोक्तं निरतिशयं समधिकमित्यर्थः । अतिनिष्ठुरम् अतिशयकर्कशञ्च यथा स्यात्तथा उपालब्धाः स्मः तिरस्कृताः वयमिति शेषः ।

---

† परो रजसाम् इति पाठान्तरम् ।

‡ रामभद्रेणापि समन्तात् प्रवर्त्तितबीभत्सकिंवदन्तीकाः............दारुणमनुष्ठितमिति विद्यासागरधृतपाठः ।

जनक.। आः! कोऽयमग्निर्नाम अस्मत्प्रसूतिपरिशोधने! कष्ट-मेवंवादिना जनेन रामपरिभूता अपि वयं पुनः परिभूयामहे। (झ)

— — — —

पूर्व्ववत् "प्रियसखि" इत्यामन्त्रणपूर्वककुशलप्रश्नाकरणात् साक्षात् कौशल्यामपृष्ट्वा मां प्रति "अपि प्रजापालनात् कुशल"मिति सोल्लुण्ठनवचसा तस्याः कुशलप्रश्नाच्च राजर्षिणा वयम् अतीव निर्भर्त्सिता इति भावः। प्रकाशं सर्व्वश्राव्यं यथा स्यात्तथा आह। राजर्षे भो वैदेह। अनेनैव अकारणसीतानिर्व्वासनजनितेन एव मन्युना शोकेन चिरपरित्यक्तरामभद्रमुखचन्द्र दर्शना मुखं चन्द्र इव इति मुखचन्द्रः रामभद्रस्य मुखचन्द्रः रामभद्रमुखचन्द्रः तस्य दर्शनं रामभद्रमुखचन्द्रदर्शनं चिरं दीर्घकालं व्याप्य परित्यक्तं रामभद्रमुखचन्द्रदर्शनं यया तां तथोक्तां सीतापरित्यागजन्येन शोकेन कौशल्या रामस्यापि मुखं नाद्याप्यवलोकयतीत्यर्थः। अतएव अतिदुःखितां सखीं तदुःखां सीतारामशोककातरामित्यर्थः। देवीं राज्ञीं कौशल्यां दुःखयितुं क्लमयितुं न अर्हसि न युज्यसे। एवं दुःखितां देवीं त्वमपि परुषवाग्भिर्भर्त्सयन् मम सुखां कर्त्तुं नार्हसीत्यर्थः। रामभद्रोऽपि न ते निर्भर्त्सनीय इत्याह—रामेति, कोऽपि अनिर्व्वचनीयः दैवदुर्नियोगः दैवस्य पूर्व्वानुष्ठितकर्म्मणः अदृष्टापरनाम्नः, दुष्टः नियोगः नियोजनं प्रेरणमिति यावत्। यत् यस्मात् दैवदुर्नियोगादित्यर्थः। समन्तात् सर्व्वासु दिक्षु प्रसृतबीभत्सकिंवदन्तीकाः प्रसृता प्रचारिता बीभत्सा जुगुप्सिता किंवदन्ती जनापवादः येभ्यः ते तथोक्ताः। अतएव अकारणापवादित्वात् दुर्व्विदग्धाः पौरजानपदाः पुरवासिनः देशवासिनश्च जनाः, अग्निपरिशुद्धिमपि अग्निपरीक्षोत्तीर्णतया प्रमाणितनिर्द्दोषत्वमपि न प्रतियन्ति न विश्वसन्ति। अग्निना परिशोधिता सीतेति श्रुत्वापि अश्रद्दधाना नितरां निन्दन्तीत्यर्थः। इति वाक्यसमाप्तौ "इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" इत्यमरः। अतः अस्मात् पौरजानपदानाम् अप-वाददानाद्धेतोः। दारुणं सीतानिर्व्वासनरूपं अतिभयानकं कर्म्म अनुष्ठितं आचरितं रामेणेति शेषः। नात्र रामस्य कोऽपि दोषः दुर्नियतेरन्यथाकरणमेवास्य कारणमिति भावः।

(झ) आ इति। आः इति कोपार्थमव्ययम्। अस्मत्प्रसूतिपरिशोधने अस्माकं प्रसूतेः दुहितुः परिशोधने पवित्रतासम्पादने कोऽयं अग्निर्नाम। यस्त्वयोक्तमग्निरिति नाम वह्निरिति ख्यातः तेजोविशेषः कः, अपितु अयोनिजायाः ब्रह्मवित्तमस्य मम तनयायाः पवित्रीकरणे न कोऽपीत्यर्थः। एवंवादिना जनेन, अग्नौ सीतायाः परिशुद्धिरिति वदता जल्पकेन रामपरिभूता अपि रामेण परिभूताः अविरुद्धोपालम्भेनैव सीतानिर्व्वासनात् तिरस्कृताः अवमानिता अपि वयं परिभूयामहे निर्भर्त्सिताः स्मः। निर्द्दोषाया अपि मे तनयाया अग्नि ... शुद्धे पर्य्यन्तं तस्या जननान्तरसम्बन्धात् अवश्यमपि रामेणावमानितः, परन्तु अग्नि ... न दृष्टिना दोषं दृढीकुर्व्वता पुनरपि विशेषेण तिरस्कृतोऽस्मीति भावः।

अरु। (नि:श्वस्य) एवमेतत्, अग्निरिति वत्सां प्रति परिलघूनि अक्षराणि, सीतेत्येव पर्य्याप्तम्। हा वत्से! (अ)

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥ १ ॥

[११। (त्वम्) शिशुः वा मम शिष्या वा यदसि तत् तथा तिष्ठतु। विशुद्धेः उत्कर्षः त्वयि तु मम भक्तिं द्रढयति। शिशुत्वं स्त्रैणं वा भवतु, ननु जगतां वन्द्या असि। गुणिषु गुणाः पूजास्थानं लिङ्गं न वयश्च न। इत्यन्वयः]

(अ) एवमिति। एतत् कोऽयमग्निर्नामेति भवता यदुक्तं तदेवमेव सत्यं खलु। अहमपि भवद्वचनं समर्थये। वत्सां प्रति सीताविषये अग्निरिति अक्षराणि, "अग्नि" इत्याकारवर्णाः "लाघवापवादयन्ता" इति यावत्। परिलघूनि अतिन्यूनानि निकृष्टानीति यावत्। सीतया सह अग्नेः तुलनायां पवित्रताधर्म्मेण सेवाग्नेः विशिष्यते नत्वग्निस्तस्या इत्यर्थः। अत सीता इत्येव पर्य्याप्तं सीता इति नामोच्चारणमेव पर्य्याप्तं समधिकं यथेप्सितम्। "कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सित"मित्यमरः। अग्निसीतयोः पावनत्वे समकक्षत्वात् प्रत्युत सीतायाः प्रकर्षात् सीताशब्द एव परिपूर्णः। सीताया एतादृशी पवित्रता जगति प्रथिता, यत् सीतेत्युच्चारणादेव आतृणां हृदये तस्याः लोकविलक्षणः पवित्रतातिशय आविर्भवति न खलु तत् प्रतिपत्तये अग्न्यादिभिः किमपि प्रयोजनमिति भावः। हा वत्से इति वक्ष्यमाणश्लोकेनान्वयः।

(११) शिशुरिति। हा वत्से सीते! त्वं मम समक्षे शिशुर्वा अल्पवयस्का बालिका वा असि, शिष्या सदसतोः उपदेशार्हा वा। वाक्य समुच्चये बोध्यम्। शिशुर्शिष्या वा असि भवसि इति यावत्, शिशुत्वं शिष्यात्वञ्च तत् तथा तेन प्रकारेण तिष्ठतु। आस्तां तावत्ते न्यूनवयस्त्वं शिष्यात्वं चेत्यर्थः। तु किन्तु विशुद्धेः पवित्रतायाः निर्द्दोषतायाः इति यावत्, उत्कर्षः अतिरेकः अतिशयः त्वयि विषये मम भक्तिं पूज्यानुरागम्। पूज्येषु अनुरागो भक्तिः। पूजनीयत्व-ज्ञानं द्रढयति दृढां करोति वर्द्धयतीत्यर्थः। तवाकारसम्पदा त्वां देवीं भावयन्त्याश्चिरमेव मे त्वयि भक्तिरासीदिदानीन्तु पवित्रतातिशयदर्शनात् सैव भक्तिः अतिनिश्चला जातेत्यर्थः। शिशुत्वं शैशवं स्त्रैणं 'स्त्रीपुंभ्यां नञ्स्नञौ' इति स्त्रीशब्दान्नञ्, स्त्रीत्वं वा तव भवतु अस्तु, ननु तावतापि वन्द्यत्वहानिरिति भावः। तथापि त्वं शिशुः स्त्री अपि सती जगतः लोकस्य वन्द्या पूजनीया असि, भवसि ननु खलु। तथाहि—गुणाः पातिव्रत्यशीलसौशील्यादयो धर्म्माः गुणिषु

कौशल्या । अह्मो उम्मीलन्ति वेअणाओ । (ट)

(ट) अहो उन्मीलन्ति वेदना । इति मम ।]

(इति मूर्च्छति ।)

जनक । हा कष्टं ! किमेतत् ? (ठ)

चर । राजर्षे ! किमन्यत् ? (ड)

स राजा तत् सौख्यं स च शिशुजनस्ते च दिवसा
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम् ।
विपाके घोरेऽस्मिन्नथ खलु विमूढ़ा तव सखी
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ १२ ॥

[१२ । सुहृदि त्वयि दृष्टे स राजा तत् सौख्यं स च शिशुजन ते च दिवसा, तदखिल स्मृतौ आविर्भूतम् अथ अस्मिन् घोरे विपाके तव सखी विमूढा खलु । पुरन्ध्रीणां चित्तं कुसुमसुकुमारं भवति हि । इत्यन्वय ।]

अहिसाशौचमसत्यमित्याद्युक्तगुणवत्सु विषये पूजास्थानं पूजायाः अधारः स्थानं आस्पदम् । गुणा एवान्वयव्यतिरेकाभ्यां पूजाप्रयोजका हेतव इत्यर्थ । न च लिङ्गं स्त्रीत्वपुंस्त्वादिकं यथा जटोपवीतादिचिह्नम् चकारद्वय प्रत्येकप्राधान्यार्थम् । तथा वय अल्पवयस्त्वं प्रवयस्त्वं च न पूजास्थानम् इति योजना, भवेदिति शेष । "स्त्रीपुमानित्यनास्थैषा वृत्तं हि महित सता"मित्युक्तत्वात् त्वं शिशुरपि पवित्रतादिगुणोत्कर्षेण मम पूज्यासीति भाव । अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कार । तथा गुणा पूजास्थानं लिङ्गं वयो न इत्यनेन लिङ्गवयसो पूजाहेतुत्वव्यपोहनात् शाब्दी परिसंख्या इति अनयोरङ्गाङ्गिभाव सङ्कर । शिखरिणी वृत्तम् ।

(ट) अहम् इति । वेदना शोकव्यथा उन्मीलन्ति उद्भवन्ति सीतायाः गर्भवार्ताकर्णनात् तद्विरहदुःखानि पुनर्नवीभूय मां व्यथयन्ति इति भाव इति मूर्च्छति एतदुक्त्वा कौशल्या मोहं नाटयतीत्यर्थ ।

(ठ) हेति । हा कष्ट अहो अतीव दुःखम् । किमेतत् एतत् कौशल्यायाः मूर्च्छितत्वं किं कीदृशम् । कथमियं मूर्च्छतीत्यर्थ ।

(ड) राजेति । अन्यत् किं अन्य प्रकार कोऽपि न । एवं मूर्च्छ॰ प-न्नेत्यर्थ ।

(१२) मूर्च्छाकारणमेवाह—स इति । सुहृदि प्रियसखे त्वयि भवति दृष्टे साक्षात्-कृते सति । स राजा दशरथ तत् सौख्यं सुखमेव सौख्यं स्वार्थे ष्यञ्प्रत्यय । तत्

जनक। हन्त हन्त सर्वथा नृशंसोऽस्मि संवृत्तः, यच्चिरस्य दृष्टान् प्रियसुहृदः प्रियान् दारान् न स्निग्धं पश्यामि। (ढ)

स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयम्
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतो वा प्रियतमो
महाराजः श्रीमान् किमिव मम नासीद्दशरथः॥ १२॥

[१२ स श्लाघ्यः सम्बन्धी, असौ प्रियसुहृत्, तच्च हृदयं, स च साक्षादपि आनन्दः, निखिलं जीवितफलं शरीरं जीवो वा अतो वा यदधिकं तदासीत् प्रियतमः श्रीमान् महाराजः दशरथः मम किमिव नासीत् इत्यन्वयः।]

अनुभूतपूर्व्वसौख्यः सुखप्रवाहः स च प्रियजनः रामसीतादिः ते च दिवसाः ते अनुभूतपूर्व्वाः सुखमयाः दिवसाः दिनानि तत् अखिलं, तदिति नपुंसकैकशेषत्वान्नपुंसकम्। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति। स्मृतौ आविर्भूतं स्मरणपथारूढम्। तत् सकलं स्मृतिविषयीभूतमित्यर्थः। अथ स्मरणादनन्तरं अस्मिन् घोरे भीषणे विपाके दशाविपर्य्यये स्मृते सतीति शेषः। पूर्व्वावस्थायाः वर्त्तमानावस्थायाश्च स्मृतायामित्यर्थः। तव सखी कौशल्या कौशल्या विमूढा मोहमापन्ना। वर्त्तमानावस्थायाः अतीवदुःसहतया युगपदवस्थाद्वयं स्मृत्वा मुमोहेति भावः। हि यस्मात् पुरन्ध्रीणां पातिव्रत्यादिगुणालङ्कृतानां स्त्रीणां 'पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता' इत्यमरः। चित्तं हृदयं कुसुमसुकुमारं पुष्पमिव कोमलं सोढुमक्षमं असहिष्णु इत्यर्थः। भवति। पतिपरायणाः कुलस्त्रियः खलु पर्य्यायेणातिदुःसहदुःखावेगं सोढुं न शक्नुवन्ति, अतएव तव दर्शनादुद्बुद्धपूर्व्वतनसम्बन्धकरावस्था स्मृत्वा शोकार्त्ता जरातुरा धैर्य्यं मूर्च्छिता न च कारणान्तरमिति भावः। कौशल्यायाविमोहरूपविशेषं प्रति पुरन्ध्रीणां चित्तस्य अतिकोमलत्वरूपेण सामान्येन समर्थनात् सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासोऽलङ्कारः कुसुमसुकुमारमित्युपमया सङ्कीर्णः। शिखरिणी वृत्तम्।

(ढ) हन्तेति। अत्र विषादे हन्त हन्तेति द्विरुक्तिः। सर्व्वथा सर्व्वप्रकारेण अहं नृशंसः अतिनिष्ठुरः संवृत्तः अस्मि भवामि। यत् योऽहं चिरस्य दृष्टान् अतिपूर्व्वमवलोकितान् पूर्व्वं परिचितानित्यर्थः। प्रियसुहृदः दयितबन्धोर्दशरथस्य दारान् भार्य्यां 'भार्य्या जायाथ पुंभूम्नि दाराः' इत्यमरः। प्रियसखीं कौशल्यां स्निग्धं सस्नेहं न पश्यामि। अतोऽहं निष्ठुर इति भावः।

(१२) स इति। स दशरथः मम श्लाघ्यः आदरणीयः प्रशंसनीयः सम्बन्धी वैवाहिकः आसीत्। असौ दशरथः प्रियसुहृत् परमबन्धुः आसीत्। तच्च हृदयं स दशरथः हृदयं मम द्वितीयं हृदयम् इवासीत् तदिति विधेयप्राधान्यात् क्लीवत्वम्। स दशरथः। साक्षाच्छब्देनानन्दहेतावानन्दत्वात् लोपो व्यावर्त्त्यते। साक्षात् मूर्त्तिमान् आनन्दः

कष्टम्, इयमेव सा कौशल्या। (ग)

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत् स्मृत्वा दहति यदवस्कान्द्य हृदयम्॥ १४॥

[१४। अस्या व पत्यु रहसि यत् परम दूषितमभूत्, अहं पृथक् उपालम्भविषय अभूवम्। तदनु प्रसादे कोपे वा मदधीन विधि अभूत। वा तत् स्मृत्वा अ न यत् हृदयम् अवस्कान्द्य दहति। इत्यन्वय।]

आनन्दस्वरूपम् आसीत। अपिच किञ्च निखिलं सकल जीवितफल प्राणधारणस्य फलं भोगापवर्गादिरूपप्रयोजनम् आसीत्। यद्वा कर्म्मज्ञानभक्तिरूपं जीवनप्रयोजनञ्च। चकारः पूर्व्वसमुच्चायक। वा किञ्च स मे शरीर देह 'दुर्ल्लभो मानुषो देह' इत्युक्तत्वात सकलधर्म्मसाधनं शरीरञ्चाभूदित्यर्थ। स जीवो वा जीवनं वाभवत, अथवा जीवात्मा अहङ्कारविशिष्ट चैतन्यञ्च आसीत्। तस्य हि ज्ञानानन्दमयत्वात प्रेमास्पदत्वम्। अतो जीवादधिक समस्तकल्याणगुणा-स्पदत्वेनानन्दमयत्वेन च प्रकृष्ट प्रियतर प्रियो जीव प्रियतरं ब्रह्म तथाविधं यत् परंब्रह्म तदभूत। यद्वा ततोऽधिकं तेभ्य हृदयादिभ्य अधिकम् उत्कृष्ट यत किमपि प्रियतमम् अभूत्। ततोऽधिकं शरीरजीवाभ्या यत गरीय तदप्यासीदिति वा। अतएव प्रियतम सकलानां प्रियवस्तूनां प्रधान श्रीमान् राजलक्ष्मीसम्पन्न महाराज दशरथ मम किमिव नासीत् अपि तु मम सर्व्वमेवासीदित्यर्थ। लोके सम्बन्धिसुहृदादीना ततन्मात्रत्वम् अस्य तु सर्व्वदा सर्व्व-विधत्वमिति भाव। अत्रानन्दस्य प्रत्यक्षत्वासम्बन्धेऽपि तत्सम्बन्धोक्त अतिशयोक्तिरलङ्कार। आनन्दजनकस्य आनन्दरूपताप्रकाशेन हेतुहेतुमदभेदप्रतीत्या अभिधाहेतुरलङ्कार इति वा। एवं तव हृदयं इत्यादौ रूपक काव्यलिङ्गञ्चालङ्कार,। शिखरिणी वृत्तम्।

(ग) कष्टमिति। सा पूर्व्वदृष्टा प्रियसखी कौशल्या इयमेव एषैव। प्रथमसाक्षात्-कारक्षणे शोकक्षामाङ्गतया सेयं नवेति सन्देहो जात इति भाव।

(१४) यदस्या इति। अस्या सम्मुखवर्त्तिन्या कौशल्याया पत्युर्व्वा अस्या एव पत्युर्दश-रथस्य च रहसि गुह्ये रतौ वा निर्ज्जनस्थाने वा 'रहस्तत्त्व रते गुह्य' इति मेदिनी। ' क। विजनच्छन्न निःशलाकास्तथारह" इत्यमर। यत परमं अतिशयदूषितं दूषण निबन्धः। अभूत्। तदर्थमहं दम्पत्यो जायापत्यो जाया च पतिश्च इति ज जायाया दम्भावो जम्भावो वा निपात्यते। "दम्पती जम्पती भार्य्यापती"त्यमर। ...रेव पृथक् व्यस्तम्' यथा तथा उपालम्भविषय। उपालम्भस्य तिरस्कारस्य विषय पात्रम् अभूवम्।

अरु॰ । हा कष्टम् ! अतिचिरनिरुद्धनिश्वासनिष्ठुरं हृदयमस्याः । (त)

जनक । हा प्रियसखि !

[इति कमण्डलूदकेन सिञ्चति ।] (थ)

कञ्चुकी । सुहृदिव प्रकटय्य सुखप्रदः

प्रथममेकरसामनुकूलताम् ।

दशरथस्य रहोजातं दूषणमुद्घोष्य कौसल्या "तव वैवाहिकेन मां प्रति एवमनुचितं [illegible] कृतवती पतिदोषं प्रकाशितवती । दशरथोऽपि 'तव प्रियसखी वैवाहिकी मयि [illegible] नाचरितवती'ति जनकस्य प्रतीकार'यथाय इति भाव । तदनु तदनन्तरम् । अनुबन्धस्य सर्व-प्रयत्नीयत्वात्तयोरेव तदिति विनोदः । प्रसादे तयो परस्परविषयकानुनयदूतीकरणे कोऽपि तु तयो' प्रकर्षोऽपीत्यर्थः च विधि विधान मवशेति यावत् 'मदधीन तदायत्त । [illegible] मीष्मादिषु कालभावात् 'सप्तमी शौण्डादिभि'रिति सप्तमीसमास. । तेन च मयि वर्ति इति [illegible] अनुमतत्वादेवेति च । अभूत् । दम्पती परस्पर कोपयितु प्रसादयितु वा मामेव प्रभुरभव-दित्यर्थ । सा अवस्था तत् पूर्वानुभूतानन्दादिकमित्यर्थ । कृता अलम् अतीतकथाकथनेन नास्ति किमपि प्रयोजनम् । यत् पूर्ववृत्तान्तकथनस्य कर्तुं हृदयं चित्तं [illegible] तापयति दुःखं जनयतीत्यर्थ । पूर्ववृत्तान्तालोचनेन केवल हृदयपीडनैव जायते [illegible] किमपि फलमिति भाव । विपरीतलक्षणम् ।

(त) केति । हा कष्टं अहो दुःखम् । अतिचिरनिरुद्धनिश्वासनिष्ठुरं [illegible] बहुकालं यथा स्यात्तथा निरुद्धा आयता निवारितगतय इति यावत्, निश्वासाः [illegible] सुखनासिकावायुनिःसारणलता इत्यर्थ । तस्मिन् तत्कालम् अतएव निष्ठुरं कठोरम् "निष्ठुरं कठोरं दृढ"मित्यमर । अस्याः कौसल्याया हृदयं मनः [illegible] [illegible] निश्वासानामवरोधात् अस्या' हृदयं नि [illegible] इत्यर्थ । [illegible] [illegible] [illegible]

(थ) कृति । हा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] कमण्डलूदकेन [illegible] [illegible] [illegible] [illegible] [illegible] सिञ्चति [illegible] [illegible] "कमण्डलुः [illegible] [illegible] [illegible]" इति [illegible] ।

पुनरकाण्डविवर्त्तनदारुणो
विधिरहो विशिनष्टि मनोरुजम्॥ १५॥

[१५। विधि, प्रथम सुहृदिव एकरसाम् अनुकूलतां प्रकटय्य सुखप्रदः पुन अहो। अकाण्डविवर्त्तनदारुणः (सन्) मनोरुजं विशिनष्टि॥ इत्यन्वयः।]

कौसल्या। (संज्ञां लब्ध्वा) हा वच्छे जाणइ! कहिं सि? सुमरामि दे विवाहलच्छीपरिग्गहेक्कमङ्गलं पप्फुरन्तसुद्धविहसिदमुद्धमुहपुण्डरीअं आपूरन्तकोमुदचन्दचन्दिआसुन्दरेहिं अङ्गेहिं पुणोवि मे जादे! उज्जोएहि उच्छङ्गम्। सव्वदा महाराओ भणादि,—एसा रहुउलमहत्तराणं वहू, अम्हाणं उण जणअसम्बन्धेण दुहिदिआ एव्व। (द)

[(द) हा वत्से जानकि! क्वासि, स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमङ्गलं प्रस्फुरच्छुद्धविहसितमुग्धमुखपुण्डरीकम्, आपूरत्कौमुदचन्द्रचन्द्रिकासुन्दरैरङ्गैः पुनरपि मे जाते उत्सङ्गम्। सर्वदा महाराजो भणति,—एषा रघुकुलमहत्तराणां वधूः, अस्माकं पुनर्जनकसम्बन्धेन दुहिता एव। इति छम्।]

---

(१५) सुहृदिवेति। विधिः दैवं "विधिर्विधाने दैवे च" इत्यमरः। प्रथमं पूर्वम् आबाल्यात् [illegible]। सुखप्रदः आनन्ददायकः सुहृत् मित्रम् इव एकरसाम् एकः केवलः [illegible] इत्यर्थः। रसः सुखास्वादः यत्र ताम् अविच्छिन्नसुखसन्तानविर्भरां केवल-सुखमयीमित्यर्थः। अनुकूलताम् कूलम् अनुगत इति अनुकूलः तस्य भावः अनुकूलता ताम्, आनुकूल्यं योगक्षेमहेतुभूतामिति यावत्, प्रकटय्य आविष्कृत्य निरन्तरसुखप्रदः सन्नित्यर्थः। अहो बत पुनः भूयः अकाण्डविवर्त्तनदारुणः अकाण्डे अनवसरे 'काण्डोऽस्त्री दण्डबाणार्व-वर्गावसरवारिषु' इत्यमरः। अकाण्डेन निर्निमित्तेनेति वा। योग्ये कालेऽसमये इत्यर्थः। विवर्त्तनेन अवस्थापरिपाकेन परिवर्तनेन प्रतिकूलाचरणेनेत्यर्थः। [illegible] इति यावत्। दारुणः क्रूरः सन् मनोरुजं मनसः हृदयस्य रुजं पीडाम् विशिनष्टि विशेषेण वर्द्धयति। पूर्वं सुखदायी विधिरिदानीमसह्यक्लेशं ददातीत्यर्थः। अत्र [illegible] विधेरनुकूलताप्रकटनमनोरुजा-[illegible] सुहृदिवेत्युपमया सहितः। [illegible]

(द) हेति। संज्ञां चैतन्यं लब्ध्वा प्राप्य कौसल्या आह इति कौशल्याम्। [illegible] [illegible] जानकि!' [illegible] [illegible] अपि [illegible] वर्त्तसे। ते तव विवाहलक्ष्मीपरिग्र[illegible] [illegible] परिग्रहः स्वीकारः धारणमिति यावत्। [illegible]

कञ्चुकी । यथाह देवी । (च)—

पञ्चप्रसूतेरपि राज्ञ आसीत् प्रियो विशेषेण सुबाहुशत्रुः ।
बधूचतुष्केऽपि यथा हि शान्ता प्रिया तनूजास्य तथैव सीता ॥ १६ ॥

[१६ । पञ्चप्रसूतेः अपि राज्ञः सुबाहुशत्रुः विशेषेण प्रियः आसीत् । शान्ता यथा हि प्रिया तनूजा, बधूचतुष्के अपि सीता तथा एव (आसीत्) ॥ इत्यन्वयः ।]

पुष्पाग्रकेवला' इत्यमरः । मण्डनं भूषणं यस्य तत् । विवाहकालीनया नैसर्गिकशोभया क्रमिता सर्व्वा शोभा परिभूतासीदित्यर्थः । प्रस्फुरदच्छहसितमुग्धमुखपुण्डरीकं प्रस्फुरता विकसता स्वच्छेन उज्ज्वलेन हसितेन स्मितेन मुग्ध सुन्दरं मुखं पुण्डरीकमिवेति तत्तयोक्तम् आननकमलम् अहं स्मरामि चिन्तयामि । आस्फुरत्कौमुदचन्द्रचन्द्रिकासुन्दरैः आस्फुरन्ती प्रकाशमाना कौमुदचन्द्रस्य शरत्कालीनस्य इन्दोः चन्द्रिका ज्योत्स्ना तद्वत् सुन्दरैः मनोज्ञैः समस्तअङ्गैः अवयवैः । जाते वत्से ! उत्सङ्गं क्रोड उद्योतय शोभय । महाराजः दशरथः सर्व्वदा सर्व्वस्मिन् काले भणति वदति, अतीतसामीप्ये वर्त्तमाना । एषा सीता रघुकुलमहत्तराणां रघोः कुले वंशे ये महत्तराः अतिशयेन महान्तः इति महत्तराः मनुप्रभृतयः मान्याः पूर्व्वतनाः पितृपितामहाः तेषां वधूः स्नुषा, पुनः किन्तु अस्माकं मम इत्यर्थः । जनकसम्बन्धेन जनकेन सह बन्धुत्वसम्पर्केण दुहितेव कन्येव, अभिन्नहृदयस्य जनकस्य कन्या सीता ममापि कन्येव इत्यर्थः । महाराजः एतद्भणतीत्यन्वयः । अत्र मुखपुण्डरीकमित्यत्र चन्द्रिकासुन्दरैरित्यत्र च लुप्तोपमालङ्कारः । चन्द्रचन्द्रिकासुन्दरैरित्यत्र पुनरुक्तता-दोषः, चन्द्रिकापदेनैव तदर्थलाभे चन्द्रपदं पुनरुक्तमित्यवगन्तव्यम् ।

(च) यथेति । देवी कौशल्या यथा यत्प्रकारम् आह ब्रवीति तत् सत्यमित्यर्थः ।

(१६) कौशल्यावाक्यमेव समर्थयितुमाह—पञ्चेति । पञ्चप्रसूतेः प्रसूयन्ते जायन्ते इति प्रसूतयः अपत्यानि, बाहुलकात् कर्म्मणि क्तिन् । पञ्च पञ्चसंख्यकाः प्रसूतयः यस्य तस्य कन्यैकाः, रामादयश्चत्वारः पुत्राः शान्ता कन्येकेति पञ्च । सुबाहुशत्रुः सुबाहुनाम्नः राक्षसस्य शत्रुः निहन्ता रामः विशेषेण अन्येभ्यः आधिक्येन प्रियः प्रीतिदायकः स्नेहास्पदमित्यर्थः । राज्ञः, दशरथस्य ; सुबाहुशत्रुरित्यनेन रामस्य शौर्य्यातिरेको द्योत्यते, तेन च राज्ञः अधिकप्रियः आसीत् । यथा शान्ता शान्तानाम्नी कन्या यथा यादृशी प्रिया प्रेमास्पदम् आसीत् । बधूचतुष्केऽपि, चतस्रः परिमाणमस्येति चतुष्कः बधूनां चतुष्कः इति बधूचतुष्कः तस्मिन्, निर्द्धारणे सप्तमी । सीतादिषु बधूचतुष्टयेऽपि अस्य राज्ञः तनूजा, दुहिता शान्ता यथैव प्रिया आसीत् । अत्र तनूजा शान्तेव जनकाभिन्नहृदयात्मजा सीतापि एव तनूजातुल्या आसीदिति भावः ।

जनकः ! हा प्रियसख महाराज दशरथ ! एवमसि सर्व्वप्रकार-हृदयङ्गमः कथं विस्मर्य्यसे ? (न)

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि ।
त्वं कालेन तथाविधोऽप्यपहृतः सम्बन्धबीजञ्च तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग् जीवितम् ॥ १७ ॥

[१७। सम्बन्धे कन्यायाः पितरः जामातुः आप्तं जनं पूजयन्ति किल। मयि ते तत् आराधनं विपरीतम् एव अभूत्। तथाविधः त्वं कालेन अपहृतः, तत् सम्बन्धबीजञ्च (अपहृतम्)। घोरे अस्मिन् जीवलोकनरके पापस्य मे जीवितं धिक् ॥ इत्यन्वयः।]

अपत्येषु मध्ये राम एव राज्ञः परमस्नेहास्पदम् आसीत् वधूषु च सीता आत्मापत्यं प्रियतम आसीदित्यर्थः। अत्र आसीदित्येकस्याः क्रियायाः सुताद्युसीताद्युपपदार्थद्वयेन प्रस्तुतेन सम्बन्धात् तुल्ययोगितालङ्कारः, स च उपमया सङ्कीर्णः। उपजातिवृत्तम्।

(न) इति। एवम् इत्थं सर्व्वप्रकारहृदयङ्गमः सर्व्वैः प्रकारैः धर्म्मैः हृदयङ्गमः हृद-यग्राह्यपदम् अपि त्वमित्यर्थः। कथं केन प्रकारेण विस्मर्य्यसे मया त्वं विस्मृतो भवसि कथमपि नेत्यर्थः। अहो त्वं मे ईदृशः प्रीतिप्रद आसीः यत् बहुकालात्ययेऽपि विस्मर्त्तुं न शक्नोमीति भावः।

(१७) कन्याया इति। सम्बन्धे कन्यावरसम्बन्धे वैवाहिकसम्पर्के इत्यर्थः। कन्यायाः पितरः जनकः जनकाश्च आत्मीयवर्गाः जामातुः वरस्य "वरो जामातरि श्रेष्ठे देवतादेरभीप्सिते" इत्यमरः। आप्तं सन्निहितं बन्धुं जनं पित्रादिपरमात्मीयवर्गमित्यर्थः। पूजयन्ति किल सम्मानय-न्तीति प्रसिद्धिः खलु। किलेति सम्भावनायां "वार्त्तासम्भाव्ययोः किल" इत्यमरः। तदाराधनं तत्पूजनं मयि विपरीतमेव अभूत्, त्वत्कर्त्तृकमस्मद्विषयकपूजनं प्रतिलोमं जातमित्यर्थः। यथा सम्बन्धे आवयोरस्मिन् वैवाहिके सम्पर्के जाते मयि कन्यापितरि ते जामातृपितुः तव आरा-धनम् अर्च्चनं विपरीतं लोकव्यवहारविरुद्धमेव अभूत्। मयैव अर्च्चनीयस्त्वं त्वमार्च्चितवान् [illegible] [illegible]मित्यर्थः। तथाविधः तादृशः सकलगुणाधारः उदारचेतास्त्वं कालेन कृतान्तेन दुरतिक्रमेण समयेन वा अपहृतः लोकान्तरं नीतः। अपि [illegible] [illegible] 'सर्व्वसमुच्चयसम्भावनासम्भावने' [illegible]। [illegible] तु यथा तत् सीतारूपं सम्बन्धस्य वैवाहिकस्य बीजं [illegible] [illegible], [illegible] [illegible]। न केवलं [illegible] [illegible] [illegible], या खलु आवयोः वैवाहिकसम्बन्धे हेतुभूता सापि सीता

कौशल्या। जादे जाणइ ! किं करेमि, दढ़वज्जलेवघड़िअवच्छ-णिच्चलं हदजीविदं मं मन्दभाइणीं ण परिच्चअदि। (ख)

[(ख) जाते जानकि ! किं करोमि, दृढवज्रलेपघटितप्रत्यवच्छिन्ननिश्चलं हतजीवितं मां मन्द-भागिनीं न परित्यजति। इति सम्]

अरु। आश्वसिहि राजपुत्रि ! बाष्पविश्रामोऽप्यन्तरेषु कर्त्तव्य एव ! अन्यच्च किं न स्मरसि,—यदवोचदृष्यशृङ्गाश्रमे युष्माकं कुलगुरु-स्तदुपजातमेव, किन्तु कल्याणोदर्कं भविष्यति। (ग)

जाठेनापहृता, अहो दुर्वेष्टितं जातस्येति भावः। अतएव अस्मिन् घोरे अतिबहु-दुःखजनकत्वात् दारुणे जीवलोकनरके जीवानां लोक भुवनं स एव नरकः, जीवलोकः नरक इवेति वा तस्मिन् संसारस्वरूपे निरये पापस्य पापिष्ठस्य मम। पूर्वजन्मार्जितनिखिल-दुष्कृतिमयस्य मम जीवितं प्राणान् धिक् प्राणधारणं धिगिति यावत्, [illegible] धिग्जीवितमित्यर्थः। अपत्यस्य सुतस्य मरणात् दुहितुर्वैधव्यदुर्विपाकात्परं यदहं जीवामि तन्मे दुष्कृतस्य फलम्। अधुनेदानीं भवत्पुत्र्याद्यभावेऽपि मम लोकान्तरे आश्रमः [illegible] [illegible] मदीयजीवनलोकनिस्तुरितमतिप्रबलमिति भावः। अत्र जीवलोकनरके इत्यत्र रूपकोपमयोः सन्देहसङ्करालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।

(ख) जादे इति। जाते वत्से जानकि ! अहं किं करोमि। जीवनापहरण एव स्वकीयदुःखप्रतीकारोपायः किन्तु स मम न घटते इत्यर्थः। दृढवज्रलेपघटितप्रत्यवच्छिन्न-दृढेन दुर्भेद्येन [illegible] वज्रलेपेन [illegible] घटितः [illegible] सः [illegible]; संयोगः तेन निश्चलं स्थिरं [illegible] इदं एतन्मे मम हतजीवितमेव [illegible] मन्दभागिनीं दुर्भाग्यां मां न परित्यजति न मुञ्चति। तदभावे जीवनस्य [illegible] हतजीवितमेतत् [illegible], किन्तु न त्यजतीति भावः।

(ग) हे राजपुत्रि कौशल्ये ! आश्वसिहि आश्वस्ता भव स्थिरचित्ता भव। [illegible] अन्तरे अन्ते अन्ते बाष्पविश्रामः बाष्पस्य अश्रूणां विरामः निवृत्तिः [illegible] यावत्, अपि कर्त्तव्यः। अविरततोदनं न कर्त्तव्यमित्यर्थः। तेन हि [illegible] [illegible] अन्यच्च स्मरसि—युष्माकं कुलगुरुः वसिष्ठः ऋष्यशृङ्गाश्रमे [illegible] [illegible] [illegible] तदनुष्ठितयज्ञकाले इत्यर्थः। तत् भवितव्यं भवत्येव, तत् किं न स्मरसि ? [illegible] तत् खलु [illegible] [illegible] संजातः, यदा [illegible] [illegible] [illegible]। किन्तु कल्याणोदर्कं कल्याणं मङ्गलं उदर्कः उत्तरकालं [illegible] [illegible] "[illegible] [illegible]"

कौशल्या। भअवदि! अदिक्कन्तो मणोरहो *। (च)

[(च) भगवति! अतिक्रान्तो मनोरथ। इति छाया।]

अरु। तत् किं मन्यसे राजपुत्रि! मृषोद्यं तदिति? नहीदं ब्रह्मर्षिभ्यो अन्यथा मन्तव्यं, भवितव्यमेव तेन। (भ)

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति॥ १८॥

[१८। आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारा तेषु संशय मा भूत्। एषां वाचि भद्रा लक्ष्मीः निषक्ता हि; एते विप्लुता वाच न व्याहरन्ति॥ इत्यन्वय।]

निवेदनः। भविष्यति सम्पत्स्यते, ऋष्यशृङ्गयज्ञसम्पादनार्थं तदाश्रमगतो वशिष्ठः सीताशोकातुरां कौशल्यामिदमाह स्म,—भद्रे पुत्रपूर्णोत्सङ्गामेव वधूं द्रक्ष्यसीति। मुनिवाक्यस्य [illegible] सार्थकत्वात् अरुन्धती कौशल्यामिव सान्त्वयतीति बोध्यम्।

(च) भअवदि इति। मनोरथ अभिलाष अतिक्रान्त अतीतः नष्ट इत्यर्थः। आसन्नप्रसवे निर्वासितायाः सीताया अभावात् तत्पुत्रदर्शनाभिलाषो मे नष्ट इति भावः।

(भ) तदिति। हे राजपुत्रि क्षत्रियकुमारि कौशल्ये। तत् तस्मात् अतिक्रान्तो मनोरथ इति तवोक्तकारणेनेत्यर्थं। तत् तदा वा। तत् पुत्रवत्कुलगुरोर्वचनं मृषोद्यं मृषा मिथ्या उद्यते कथ्यते इति मृषोपपदात् वदेः क्यप्। मिथ्याभावं किं मन्यसे कल्पयसि। हे क्षत्रियि क्षत्रियकुलोत्पन्ने। अत. आयते इति अत:' अतस्यापत्यमिति अपिवः [illegible] [illegible] [illegible] क्षत्रियाणी अर्य्यक्षत्रियाभ्यां वा इति स्त्रियां आनुक्। पुंयोगे तु क्षत्रिया। इदं गुरुवाक्यम् अन्यथा अन्यप्रकारं मिथ्याभूतमित्यर्थं, नहि नैव मन्तव्यम् [illegible] इति शेषः। तेन गुरुवाक्येन भवितव्यमेव सत्येनावश्यम्भाव्यमेव। पुत्रवत्-[illegible] [illegible] मुनीनां वचनं कदापि वितथं न भविष्यतीति निश्चितमेव, त्वं [illegible] पुत्रपूर्णोत्सङ्गां वधूं द्रक्ष्यसीति भावः।

(१८) ब्राह्मणानां वचनस्याविसंवादितामेव वदन्ति—आविरिति। आविर्भूतज्योति [illegible] [illegible] प्रकाशितमिति यावत्, ज्योतिः ब्रह्मात्मं तेजः येषां ते त [illegible]

* इतः परं कौशल्यावचनम् अत्र एवम् इति पाठान्तरम्।

नेपथ्ये कलकलः । सर्व आकर्णयन्ति ।] (ल)

जनकः । अये खलु शिष्टानध्याय इत्यस्खलितं खेलतां बटूनां कोलाहलः । (य)

कौशल्या । सुलहसोक्खं दाव बालत्तणं होदि ।

[निरूप्य] अम्महे ! एदाणं मज्झे को एसो रामभद्दस्स सोहापरि-सोहिदेहिं सावट्ठम्भमुद्धललिदेहिं अङ्गेहिं अम्हाणं लोअणाइं सीदलावेदि ? (र)

[(र) सुलभसौख्यं तावद् बालत्वं भवति । अहो ! एतेषां मध्ये क एष रामभद्रशोभापरिशोभितैः सावष्टम्भमुग्धललितैरङ्गैरस्माकं लोचनानि शीतलयति ? इति छाया ।]

दर्शनानां ब्राह्मणानां विप्राणां ये व्याहरा: उक्तय: । बहुवचनं तदीयसर्ववाक्यानामपि प्रामाण्यप्रतिपत्त्यर्थम् । तेषु वाक्येषु संशय: सत्यं मिथ्या वा भवेदिति सन्देह: मा भूत् न भवतीति शेष: । हि यस्मात् एषां ब्राह्मणानां वाचि वाक्ये । एकवचनन्तु तदीयं यत्किञ्चिदपि वचनं नाप्रमाणमिति बोधनार्थम् । भद्रा कल्याणी यथार्थेत्यर्थ: । लक्ष्मी: अर्पितार्थसम्पत्ति: निपन्ना संलग्ना वर्त्तते इति शेष: । 'सम्पत्ति: श्रीश्च लक्ष्मीश्च' इत्यमर: । अपिच एते ब्राह्मणा: विप्लुतां असदर्थां मिथ्याभूतामिति यावत्, वाचं वाक्यं न व्याहरन्ति न वदन्ति । अत्र तादृशानां ब्राह्मणानां व्याहारेषु संशयाभावरूपकार्य्यं प्रति कारणस्य अविप्लुतत्वस्य समर्थकतया विन्यासात् कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कार: । मालिनी वृत्तम् ।

(ल) नेपथ्ये नेपथ्यस्थाने । कलकल: कोलाहल: अभूदिति शेष: । सर्वे सकला: जना: आकर्णयन्ति उद्ग्रीवा: सन्त: तं कोलाहलं शृण्वन्ति ।

(य) अये इति । कथमयं कोलाहल इति विचारयन् तत्कारणमुपन्यस्यति—अये इति । शिष्टानध्याय: शिष्टानां वेदविदां अनध्याय: अध्ययनाध्यापनाभाव: । "धारणाधीतवतो येषां वेद: सपरिबृंहण: । ते शिष्टा ब्राह्मणा ज्ञेया: श्रुतिप्रत्यक्षहेतव: ॥" इति वसिष्ठसंहिता । शिष्टागमनप्रयुक्ताध्ययनाभाव इति वा । 'अनध्यायो बधनामि समवाये समागते' इति मनुवचनात् आगतानाम् अनध्यायकारणं मन्तव्यम् । इति हेतु: अस्खलितं अबाधं खेलतां क्रीडतां बटूनां ब्राह्मणबालकानां कलकल: । अयं भाव: अतिथीनामागमनात् अध्ययनविरतिं लभमाना: बालका: स्वच्छन्दं कोलाहलं कुर्वन्त: क्रीडन्तीति भाव: ।

(र) सुलभेति । बालत्वं शैशवे सुलभसौख्यं सुलभम् अक्लेशलभ्यं सौख्यं यस्य तत्; अनेन

अरु। [अपवार्य सहर्षोत्कण्ठं सास्रम्] इदं नाम तद्भागीरथीनिवेदितरहस्यं कर्णामृतं, न त्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति। (ख)

जनकः। कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियेव सभाजयन्।

तनयीत्वं भवति। शैशवे हि विषयचिन्ताविरहात् येन केनापि कारणेन बालका उत्सवमनुभवन्ति, अत एते अन्यानश्वावमुख्यं लभमानाः क्रीडन्तीति भावः। अनेन "इमौ जनौ दुःखमतानि भुङ्क्ते" इत्युक्तात्मनिन्दा व्यज्यते। निरूप्य दृष्ट्वा। रामभद्रलक्ष्मीपरिशोभितैः रामभद्रस्य रामचन्द्रस्य। अत्र लक्ष्मीपदेन प्रेमस्य स्पृहणीयत्वं व्यज्यते। या लक्ष्मीः शोभा तया तत्सदृशा शोभयितव्यैः। अत एव निदर्शनालङ्कारः। परिशोभितैः भूषितैः सावष्टम्भमुग्धललितैः अवष्टम्भेन गौरवेण सह वर्तन्ते यानि सावष्टम्भानि प्रशंसनीयानि मुग्धानि "गौरवं त्ववष्टम्भः" इति हलायुधः। मनोहराणि च ललितानि सुन्दराणि च तैः तथोक्तैः अङ्गैः अवयवैः अस्माकमपि निःसपत्नानाम् अपीत्यपेरर्थः। लोचनानि नेत्राणि शीतलयति दर्शनसुखेन शीतयतीत्यर्थः। एतेषां बालकानां मध्ये अयं कः किंनामधेयः कुलश्च वा एष बालकः इति शीघ्रजाता जिज्ञासा।

(ख) अपवार्येति। अपवार्य कौशल्यादीनामश्रूयमाणमुक्त्वेत्यर्थः "तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते" इति साहित्यदर्पणे। सहर्षोत्कण्ठं हर्षः इष्टलाभात् प्रीतिः, उत्कण्ठा चिरविरहाभिलाषः। ततः हर्षेण उत्कण्ठया च ताभ्यां सह यथा स्यात्तथा अरुन्धती सास्रं साश्रुनयनम् आह इति शेषः। इदं नाम भागीरथीनिवेदितरहस्यं भागीरथ्या गङ्गया निवेदितं कथितं रहस्यं गुप्तविषयं यस्य तत् तथोक्तं कर्णामृतं कर्णयोः श्रवणयोः अमृतम् अमृततुल्यम् आनन्ददायकम्, अतएव रूपकालङ्कारः। इदम् एतत् तत् वचनं रामचन्द्रस्य पुत्रजन्मरूपं वाक्यम्। अत्र वाच्यवाचकयोरभेदविवक्षया इदं तदिति नपुंसकनिर्देशः। इदं खलु अर्थं यत् भागीरथीनिवेदितरहस्यस्य कर्णामृतरूपस्य वचनस्यार्थस्य [illegible] कुशलवयोरन्यतरः। तु किन्तु आयुष्मतोः दीर्घजीविनोः कुशलवयोर्मध्ये अ[illegible]तरः ज्येष्ठकनिष्ठयो न विद्मः न जानीमः। भागीरथीवचनानुरूपाकृतिदर्शनेन [illegible]योः कुशलवयोरिव अयम् इति जानामि, किन्तु नामदर्शनात् कुशो वा लवो वा अयम् [illegible] उत्कण्ठयावधारयितुं न शक्नोमीति भावः।

पुनरिव शिशुर्भूतो * वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ १९ ॥

[१९ । कुवलयदलश्यामस्निग्ध शिखण्डकमण्डन पुण्यश्रीक श्रिया बटुपरिषदं सभाजयन् इव पुन शिशुर्भूत स मे वत्स रघुनन्दन इव दृष्ट सन् झटिति कोऽय दृशो अमृताञ्जनं कुरुते ॥ इत्यन्वय ।]

कञ्चुकी । नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये । (व)

जनक । एवमेतत् । तथाहि,— (श)

---

(१९) कुवलयेति । कुवलयदलश्यामस्निग्ध कुवलयस्य इन्दीवरस्य पद्मस्येति वा दलं पत्र तद्वत् श्याम मेचक तथा स्निग्ध मसृणश्च इति तथोक्त पद्मपलाशसुकुमारकान्तिः । शिखण्डकमण्डन शिखण्डका काकपक्षा "काकपक्ष शिखण्डक" इत्यमर । मण्डनं भूषणं यस्य स तथोक्त, काकपक्षधारी । तथा पुण्यश्रीक पुण्या पवित्रा श्री शोभा यस्य स तथोक्त पवित्रलक्ष्मीक । समासान्त कप्रत्यय वैकल्पिक । श्रिया शरीरकान्त्या बटुपरिषद बटूनां ब्राह्मणबालकानां परिषदं सभाम् । "समज्या परिषद्गोष्ठी सभासमितिसंसद" इत्यमर. । सभाजयन् शोभयन् इव अलङ्कुर्वन्निव स्थित इति शेष । पुन भूय शिशुर्भूत कौमारमापन्न: स मे मम वत्स पुत्रक रघुनन्दन राम इव क अयं बालक दृष्ट विलोकित सन् झटिति शीघ्र दर्शनसमकालमेवेत्यर्थ । दृशो नेत्रयो अमृताञ्जन अमृतेन सुधया अञ्जन विलेपनं सेचनमिति यावत्, कुरुते, यद्वा अमृताञ्जनम् अमृतमयमञ्जन तद्धि शीतलत्वादिभिरतिरमणीयमिति कविसमयप्रसिद्धि । अमृतेन चक्षुषी लिम्पतीवेत्यर्थ । अत एवात्र प्रतीयमाना क्रियोत्प्रेक्षालङ्कार । तथा सभाजयन्निव पुन शिशुर्भूतो रघुनन्दन इव इत्यत्र वाच्यक्रियोत्प्रेक्षा, कुवलयदलश्यामस्निग्धेति लुप्तोपमया संसृज्यते । हरिणी छन्दः ।

(व) नूनमिति । अयम् एव सम्मुखवर्ती दारक बालक. क्षत्रियब्रह्मचारी ब्रह्म वेदं, तदर्थं तु शीलमस्येति ब्रह्मचारी नवोपनीत गुरुकुले वसन् वेदमधीयान इत्यर्थ । क्षत्रस्यापत्यम् इति क्षत्रिय स चासौ ब्रह्मचारी चेति स तथोक्त । नूनं निश्चितं अयेदिति मन्ये अहं सम्भावयामि अनुमिनोमीत्यर्थ ।

(श) एवेति । एतत् त्वया यदुक्तं तत् एवम् इत्थमेव सत्यमित्यर्थ ।

* भूत्वा इति पाठभेद ।

चूड़ाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोमपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठिकम्
पाणौ कार्मुकमक्षसूत्रवलयं दण्डं तथा पैप्पलम् † ॥ २० ॥

[२० । पृष्ठत: अभित: चूड़ाचुम्बितकङ्कपत्र तूणीद्वयं भस्मस्तोमपवित्रलाञ्छनम् उर:, रौरवीं त्वचं, मौर्व्या मेखलया नियन्त्रित माञ्जिष्ठिकम् अधोवासश्च, पाणौ कार्मुकम्, अक्ष—सूत्रवलयं तथा पैप्पल दण्डं धत्ते ॥ इत्यन्वय ।]

भगवति अरुन्धति ! किमुत्प्रेक्षसे कुतस्त्योऽयमिति ? (ख)

(२०) तदेव विवृणोति—चूडेति। अय बालक पृष्ठत अभित पृष्ठस्योभयो. पार्श्वयो: चूडाचुम्बितकङ्कपत्र चूडाभि. शिखाभि लम्बमानकेशाग्रैरित्यर्थ । चुम्बितानि स्पृष्टानि बाणाना मूलदेशे गतिवैचित्र्याय निवेशितानि कङ्कस्य तदाख्यपक्षिविशेषस्य पत्राणि यस्य तत् तथोक्तम् । तूणीद्वयम् इषुधियुगलं "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयो"रित्यमर । लम्बमानशिखस्पृष्ट-सायकमूलतूणीरयुगलमित्यर्थ । तथा भस्मस्तोमपवित्रलाञ्छन भस्मना स्तोम पुञ्ज एव पवित्रं शिष्यं लाञ्छनं चिह्नं पुण्ड्रं वा यस्य तत्तथोक्तम् । भस्मस्तोमेन पवित्र लाञ्छनमिति वा । उर. वक्ष:स्थलम् । तथा रौरवी रुरो मृगस्य इयम् इति रौरवी ता त्वच चर्म्म उत्तरीयभूत मृगचर्मे-त्यर्थ: । मौर्व्या मुर्वाया. तृणविशेषस्य इयम् इति मौर्वी तया यद्वा धनुर्गुणरूपया मेखलया काञ्च्या परिधेयवस्त्रबन्धनरज्ज्वा इत्यर्थ । नियन्त्रित कटिदेश [illegible] माञ्जिष्ठिक मञ्जिष्ठारागेण रक्तम् अधोवास: अन्तरीयक च परिधेयवसनञ्चेति यावत् । तथा पाणौ हस्त कार्मुक धनु अक्षसूत्र-वलयम् अक्षाणां जपार्थं सूत्रेण स्फाटिकादीना वलय वलयीकृताक्षसूत्रम् जपमालिकावलयमित्यर्थ । तथा पैप्पलम् अश्वत्थशाखारचित दण्ड ललाटसम्मिता यष्टिञ्च धत्त बिभर्त्ति। वामे धनु. दक्षिण-मणिबन्धे जपमालां दक्षिणपाणौ दण्डञ्च धत्त इत्यर्थ.। चिह्नैरेतै. अय क्षत्रियब्रह्मचारीति प्रतीयते। तूणकार्मुकयोर्धारण क्षत्रियमात्रचिह्नम् , रौरवत्वगादिकधारणन्तु क्षत्रियब्रह्मचारि-चिह्नं यथाह मनु.—'कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिण ' इति। 'क्षत्रियस्य तु मौर्वी ज्या' इति च । पैप्पलदण्डोऽपि क्षत्रियब्रह्मचारिण एव, यथाह गौतम —'बैल्वपालाशौ ब्राह्मणस्य दण्डा-वश्वत्थपैलवौ शेषे' इति, शेषे क्षत्रिये। अत्र धत्त इत्येकया क्रियया अनेकेषां कर्मतयाभिसम्ब-न्धात् तुल्ययोगितालङ्कार., स च गद्यभागसम्पर्केण उक्तलिङ्गदर्शनेन कथितः" क्षत्रियब्रह्म-चारित्वनिश्चयाविदकत्वात् अनुमानसङ्कीर्ण.। शार्दूलविक्रीडित वृत्तम्।

(ख) भगवतीति। भगवति अरुन्धति! अयं बालक: कुत [illegible] आगतो

† दण्डोऽपर: पैप्पल इति क्वचित् पाठ ।

अरु। अद्यैव वयमप्यागताः । (स)

जनकः। आर्य्य गृष्टे ! अतीव मे कौतुकं वर्त्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ। इमञ्च बालकं ब्रूहि,—केऽप्येते प्रवयसस्त्वां दिदृक्षव इति। (ह)

कञ्चुकी। यदाज्ञापयसि। [इति निष्क्रान्तः ।] (च)

कौशल्या। किं भणाध, एवं भणिदो आगमिस्सदित्ति। (क)

[(क) किं भणथ, एवं भणित आगमिष्यतीति। इति सम्।]

अरु। भिद्येत वा सद्वृत्तमीदृशस्य निर्माणस्य ? (ख)

वा इति अव्ययात् त्यप्प्रत्यय । इति अस्मिन् विषये किमुत्प्रेक्षसे मन्यसे। अस्य बालकस्य परिचयं कश्चिदनुमातुं शक्नोषि चेत् ब्रूहीति भावः ।

(स) अद्येति ! वयमपि अद्यैव यस्मिन्नेवाहनि यूयम् आगता, अत्रोपस्थिताः। तस्मादस्य पूर्वदृष्टस्य परिचयं न निश्चिनुम इत्यर्थः। छलेनास्य परिचयगोपनं कृतम्, मिथ्याकथनभिया इमं न जानीम इत्यनुक्त्वा अद्यैवागता इत्युक्तम्।

(ह) आर्य्येति। गृष्टिरिति कञ्चुकिनो नाम तस्य सम्बोधनम्। मे मम अतीव सविशेषं कौतुकं कुतूहलं वर्त्तते। तत् तस्मात् कारणात् गत्वा वाल्मीकिसमीपमिति शेषः। भगवन्तं माहात्म्यशालिनं वाल्मीकिमेव मान्यमित्येवार्थः। पृच्छ अस्य परिचयादिकमिति शेष। इमञ्च बालकं एतं समीपागतं शिशुं च ब्रूहि कथय, एते केऽपि अपरिचिताः प्रवयसः प्रकृष्टं वयो येषां ते तथोक्ताः अतिवृद्धाः त्वां दिदृक्षवः द्रष्टुमिच्छवः इति पदस्य ब्रूहीत्यनेनान्वयः। त्वां केऽपि स्थविरा द्रष्टुमिच्छन्ति माननीयप्राचीनानां त्वद्दर्शनाभिलाषं पूरयितुमत्रागच्छेति भावः।

(च) यदिति। यत् आज्ञापयसि आदिशसि तदहं प्रतिपालयामीति शेषः। इति निष्क्रान्तः इत्येव उक्त्वा निष्क्रान्तः रङ्गालयाद्बहिर्गतः।

(क) किमिति। एवं भणितः जनकादेशेन कञ्चुकिना उक्तः स बालक इति शेषः। आगमिष्यति इति अत्र एष्यति किम् ? किं भणथ अयमागमिष्यति न वेति विषये यूयं किं ब्रूथ इत्यर्थः। यद्वा एवं भणितः प्रवयसस्त्वां दिदृक्षव इत्युक्तः सन् आगमिष्यति किं मन्यध्वे।

(ख) भिद्येतेति। ईदृशस्य एवंभूतस्य लोकोत्तरस्येत्यर्थः। निर्माणस्य विधात्रा स्वयं निर्मितस्येत्यर्थः। तदभिहितो भावः द्रव्यवत् प्रकाशते इति। यद्वा निर्मीयते यत् तन्निर्माणं कर्म्मणि ल्युट्। कृत्यल्युटो बहुलमित्युक्तेः। एतादृशसौम्याकारस्य बालकस्येत्यर्थः। सद्वृत्तं

कौशल्या। [निरूप्य।] कहं सविणअं णिसामिदगिट्ठिवअणो विसज्जिदइसिदारओ इदो अहिमुहं पसरिदो ज्जेव सो वच्छो। (ग)

[(ग) कथं सविनयं निशामितगृष्टिवचनो विसर्जितर्षिदारक इतोऽभिमुखं प्रसृत एव स वत्सः॥ इति सम्।]

जनकः। [चिरं निर्वर्ण्य।] भोः किमप्येतत्! (घ)

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे सम्मोहः स्थिरमपि हरत्येव बलवान्
अयोधातुं यद्वत् परिलघुरयस्कान्तशकलः॥ २१॥

[२१। एतस्मिन् विनयशिशुतामौग्ध्यमसृणः विदग्धैः न पुनः अविदग्धैः निर्ग्राह्यः महिम्नाम् अतिशयः एतस्मिन् (वर्त्तते)। परिलघुः अयस्कान्तशकलः अयोधातुं यद्वत् (तथा) बलवान् सम्मोहः स्थिरम् अपि मे मनः हरति एव॥ इत्यन्वयः।]

साधुशीलं सदाचार इति यावत्। किं भिद्येत विलुप्येत कथमपि नश्यत। कर्मकर्त्तरि यगात्मनेपदे। यत्राकृतिस्तत्र गुणा वसन्तीति वचनमवितथमिति भावः।

(ग) निरूप्येति। निरूप्य दृष्ट्वा। निशामितगृष्टिवचनः गृष्टेः कञ्चुकिनः वचनं इति गृष्टिवचनं निशामितम् आलोचितं गृष्टिवचनं येन स तथोक्तः। शम आलोचने इत्यस्य ण्यन्तस्य मित्त्वनिषेधात् निशामितमिति अन्यथा मित्त्वात् ह्रस्वः स्यात् विसर्जिताः परित्यक्ताः ऋषिदारकाः मुनिकुमाराः येन स तथोक्तः स वत्सः इतः अस्यां दिशि अभिमुखम् अस्माकं सम्मुखं प्रसृत एव प्रस्थित एव। कञ्चुकिवचनश्रवणमात्रेणैव अयं बालकः सविनयमितः आगन्तुमारभते न च कथमपि विलम्बते इति भावः।

(घ) चिरमिति। चिरं निर्वर्ण्य चिरं बहुसमयं व्याप्य निर्वर्ण्य सविशेषं विलोक्य। भो इति कौशल्यादीनां सम्बोधनम्। एतत् किमपि, एतत् वक्ष्यमाणं किमपि अपूर्वमित्यर्थः। यद्वा एतत् शिशुत्वं किमपि अनिर्वचनीयं वस्तु इत्यर्थः।

(२१) तदेव व्याकरोति विवृणोति—महिम्नामिति। एतस्मिन् शिशौ विनयशिशुतामौग्ध्यमसृणः विनयः नम्रता ज्ञानमौनवयोवृद्धजनसन्निधौ स्वनिकर्षपर्य्यवसाय्यवस्थानमिति यावत्। शिशुता शैशवं मौग्ध्यं सौन्दर्य्यं आर्जवमिति वा, तैः मसृणः स्निग्धः पौरुष्यहीनः विदग्धैः सूक्ष्मदर्शिभिः निर्ग्राह्यः निर्णेयः ज्ञेय पुनः किन्तु अविदग्धैः अनिपुणैः नर्णेतुं शक्यः इत्यर्थः। महिम्नां प्रकृष्टज्ञानतेजःप्रकृतिगुणादिमाहात्म्यानाम् त्कर्षं आधिक्यमिति यावत्। वर्त्तते इति शेषः। परिलघुः अल्पोऽपि अयस्कान्तः अयस्कान्तस्य

[प्रविश्य सव स्वगतम्] अज्ञातनामक्रमाभिजनान् पूज्यानपि नः स्वतः कथमभिवादयिष्ये । [विचिन्त्य] अयं पुनरविरुद्धः प्रकार इति वृद्धेभ्यः श्रूयते । [सविनयमुपसृत्य] एष वो लवस्य शिरसा प्रणामपर्यायः । (ङ)

अरुन्धतीजनकौ । कल्याणिन् ! आयुष्मान् भूयाः । (च)

लौहाकर्षकमणिविशेषस्य शकल खण्ड 'भित्त शकलं खण्डे वा' इत्यमर । यद्वत् यथा अयोधातुं लौहं हरति आकर्षति तथा बलवान् प्रबल महानिति यावत्, सम्मोद. एतद्बालक दर्शनजनितानन्द मे मम स्थिरमपि निश्चलम् अपि विषयव्यनासक्तमपीत्यर्थ.। मनश्चित्त हरति एव आकर्षत्येव। माहृशस्यापि चित्ताकर्षणादस्य अनिर्वचनीयमहिमशाली बालकोऽयमिति भाव । अत्र विनयशिशुतासौग्ध्यगणानामेकदा समुच्चयात् समुच्चय । द्वितीये पादे परिसङ्ख्या। उत्तरार्द्धे श्रौती उपमा च, स्थिरमपि हरति इति विरोध. महिमातिशयस्य असाधारणत्वात् कालभेदेन आभासत्वम् इति विरोधाभास । तदेतेषां मिथोऽनपेक्षया स्थितेः संसृष्टिः। शिखरिणी वृत्तम्।

(ङ) प्रविश्येति। प्रविश्य रङ्गभूमाविति शेष । स्वगतम् आत्मगतं यथा तथा आहेति शेष । पूज्यान् अपि ज्ञानवयोवृद्धतया अभिवादनार्हान् अपि। अज्ञातनामक्रमाभिजनान् नाम अभिधानं क्रम नमस्कारपौर्वापर्य्यप्रकार सत्काराद्यानुपूर्व्यमिति यावत्। अभिजन. वंश इति नामक्रमाभिजना न ज्ञाता नामक्रमाभिजना येषां ते तथोक्तास्तान् एतान् स्थविरान् इत्यर्थ । स्वत स्वयं स्वबुद्ध्या निश्चित्य इत्यर्थ । कथं केन क्रमरूपप्रकारेण अभिवादयिष्ये नमस्करिष्ये। एते खलु मे पूज्या इति सामान्यरूपेण मया स्वयं बुध्यते, किन्तु एषां मध्ये कस्य किं नाम, को वा वंशमर्य्यादया श्रेष्ठ को वा ब्राह्मण. को वा क्षत्रिय: इत्यादि विशेषपरिचयम् अविदित्वा केन क्रमेण केन प्रकारेण वा एतान् प्रणमामि, येन मे अभिवादने पौर्वापर्य्यातिक्रम-विरुद्धप्रकारो न स्यादिति भाव । विचिन्त्य अथ तद्विषयं मनसा पर्य्यालोच्य आहेति शेष.। अयं पुनरिति। पुन किन्तु अयं प्रकार. मनसा उद्भावित एष कल्प: अनुष्ठानविशेष इति यावत्, अविरुद्ध. अविपरीत लोकत. शास्त्रतश्चागर्हणीय. इति यावत्, सामान्यरूपविषयकप्रणाम-करणरूप इति भाव । 'सभायां प्रत्येकं न नमस्कुर्य्यात्' इति गौतमचरणानामभिप्रेतम्। इति अयं प्रकार. इत्यर्थ.। वृद्धेभ्य. प्राचीनगुरुभ्य श्रूयते। व. युष्माकम् एष: प्रणामपर्याय: प्रणामानां नमस्काराणां पर्य्याय. क्रम यथापूज्यम् अभिवादनमिति यावत्। अहं युष्मानभि-वादये तत् खलु युष्माभि: पर्य्यायेण गृह्यतामिति भाव.।

(च) कल्याणिन् इति। हे कुशलिन्। त्वम् आयुष्मान् प्रशस्तजीवित. दीर्घजीवीत्यर्थ:। भूयाः भव।

कौशल्या। जाद! चिरं जीव। (छ)

[(छ) जात! चिरं जीव। इति सम्।]

अरु। एहि वत्स! [इति लवमुत्सङ्गे कृत्वा स्वगतम्।] दिष्ट्या न केवलमुत्सङ्गश्चिरात् मनोरथोऽपि मे सम्पूर्णः। (ज)

कौशल्या। जाद! इदो वि दाव एहि। [उत्सङ्गे कृत्वा] अम्महे ण केअलं दरविअसन्तणीलुप्पलसामलुज्जलेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिणाददीहरदोहरेण सरेण अ रामभद्दमणुहरदि, णं कठोरकमलगब्भपक्खलो सरीरप्फंसोवि तादिसो ज्जेव वच्छस्स। जाद पेक्खामि दाव दे मुहचन्दम्। [चिबुकमुन्नमय्य निरूप्य सबाष्पाकूतम्] राएसि! किं ण पेक्खसि, णिउणं णिरूविज्जमाणं से मुहं वच्छाए बहूए मुहचन्देण संवददि ज्जेव। (झ)

[(झ) जात! इतोऽपि तावदेहि। अहो न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति, ननु कठोरकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य। जात! प्रेक्षे तावत् ते मुखचन्द्रम्। राजर्षे! किं न प्रेक्षसे, निपुणं निरूप्यमाणम् अस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदति एव। इति सम्।]

(ज) एहीति। वत्स! एहि त्वं मम समीपम् आगच्छ। इति एवमुक्त्वा लवम् उत्सङ्गे क्रोडे कृत्वा उपवेश्य स्वगतम् आहेति शेषः। दिष्ट्या भाग्येन केवलं एकः मे उत्सङ्गः क्रोडः न पूर्णः, किन्तु चिरात् बहुकालात् परं मनोरथोऽपि सीतातनयं क्रोडे करिष्यामीत्यभिलाषोऽपि सम्पूर्णः परिपूर्णो जातः। शिशोरस्यावयवयोगेन मम क्रोडस्थलं परिव्याप्तं, सीतापुत्रमुत्सङ्गे कृत्वा कदाहं सुखिनी स्यामिति बहुकालं मनसि पोषितोऽभिलाषः अद्य परिपूर्ण इति सरलार्थः।

(झ) जादेति। हे जात वत्स! इतः अपि अस्मिन् ममापि क्रोडे इत्यर्थः। एहि आगच्छ। केवलं भगवत्या अरुन्धत्या एव क्रोडे चिरं न स्थातव्यम्, किन्तु मम क्रोडेऽपि अर्ध्यं ... स्थीयताम्। उत्सङ्गे कृत्वा क्रोडमारोप्य। दरविकसन्नीलोत्पलश्याम मनाक् विकसत् उन्मीलत् यत् नीलम् उत्पलम् इन्दीवरमित्यर्थः। तद्वत् श्यामलः मेचकः तेन उज्ज्वलं ... देहबन्धेन शरीरघटनेन अथ ... केवलं

जनकः। पश्यामि सखि! पश्यामि। (ञ)

कौशल्या। अम्मो उम्मत्तीभूदं विअ मे हिअअं, किम्पि चिन्तअन्तो बहु विप्पलबदि। (ट)

[(ट) अहो उन्मत्तीभूतमिव मे हृदयं, किमपि चिन्तयत् बहु विप्रलपति। इति सम्।]

रामभद्रं रामचन्द्रम् अनुहरति अनुकरोति इति न, अपितु कवलितारविन्दकेसरकषाय-कण्ठकलहंसनिनाददीर्घदीर्घेण कवलिता भक्षिता ये अरविन्दानां पद्मानां केसराः किञ्जल्काः 'किञ्जल्कः केसरोऽस्त्रिया'मित्यमर। तैः कषायः रक्तः सुमधुर इत्यर्थः। कण्ठः लक्षणया तद्गत. स्वरः यस्य स चासौ कलहंसश्चेति तयोक्तस्तस्य अव्यक्तमधुरध्वनेः राजहंसस्य निनादः ध्वनि' इव दीर्घदीर्घः दीर्घप्रकार', प्रकारे गुणवचनस्येति द्वित्व कर्म्मधारयवदुत्तरेष्विति सुबलोपः। तेन अतिदीर्घेण स्वरेण कण्ठध्वनिना अपि रामभद्रम् अनुहरति अनुकरोति। अस्य बालकस्य देहः रामभद्रदेहसदृश. कण्ठस्वरोऽपि तादृश एवेत्यर्थः। किञ्चास्य शरीरस्य देहस्य स्पर्शः अपि रामभद्रगात्रस्पर्शानुरूप एव, तथाहि—कठोरकमलगर्भपक्ष्मलः कठोरस्य पूर्णावयवत्वात् दृढस्य च. कमलस्य पद्मस्य गर्भः अन्तर्गतपत्रं तदिव पक्ष्मलः सुकुमारः, पक्ष्मशब्दात् सिध्मादिभ्यश्चेति लच्। अतिकोमलत्वाद्दन्तुरत्वाच्च पद्माभ्यन्तरदलाना स्पर्शोऽभिलाषो स्पर्श इव सुकुमारः, तद्वदसौ सुकुमार इति पक्ष्मलशब्देन लक्षणामूलया व्यञ्जनया उपस्थाप्यते। ईदृशः शरीरस्पर्शः अपि वत्सस्यास्य रामभद्रगात्रस्पर्शतुल्य एवेत्यर्थ.। जात वत्स! ते तव मुखचन्द्रं तावत् निपुणं प्रेक्षे अहं पश्यामि! चिबुक अधरनिम्नदेशं उन्नमय्य मुखदर्शनार्थमुत्तोल्य, निरूप्य सम्यगवलोक्य सबाष्पाकूतं बाष्पेण हर्षाश्रुणा आकूतेन अभिप्रायेण च सह वर्त्तते यत्तथोक्तम् आह राजर्षे हे राजर्षिजनक। किं न पश्यसि त्व किमेतत् नावलोकयसि। निपुणं सावधान निरूप्यमाणं निरीक्ष्यमाणं अस्य मुख वत्सायाः सीतायाः मुखचन्द्रेण सह संवदति एव सदृशीभवति साम्यं प्रकटयति। न किमपि वैषम्यं दृश्यते इत्येवकारार्थः।

(ञ) अयि सखि कौशल्ये! पश्यामि अस्य शिशोर्मुखमहं सादरमवलोकयामि। भवादरादद्विरुक्तिः।

(ट) अम्मो इति। अहो इति खेदेऽव्ययम्। मे मम हृदयं चित्तम् उन्मत्तीभूतमिव अनुन्मत्तम् उन्मत्तं भूतम् इति उन्मत्तीभूतम् अभूततद्भावे च्विप्रत्ययः। विभ्रान्तमिव। सीताया रामचन्द्रस्य चाङ्गप्रत्यङ्गसौसादृश्यमनविम् बालके दृष्ट्वा नाहं चित्तं स्थिरीकर्तुं शक्नोमि अतएव किमपि अनिर्वाच्यं चिन्तयत् विभावयत् सत् बहु नानाविधं विप्रलपति परिदेवयति।

जनक. । [निरूप्य ।] (ठ)

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
सम्पूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा देव किमुत्पथैर्मम मनः पारिप्लवं धावति ॥ २२ ॥

[२२ । वत्सायाः रघूद्वहस्य च सम्पूर्णप्रतिबिम्बिता अस्मिन् शिशौ अभिव्यज्यते इव । निखिला आकृति. सा एव द्युति सा वाणी स सहज विनय स एव पुण्यानुभाव अपि असौ । हा हा देव । पारिप्लव मम मन उत्पथैः किम् धावति ॥ इत्यन्वय ।]

असम्बद्धमसम्भाव्यञ्च किमपि वक्तुमुपक्रमते इत्यर्थ । आकारसाम्याद्भ्रमय सीताया पुत्र इति मे चित्तं प्रकाशयतीति भाव. ।

(ठ) निरूप्येति । निरूप्य विशेषेणावलोक्य बालकमिति शेष ।

(२२) वत्सायाः इत्यादि । अस्मिन शिशौ बालके वत्सायाः सीतायाः रघूद्वहस्य च रघुकुलश्रेष्ठस्य रामचन्द्रस्य च सम्पूर्णप्रतिबिम्बिता एव प्रतिबिम्ब प्रतिच्छाया अस्ति अस्मिन् इति प्रतिबिम्बी, तस्य भाव तत्ता, सम्पूर्णा समग्रा चासौ प्रतिबिम्बिता चेति तत्तयोक्ता समग्रकान्तिमत्ता अभिव्यज्यते स्पष्ट लक्ष्यते इत्यर्थ । "प्रतिमान प्रतिबिम्ब प्रतिमा प्रतियातना प्रतिच्छाये"-त्यमर । तथाहि सैवाकृति सा एव सीतारामयोरन्यया एव निखिला सर्वा आकृति अवयवसंस्थानविशेष । अस्य बालकस्येति शेष । एव द्युति देहकान्ति सैव तयो सदृशी एव । तथा वाणी कण्ठस्वर इत्यर्थ, सा एव तत्सम्बन्धिनी एव सहज स्वाभाविक विनय प्रश्रय स एव तयोरनुरूप एव । तथा पुण्यानुभावोऽपि असौ पुण्य पावन अनुभाव तेजो विशेष., अपि च समीचीनव्यवसाय इति यावत्, असौ सीतारघूद्वहतुल्य एव । अदूरविप्रकृष्ट वाच्योऽयं शब्दः । "अनुभाव प्रभावे च सताञ्च मतिनिश्चये" इत्यमर । यद्वा सैवाकृति सा द्युतिः अस्मिन् शिशौ सम्पूर्णं यथा तथा प्रतिबिम्बिता प्रतिफलिता सती अभिव्यज्यते । तत सा वाणी विनय स एव पुण्यानुभाव अपि असौ अभिव्यज्यते इत्यनेनान्वय इति केचित् । प्रतिबिम्बता इवेति पाठ. साधीयान् मन्यते, तथात्वे सम्पूर्णा प्रतिबिम्बता अस्मिन् शिशौ सर्वं वत्सायाः रघूद्वहस्य च समग्रं सादृश्यं अभिव्यज्यते इत्यर्थ । प्रतिबिम्बतामिव व्यनक्ति—सैवाकृति रित्यादिनेति । हा हा देव अहो भाग्य पारिप्लवं चञ्चल "चञ्चल तर वपरिप्लव" इत्यमर' । मम मन किं किमर्थम् उत्पथैः उन्मार्गैः अयथा ।इत्यर्थ । धावति अनवस्थितं भवति । सीतायाः अभावात् तदपत्योत्पत्तेर्निंतान्तास भय आकृति

कौशल्या। अत्थि दे मादा, सुमरसि वा तादं। (ड)

[(ड) अस्ति ते माता, स्मरसि वा तातम्। इति मम।]

लव.। नहि नहि। (ढ)

कौशल्या। तदो कस्स तुमं। (ण)

[(ण) ततः कस्य त्वम्। इति मम।]

लवः। भगवदो वाल्मीकेः। (त)

कौशल्या। अइ जाद! कहिदव्वं कहेहि। (थ)

[(थ) अयि जात। कथयितव्यं कथय। इति मम।]

लव। एतावदेव जानामि। (द)

सीतासादृश्यात् सीताया एव पुत्र इति मे मनः विस्मयत् सत् व्याकुलीभवतीति भावः। अत्र प्रसिद्धार्थत्वात् तच्छब्दो यच्छब्दोपादानं नापेक्षते। श्लोकेऽस्मिन् लवगताकृतिकान्त्यादीनां भेदेऽपि सीतागामनिष्ठाकारादिभिरभेदेनाध्यवसायात् अतिशयोक्तिरलङ्कारः। परे तु तदाकृति-सदृशाकृत्यादार्थेन वाक्यार्थपर्यवसानात् निदर्शना इत्यन्ति। अभिव्यज्यते इत्येकक्रियया आकृत्यादी-नामनेककर्तृणां सम्बन्धात्तुल्ययोगिता चेति। मम उत्पर्थः धावति इत्युक्तिभङ्ग्या सीतायाः प्राणेवाभावात् कथं तत्पुत्र इति गम्यार्थस्याभिधानात् पर्यायोक्तस्यालङ्कारः, तदेतेषां सङ्करः। शार्दूलविक्रीडितं वृत्तम्। 'रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम्' इति रघुवंशी-ऽस्यानुरूपः श्लोकः।

(ड) अस्तीति। ते तव माता जननी अस्ति विद्यते किम? तातं जनकं वा स्मरसि? तातश्च किमस्ति इत्येव प्रश्न एव भङ्ग्या कृतः।

(ढ) नहीति। अवधारणे द्विरुक्तिः। मे माता नास्ति नवा तातं स्मरामीत्यर्थः।

(ण) तत इति। तदा पित्रोरभावे त्वं कस्य केन रक्षितः सन् वर्द्धसे इत्यर्थ।

(त) भगवत इति। अहं भगवतो वाल्मीकेः, वाल्मीकिसम्बन्ध्येव, स खलु भगवान् मत्ताभिरक्षिता इत्यर्थः।

(थ) अइ इति। अयीति कोमलसम्बोधने, जात वत्स! कथयितव्यं वक्तव्यं कथय ब्रूहि त्वमिति शेषः। यन्मया पृच्छामि तज्जानासि चेत् स्पष्टमभिधेहि न किञ्चित् गोपयेति भावः।

(द) एतावदेवेति। एतावदेव एतत्पर्यन्तमेव जानामि, नत्वेतदधिकं मत्परिचयं जानामीत्यर्थः।

[नेपथ्ये ।] भोः भोः सैनिकाः ! एष खलु कुमारश्चन्द्रकेतुराज्ञापयति,—न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति। (ध)

अरुन्धतीजनकौ। अये ! मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्य इत्यहो सुदिवसः। (न)

कौशल्या। वच्छलक्खणस्स पुत्तओ आणवेदित्ति अमिअबिन्दुसुन्दराइं अक्खराइं सुणीअन्ति। (प)

[(प) वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीति अमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते । इति संस्कृतम् ।]

जनकः। आर्ये ! क एष चन्द्रकेतुर्नाम ? (फ)

(ध) भो इति। हे सैनिकाः सेनासमूहा एष अयं कुमारश्चन्द्रकेतुः तन्नामधेयो लक्ष्मणात्मज इत्यर्थः, आज्ञापयति आदिशति। केनचित् युष्माकं मध्ये केनापि आश्रमाभ्यर्णभूमिः आश्रमस्य तपोवनस्य अभ्यर्णा निकटवर्त्तिनी भूमिः प्रदेशः तपोवनसमीपप्रदेशः न आक्रमितव्या न प्रवेष्टव्या नावरोद्धव्या इत्यर्थः। अभिपूर्वात् दहेन (?) क्रमधातोः सिद्धमभ्यर्णमिति। वाल्मीकेस्तपोवनं प्रविश्य तरुलतादीनां पालितमृगपक्षिणाञ्च किमप्यनिष्टं न कर्त्तव्यमिति भावः। मुनेर्बहुमानार्थमिदमुक्तम्।

(न) अये इति। अये इति साधारणोऽनिर्द्दिष्टजनसम्बोधनम्। मेध्याश्वरक्षाप्रसङ्गात् मेध्यस्य यज्ञियस्य अश्वमेधीयस्य इत्यर्थः। अश्वस्य रक्षा रक्षणं तस्याः प्रसङ्गात् अवश्यानुष्ठेयत्वात् अत्र च विचरतोऽस्य यज्ञाङ्गभूतस्य वाजिनः रक्षणायेत्यर्थः। उपागतः समीपागतः वत्सश्चन्द्रकेतुः तदभिधानः लक्ष्मणात्मजः अद्य द्रष्टव्यः अवश्यमवलोकितव्य इति हेतोः अहो सुदिवसः सौभाग्यम्। प्रियजनदर्शनदिनात् शोभनतमं दिनं नास्ति, यदद्य तद्भाग्यमतः सुप्रभातमिति भावः।

(प) वच्छेति। वत्सलक्ष्मणस्यापि कुमारस्य समाचारश्रवणे अचिरसमागतस्येति यावत्, सौमित्रेरपि पुत्रकः चन्द्रकेतुरित्यर्थः। आज्ञापयति सैनिकान् आदिशति इति एतानि अमृतबिन्दुसुन्दराणि अमृतस्य बिन्दवः कणा इव सुन्दराणि मधुराणि श्रुतिसुखानि अक्षराणि वाक्यानि श्रूयन्ते मयेति शेषः। पौत्रस्याधिपत्यस्य ... कस्य निरतिशयानन्दो न जायते इति भावः।

(फ) आर्ये इति। चन्द्रकेतुर्नाम चन्द्रकेतुरिति नाम्ना ख्यातः एषः अयं कः कुतस्त्यः ?

जनक। जानासि रामलक्ष्मणौ दाशरथी ? (ब)

लव। एतावेव रामायणकथापुरुषौ ? (भ)

जनक। अथ किम् ? (म)

लव। तौ कथं न जानामि ? (य)

जनक। तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः। * (र)

लव। ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः। (ल)

अरु। [विहस्य] आविष्कृतं कथाप्रावीण्यं वत्सेन। (व)

(ब) जानासीति। दाशरथी दशरथस्यापत्ये पुमांसाविति दाशरथी रामलक्ष्मणौ जानासि त्वं किम्? किमिति काका योजनीयम्।

(भ) एताविति। एतौ दाशरथी रामलक्ष्मणौ एव मत्पृष्टौ रामायणकथापुरुषौ रामायणकथाया वाल्मीकिकृतरामायणनामाख्यानस्य पुरुषौ नायकौ प्रधानपुरुषौ किम्? अत्रापि काका किमिति प्रश्नो व्यज्यते।

(म) अथ किमिति स्वीकारार्थकमव्ययम्। एतौ एव रामायणकथापुरुषौ इति स्वीकारार्थं द्योतयति। तदेवेत्यर्थः।

(य) ताविति। तौ प्रसिद्धौ रामलक्ष्मणौ कथं केन हेतुना न जानामि न वेद्मि। प्रतिप्रसिद्धनामानौ एतौ केन न ज्ञायेते। रामायणकथानायकत्वादधीतरामायणोऽहमेतौ जानाम्येवेत्यर्थः।

(र) तस्येति। तस्य दाशरथेः स्वनामप्रसिद्धस्य लक्ष्मणस्य आत्मजः तनयश्चन्द्रकेतुः।

(ल) ऊर्मिलेति। तर्हि तदा लक्ष्मणात्मजत्वे सत्ययम् ऊर्मिलापुत्रः ऊर्मिलाया तदाख्याया लक्ष्मणपत्न्याः पुत्रः गर्भजाततनयः। मैथिलस्य मिथिलाधिपस्य जनकस्य राजर्षेः दौहित्रः दुहितुः कन्याया अपत्यं पुमान् इति दौहित्रः।

(व) विहस्येति। विहस्य मध्यमं हसित्वा "मध्यमः स्याद्विहसित"मित्यमरः। अरुन्धती आह वत्सेन अनेन लवेन कथाप्रावीण्यं कथायां रामायणाख्याने प्रावीण्यं दक्षत्वं विचक्षणत्वम् अभिज्ञतेति यावत्। आविष्कृतं प्रकटितम्। चन्द्रकेतोः पितुः मातामहस्य च यथावत् परिचयदानादेव रामायणकथायाम् अतीवाभिज्ञ इति मन्यते।

* तत् कथं न जानासीत्यधिकं क्वचित्।

जनक। [विचिन्त्य।] यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत् पृच्छामस्तेषां दशरथात्मजानां किन्नामधेयानि अपत्यानि केषु केषु दारेषु प्रसूतानि? (अ)

लव। नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः। (ब)

जनक। किं न प्रणीतः कविना? (स)

लव। प्रणीतो न तु प्रकाशितः। तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः, तञ्च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य। (ड)

(अ) यदीति। यदि त्वं कथायां रामायणाख्याने ईदृशः एवंविधः अभिज्ञः विचक्षणः, असीति शेषः। तत्तदा पृच्छामः त्वामिति शेषः। तावत् वाक्यालङ्कारे। तेषां दशरथात्मजानां दशरथस्य राज्ञः तनयानां केषु केषु किन्नामधेयेषु दारेषु कस्याः कस्याः पत्न्यामित्यर्थः किन्नामधेयानि किं नामधेयं येषां तानि तथोक्तानि अपत्यानि सन्तानाः प्रसूतानि उत्पन्नानि। [illegible]। तद्ब्रूहि त्वं कथयेत्यन्वयः। यद्यत्र दशरथात्मजपरिचयदानप्रसङ्गात् स्वस्यापि पितुः नामादिकं वदेत्, तदभिप्रायेण जनकेन पृष्टमिति भावः।

(ब) नेति। अयं भवता पृच्छ्यमानः दशरथात्मजानां सन्ततिविवरणरूपः कथाप्रविभागः आख्यानस्य अंशः अस्माभिः अन्येन वा अस्मद्व्यतिरिक्तेन जनेन वा न श्रुतपूर्वः पूर्वं श्रुत इति श्रुतपूर्वः नाकर्णितः। यस्मिन्नंशे दशरथात्मजानामपत्योत्पत्तिविवरणं भगवतोपनिबद्धं स अंशः अस्माभिरन्येन वा न श्रुत इत्यर्थः। अतः भवतः प्रश्नस्योत्तरं दातुं न शक्नोमीति भावः।

(स) किमिति। कविना वाल्मीकिना किं न प्रणीतः एव न विरचित एव, दशरथात्मजापत्यविवरणप्रबन्धः किं न रचितः? अथवा रचितस्तथा न श्रुत इत्येवकारार्थः। यद्वा किं न प्रणीतः प्रबन्धः किं नोक्तः किमिति वा न प्रकाशितः न श्रावितो नाध्यापितश्च।

(ड) प्रणीतः रचितः न तु प्रकाशितः अद्यापि न प्रकटितः कविनेति शेषः। तस्य एव दशरथतनयानां सन्ततिविवरणांशस्य एव यद्वा तस्य रामायणस्य कोऽपि अनिर्द्दिष्टोऽंश इति वा। स च समग्रः वक्ष्यमाणनाटकात्मक इति प्रथम श्राव्यप्रबन्धातिरिक्तदृश्यप्रबन्धरूपकरूपेण वा प्रबन्धान्तरस्य अर्थेन कृतार्थत्वम् प्र[illegible]।

जनक.। किमर्थम्? (च)

लव। स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति। (क)

जनक.। सर्वमिदमस्माकमाकूतकरम्। (ख)

लव। महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। केषाञ्चिदन्तेवासिनां हस्तेन तत् पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषामानुयात्रिकश्चापपाणिः प्रमादापनोदनार्थमस्मद्भ्राता प्रेषितः। (ग)

रसवान् करुणादिरसबहुलः अभिनयार्थः अभिनेतुं योग्यः सात्त्विकाङ्गिकादिचतुर्विधाभिनयप्रकाश्यः अर्थः अभिधेयं यस्य तथोक्तः कृतः इति भावः। किमर्थं कमभिनयार्हं दृश्यकाव्यं कृतमित्यर्थः। समग्रं रामायणं खलु श्रव्यकाव्यरूपेणोपनिबद्धम्, परन्तु तदन्तर्गतसीतानिर्वासनादिपुनर्मिलनपर्य्यन्तांशमादाय किमपि सरसं दृश्यकाव्यं कविना व्यरचि इति निष्कर्षः। तच्च सन्दर्भं स्वहस्तलिखितं निजकर्त्तृकं लिखितं प्रकाशभयात् न तु शिष्यादिनापि लेखितवान् एतेन तस्य सन्दर्भांशस्य गोपनीयत्वं सूच्यते। मुनिर्वाल्मीकिः। तौर्य्यत्रिकसूत्रकारस्य तौर्य्यत्रिकस्य नृत्यगीतवादित्रस्य, तूर्य्यं मुरजादि तत्र भवं तौर्य्यं त्रयं, तच्च त्रिकं, तौर्य्योपलक्षितं त्रिकमिति तौर्य्यत्रिकमित्यमरटीकायां महेश्वरः। 'तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयं'मित्यमरः। सूत्रकारः शास्त्रकारः तस्य नृत्यगीतवादित्रशास्त्राचार्य्यस्य भरतस्य आचरागतान्नयात्राचार्य्यत्वमूलकतदाद्यक्षरघटितभरतनामकस्य मुनेः सकाशे व्यसृजत् प्रेरयामास।

(च) किमर्थं किम्प्रयोजनम्। कथं तं सन्दर्भं भरतसमीपे व्यसृजत् इत्यर्थः।

(क) स इति। स भगवान् ऐश्वर्य्यशाली भरतः तदभिधानतौर्य्यत्रिकशास्त्राचार्य्यः। तं अभिनयार्हं सन्दर्भांशम्। अप्सरोभिः अभिनेत्रीभिर्देवनारीभिः प्रयोज्यकर्त्रीभिः। प्रयोजयिष्यति अभिनेष्यति इति एतदर्थं व्यसृजदिति सम्बन्धः।

(ख) सर्वमिति। इदं त्वयोक्तं सर्वं सकलं अप्रकाशभयेन प्रबन्धान्तरेण च विधानं भरतं प्रति प्रेषणञ्च आकूतकरं गूढार्थकम्, यद्वा आकूतकरं कौतुकजनकम्। अत्र कस्यापि आश्चर्य्यजनकव्यापारस्य विद्यमानत्वादेव मुनिः स्वहस्तेन लिखित्वा संगोप्य तमंशं भरतान्तिके व्यसृजदिति भावः।

(ग) महतीति। तस्मिन् सन्दर्भे। आस्था आवश्यकत्वप्रकारकेच्छा आदरातिशयः इत्यर्थः, यत्न इति यावत्। यतः केषाञ्चित् अन्तेवासिनां अन्ते वसन्ति ये ते अन्तेवासिनः शिष्याः। शयवासवासिषु अकालादिति सप्तम्या अलुक्। हस्तेन करेण। तत्पुस्तकं अभिनेयार्थकं

कौशल्या। जाद! भादावि दे अत्थि? (घ)

[(घ) जात! भ्रातापि तेऽस्ति। इति सम।]

लव। अस्ति आर्यः कुशो नाम। (ङ)

कौशल्या। जेट्ठो त्ति भणिदं होदि। (च)

[(च) ज्येष्ठ इति भणितं भवति इति सम।]

लव। एवमेतत्, प्रसवक्रमेण स किल ज्यायान् इति। (छ)

जनक। किं यमजावायुष्मन्तौ? (ज)

लव। अथ किम्! (झ)

तं सन्दर्भं भरताश्रमं प्रति भरतस्य आश्रमं तपोवनं प्रति प्रस्थितं प्रेरितम्। तेषाम् अस्त्रवासिनाम् आनुयात्रिकः अनु पश्चात् यात्रा गमनं प्रयोजनमस्येत्यानुयात्रिकः। धनुर्धरः चापपाणिः कार्मुकधरः। प्रमादापनोदनार्थं प्रमादस्यानवधानताया अपनोदनं निरसनं दूरीकरणम् अर्थः प्रयोजनं यस्मिन् कस्मिंश्चित् तद्यथा तथा। अनवधानतानिमित्तविपन्निरासार्थमित्यर्थः। अस्मद्भ्राता मम सहोदरः प्रेषितः।

(घ) जादेति। अयि वत्स! ते तव भ्राता सहोदरः अपि किम् अस्ति वर्तते।

(ङ) अस्तीति। आर्यः पूज्यः। एतेन ज्येष्ठत्वं व्यज्यते। कुशो नाम कुश इति नाम्ना प्रसिद्धः। मे भ्राता अस्तीत्यर्थः।

(च) जेट्ठो त्तीति। ज्येष्ठः ज्यायान् अग्रजः इति भणितम् उक्तं भवति। आर्य इति विशेषणात्तस्य ज्येष्ठत्वं प्रतीयत इत्यर्थः।

(छ) एवमिति। एवमेतत् भवत्या यदुक्तं ज्येष्ठ इति तत् सत्यमित्यर्थः। प्रसवक्रमेण प्रसवस्य मातृगर्भात् बहिर्भवनस्य क्रमः पौर्वापर्यं तेन स कुशः मे मम ज्यायान् अग्रजः। इतिशब्दो वाक्यसमाप्तौ। किलेति निश्चये। यमसाधारणपूर्वजातत्वं यत्प्रथमापेक्षजननपूर्वत्वम् ज्येष्ठ इति भावः। जननानुपूर्व्येण ज्येष्ठः जन्मप्राथम्यात्। अन्ये यमजयोस्तु निषेकप्राथम्यादिति आहुः।

(ज) किमिति। आयुष्मन्तौ दीर्घजीविनौ युवामित्यर्थः। किं यमजौ युग्मजातौ।

(झ) अथ किमिति। एवमेतदित्यर्थः। अथ किमित्यङ्गीकारे पदम्। कुशलवेति नामकारणं यमजत्वञ्च रामायणे यथा—

यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः।
निर्मार्जनीयस्तु नाम्ना हि भविता कुश इत्यसौ॥

जनकः। कथय कथाप्रबन्धस्य कीदृशः पर्य्यन्तः ? (ञ)

लवः। अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति। (ट)

कौशल्या। हा वच्छे मुद्धचन्दमुहि ! को दाणिं दे कुसुमभूदस्स सरीरस्स देव्वदुव्विलासपरिणामो एआणीआए णिवडिदो। (ठ)

[(ठ) हा वत्से मुग्धचन्द्रमुखि। क इदानीं ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणाम एकाकिन्या निपतितः। इति सम्।]

यथारण्ये प्रसूतौ ... समाहृत ।
निर्माज्जनीयौ हस्ताभ्यां नाम्ना स भविता लवः ॥
एवं कुशलवौ नाम्ना यमौ तौ संबभूवतुः ।
भगवत्कृतनामानौ सुखिमावस्थयौ च तौ ॥

(ञ) कथयेति। कथाप्रबन्धस्य रामायणकथायाः प्रबन्धः रचना इति यावत्, तस्य रामायणकथाप्रबन्धस्य कीदृशः कियान् पर्य्यन्तः सीमा अवसानमित्यर्थः। जनकस्य लवं प्रति पुनः पुनः प्रश्नकारणम् रामायणकथाप्रसङ्गेन यद्ययं निजविवरणमपि वदेत्, तदायं सीतापुत्रो न वेति सन्देहनिरासार्थमिति बोध्यम्।

(ट) अलीकेति। अलीकपौरप्रवादोद्विग्नेन अलीकः मिथ्याभूतः यः पौराणां नगरवासिनां प्रवादः दोषारोपणमित्यर्थः। पौरजनैः उत्थापितः सीतापवादः इति यावत्। तेन उद्विग्नः व्याकुलः सम्भ्रान्तः, तेन राज्ञा नृपेण रामचन्द्रेण निर्वासिता वने परित्यक्ताम्। आसन्नप्रसववेदनाम् आसन्ना निकटवर्त्तिनी प्रसवस्य गर्भमोचनस्य वेदना यातना यस्याः सा तां देवयजनसम्भवां यज्ञभूमिसमुत्पन्नाम् एकाकिनीम् असहायां देवीं सीताम् अरण्ये वने परित्यज्य विहाय लक्ष्मणः सौमित्रिः प्रतिनिवृत्तः अयोध्यां प्रस्थितः। इति एष कथायाः पर्य्यन्त इति योजना।

(ठ) हेति। हा खेदे। वत्स पुत्रीभूते ! मुग्धचन्द्रमुखि मुग्धः सुन्दरः यश्चन्द्रः स इव मुखं यस्याः, अयि तथोक्ते। कुसुमभूतस्य कुसुमैः तुल्यं इति नित्यसमासः। पुष्पवत् अतिसुकुमारस्य एकाकिन्याः एकलिकायाः ते तव शरीरस्य अवयवस्य कः अनिर्वचनीयः भयावहः दैवदुर्विलासपरिणामः दैवस्य भाग्यस्य दुष्टः अशुभफलोन्मुखीभावः विलासः व्यापारः तस्य परिणामः फलोपधानं परिपाकः दुष्टः विलासो यस्मिन् स चासौ परिणामश्चेति स तथोक्तः दैवस्य दुर्विलासपरिणामः स तथोक्त इति वा। निपतितः जातः। एतादृश्यास्ते निर्ज्जनारण्ये का विपत्तिर्जाता अहो दुर्भाग्यं ; सुखदुःखयोस्तदायत्तत्वात् दैवमेवात्र अवगतमिति भावः।

जनक । हा वत्से !

नूनं त्वया परिभवश्च नवश्च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
सन्त्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि ॥ २१ ॥

[२१ । त्वया नवश्च घोरश्च परिभवम्, प्रसवकालकृता तां व्यथां च अवाप्य क्रव्याद्गणेषु परितः परिवारयत्सु सन्त्रस्तया शरणम् इति नूनम् असकृत् स्मृतः अस्मि ॥ इत्यन्वयः ।]

लव । [अरुन्धतीं प्रति ।] आर्य्ये ! कावेतौ ? (ड)

अरु । इयं कौशल्या, अयं जनकः । (ढ)

---

(२१) नूनमिति । हा वत्से ! हा पुत्रि सीते ! त्वया नव नूतनम् अननुभूतपूर्व्वं च घोरं दुःसहं च परिभवं तिरस्कारम् अकारणनिर्वासनजन्यमवमाननमित्यर्थः । तथा प्रसवकालकृतां प्रसवस्य गर्भमोचनस्य काले समये कृताम् उत्पन्नां प्रसवकालेन जनितामिति वा, तां प्रसिद्धां व्यथां वेदनां च अवाप्य लब्ध्वा क्रव्याद्गणेषु क्रव्यम् आमिषम् अदन्तीति क्रव्यादः आममांसभोजिनः श्वापदादयः तेषां गणाः सङ्घाः तेषु परितः समन्तात् परिवारयत्सु वेष्टयत्सु सत्सु । त्वद्भक्षणार्थं परिमण्डलीकृत्य व्याप्नुवत्सु सन्त्रस्तया तेभ्यो भीतया त्वया अस्मि अहं शरणं रक्षक भो जनक क्वासि मामितो रक्षेत्युक्त्वेत्यर्थः । नूनं निश्चितम् असकृत् वारं वारं स्मृतः चिन्तितः अभवम् । अस्मि भवामि इति वा । निर्जनारण्ये प्रसववेदनाभिभूता व्याघ्रादिहिंस्रजन्तुवेष्टिता नितरां भीता त्वं रक्षितारं मां सम्बोध्य नूनं भृशं क्रन्दितवतीत्यर्थः । अतो मयैव उपस्थितेषु मातापितरौ आह्वयतीति प्रसिद्धिः । सीताया अनाथत्वात् तां अकृत्वात् परित्यज्य केवलं पितरम् एवमाहूतवतीति मन्तव्यम् । अवाप्येत्येकया क्रियया परिभवव्यथयोरभिसम्बन्धात् तुल्ययोगितालङ्कारः 'पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् । एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिते'ति दर्पणोक्तेः । अत्र पदार्थानामिति बहुवचनमतन्त्रमिति बोध्यम् । अत्रत्य वास्तवत्वादुत्प्रेक्षाव्यञ्जकनूनपदस्य विद्यमानत्वेऽपि नात्रोत्प्रेक्षालङ्कारः तादृशसम्भावनाभावादिति । वसन्ततिलकं वृत्तम् ।

(ड) अरुन्धतीमिति । प्रतियोगात् कर्म्मप्रवचनीयत्वे द्वितीया । अरुन्धतीं लक्ष्यीकृत्याहेति शेषः । किमाह—एतौ काविति ? एतौ पुरोवर्त्तिनौ सीतानिमित्तं खिद्यमानौ अपि जातितः किञ्जन्मानौ इमौ कुलतः कौ किन्नामानौ वा इति लवस्य प्रश्नः ।

(ढ) इयमिति । इयम् एषा कौशल्या कोशलराजनन्दिनी महाराजदशरथपत्नी रामजननी, अयं जनकः मिथिलाधिपतिः राजर्षिरिति ।

लव । [सबहुमानखेदकौतुकं पश्यति ।] (ण)

जनक अहो दुर्मर्य्यादता दुरात्मनां पौराणाम्, अहो रामस्य राज्ञः क्षिप्रकारिता ! (त)

एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः ।
क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन शापेन वा ॥ २४ ॥

[२४ । एतत् वैशसघोरवज्रपतनं शश्वत् उत्पश्यतः मम क्रोधस्य चापेन शापेन वा धक् इति ज्वलितुम् अवसरः ॥ इत्यन्वयः]

(ण) सबहुमानेति । सबहुमानखेदकौतुकं बहुमानेन एकत्र राघवस्य माहात्म्यात् अन्यत्र श्वशुरत्वाच्च गौरवेण खेदेन अनयोः विषमभावदर्शनाद् खेदेन, तथा पठितरामायणकथानायकस्य राघवस्य मातुः श्वशुरस्य च प्रत्यक्षावलोकनात् कौतुकेन च सह वर्त्तमानं यथा स्यात्तथा पश्यति अवलोकयति ।

(त) अहो इति । अहो इति इह खेदाभिव्यञ्जकम् । दुरात्मनां दुर्वृत्तानां पौराणां पुरवासिजनानां दुर्म्मर्य्यादता दुष्टा मर्य्यादा येषां ते तथोक्तास्तेषां भावः तत्ता, उल्लङ्घित-लोकाचारत्वं, दुरात्मनां पौराणामेतदेवौचित्यं यत् निर्द्दोषायामपि राजमहिष्यां दोषमारोप्य एतमनर्थमेते जनयामासुः । राज्ञः रामस्य क्षिप्रकारिता क्षिप्रं सहसा अविमृश्य कर्त्तुं शीलमस्य तस्य भावः तत्ता अविमृश्यकारिता । राज्ञा खलु सदसद्विविच्यैव सर्व्वं कर्त्तव्यम्, रामस्तु पौराणाम् अलीकापवादाकर्णनमात्रमेव गुरुजनमनपेक्ष्यैव सहसा सीतां निर्व्वासितवान्, तस्मादेतदविवेकित्वमस्येति भावः ।

(२४) तस्मात् अविमृश्यकारिणो रामस्य पौराणाञ्च यथाविधि शासनं कर्त्तव्यमित्याह— एतदिति एतत् सीतानिर्व्वासनरूपं वैशसघोरवज्रपतनं विशसति छिनत्ति इति विशसः घातकः तस्य कर्म्म इति वैशसं हननं, तदेव घोरं दारुणं वज्रस्येव पतनं तीक्ष्णपातं, अकाण्डे वज्रपातोपममेतत् महाव्यसनमित्यर्थः । शश्वत् पुनः पुनः अविश्रान्तमिति यावत्, "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः" इत्यमरः । उत्पश्यतः निरन्तरम् अवलोकयतः मम, क्रोधस्य कोपानलस्य चापेन मारकधनुषा शापेन अनिष्टोपधायकसङ्कल्पविशेषेण वा अभिसम्पातदानरूपेण उपायेनेति यावत् । धक् इति धक् इत्यव्यक्तानुकरणं शब्दं कृत्वा ज्वलितुम् अवसरः समयः प्राप्तकालता इति यावत्, उपस्थित इति शेषः । मम राजर्षित्वादिति भावः । अत्रावसरशब्दस्य कालार्थकत्वात् 'कालसमयवेलासु तुमुन्' इत्यनेन ज्वलितुमित्यत्र तुमुन् । यथा वह्निः धक् इति शब्दं कृत्वा ज्वलति तथा ममापि क्रोधवह्निरकार्य्य

कौशल्या । भअवदि ! परित्ताहि, परित्ताहि, पसादेहि कुविदं राएसिं । (थ)

[(थ) भगवति ! परित्रायस्व परित्रायस्व, प्रसादय कुपितं राजर्षिम् । इति सम् ।]

अरु । एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम् ।
राजन्नपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः ॥ २५ ॥

[२५ । परिभूतानां मनस्विनाम् एतत् हि प्रायश्चित्तम्, राजन् राम ते अपत्यम्, कृपणाः प्रजाः च पाल्याः ॥ इत्यन्वयः]

— —— —— —— — — —— —

कारिणां दुराचारिणां दहनाय ज्वलन् समयं प्राप्त मम न । एव साधनं विद्यते चाविनयत्वात् प्रथमञ्चापं, अध्ययनसम्पत्त्या तपःप्रभावोत्पन्नः शापश्च एताभ्यामेतान् दुराचारान् निपातयामीति भावः । अत्रोपमानस्य वज्रधर्मस्य ज्वलनस्य उपमेये क्रोधे उपचरितं अतएव उपमेयस्योपमानस्य निगीर्णत्वादतिशयोक्तिः, तथा वैरस्य वज्रपतनत्वारोपान्निरङ्गरूपकञ्चालङ्कारः । श्लोकस्यास्य परार्द्धमयः (२६) द्रष्टव्यम् ।

(थ) भगवदीति । परित्रायस्व रामर्षेः क्रोधानलाद्रक्ष इत्यर्थः सम्भ्रमे द्विरुक्तिः । कुपितं क्रुद्धराजर्षिं जनकं प्रसादय प्रसन्नं कुरु, अन्यथास्य कोपानलेनास्माकं सर्व्वं भस्मीभवितीति भावः ।

(२५) एतदिति । परिभूतानां विमानितानां पराभवमानितानां इत्यर्थः मनस्विनां प्रशस्तचित्तानां साधूनामित्यर्थः । एतत् चापग्रहणं शापप्रदानं वा प्रायश्चित्तं क्रोधप्रतीकारः । यद्वा परिभूतानां मनस्विनां जनानां चित्तं मनः प्रायश्चित्तम् एतत् ईदृशं भवतीत्यर्थः । पराभवमानिता तेजस्विनो जनाः प्रायेण एवं प्रकारेण क्रोधप्रतीकारं कर्त्तुमीहन्ते इति भावः । निर्दोषायाः सीतायाः निर्व्वासनेनावमानितः जनकः पितरः कुपितः सन् चापेन शापेन वा तत्प्रतिकर्त्तुमिच्छति इति यत् स खलु मनस्विस्वभाव एव इति भावः । यद्वा परिभूतानां कुत्सितकर्म्मानुष्ठानात् नितान्तावमानितानां मनस्विनां महामनसां एतत् ईदृशं चापेन शापेन वा दण्डविधानमेव प्रायश्चित्तं दोषसंशोधनम् अलीकपौरजनापवादेन प्रमादवशात् रामः सीतां निर्व्वास्य साधुभिर्निन्दितः निभृतं स्थित एव, तथापि भवन्तः गुरुजनाः यत् तिरस्कुर्व्वन्ति तदेव तस्य रामस्य महत् प्रायश्चित्तं जातम्, अवमानितस्य गुरुजनतिरस्कार[illegible] इति भावः । किन्तु हे राजन् ! हि यस्मात् रामस्ते अपत्यं सन्तानकल्पः [illegible]धोऽपि स पाल्यः । तथा कृपणाः दीनाः क्षुद्रा इति यावत्, प्रजाः प्रकृतिपुञ्जाः [illegible] रक्षणीयाः अवध्या इति भावः । न हि चापवर्षणेन शापदानेन वा विनाशनीया इत्यर्थः । अत्र पूर्व्वार्द्धे अप्रस्तु-

जनक। शान्तं वा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे।
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ॥ २६ ॥

[२६। वा रघुनन्दने तदुभयं शान्तम्, तत् मे पुत्रभाण्डम्, पौरः जनः भूयिष्ठद्विजबाल-वृद्धविकलस्त्रैणश्च ॥ इत्यन्वयः]

[प्रविश्य सम्भ्रान्ता वटवः।] कुमार! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेषु श्रूयते, सोऽयमधुनास्माभिः प्रत्यक्षीकृतः। (८)

—

तात मनस्विसामान्यात प्रस्तुतस्य जनकस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः। उत्तरार्द्धे तु काव्य-लिङ्गम्। इत्युभयोः सङ्करः। पथ्यावक्त्रं वृत्तम्।

(२६) शान्तमिति। रघुनन्दने रामचन्द्रे तदुभयं चापधारणं शापदानञ्चेत्यर्थः। शान्तं विरतम् अस्तु। एतद्द्वयं रामे न प्रयोक्तव्यम्। हि यतः तत् रामचन्द्र इत्यर्थः। विधेयप्राधान्या-न्नादित्यत्र क्लीवत्वम्। मे मम पुत्रभाण्डं पुत्र एव भाण्डं मूलधनं पुत्रभूतरामात्मकमूलधनम्। "स्याद्भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने" इत्यमरः। पुत्रस्थानीयतया रामो अवध्य एव इत्यर्थः। को नाम निजं मूलधनं नाशं नयेदिति भावः। तथा पौरः जनः पुरवासिवर्गश्च भूयिष्ठद्विज-बालवृद्धविकलस्त्रैणश्च भूयिष्ठा बहवो द्विजा अवध्या ब्राह्मणा बाला शिशवः निरपराधा अतएव स्नेहार्हा इति भावः। वृद्धा प्रवयसः कार्य्याक्षमत्वादनुकम्पार्हा इति भावः। विकला हस्तपदाद्यवयवहीना खञ्जकुब्जादयः सर्व्वथा पालनीयाः। स्त्रैणं स्त्रीसमूहः अवध्य इत्यर्थः यस्मिन् स तथोक्तः। अतएवास्मिन्नपि पुरवासिवर्गे मिथ्याकिंवदन्तीप्रवर्त्तके दण्डार्हेऽपि तदुभयं शान्तम्, अत्रानेके अवध्याः सन्ति तत्पाल्या एव मे इति भावः। यद्वा हि यतः भूयिष्ठ-द्विजबालवृद्धविकलस्त्रैणः पौरो जनः अकारेण रामं समनुशोचति, तदुभयं पौरजनरामा-त्मकयोरुभयं मे पुत्रभाण्डं पुत्रात्मकमूलधनवत् मम संरक्षणीयं तस्मात् शान्तं क्रोधेन ज्वलित्वा अलं, स्थैर्य्यद्योतनार्थं द्विरुक्तिरवगन्तव्या। क्रोधः न कर्त्तव्य इत्यर्थः। काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितं वृत्तम्

(८) प्रविश्येति। सम्भ्रान्ता सत्वरा व्याकुला इति यावत्, 'सम्भ्रमस्त्वरया वेगे भूषास्थानविपर्य्यये" इति मेदिनी। वटवः ऋषिकुमाराः प्रविश्य रङ्गभूमिमागत्य वक्ष्यमाण-माहुरिति शेषः। कुमार लव। अश्वोऽश्व इति वीप्सायां द्विरुक्तिः। अश्व इति प्रसिद्धः. कोऽपि अस्माभिरदृष्टपूर्व्व इत्यर्थः। भूतविशेषः भूतेषु प्राणिषु विशेषः प्रभेदः प्राणिभेदः। जनपदेषु लोकालयेषु कोशलादिदेशेषु इति वा। आरण्यकत्वादियमुक्तिः। श्रूयते शब्द-बोधविषयो भवति, लोकपरम्परया शास्त्रे च अश्वो नाम कश्चिज्जन्तुरस्तीति अस्माभिराकर्ण्यते

लव। अश्व इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते, तद्ब्रूत कीदृशः? (ध)

बटव। श्रूयताम्।

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥२७॥

[२७। पश्चात् विपुलं पुच्छं वहति, तच्च अजस्रं धनोति स दीर्घग्रीवः भवति। तस्य चत्वारः एव खुराः, शष्पाणि अत्ति, आम्रमात्रान् शकृत्पिण्डकान् प्रकिरति, व्याख्यातैः किं वा स पुनः दूरं व्रजति, एहि एहि यामः ॥ इत्यन्वयः]

इत्यर्थः। म स्रुतपूर्व अश्व अभना इदानीम् अस्माभिः प्रत्यक्षीकृत अस्मभ्यं प्रति इति प्रत्यक्षम् अव्ययीभावे समासान्त अच्। प्रत्यक्षम् अक्ष्णि अस्यति अर्शआदित्वात् अच्, तत, अप्रत्यक्ष प्रत्यक्ष कृत इति च्विप्रत्यय अप्रत्यक्षीकृत

(ध) अश्व इति। पशुसमाम्नाये पशुद्रव्यकयागप्रतिपादकवेदभागे, साङ्ग्रामिके युद्धशास्त्रे च अश्व इति अश्व इति शब्द पठ्यते। तत तस्मात ब्रूहि कथय कीदृश स पशु। पशुनामप्रतिपादकशास्त्र धनुर्वेदादियुद्धशास्त्र च अश्व इति कश्चित् ग्राम्य पशुरस्ति इति श्रूयते, स कदापि न दृष्टः तत कीदृश किंलक्षण, किञ्चताऽयमिति वर्णय इत्यर्थ।

(२७) तमेव वर्णयति—पश्चादिति। स अस्माभिर्दृष्ट अश्व पश्चात् पृष्ठप्रान्तदेशे विपुल महत् पुच्छ लाङ्गूल वहति धारयति। वनमहिषकोऽयमुभयत पुच्छ इत्यारण्यकाश्र मानुरूपेण व्याख्याय पश्चात्पदम्, अन्यथा पुच्छस्य पश्चाद्वहनाव्यभिचारात्। विपुल मित्यनेन महत्त्व्याहृति। तस्य हि पुच्छ गात्रद्राघिमाकृत भवति एव च वक्ष्यमाणविशेषणाना तत्साधारणत्वेऽपि न दोष। तच्च पुच्छ अजस्रम अनारत धनोति चालयति, तथा स दीर्घग्रीव आयतकण्ठो भवति। तस्य अश्वस्य खुरा शफाश्चत्वार एव नाधिका इत्यर्थ। स शष्पाणि बालतृणानि अत्ति भक्षयति। आम्रमात्राम् अतफलप्रमाणान् शकृत् पिण्डकाम् पुरीषपिण्डाम् प्रकिरति विसृजति। किं व्याख्यातै व्याख्यानै तत् म किंवा फलमित्यर्थ। स अश्व दूर व्रजति गच्छति, एहि एहि आ भूमि विदत्ति। याम वयम अदृष्टपूर्व्व म द्रष्टु गच्छाम। अनाश्र इत्येवाकार प्रति-

[इति उपसृत्याजिने हस्तयोराकर्षन्ति ।] (न)

लव । [सकौतुकापरोधविनयम् ।] आर्य्याः ! पश्यत पश्यत, एभिर्नीतोऽस्मि । [इति त्वरितं परिक्रामति] (प)

अरुन्धतीजनकौ । पूरयतु कुतूहलं वत्सः । (फ)

कौशल्या । भअवदि ! जाणामि, एदं अणालोअअन्ती ण जीआमि विअ, अदो अण्णदो भविअ पेक्खम्ह दाव गच्छमाणं दीहाउम् । (ब)

[(ब) भगवति ! जानामि, एतमनालोकयन्ती न जीवामीव, अतोऽन्यतो भूत्वा पश्यामस्तावद्गच्छन्तं दीर्घायुषम् । इति सम् ।]

जन । अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते । (भ)

प्रभृत्यनेकक्रियान्वयात् दीपकालङ्कारः, स चाससमासानित्युपमादिभिः सङ्कीर्य्यते । मन्दाक्रान्ता वृत्तम् ।

(न) इतीति । इत्युक्त्वा उपसृत्य नवान्तिकं गत्वा अजिने उत्तरीयमृगचर्म्मणि हस्तयोः करद्वये च धृत्वा आकर्षन्ति अस्मद्दर्शनार्थं सत्वरीकुर्व्वन्ति बटवः लवमिति शेषः ।

(प) सकौतुकेति । सकौतुकं परोधविनयं कौतुकम् अस्मद्दर्शने कौतूहलं उपरोधः सहचरगणानुरोधरूपो निजकार्य्याघातः बलात् क्रियमाणत्वं वा । विनयः गुरुजनेषु नम्रतादिसाधुव्यवहारः, बालकैः सह गन्तुमनुमतिप्रार्थनमिति यावत् । तैः सह वर्त्तमानं यथा स्यात् तथा आह । हे आर्य्याः भो पूज्यतमाः ! पश्यत पश्यत यूयम् अवलोकयत एभिर्बालकैर्नीतोऽस्मि युष्मद्गौरवभङ्गभयात् नाहं गन्तुमिच्छामि, किन्तु बटुभिरेभिर्बलादाकृष्य नीये, तदनुमन्यतामित्यर्थः

(फ) पूरयत्विति । कुतूहलम् आत्मनः अश्वावलोकनकौतुकं पूरयतु वत्सः लवः । अश्वदिदृक्षा चेत् एभिः सह गत्वा दृश्यतामिति भावः ।

(ब) भगवदीति । एतं लवम् अनालोकयन्ती अपश्यन्ती सती अहं न जीवामि इति जानामि मन्ये, एतम् अदृष्ट्वा क्षणमपि स्थातुं न शक्नोमीति भावः । अन्यतो भूत्वा दर्शनयोग्यदेशं गत्वेत्यर्थः । दीर्घायुषं चिरजीविनमेनं गच्छन्तं सहचरैः सह यान्तं बालकं पश्यामि । तावद्वाक्यालङ्कारः ।

(भ) अतीति । अतिजवेन अतिशयवेगेन दूरं विप्रकृष्टं पन्थानम् अतिक्रान्तः गतः चपलः सत्वरगतिः स बालकः त्वया कथं दृश्यते द्रष्टुं शक्यते, नेत्रविषयातिक्रमात् कथं तं बालकं द्रष्टुं शक्नोषीत्यर्थः ।

कञ्चुकी। (प्रविश्य) भगवान् वाल्मीकिराह—ज्ञातव्यमेतदवसरे भवद्भिरिति। (म)

जनक। अतिगम्भीरमेतत् किमपि भविष्यति। भगवति अरुन्धति! सखि कौशल्ये! आर्य्य सृष्टे! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः। (य)

[इति निष्क्रान्तो वृद्धवर्गः] (र)

बटव। पश्यतु कुमारस्तदाश्चर्य्यम्। (ल)

लव। दृष्टमवगतञ्च नूनमाश्वमेधिकोऽयमश्व इति। (व)

बटव। कथं ज्ञायते? (श)

लव। ननु मूर्खाः! पठितमेव युष्माभिस्तत्काण्डे। किं न पश्यथ,

(म) कञ्चुकिनमेवा नृक्रम्। प्रविश्याह—इति शेष। भगवान् ऐश्वर्य्यान्वित वाल्मीकि प्राचेतस आह ब्रवीति, एतत् अस्य बालकस्य वृत्तान्त अवसरे योग्य समये ज्ञातव्य मम सर्व्वं युष्माभि वेदितव्य, तत् कञ्चित्कालं क्षम्यतामिति भाव।

(य) अतीति। एतत् अस्माभिर्ज्ञातव्य कुमारस्यास्य जन्मादिसकलविवरणम् एत-द्वाल्मीकिवचन अतिगम्भीर गूढाशय किमप्यपूर्व्वमिति वा कस्याथ पुत्र किं नाम इत्यादिकम् अतिगम्भीरम् अत्यन्तगूढम् अत्र किमप्यनिर्व्वचनीयरहस्यं विद्यते, तदेव भगवतोऽवसरे ज्ञातव्यमित्युक्तमिति भाव अतएव स्वयमेव ननु प्रतिनिधिभि। गत्वा तत्समीपमुपस्थाय भगवन्तं प्राचेतस वाल्मीकि पश्याम। तस्य स्थान् मत्त्वा जानीम इत्यर्थं।

(र) इतीति। वृद्धवर्गं वृद्धाना जनकादीना वर्गं समूह इति एवमभिधाय निष्क्रान्त रङ्गालयाद्बहिर्गत।

(ल) पश्यत्विति। कुमारो भवान् तत् आश्चर्य्यम् अत्यद्भुत चित्र वस्त्वित्यर्थं। हि निश्चित पश्यतु अवलोकयतु। अदृष्टपूर्व्वत्वादयमश्व बटूना विस्मय जनयतीति भाव।

(व) दृष्टमिति। मया दृष्टम् अवलोकितम् अत्यद्भुत वस्तु चतुर्व्विधगोक्रान्तमित्यर्थं। तथा अवगतञ्च ज्ञातञ्च नून निश्चितम् अयमश्व आश्वमेधिक इति च [illegible] नमस्य अश्वमेधाय तत्रामकयज्ञाय प्रभवतीति वा इत्याश्वमेधिक अश्वमेधयज्ञस्य [illegible] मया सूचितमित्यर्थः।

(श) कथमिति। कथं केन प्रकारेण ज्ञायते बुध्यते अयम आश्वमेधिक इति?

प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारस्तत्प्राय-
मेव बलमिदमपि दृश्यते, यदि इह न प्रत्ययस्तद्गत्वा पृच्छत । (ष)

बटवः । भोः भोः । किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ? (स)

लवः । [सस्पृहमात्मगतम् ।] अये ! अश्वमेध इति विश्वविजयिनां
क्षत्रियाणामूर्जस्वलः सर्वक्षत्रियपरिभावी महान् उत्कर्षनिकषः* ।(ह)

[नेपथ्ये] अयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २८ ॥

(ष) नन्विति । नन् भो मूर्खा बालिशा "मूर्खवैधेयबालिशा" इत्यमरः । तत्काण्डे अश्वमेधप्रकरणे अश्वमेधप्रतिपादकश्रुतिभागे वा । पठितमेव मया युष्माभिश्च अश्वस्य लक्षणादिकमिति शेषः । तथापि मयि प्रश्नकरणाद्युष्माकं मूर्खत्वं प्रकाश्यते इति भावः । किं न पश्यथ यूयम् एतत् किं नावलोकयथ, प्रत्येकम् एकमेकं प्रति प्रत्येकं शतसंख्याः शतं संख्या यथा ते तथोक्ताः कवचिनः वर्मवन्तः दण्डिनः दण्डवन्तः निषङ्गिणः तूणीरवन्तः सर्वत्र मत्वर्थीय इनप्रत्ययः । रक्षितारः रक्षकाः वर्तन्ते इति शेषः । तत्प्रायमेवेदमपि तेषां प्रायः प्राचुर्यं यत्र तत्तत्प्रायम् इदमपि एतत् अनीकमपि दृश्यते । अश्वमेधप्रकरणेऽस्माभिर्यथाधीतं तादृशमेवैतत् बलं दृश्यते इत्यर्थः । अतो मयानुमीयते अयमाश्वमेधिकोऽश्व इति । यदि चेत् इह मयि मद्वाक्ये इत्यर्थः । न प्रत्ययः न विश्वासः अभवत् तत्तदा गत्वा पृच्छत, वाल्मीकिमिति यद्वा अश्वरक्षकान् इति शेषः । मद्वाक्ये यदि यूयं न विश्वसित तदा गुरुं पृच्छत इत्यर्थः ।

(स) भो भो इति । चन्द्रकेतुसैन्यसम्बोधनमेतत् । किम्प्रयोजनः किम्प्रयोजनं यस्य स तथोक्तः, किंफलकः अश्वः परिवृतः रक्षिभिः परिगतः सन् पर्यटति विहरति ।

(ह) सस्पृहमिति । सस्पृहम् अनागते वस्तुनीच्छा स्पृहा तया सह वर्तमानम् आत्मगतं स्वगतमाहेति भावः । अश्वमेध इति अश्वमेधनामकः यज्ञ इति विश्वविजयिनां विश्वं भुवनं विजेतुं शीलं येषां तेषां क्षत्रियाणां बाहुजानां सर्वक्षत्रियपरिभावी सर्वान् क्षत्रियान् राजन्य-वंश्यान् परिभावयितुं शीलं यस्य स तथोक्तः सकलराजन्यकुलपरिभवजनकः ऊर्जस्वलः बलिष्ठः महान् समधिकः उत्कर्षनिकषः उत्कर्षस्य श्रेष्ठत्वस्य निकषः परीक्षास्थानम्, उपादेयदेवत्वख्या-पकप्रस्तरविशेष इति यावत् । अश्वमेधे हि केवलं सार्वभौमस्यैवाधिकारात् तदनुष्ठातृणां तस्य यज्ञस्य च सर्वप्राधान्यमिति भावः । 'राजा सार्वभौमोऽश्वमेधेन यजेते'ति ।

---

* उत्कर्षनिष्कर्षः इति पाठान्तरम् । निष्कर्षः निर्धारणमित्यर्थः ।

[२८ । समस्तलोकैकवीरस्य दशकण्ठकुलद्विषः अयम् अश्वः इव पताका अथवा वीरघोषणा ॥ इत्यन्वयः ।]

लव. । [सव्यथमिव] अहो ! सन्दीपनानि अक्षराणि । (ख)

वटव. । किम् उच्यते, प्राज्ञः खलु कुमारः । (क)

---

२८ । वटुभिर्ज्ञातव्यविषयं चन्द्रकेतुर्मैनिका नेपथ्यादाहरयमश्व इति । समस्तलोकैकवीरस्य समस्तु भूरादिषु लोकेषु एक अद्वितीय वीर शूर इति तस्य "भूर्भुव स्वर्महश्चैव जनश्च तप एव च । सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिता ।" समस्तु लोकेषु एकः वीर इति तद्विवार्थं इत्यादिना उत्तरपदहिगु । इह विपदतत्पुरुषस्यानिष्टत्वात् समावयवा लोका इति शाकपार्थिवादित्वात् समास, तेषु एक वीर इति नन्या यद्वा समावयवेषु लोकेषु एकवीरस्य एकेषु प्रधानेषु वीरयात पराक्रमत इति एकवीर तस्य । मध्यपदलोपिसमास । पाचादित्वं वा वीरैक इत्यापत्तिवारणाय एकश्च वीरश्चतीति विग्रहोऽङ्गीकृत । यद्वा सप्त च ते लोकाश्चेति दिक्सङ्ख्ये सञ्ज्ञायामिति समास । सप्तर्षयोऽयम । दशकण्ठकुलद्विष दश दशसंख्यका, कण्ठाः ग्रीवा यस्य स तथोक्त, रावण इत्यर्थ । तस्य कुलं वंशं द्वेष्टि हिनस्ति इति दशकण्ठकुलद्विट तस्य रावणवंशोन्मूलयितु रामस्य अयम् अश्वः आश्वमेधिको घोटक. । इव पताका समस्तभुवनविजयज्ञापिका वैजयन्ती । यद्वा इयम अश्व इत्यर्थं । विधेयप्राधान्यात् स्त्रीत्व पताकात्वं विधेयम् । अयमाश्वमेधिक अश्व एव पताका विजयध्वज इत्यर्थ । अथवा वीरघोषणा अथवा पूर्वोक्तातिरेकेण वीरघोषणा वीर इति जगदाकर्णनानुकूलव्यापार । समस्तलोकेषु राघव, अद्वितीयवीर इति ख्यापयितुम अयमश्व पर्यटतीत्यर्थ । अत्र समस्तलोकजयिनो राघवस्य जेतृत्वात् राम, अद्वितीय, वीर इति प्रत्याख्यानमूलो वस्तुध्वनि । अश्वपताके एव वीरघोषणा इति ताभ्यां भेदे अभेदारोपादतिशयोक्तिरलङ्कार ।

(ख) सव्यथमिवेति । व्यथया रामोत्कर्षश्रवणजन्यपीडया सह वर्त्तते इति सव्यथम् इव चाचरित लव. । सन्दीपनानि प्रोत्तु क्रोधोत्पादकानि अक्षराणि वर्णा. । अयमश्व इत्युक्ताक्षराणि तेजस्विनामतीव दु सहानीति भाव. ।

(क) किमुच्यते इति । किमुच्यते अस्माभिः अत्र कि वक्तव्य तत्र स्थिरीकर्तुं शक्यते इत्याह—कुमार इति । कुमार, लव, प्राज्ञ, पण्डित खलु अस्माक वचना मध्ये लव एव विशिष्टाभिज्ञ: स एव उक्तवाक्यस्योत्तर दास्यतीत्यर्थ. । लवस्य प्राज्ञत्वम् वेलाया- मेवाभिज्ञातं यत् आश्वमेधिकोऽयमश्व इति हृष्टिमात्रेणैवाकथयदिति न इति, किंप्रयोजनोऽयमश्व इत्यादि यदेभिरुच्यते तस्य तात्पर्यं परिकल्पयितुमशक्त. ात भाव: । कुमारो लव. खलु प्राज्ञ, मन्ये एष एतस्य तात्पर्यमवगतवानिति भाव ।

लव। भो भोः! तत् किमक्षत्रिया पृथ्वी? यदेवमुद्धतमुद्‌घोष्यते।(ख)

[नेपथ्ये] अरे! महाराजं प्रति कुतः क्षत्रियाः? (ग)

लवः। धिग् जाल्मान्। (घ)

यदि ते सन्ति सन्त्वेव केयमन्या विभीषिका।
किमुक्तैः सन्निपत्यैव पताकां † वो हराम्यहम्॥ २९॥

[२९। यदि ते सन्ति सन्तु एव, का इयम् अन्या विभीषिका, उक्तैः किम्, अहं सन्निपत्य एव वः पताकाम् हरामि॥ इत्यन्वयः।]

(ख) भो भो इति। भो भोः सैनिकाः। तत् तस्मात् पृथ्वी इयम् पृथिवी किम् अक्षत्रिया क्षत्रियरहिता? यत् यस्मात् एवम् इत्थं उद्धतं सगर्वम् उद्घोष्यते प्रख्याप्यते। यतः युष्माभिः उक्तप्रकारेण रामस्याद्वितीयवीरत्वसूचैः सदर्पं घोष्यते, तन्मन्ये इयं पृथिवी क्षत्रियशून्या इति। तन्न मन्तव्यं, पृथिव्यामन्ये वीरा अन्येऽपि वर्त्तन्ते, अतः युष्माकमेतत् सगर्ववचनं न शोभते इति भावः।

(ग) नेपथ्ये इति। अरे इति क्षेपसूचकामन्त्रणे। महाराजं प्रति रामचन्द्रं प्रति कुतः क्षत्रियाः विद्यन्ते इति शेषः। रावणविजयिनो राघवस्याग्रिके कुत्र के पुनः क्षत्रियाभिमानिनो वीरा विद्यन्ते यदेवं सगर्वमुच्यते इति भावः।

(घ) धिगिति। जाल्मान् असमीक्ष्यकारिणो मूर्खान् युष्मान् धिक् निर्भर्त्सयामि। "निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः।" "जाल्मोऽसमीक्ष्यकारी स्या"दिति चामरः। सैनिकानां जाल्मत्वन्तु रे इति निकृष्टसम्बोधनपदप्रयोगादिति बोध्यम्। वीराणां तारतम्यमबुद्ध्वैव एते सैनिकाः यदीदृशं साहङ्कारम् उद्घोषयन्ति तदेते निन्दनीया इति तात्पर्यम्।

(२९) यदीति। ते राघवाः गौरवात् बहुवचनम्। समस्तलोकैकवीरा रावणजयिनो रामचन्द्रा यदि चेत् सन्ति विद्यन्ते तर्हि सन्तु तिष्ठन्तु तावत्। तेषां स्थितौ नः का क्षतिः अस्थितौ वा केति भावः। यद्वा ते अतिवीराः क्षत्रियाः सन्ति सन्तु एव। किन्तु इयम् एषा अन्या अन्यरूपा अप्राकृतिकीत्यर्थः, विभीषिका भयप्रदर्शना का, विपूर्वाद्भीधातोर्णिचि पर्यायार्हणोत्पत्तिषु ण्वुच् इति ण्वुच्प्रत्ययः। किमिदं भयप्रदर्शनमित्यर्थः। महाराजानां तेषां नाम श्रुत्वैव नाहं बिभेमीति भावः। उक्तैः किं एवमन्योऽन्यं प्रति वागाडम्बरैः किम्प्रयोजनम्। निजोत्कर्षप्रकाशकैर्व्वाक्यैः नास्ति किमपि फलं कार्य्येणैव दर्शयितव्यमित्याह—सन्निपत्यैवेति। अहं सन्नि-

---

† 'एभिरधुना तां पताकां हरामि वः।' 'शरसम्बाधां (शरैः मदीयैः वाणैः सम्यक् बाधा यस्यास्तामित्यर्थः) पताकां वो हराम्यहम्' इति पाठभेदौ।

भो भो बटवः ! परिवृत्य लोष्टैरभिघ्नन्तो नयत एनमश्वम् । एष रोहितानां मध्ये चरतु । (क)

[प्रविश्य सक्रोधदर्पं पुरुषः ।] धिक् चापलं, किमुक्तवानसि, तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते, राजपुत्रश्चन्द्रकेतुरविमर्दनः आक्रष्टशरासनः सोऽप्यपूर्वारण्यदर्शनकौतूहलाक्षिप्तहृदयो न यावदायाति तावत् त्वरितमनेन तरुगहनेनापसर्पत * । (ख)

पत्य एव वेगेन धावित्वा एव न किञ्चित् विविच्यति पदार्थं । युष्माकं च सैनिकानां पताका विजयवैजयन्ती हरामि बलात् गृह्णामि गृह्णाम्येवाहं तामिति भावः । भवतामपि निस्तारः ।

(क) भो भो इति । हे बटवः । यूयं परिवृत्य अश्वं परिवेष्ट्य लोष्टैः मृत्पिण्डैः प्रस्तरखण्डैर्वा अभिघ्नन्तः ताडयन्तः एनम् अश्वं नयत आश्रमाभिमुखं चालयत । एषः अश्वः वराकः क्षुद्रः, पशुः इति भावः, रोहितानाम् आश्रमस्थानां मृगविशेषाणां मध्ये चरतु भ्रमतु ।

(ख) धिगिति । चापलं चपलता धिक् । बालसुलभचापल्येन यदेनमश्वं लोष्टैस्ताडयन् नेतुमिच्छसि एतत्ते चापल्यं निन्दामीत्यर्थः । किमुक्तवानसि परिवृत्य लोष्टैरभिघ्नन्त इत्यादिकं किं कथितवान् असि त्वम्, नैतदुक्तव्यमित्याह—तीक्ष्णेति । हि यस्मात् तीक्ष्णनीरसाः तीक्ष्णाः उग्राः क्रोधाध्माता नीरसाः स्नेहरहिताः, कस्यापि प्रश्रयमननुरुन्धानाः । ततः कर्मधारयः । आयुधीयश्रेणयः, आयुध्यते अनेनेति आयुधम् । आयुधेन व्यवहरन्ति इत्यायुधीयाः, योद्धारः तेषां श्रेणयः संघाः अतिभीषणनिष्करुणशस्त्रधारिसमूहाः । शिशोरपि बालकस्यापि का कथान्येषां प्रवयसाम् । दृप्तां सदर्पां वाचं वचनं न सहन्ते न क्षमन्ते । सगर्वं वचनं श्रुत्वा बालकं कुत्रापि अविमृश्य त्वां न क्षमन्ते तेभ्यो नास्ति ते मोक्ष इति भावः । अरिविमर्दनः शत्रुदमनः, आक्रष्टशरासनः अधिज्यकार्मुकः सोऽपि अस्माकं सेनापतित्वेन प्रख्यातः राजपुत्रः लक्ष्मणतनयः चन्द्रकेतुः अपि, अपिशब्देन न केवलं योध्यवन्तः सैनिकाः अत्र समागताः, किन्तु सेनापतिश्चन्द्रकेतुरपि अत्रैव राजते इति व्यज्यते । अपूर्वारण्यदर्शनकौतूहलाक्षिप्तहृदयः अपूर्वस्य अत्याश्चर्यदर्शनस्यारण्यस्य वनस्य दर्शनेन अवलोकनेन आक्षिप्तम् आकृष्टं हृदयं मनः यस्य स तथोक्तः वर्तते इति शेषः । यावत् नायाति न आगच्छति तावत् अनेन तरुगहनेन गहनशब्देनैवार्थप्रतीतौ तरुपदं वनस्य निबिडत्वद्योतनार्थं तेन पलायनस्य सुयोगः । निबिडवृक्षवनाच्छन्नमार्गेणेत्यर्थः । त्वरितं शीघ्रं यथा स्यात् गमनं तथा । त्वत् भ्रातरः वा यूयं पलायध्वम् । अस्माकं सेनापतिरागत्य इदं वाक्यं श्रुणोति तदा महाननर्थः स्यात् ... जीवनं रक्षतेति भावः ।

---

* न यावदायाति तावत् त्वरितमपसर्पतानेन तरुगहनेन इति पाठान्तरम् ।

बटव। कुमार, कृतमनेनाखेन, तर्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः, दूरे चाश्रमपदमितस्त्वरेहि हरिणप्लुतैः पलायामहे। (छ)

लव.। [स्मितं कृत्वा] किं नाम विस्फुरन्ति शस्त्राणि! (ज)

[धनुरारोपयन्।]

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत्।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ ३० ॥

[३०। ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्रम् उद्गारिघोरघनघर्घरघोषम् एतत् चापम् ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बिविकटोदरम् अस्तु ॥ इत्यन्वयः।]

(छ) कुमार इति। अनेन अश्वेन अश्वहरणेन इत्यर्थः। कृतम् अलम् अश्वहरणं न कर्तव्यमित्यर्थः। अश्वसाध्यं किमपि नास्तीति गम्यमानसाधनक्रियायाः करणत्वम्। अश्वानादेव वयमत्र प्रवृत्ताः इति भाव.। कुत इत्याह—यत. विस्फुरितशस्त्रा विस्फुरितं विलसत् शस्त्रम् आयुधं येषां तथोक्ताः विकसितास्त्राः आयुधीयश्रेणयः शस्त्रधारिसमूहाः कमारं त्वां तर्जयन्ति भर्त्सयन्ति भयं प्रदर्शयन्ति। आश्रमपदं तपोवनञ्च दूरे वर्तते इति शेषः। तत्त्वरेहि आगच्छ हरिणप्लुतैः हरिणस्य यानि प्लुतानि अभूमिस्पर्शगमनानि तद्वद्गमनैरिति यावत्। हरिणवदुल्लम्फनगमनैः पलायामहे अपसर्पामः आश्रमस्य दूरत्वादेवागामाक्रमणात् वाल्मीकिरपि त्रातुं न शक्नोति, तदेनमश्वं विहाय सत्वरं प्राणरक्षार्थम् आयनं याम इति भावः।

(ज) किमिति। शस्त्राणि सैनिकानामिति शेषः। विस्फुरन्ति किं विलसन्ति किं-नामपदमत्र कोपसूचकम्। न भेतव्यं तत्प्रतिविधानं मयापि क्रियते इति भावः। धनुरारोपयन् कार्मुकं ज्यायुक्तं कुर्वन् वक्ष्यमाणम् आहेति शेषः।

(३०) अभ्यरक्षकान् विस्फुरितशस्त्रान् अवलोक्य तान् भयप्रदर्शनपूर्वकमाह—ज्येति। ज्याजिह्वया ज्या मौर्वी जिह्वा रसना इव तया, "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः। वलयितोत्कटकोटिदंष्ट्रं वलयिते वेष्टिते वलयाकारं गमिते वा। उत्कटे भयङ्करे कोटी अग्रभागौ एव दंष्ट्रे दन्तौ यस्य तत्तथोक्तम्। भक्षणाभिलाषिणः अन्तकस्य दीर्घा रसना यथा लौल्यात् वक्त्रप्रान्तद्वयं विशालौ दंष्ट्रिणौ दन्तौ च आलिङ्गति तथात्र मौ

[इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे]। (अं)

इति कौशल्याजनकयोगो नाम चतुर्थोऽङ्कः। (अ)

चापोऽपि जिह्वाकारया मौर्व्या उभयकोटिरूपदन्तद्वयं स्पृशतु इति भावः। निरन्तरं वाणवर्षं वर्षतु इति फलितम्। तथा उद्गारिघोरघनघर्घरघोषम् उद्गारी उत्पद्यमानः घोरः भीमः घनस्य मेघस्य इव घर्घरः स्पष्टश्रुतः घोषः ध्वनिः यस्य तत्तथोक्तम्। यद्वा घोरं घनस्य इव घर्घरघोषम् उद्गारि उत्पादयत्। घनः सान्द्रो घोष इति वा। एतत् इदं मम चापं धनुः। ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बिविकटोदरं ग्रासे जगतः कवलीकरणे प्रसक्तम् उद्युक्तं हसत् अट्टहासादिनाऽट्टहास्यं कुर्वत् यत् अन्तकस्य यमस्य वक्त्रम् आननं तदेव यन्त्रं तस्य जृम्भा व्यादानं तद्विडम्बि तदनुकारि विकटोदरं विकटं विषमम् उदरं मध्यं यस्य तत्तथोक्तम् अस्तु भवतु; अनवरतबुभुक्षितस्य प्रचुरतरभक्ष्यवस्तुलाभात् कृताट्टहासस्य यमस्य मुखं यथा व्यात्तं भवति तथायं मे चापः प्रचुरसैनिकसंहारव्यापारात् विपुलायतमध्यो भवत्वित्यर्थः। समग्रमेतत् सैन्यमण्डलं अचिरेणैव विनाशयिष्यामि इति भावः। अत्र व्याजिह्मया वल्गयितेत्यादिषु लुप्तोपमालङ्कारः। अचिरेणैतत् सैन्यमण्डलं विनाशयिष्यामीति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः। ग्रासप्रसक्तहसदन्तक इत्युपमालङ्कारेण च कालस्य जगद्भक्षणासम्भवेन तत्सम्बन्धोक्तेः अतिशयोक्तिरलङ्कारो व्यज्यते। शब्दालङ्कारास्तु छेकानुप्रासवृत्त्यनुप्रासादयः। अत्र विद्यमानोऽपि दुःश्रवत्वदोषो वक्तुः क्रुद्धत्वात् गुण एव भवति, तथाहि—'वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते। रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवे"दिति विश्वनाथवचनात्। अत्र वीरो रसः, ओजो गुणः, रीतिश्च गौडीति। वृत्तं वसन्ततिलकं नाम। वीररसद्योतकस्य श्लोकस्यास्य वसन्ततिलकाछन्दसा विरचनं न समीचीनमिति ध्येयम्।

(अं) यथोचितमिति। उचितम् अनतिक्रम्येति यथोचितं यथायोग्यम्, यद्वा निष्क्रमणरीत्यनुसारेणेत्यर्थः। सर्वे जनकप्रभृतयः चन्द्रकेतुसैनिकाश्च निष्क्रान्ताः रङ्गालयाद्बहिर्गताः।

(अ) इतीति। इतिशब्दः समाप्त्यर्थकः, "इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" अमरः। कौशल्याजनकयोगो नाम कौशल्याजनकयोर्योगः मिलनं यत्र स तथोक्तः नाम कौशल्याजनकयोग इति प्रसिद्धः चतुर्थः तुर्यः अङ्कः परिच्छेदः समाप्त इति शेषः।

पञ्चमोऽङ्कः ।

[नेपथ्ये] (क)

भोः भोः सैनिकाः ! जातं जातमवलम्बनमस्माकम् । (ख)

नन्वेष त्वरितसुमन्त्रनुद्यमान-

व्यावल्गत्प्रजवनवाजिना रथेन ।

उद्घातप्रचलितकोविदारकेतुः

श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः ॥ १ ॥

[१ । ननु एष चन्द्रकेतुः वः प्रधनं श्रुत्वा त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवनवाजिना रथेन उद्घातप्रचलितकोविदारकेतु उपैति । इत्यन्वयः ।]

(क) नेपथ्ये वेशरचनास्थाने ।

(ख) भो भो इति । अस्माकं सैनिकानाम् अवलम्बनम् आश्रयः सहाय इति यावत्, जातं लब्धम्, हर्षे द्विरुक्तिः । लवनिपीडिताः सैनिकाः चन्द्रकेतुं रक्षकं प्राप्य हर्ष-निर्भरमानसाः परस्परमूचुः नास्त्यधुनास्माकं किमपि भयं रक्षितासौ समागत इति ।

(१) तदवलम्बनमेवाह—नन्वेष इति । ननु भोः सैनिकाः एषः अयं चन्द्रकेतुः अस्माकं सेनापतिः लक्ष्मणतनयः चन्द्रकेतुनामधेयः महावीरः । युष्माकं प्रधनं युद्धं केनचिन्मुनि-बालकेन सह अश्वरक्षिणां युद्धं संवृत्तमिति श्रुत्वा आकर्ण्य त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवन-वाजिना त्वरितेन त्वरान्वितेन त्वरितं द्रुतं यथा स्यात् तथा वा, सुमन्त्रेण तन्नामप्रसिद्धेन रघुकुल-सारथिप्रवरेण नुद्यमानाः प्रेर्यमाणाः व्यावल्गन्तः शीघ्रं धावन्तः प्रजवनाः अतिवेगशालिनः वाजिनः हयाः यस्य तेन तादृशेन रथेन स्यन्दनेन करणेन । तादृशं रथमारूढ इत्यर्थः । उद्घातप्रचलितकोविदारकेतुः उद्घातेन निम्नोन्नतस्थाने रथस्य प्रतिघातेन प्रचलितः केतुः कम्पितः कोविदारकेतुः कोविदाराख्यकाष्ठनिर्मितध्वजयष्टी यस्य स तथोक्तः । रक्तकाञ्चन-काष्ठनिर्मित इति वा । "कोविदारमपि काञ्चनारकं मन्त्रिकां विपत्रिणं विपत्रका" इति हलायुधः । "कोविदारे चमरिकः कुद्दालो युगपत्रकः" इत्यमरः । तादृशचन्द्रकेतुः उपैति आगच्छति । अस्माकं युद्धवार्त्तां श्रुत्वा वैरिवधार्थं समरभूमिं सत्वरम् आगच्छतीत्यवलम्बन-मस्माकं सम्प्रति जातमित्यर्थः । अत्र प्रजवनत्वं प्रति व्यावल्गनस्य पदार्थस्य हेतुत्वात् पदार्थ-हेतुकं काव्यलिङ्गमलङ्कारः, तथा चन्द्रकेतुः कोविदारकेतुरित्यनयोरनुप्रासालङ्कारश्च इत्यनयो-

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसम्भ्रमश्चन्द्रकेतुः ।) (ग)

चन्द्र । आर्य्य सुमन्त्र ! पश्य ! पश्य ! (घ)

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रनवरतनिगुञ्जत्कोटिना कार्मुकेण ।
समरशिरसि चञ्चत्पञ्चचूडश्चमूनाम्
उपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ २ ॥

[२ । कलितकिञ्चित्कोपरज्यन्मुखश्रीः चञ्चत्पञ्चचूडः अयं कोऽपि वीरपोतः समरशिरसि अनवरतनिगुञ्जत्कोटिना कार्म्मुकेण चमूनाम् उपरि शरतुषारं किरति । इत्यन्वयः]

रयोर्व्यानपेक्षत्वात् संसृष्टिः । ये तु यमके प्रकरणनियमं समाद्रियन्ते तेषां मते प्रकरणाभावाद्यमकाभावात्, परं अन्त्यानुप्रास एव । भो भो इत्यादिचन्द्रकेतुपर्यन्तः सन्दर्भः विष्कम्भः वर्णोपक्षेपकचूलिका नाम । 'अन्तर्यवनिकासंस्थैः सूचनार्थस्य चूलिका' इति साहित्यदर्पणः । प्रहर्षिणी वृत्तम् ।

(ग) तत इति सुमन्त्रसारथिना सुमन्त्रः सारथिः सूतः यस्य तेन रथेन । धनुष्पाणिः धनुः कार्मुकं पाणौ हस्ते यस्य सः व्यधिकरणो बहुव्रीहिः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति सप्तम्यन्तस्य पराम्निपातः । साद्भुतहर्षसम्भ्रमः अत्यन्तनागरिकयोर्लवकुशयोः सुनिपुणधारियुद्धदर्शनादद्भुतम् आश्चर्यम् । तच्छरासनस्य लवस्य लाभात् हर्षः आनन्दातिशयः । तथा स्वसैन्यक्षयात् सम्भ्रमः त्वरा एभिः सह वर्त्तमानः स तथोक्तः । चन्द्रकेतुः प्रविशति रङ्गालयमिति शेषः

(घ) आर्य्येति । पितामहसारथित्वमाश्रित्य सुमन्त्रस्य गौरवादार्य्येति सम्बोधनं बोध्यम् । पश्य पश्येति हर्षे विस्मये च द्विरुक्तम् हर्षविस्मयकारणञ्च पूर्व्वमेव प्रोक्तम् । कस्यचित्पाश्च क्रियापदस्य वक्ष्यमाणश्लोकेन मन्तव्यम् ।

(२) किरतीति । कलितकिञ्चित्कोपरज्यन्मुखश्रीः कलितेन आरब्धेन सञ्जातेन किञ्चित्कोपेन ईषन्मन्युना रज्यन्ती लोहितायमाना मुखस्याननस्य श्रीः शोभा यस्य स तथोक्तः । कोपस्य रघुकुलवीरचाटाभिव्यक्ततया । वीरा हि मापरवीरवाटं सहन्ते । अत्र प्रत्यर्थिनामविच्छि-न्नत्वात् किञ्चित्कोप इत्युक्तम् । चञ्चत्पञ्चचूडः चञ्चन्त्यः अविरतरण कम्पनेन चञ्चला पञ्च चूडा यस्य सः, चञ्चितपञ्चशिखण्डकः, यद्वा चञ्चन्ती चञ्चला पचि शिखादि स्वस्य रूपम्) चूडा बन्धनरचितात्मीयं यस्य सः । कोऽपि च नी अयं

---

* अत्र 'सुविपुलबिम्ब' इत्यादि श्लोकः क्वचिन् दृश्यते ।

आश्चर्य्यम् ! आश्चर्य्यम् !! (ङ)

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थिटङ्कारघोर *
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ २ ॥

[२ । नव अप्रसिद्ध रघुवंशस्य प्ररोह इव मुनिजनशिशु. एक. सर्व्वत. सैन्यकाये दलितकरिकपोलग्रन्थिटङ्कारघोर॰ ज्वलितशरसहस्र. मे कौतुकं करोति । इत्यन्वयः ।]

घोरपीत घोरशिशु । समरशिरसि युद्धाग्रे अनवरतनिगुञ्जत्कोटिना अनवरतं सततं यथा, स्यात् तथा निगुञ्जन्त्यौ शब्दं कुर्व्वत्यौ कोटी अग्रभागौ यस्य तत्तथाक्तेन गुञ्जाकर्षणवदाटक्कोट्कृतेन कार्म्मुकेण धनुषा, करणे तृतीया । चमूनाम् उपरि अस्माकं सेनानां उपरि शरतुषा॰ शरतुषार इव मम । बाणवर्षं किरति क्षिपति । हिमबिन्दुवर्षणवदतिनैरन्तर्य्येण बाणान् वर्षतीत्यर्थः. । यथाहि शिलासम्पातो लोकान् विकलयति तथास्य बाणवर्षणम् इत्यर्थः । "अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिम"मित्यमरः । अत्र रज्यमुखयोः कार्म्मुकेण अयम् अश्वक इत्यतः. शरतुषारनिःसरणेन च तडित्वत् शक्रचापयुक्तस्य चलितायस्य मेघकिशोरस्य साम्यं व्यज्यते । अत्र इत्यनुप्रासश्लेषकानुप्रासाद्यालङ्कारा । शरतुषारमिति रूपकम् । मालिनी वृत्तम् ।

(ङ) आश्चर्य्यमिति । एकस्य बालकस्य बहुभिर्योद्धृभिः सह ईदृशं युद्धमिवासीत्याश्चर्य्य मित्यर्थः । विद्यन्मयाम विशयो ।

(२) किमहाह—मुनिजनेति । नव. नूतनः अप्रसिद्धः लोके अविख्यात अनुपचितावयवः रघुवंशस्य रघुकुलस्य प्ररोह. अङ्कुर इव अयं मुनिजनशिशुः एकः ऋषिकुमारः । प्रायेण रघुवंशीयबालकादन्ये तथा वीरत्वविकाशोऽपरेषां न सम्भवति इति अत्र इत्याकारस्य गूढार्थः । अपरे नाधेन च आत्मनर्य्यादा, कौतुकजननेन च वीरोत्साहः सूच्यते । एकः सहायहीनः सर्व्वतः सर्व्वस्मिन्, समन्यासनि । सैन्यकाये-सेनायां समवेताः सैन्याः तेषां कायः समूहः सैन्यसंघे समये सैनिकव्यूहे । विनोतेऽर्थेऽपि काय इति अन्यत्र भावः । दलितकरिकपोलग्रन्थिटङ्कारघोरं दलितानां मर्द्दितानां करिकपोलानां हस्तिगण्डस्थलानां ये ग्रन्थयः तान् [illegible] तेषां टङ्कारैः ट टमिति भयङ्करशब्दैः घोर भीमं यथा स्यात्तथा ज्वलितशरसहस्रः ज्वलितानि [illegible]

---

* टङ्कारघोर,-इति क्वचित् पाठः ।

सुमन्त्रः । आयुष्मन् ! (च)

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥ ४ ॥

[४ । अतिशयितसुरासुरप्रभावं तथैव तुल्यरूपं शिशुमवलोक्य कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि । इत्यन्वयः ।]

उद्दीपितानि प्रदीप्तानि बाणानां सहस्राणि यस्य स तथोक्तः, सुतीक्ष्णशरनिकरनिक्षेपेण मत्त वारणसङ्घश्रेणीन् विपाटयन् सकलसैन्यमध्यात् समुत्पोड्यन् अयं सुतनकुमारः मे मम कौतुकं कुतूहलं विस्मयमित्यर्थः । करोति जनयति । बालस्यास्य अद्भुतं रणकौशलं दृष्ट्वा अहमतीव विस्मितोऽस्मीत्यर्थः । बालकोऽप्ययं यत् एकाकी बहुसैनिकैः सह रणं निर्भयं लोकातिशायि शौर्य्यं प्रकाशयति, तदेव महदाश्चर्य्यमिति भावः । रघुवंशस्य प्ररोह इत्यत्र वंशस्य कुलं इव जातिविशेषस्य इति अर्थद्वयसमावेशः रूपकालङ्कारः। नव इव इत्याद्युत्प्रेक्षा लवस्य रघुकुलाङ्कुर तथा सम्भावनात् उत्प्रेक्षा च लवस्य रघुकुलाङ्कुरतया प्रकृतत्वेऽपि वस्तुसन्निधयाभावात् वाच्य लक्ष्मीवाहित इति । तथा कौतुकोत्पत्तिं प्रति दलितकरीत्यादि पदार्थस्य हेतुत्वात् तस्य च पदार्थ गतत्वेन काव्यलिङ्गम् । मालिनी वृत्तम् ।

(च) आयुष्मन् इति सूतस्य सुमन्त्रस्य रथिनं चन्द्रकेतुं प्रति आमन्त्रणपदम् । 'आयुष्मन् रथिनं सूत ।' इत्यालङ्कारिकवचनप्रामाण्यात् । सुमन्त्रः सारथिः । हे आयुष्मन् दीर्घजीविन् कुमार इति वक्ष्यमाणेनान्वयः ।

(४) अतीति । अतिशयितसुरासुरप्रभावं सुराश्चासुराश्चेति सुरासुराः देवासुराणां विरोधस्याशाश्वतिकत्वेन अहिनकुलमितिवत् न समाहारद्वन्द्वः । तेषां प्रभावः पराक्रमः । अतिशयितः अतिक्रान्तः सुरासुराणां प्रभावो येन स तादृशः तं देवासुराधिकपराक्रमं तथैव तुल्यरूपं समानाकारं रघुकुलबालकवत् आकारपराक्रमवन्तमित्यर्थः । शिशुं इमं बालकं अवलोक्य दृष्ट्वा । कुशिकसुतमखद्विषां कुशिकस्य सुतः विश्वामित्रः तस्य मखः यज्ञः द्विषन्ति ये ते तेषां विश्वामित्रयज्ञविघातकानां मारीचादिराक्षसानां प्रमाथे मर्दने । धृतधनुषं कार्मुकधरं रघुनन्दनं रामचन्द्रं स्मरामि । आकारेण पराक्रमेण च अयं बालकः रामः प्रतिभातीति भावः । पुरा किल विश्वामित्रः यज्ञद्रुहां रक्षसां वधाय राजानं दशरथं रामचन्द्रं याचित्वा नीतवान् इति रामायणी कथा । अत्र सदृशवस्तुदर्शनात् तथा सुरासुरप्रभावातिशयनाद् सम्बन्धेऽपि तत्सम्बन्धाभिरतिशयोक्तिः, तुल्यरूपमित्युपमा, एतयोरङ्गाङ्गिभावेन सङ्करः । वृत्तञ्च पुष्पिताग्रा नाम ।

अन्ध । इममत्येकमुद्दिश्य † भूयसामारम्भ इति हृदयमपत्रपते । (क)

अयं हि शिशुरेककः समरभारभूरिस्फुरत्-
करालकरकन्दलीकलितशस्त्रजालैर्बलैः ।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदवारिदैरावृतः ॥ ५ ॥

[५ । समरभारभूरिस्फुरत्करालकरकन्दलीकलितशस्त्रजालैः क्वणत्कनककिङ्किणीझणझणायितस्यन्दनैः अमन्दमददुर्दिनद्विरदवारिदैः बलैः अयं एककः शिशुः आवृतः हि । इत्यन्वयः ।]

(क) इममिति । न किन्तु इमं एकम् अभिमन्युम् उद्दिश्य अतुल्येन लक्ष्यीकृत्य भूयसां बहूनां अत्यल्पवीयसां सैनिकानां आरम्भ संग्रामोद्यमः इति हेतोः, मे मम हृदयं चित्तं अपत्रपते लज्जते, नायं धर्म्यसंग्रामः इति लज्जितोऽस्मि । वीरा हि तुल्यतया युध्यमाना एव वीरत्वगर्व्वमव्याहतं रक्षन्ति—न ते पुनरेकस्य विपक्षस्य विरुद्धतया बहूनां योधनं युक्तं मन्यन्ते तेन हि वीर्य्यापकर्षं इति लज्जा । अनेनात्यल्पवीयसां दौर्व्बल्यं शिशोरस्य च सर्व्वातिशायिवीर्य्यं व्यज्यते ।

(५) अयमिति । समरभारभूरिस्फुरत्करालकरकन्दलीकलितशस्त्रजालैः समरस्य युद्धस्य भारे अतिशये अतिभीषणसंग्रामव्यापारे । भूरि प्रचुरं यथा स्यात्तथा स्फुरन्ति दीप्यमानानि करालानि भयङ्कराणि, कराः कन्दल्य इव इति करकन्दल्यः ताभिः गुञ्जतुल्यैर्विशालैः करैः इत्यर्थः । कलितानि गृहीतानि शस्त्रजालानि प्रहरणसमूहाः येषां तैस्तथोक्तैः । तथा क्वणत्कनककिङ्किणीझणझणायितस्यन्दनैः क्वणन्त्यः ध्वनन्त्यः याः कनककिङ्किण्यः स्वर्णनिर्म्मितक्षुद्रघण्टिका "किङ्किणी क्षुद्रघण्टिका" इत्यमरः । ताभिः झणझणायिताः झण्झण् इत्याकारमव्यक्तशब्दं कुर्व्वन्तः स्यन्दना रथा येषां तैस्तथोक्तैः । तथा अमन्दमददुर्दिनद्विरदवारिदैः अमन्दानाम् अधिकानां मदानां दानजलानां दुर्दिनं येषां ते प्रभूतमदवारिवर्षिण इत्यर्थः । यद्यपि "मेघच्छन्नेऽह्नि दुर्द्दिन"मित्यमरोक्तिस्तथाप्यत्र लक्षणया वर्षणार्थो बोध्यः । तथा अमन्दमद एव दुर्दिनं येषां तादृशाः ये द्विरदाः द्वौ रदौ दन्तौ येषां ते द्विरदाः हस्तिनः वारिदाः मेघा इव येषां तैस्तथोक्तैः बलैः सैन्यैः अयं एव शिशुः एकाकी असहायः शिशुः बालकः आवृतः अवरुद्धः परिवेष्टित इति यावत् । एतच्च शिशोर्विनाशाय इत्थिपीठस्य-

---

† मम त्वेकमुद्दिश्य इति पाठान्तरम् ।

सुमन्त्रः। वत्स! एभिः समस्तैरपि किमस्य, किं पुनर्व्यस्तैः? (ञ)

चन्द्र। आर्य्य! त्वर्य्यताम् त्वर्य्यतामनेन हि महानाश्रितजन-प्रमाथोऽस्माकमारब्धः। (झ) तथाहि —(ञ)

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवः
तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥६॥

[६। अय वीर आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरम् अमन्ददुन्दुभिरवै आध्मातं ज्यानिर्घोषम् उज्जृम्भयन् वेल्लद्भैरवरुण्डमुण्डनिकरै भुव तृप्यत्कालकरालवक्त्रविघस व्याकीर्य्यमाणा इव विधत्ते। इत्यन्वय]

रथपदातिप्रभृतिसकलसाधनसम्पन्नानाम् अस्माक सैन्यानाम् अयमारम्भ अतीवानुचित इति भाव। अत्र लुप्तोपमालङ्कार। पृथ्वी वृत्तम्।

(ञ) वत्स। एभिरिति। वत्स इति स्निग्धकोमलसम्बोधनम्। समस्तैर्मिलितै-रपि एभि सैनिकै अस्य बालकस्य कि किं कर्त्तु शक्यते। पुन किम् व्यस्तै पृथक्भूतै। एकैकशः युद्धप्रवृत्तै, किम् अपितु किमप्यनिष्ट साधयितु न शक्यते इत्यर्थ। तथाहि मिलिता अपि बहुसैनिका यस्यानिष्टलेश विधातुमसमर्थास्ते एकैकश कथमनिष्टमाचरन्तु इति भाव। अयम् एक एवास्माकं समस्तसैन्यानां विनाशे समर्थ इति भाव।

(झ) आर्य्येति। त्वर्य्यता त्वरा क्रियता सत्वर रथ चाल्यतामित्यर्थ। हि यत अनेन बालकेन अस्माक महान् अत्यन्त आश्रितजनप्रमाथ आश्रिता जना तेषां अस्मदुपजीविजनानां अस्मत्सैन्यानामित्यर्थ। प्रमाथ विमर्द- मारणमिति यावत्, आरब्ध प्रक्रान्त। तेषां रक्षार्थमवश्यं मया तत्र गन्तव्यम्, अत सत्वर रथं चालयेति भाव।

(ञ) तथाहि तमाश्रितजनप्रमाथप्रकारमेवाह आगीरीत्यर्थ।

(६) आगुञ्जदिति। अयम वीर एव मुनिबालक। आगुञ्जद्गिरिकुञ्ज-कुञ्जरघटाविस्तीर्णकर्णज्वर आगुञ्जताम् अस्य ज्याकर्षणटङ्कारश्रवण [illegible] गिरि-कुञ्जकुञ्जराणां गिरे पर्वतस्य कुञ्जा, लतादिपिहितस्थानानि [illegible] करिणां घटाभि श्रेणीभि, विस्तीर्ण, समधिकम् उत्पादित, कर्णयो [illegible] ज्वरः पीडा येन च तथोक्तम्। अत्र धनुष्टङ्कारमात्रश्रवणेन अयमतिकर्कश महता पार्वत्यगजानां पीड़-

सुमन्त्र। [स्वगतम्।] कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसम्प्रहारमनुजानीयाम्। [विचिन्त्य।] अथवा इक्ष्वाकुवृद्धाः खलु वयं, प्रत्युपस्थिते * च का गतिः! (ट)

कारेण कर्णौ बधिरौ भवतः इति भाव। यद्वा आगुञ्जदिति ... [illegible]

(ट) कथमिति। ईदृशेन अतिप्रबलपराक्रमिणैतेन लवेन सह चन्द्रकेतोः द्वन्द्वसम्प्रहारं द्वन्द्वस्य उभयोः सम्प्रहारं युद्धम् एकस्यैकेन सह प्रवृत्तमित्यर्थः। कथं केन प्रकारेण अनुजानीयाम् अनुमन्येय। सकलसैन्यप्रमाथिनानेन सह द्वन्द्वयुद्धे यदि विपत्तिः स्यादिति भावः। एतेन लवेन सह युद्धे सति चन्द्रकेतोरेव पराजयसम्भावना दृढं सूच्यते। विचिन्त्य विमृश्य। अथवा पक्षान्तरे वयम् इक्ष्वाकुवृद्धाः खलु इक्ष्वाकूणां कुले वृद्धाः वृद्धभावं गताः, वयम् इक्ष्वाकुवंशीयदशरथस्यालये सारथ्येन जीवनम् अतिवाहितवन्तः। अत एवां युद्धरीतेः सर्वथाभिज्ञा इत्यर्थः। प्रत्युपस्थिते च द्वन्द्वसम्प्रहारे समापतिते च सति

---

* इक्ष्वाकुकुलवृद्धाः......प्रत्युपस्थिते रणे च......इति पाठान्तरम्।

चन्द्र। [सविस्मयलज्जासम्भ्रमम्।] धिक् प्रतिनिवृत्तानि सर्वतः सैन्यानि मम। (ठ)

सुमन्त्रः। [रथवेगमभिनीय।] आयुष्मन्! एष वाग्विषयीभूतस्ते स वीरः। (ड)

चन्द्र। [विस्मृतिमभिनीय।] आर्य्य! किमस्य नामधेयमाख्यातमाख्यायकैः। (ढ)

द्वन्द्वयुद्धार्थिनि का गतिः क उपायः, गत्यन्तराभावात् अस्य द्वन्द्वयुद्धे मयानुमतिर्दातव्येत्यर्थः। क्षत्रियाणां संग्राममनियमं जानता मया कथं द्वन्द्वयुद्धार्थी कुमारः धर्म्माद्दाचारमार्गान्निवार्य्यते, तथाविधत्वं तत् भवत्विति भावः। एतेन इक्ष्वाकुवंशीयानां सति युद्धार्थिनि प्रतिपक्षे युद्धापराङ्मुखता लज्यते, स एव च धर्म्मः क्षत्रियाणाम्।

(ठ) सविस्मयलज्जासम्भ्रममिति। लवस्याद्भुतयुद्धदर्शनाद्विस्मय, स्वपक्षीयाणामेकेन बालकेन सह युद्धे पराभवात् लज्जा, तेषां साहाय्याय सम्भ्रम. त्वरा, तैः सह वर्त्तमानं यथा स्यात् तथा, चन्द्रकेतुराहेति शेषः। सर्व्वत सर्व्वतोभावेन सर्व्वासु दिक्षु वा प्रतिनिवृत्तानि पराङ्मुखीभूतानि मम सैन्यानि धिक् निन्दामि इत्यर्थं। अथवा सर्वत सर्वस्मात् प्रदेशादित्यर्थः। ये मम आसन् तस्मात्। एकेनैवार्भकेणास्मत्सैनिका. पराजिताः इत्यत: कापुरुषा नितरं शोच्याः क्षत्रियाणां युद्धपराङ्मुखता निन्दनीयेति भाव.।

(ड) रथवेगमिति। रथस्य स्यन्दनस्य वेग जवम् अभिनीय नाट्येन दर्शयित्वा सवेगं रथं चालयित्वेत्यर्थः। आयुष्मन् हे दीर्घायुश्चन्द्रकेतो। स वीरः अस्माकं सैन्यानां पराजेता असौ शूरः ते तव वाग्विषयीभूतः वाचां गोचरीभूत· जात सवेगं रथचालनात् निकटवर्त्तितया संलापनीयः संवृत्तः। पूर्वं दूरदेशस्थायितया परम्परालापनमात्रगम्य आसीदिदानीं तत्समीपवर्त्तित्वेन यथेष्टं सम्भाषितुं शक्नोषीति भावः। अथवा ते तव वाग्विषयीभूतः—त्वं यमाश्रित्य इतःपूर्वं मया सह वाचमरचयः, स वीर. अतिसमीपे दृश्यत इत्यर्थः। अत इदानीं यथेष्टं सम्भाषणादिकं कुरुष्वेति फलितम्।

(ढ) विस्मृतिमिति। विस्मृतिं विस्मरणम् अभिनीय विस्मयसूचकावयवभावं दर्शयित्वा आहेति शेषः। बलस्य वीर्य्योत्कर्षेण इन्द्रियाणां विस्मयस्तिमि[illegible]स्मरणमिति शेषम्। आर्य्य हे मान्य सारथे! आख्यायकैः दूतैः युद्धसन्देशव[illegible]।अस्य किं नामधेयं किं नाम आख्यातं कथितम्। तत् यदि भवान् स्मरति तदा [illegible]तन्नामधेयेन सम्भाषणादिकं करवाणीति भावः।

सुमन्त्रः। वत्स ! लव इति। (ण)

चन्द्र।

भो भो लव महाबाहो किमेभिस्तव सैनिकैः।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥ ७ ॥

[७। भो भो महाबाहो लव। तव एभिः सैनिकैः किम् ? एषः अहम्, मामेव एहि, तेजसि तेजः शाम्यतु। इत्यन्वयः।]

सुमन्त्रः। कुमार ! पश्य पश्य—(त)
व्यपवर्त्तत एष बालवीरः पृतनानिर्मथनात् त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः ॥ ८ ॥

[८। एषः बालवीरः त्वया उपहूतः (सन्) स्तनयित्नुरवात् इभावलीनां अवमर्दात् दृप्तसिंहशावः इव पृतनानिर्मथनात् व्यपवर्त्तते। इत्यन्वयः।]

(ण) वत्सेति। हे वत्स चन्द्रकेतो। लव इति लव इत्याकारं लव इत्येतद्वर्णात्मकवर्णं ममपटिरेव अस्य नाम, आख्यातमाख्यायकैरिति शेषः।

(७) भो भो इति। हे महाबाहो। महान्तौ बाहू भुजौ यस्य तस्य सम्बोधनम्। महावीरलक्षणवत्तया आजानुलम्बिभुजेति यावत्। हे महाबाहो लव। तव एभिः सैनिकैः सेनासमवायैः किं किम्प्रयोजनं तवासदृशतया अकिञ्चित्करैरेतैर्युद्धं न शोभते इति भावः। एषः अहम् अयमहमस्मि तव योग्यः प्रतियोद्धा इत्यर्थः। मामेव एहि युद्धार्थं मम समीपमेवागच्छ। नत्वेतैरयोग्यैः सैन्यैः सह त्वया योद्धव्यमित्यर्थः। तेन किमत आह—तेज इति। तेजः तव भुजवीर्यप्रभावः तेजसि मम पराक्रमे शाम्यतु शान्तिं गच्छतु। निर्व्वाणं यातु। एतान् वराकान् सैन्यलोकान् पीडयन् नैतत् सर्वं यशो वक्तुमर्हसीति भावः। 'महान्महत्येव करोति विक्रम'मिति फलितम्। सावष्टम्भमिदं वचनम्। अत्र तेजःशब्दस्य श्लिष्टतया वक्त्रर्थत्वेन पराक्रमवह्न्योर्भेदे अभेदाध्यवसायमूलातिशयोक्तिरलङ्कारः। सैनिकसमवायानां निष्प्रयोजनत्वं प्रति महाबाहुपदार्थस्य हेतुत्वात् तस्य च पदार्थगतत्वेन काव्यलिङ्गमपि। पथ्यावक्त्रं वृत्तम्।

(त) कुमारेति। भो कुमार चन्द्रकेतो ! पश्य पश्य विलोकये चित्तं, सम्भ्रमार्थेनान्वयः।

(८) व्यपेति। एष अयं बालवीरः बालश्चासौ वीरश्चेति सः शिशुः शूरः त्वया उपहूतः "भो भो लव" इत्युक्त्वापि युद्धार्थमाकारितः सन् दृप्तसिंहशावः दर्पितसिंहशिशुः इव स्तनयित्नुरवात् मेघगर्ज्जनात्, अम्बुदोऽपि स्तनयित्नुः। मेघध्वनिश्रवणानन्तरमित्यर्थः। इभा-

[ततः प्रविशति त्वरितोद्धतक्रमो लवः ।] (ब)

लवः । साधु, राजपुत्र ! साधु, सत्यमैक्ष्वाकः खल्वसि ; तदयं परागत एवास्मि । (भ)

[नेपथ्ये महान् कलकलः ।] (म)

लवः । [सावेगं परावृत्य ।] कथमिदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टभ्य निघ्नन्ति मां चमूपतयः ! धिग् आत्मानम् ! (य)

मदोन्मत्तानां हस्तिनाम् आवलयः श्रेणयः तासाम् अवमर्दात् मर्दनात् निर्मथनादिति यावत्, हस्तिनां निर्मथनात् पूजनानां सैन्यानां निर्मथन तस्मात् सैन्यसमूहविनाशात् व्यपवर्त्तते निवृत्त्यागच्छतीत्यर्थः । यथा बलगर्वितः सिंहशावकः मेघगर्जितं श्रुत्वा गजेभ्य समधिकबलमपरं प्रतिपक्षं मन्यमानः तमाक्रमितुं करियूथमर्दनं परित्यज्य तदभिमुखं धावति, तथायमपि बलदृप्तः कुमारः त्वत्कृतसावलेपाह्वानं श्रुत्वा क्षुद्रसैन्यध्वंसकराद्व्यापारात् निवृत्य तवाभिमुख्यं आगच्छतीत्युपमार्थः । इति त्वं पश्य पश्येति सम्बन्धः । "अनुहु ककने घनध्वनिं न हि गोमायुरुतानि केसरी" इति स्मरणम् । अत्र इमसिंहशावकाभ्यादेः बालवीरादौ प्रत्ययात् उपमालङ्कार । मालभारिणी वृत्तम् । औपच्छन्दसिकमित्यस्य नामान्तरम् ।

(ब) तत इति । त्वरितोद्धतक्रमः त्वरा जाताऽस्य इति त्वरितः सत्वरः उद्धतः ऊर्द्धः क्रमः पादविक्षेपः यस्य स तथोक्तः लवः प्रविशति रङ्गालयमिति शेषः । त्वरा वीररसोन्मादात् उद्धतक्रमत्व प्रतिपक्षस्यावष्टम्भवाक्श्रवणात् तुल्यप्रतिपक्षलाभपरितोषाच्च इति भावः ।

(भ) साध्विति । हे राजपुत्र ! साधु त्वं युक्तं सममुचितमुक्तवान् इत्यर्थः । एवं उचितम् । तुल्यबलवीरलाभादानन्दमेतदुक्तमिति बोध्यम् । सत्यं तथ्यं साधु निश्चितम्, अतिबलवतोऽपि मे न्यूनताभावादिति भावः, ऐक्ष्वाकः इक्ष्वाकोरपत्यं पुमान् इति ऐक्ष्वाकः इक्ष्वाकुवंशोत्पन्नः असि भवसि ; इक्ष्वाकुवंशीयानुरूपमेव त्वं व्यवहरसीति भावः । वचनात् अपाङ्क्तमितपराक्रमपूर्वपुरुषनामादिवत्त्वात् । अयम् अस्मि पयोऽहम् अग्रतोऽवस्थितम् । परागतः एव समीपमुपस्थित एव । अधुना मया सह यथाशक्ति योद्धुमर्हसीति स्वोत्साहसूचको व्यवहारः ।

(म) नेपथ्ये इति । महान् भूयान् कलकलः अव्यक्तबहुध्वनिः सेना नाहवः भवतीति शेषः ।

(य) आवेगमिति । आवेगेन सहितं सावेगं क्षोभाद्यं परावृत्य भूयः

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे ।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ८ ॥

[८। समन्तात् उत्सर्पन् अयं घनतुमुलसेनाकलकलः प्रलयपवनास्फालितः पयोराशेः ओघः इव मे शैलाघातक्षुभितवडवावक्त्रहुतभुक्प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु । इत्यन्वयः ।]

[इति परिक्रामति ।] (प)

सैन्याभिमुखीभूयेत्यर्थः । भग्ना मया निर्जिता युद्धात् पराङ्मुखा अपीत्यर्थः । प्रतिनिवृत्य पुनर्मम सम्मुखीभूय युद्धाभिसारिणः पुनः संग्रामाभिलाषिणः सन्तः चमूपतयः सेनापतयः मां पर्यवष्टभ्य समन्तात् वेष्टयित्वा लक्ष्यीकृत्य इति वा, यद्वा सामर्थ्यमूरीकृत्य । निघ्नन्ति प्रहरन्ति । अतः कान्यान् नीचान् एतान् धिक् निन्दामि । मया पराजिता अपि एते यत् निर्लज्जाः पुनर्मामाक्रमितुमुद्यताः तदेतान् नीचान् चमूपतीन् धिक् । मानापमानज्ञानाभावादेषां गर्हणीयत्वमिति ।

(८) अयमिति । समन्तात् सर्वतः सर्वासु दिक्षु उत्सर्पन् उद्गच्छन् सर्वा दिशो व्याप्नुवन् इत्यर्थः । अयम् एष श्रवणगोचर घनतुमुलसेनाकलकलः घनः निबिडः तुमुलः सङ्कुलः भीषणः इत्यर्थः । सेनाकलकलः सैन्यानां कोलाहलः । प्रलयपवनास्फालितः प्रलयस्य युगावसानस्य पवनेन वायुना आस्फालितः उद्वेलितः पयोराशेः सागरस्य ओघः जलप्रवाहः इव मे मम शैलाघातक्षुभितवडवावक्त्रहुतभुक्प्रचण्डक्रोधार्चिर्निचय-कवलत्वं शैलानां समुद्रमध्यलीनानां पर्वतानां आघातेन सङ्घर्षेण मन्दराद्रिसङ्घट्टनेनेति वा क्षुभितः आलोडितः सन्दीपित इति यावत्, यः वडवावक्त्रहुतभुक् अश्वतरीमुखविनि-र्गतवह्निः वाडवानल इति यावत् स इव प्रचण्डः उग्रः यः क्रोधः कोपः स एवार्चिः ज्वाला अग्निशिखा इत्यर्थः । 'ज्वालाभासौ नपुंस्यर्चि'रित्यमरः । तस्य निचयः समूहः तस्य यद्वा क्रोधार्चिर्निचयस्य कोपाग्निशिखासमूहस्य । कवलत्वं ग्रासत्वं भक्ष्यत्वमिति यावत्, व्रजतु यातु । यथा महाप्रलयकालीनपवनोद्वेलितः समुद्रप्रवाहः तदन्तर्गतपर्वताघातेन सन्दीपितवाडवाग्निशिखाभिः सहसैव शोषं नीयते, तथा भूयानपि अयं सैन्यकोलाहलः मम कोपेन अचिरादेव शमं नेष्यते इत्युपमार्थः । अत्रोपमालङ्कारः । एतेन च सर्वानेव सर्वाभिसारान् सैनिकान् विनाशयामीति वक्तुं शक्यते, इत्यवतारेण वस्तुध्वनिः । 'कृत्वा

चन्द्र । भो भोः कुमार ! (फ)

अत्यद्भुतादपि गुणातिशयात् प्रियो मे
तस्मात् सखा त्वमसि यन्मम तत्तवैव ।
तत् किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

[१० । (भो भो. कुमार !) त्व अत्यद्भुतादपि गुणातिशयात् मे प्रिय सखा असि, तस्मात् यत् मम तत् तव एव, तत कि निजे परिजने कदन करोषि ? ननु एष चन्द्रकेतु तव दर्पनिकष । इत्यन्वय ।

निव भीर्याख्य: मुनि पश्चौ जव निवेश्य कुमन मनस्य । तस्माज्जायमानो वह्नि जग दग्धुमारेभे, तत भगवान् ब्रह्मा वडवामुख तस्य स्थान समुद्रजलभक्षकत्व च कल्पयामास इति पौराणिकी कथा ज्ञातव्या । शिखरिणी वृत्तम् ।

(प) इति परिक्रामति । इति एवमुक्त्वा परिक्रामति सैन्यकलकलोपशमार्थं सत्वर चावतीत्यर्थ: ।

(फ) भो भो. कुमार ! हे लव इति परेणान्वय ।

(१०) अत्यद्भुतादिति । त्वम् अद्भुतात् अतिशयाश्चर्यजनकात् एकस्यापि तेऽस्मत्-सैन्यविमर्दादिभि. विस्मयकरादित्यर्थ. । अपि, अदृष्टाश्रुतपूर्व्वादिति वा । तथाहि यद्यपि वीरा: परेषां वीर्यं न सहन्ते पर परान् वीर्य्यावदातान् प्रतिपक्षतया लघूकर्त्तु यतन्ते तथापि त्वम् गुणैरद्य मुग्ध इति ब्रवीमि यस्त्व मे प्रिय सखेति भाव । गुणातिशयात् गुणानां वीर्यौदार्यादीनाम् अतिशयादाधिक्यात् हेतो । त्व मे मम प्रिय बहुश: प्रीतिकर सखा समप्राणो बन्धु: असि । "अत्यागसहनो बन्धु सदैवानुमत सुहृत् । एकक्रियो भवेन्मित्र समप्राण: सखा मत." इति । तस्मात् सखित्वाद्धेतो यत् मम तत् तवैव, मदीय यत्तत् त्वदीयमेवेत्यर्थ: । आवयो समप्राणत्वेनाभिन्नत्वादिति भाव । तत् तस्मात् तव मम चाभिन्न त्वादित्यर्थ: । निजे आत्मीये परिजने पौरवर्गे अनुचरगणे इति यावत् । कदनं कि कथं कदर्थं विमर्दन हननमिति यावत्, करोषि कथं स्वान् परिजनान् हंसीत्यर्थ । स्वानुचर-विमर्दनं नितान्तमनुचितमिति भाव । निर्घ्नापनविनाशनकदनव्यापादनानि तुल्यानीति-त्रिकाण्डशेष: । ननु भो: एष अयं चन्द्रकेतु, अहमित्यर्थं । तव दर्पनिकष [illegible]भि-मानस्य निकष: निकषोपल: परीक्षास्थानमित्यर्थ । यथा स्वर्ण शुद्धत्वाय [illegible]र्थं.

लव । [सहर्षसम्भ्रमं परावृत्य] अहो महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्तनकुलकुमारस्य । तत् किमेभिः एनमेव तावत् सम्भावयामि । (ब)

[पुनर्नेपथ्ये कलकलः ।] (भ)

लव.। [सक्रोधनिर्वेदम्।] आः कदर्थितोऽहमेभिः वीरसंवादविघ्नकारिभिः पापैः । [तदभिमुखं परिक्रामति।] (म)

सफलो निष्फलो वेति प्रतीयताम् । मय्य एवाऽद्य चन्द्रकेतु तव गर्व्वं खर्व्वीकरोमीति भाव । अत्र चन्द्रकेतौ निकषत्वारोपस्य प्रकृतदर्पपरीक्षोपयोगित्वात् परिणामालङ्कार । सच्चित्वस्य पदार्थस्य विशेषणतया यन्मन्त्यादिवाक्यार्थहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमपि वदन्ति । वसन्ततिलका वृत्तम् ।

(ब) सहर्षसम्भ्रममिति । तुल्यबलवीरलाभेन हर्ष, युद्धार्थं सम्भ्रम त्वरा, ताभ्यां सहेति सहर्षसम्भ्रम यथा तथा परावृत्य चन्द्रकेतौ सम्मुख गत्वा आहेति शेष । अहो चित्र महानुभावस्य महान् अतिशयित अनुभाव प्रभाव यस्य स तस्य विकर्तनकुलकुमारस्य विकर्तन सूर्य्य तस्य कुलं वंश इति विकर्तनकुल सूर्य्यवंश तत्सम्भूत कुमार बालक तस्य सूर्य्यवंशोत्पन्नबालकस्य चन्द्रकेतोरित्यर्थः । प्रसन्नकर्कशा प्रसन्ना आदौ कर्कशा चेति विशेषणसमास । वेदार्द्रा पश्चात् चेत्यर्थं । सच्चित्वकरणात् प्रसादमनोहरा वीरत्वप्रकाशात् कठोरा चेति बोध्यम् । वीरवचनप्रयुक्ति वीरस्य शूरस्य वचनानि वाक्यानि तेषां प्रयुक्ति प्रयोग वीरजनोपयुक्तवाक्यकथनमित्यर्थं । एकस्मिन्नेव वाक्ये प्रसन्नता कार्कश्य चेत्याश्चर्य्यम् । तत् तस्मात् एभि एतै असहायै अतितुच्छे सैन्यै किं किं प्रयोजनम्, एषां पराजयेन नास्ति मे किमपि पौरुषमित्यर्थं । एनं वीराभिमानिनं चन्द्रकेतुमेव महान्तं सैन्यमित्येवार्थ । सम्भावयामि सम्मानयामि रणकर्म्मणा इति शेष । शूर शूरान् शौर्य्येणैव सम्मानयेदिति भाव । तावदिति वाक्यालङ्कारे ।

(भ) पुनरिति । पुन भूय कलकल कोलाहल श्रुत सैन्यानामिति शेष ।

(म) सक्रोधेति । सक्रोधनिर्वेदं क्रोधेन भग्नानामपि सैनिकानां पुन पुन आगमनात् उत्पन्नेन कोपेन निर्वेदेन खेदा अनेते नानाविधतुच्छनीति त्वावलापनया सह वर्त्तमानं यथा तथा आहेति शेष । आ इति क्रोधसूचकमव्ययम् 'आस्तु स्यात् कोपपीडयो'रित्यमर: । वीरसंवादविघ्नकारिभि वीरेण शूरेण चन्द्रकेतुना सह य: संवाद: युद्धालाप तस्य विघ्न' प्रतिबन्धं कुर्व्वन्ति ये तै तथोक्तै. अतएव वीराधिक्षेपकारणात् पापै'

चन्द्र। आर्य्य ! दृश्यतामेतद्द्रष्टव्यम्। (ग)

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा।
द्वेधासमुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम्॥ ११॥

[११। कौतुकवता दर्पेण मयि बद्धलक्ष्यः बलैः पश्चात् अनुसृतः उदीर्णधन्वा अयम् द्वेधासमुद्धतमरुत्तरलस्य माघवतचापधरस्य मेघस्य लक्ष्मीं धत्ते इत्यन्वयः]

कार्योत्सवेन वीरैः सहालापतुमिति भावः ... एते पापः पामरः सैनिकः। कदर्थित कुत्सित अर्थ क्षुद्रसैनिकैः सह युद्धरूपा विषयो यस्य स कदर्थः कदर्थं कृतः इति व्युत्पत्त्या कदर्थशब्दात् कारयति क्तः। विडम्बितः अवशोषितः शेषः। तदभिमुखं तथा कोलाहलकारिणो सैन्यानाम् अभिमुखः सम्मुखः परिक्रामति धावति। न खलु पुनः पुनरेवा क्षुद्राणाम् आक्रमणं सोढुं शक्नोमि सर्व्वानेवैतान् समूलमुन्मूलयामीति भावः।

(ग) आर्य्येति। भो आर्य्य पूज्य सारथे। एतत् इदं द्रष्टव्यं दर्शनयोग्य वस्तु इत्यसौ आश्चर्यं विस्मयनीयमावरक दृश्यताम् भवतेति शेषः॥

(११) द्रष्टव्यमेव विवृणोति—दर्पेणेति कौतुकवता चन्द्रकेतोः सामर्थ्यदर्शनकुतूहलयुक्तेन कौतुकस्य वीरत्वमिति विज्ञातु औत्सुक्यान्वितेनत्यर्थः। दर्पेण गर्वेण हेतुना मयि चन्द्रकेतौ बद्धलक्ष्यः विहितदृष्टिः मदभिमुखं प्रधावितः इत्यर्थः, तथा पश्चात् पृष्ठदेशे बलैः मदीयैः सैन्यैः अनुसृतः अनुधावितः, उदीर्णधन्वा उदीर्णं धनुर्येन स उत्तोलितकार्मुकः। अयं लवः। द्वेधासमुद्धतमरुत्तरलस्य द्वेधा विप्रकारेणाद्धतेन प्रतिकूलयादिशा पर्य्यायेण पर्य्याकुलं चलता इति यावत्, मरुता वायुना तरलस्य चालितस्य माघवतचापधरस्य मघवतः इन्द्रस्य इदमिति माघवतं तच्च तत् चापं धनुरिति माघवतचापं तद्धरतीति तथोक्तस्य मेघस्य वारिदस्य पयोधरस्य इन्द्रधनुर्लाञ्छितस्य मेघस्येत्यर्थः। लक्ष्मीं शोभां साहश्यमिति यावत्, धत्ते धारयति। पूर्वदिग्वायुना पश्चिमदिशि प्रेरितः पश्चिमवायुना पूर्वदिशि चालितश्च इन्द्रधनुःशोभितः मेघः यथा शोभते तथायं नवनीरदश्यामः उन्नमितचापः बालकः लवः ... पिंग सम्मुखवर्त्तिनं मां प्रति पश्चात् आगच्छत् पृष्ठतः आगामिभिः सैनिकैः ... यावत् च तथा शोभते इति तात्पर्यं। अत्रोपमालङ्कारः विशयायाः ... । दर्पकौतुकयोर्वीररसाङ्गभावात् ... दर्पेण कौतुकवत्त्वाभावात् शेषम्। अत्र

सुमन्त्र । कुमार एवैनं द्रष्टुमपि जानाति, वयन्तु केवलं परवन्तो विस्मयेन । (र)

चन्द्र । भो भो राजानः ! (ल)

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन् कवचनिचितैर्मध्यवर्मोत्तरीये ।
कालज्येष्ठैरभिनववयःकाम्यकाये * भवद्भि-
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग् धिगस्मान् ॥१२॥

[१२ । सङ्ख्यातीतैः द्विरदतुरगस्यन्दनस्थैः कवचनिचितैः कालज्येष्ठैः भवद्भिः एकस्मिन् मैथ्यवर्मोत्तरीये पदातौ अभिनववयःकाम्यकाये अत्र (मयि) युधि यः अयं परिकरः बद्धः तेन वः धिक् (तथा) अस्मान् धिक । इत्यन्वयः ।]

अन्यस्य लक्ष्मीं कथमन्यो धत्ते इति वस्तुसम्बन्धोऽसम्भवन् तल्लक्ष्मीमिव लक्ष्मीमिति सादृश्यमाक्षिपतीति निदर्शनालङ्कारः । मेघ माघेति छेकानुप्रासः इत्यनयोः संसृष्टिः । वसन्ततिलका वृत्तम् ।

(र) कुमार इति । कुमारः भवान् एव नतु मादृशोऽन्यः इत्येवकारार्थः । एनं कुमारं अत्र द्रष्टुं जानाति दृशा याथार्थ्येन ज्ञातुमर्हति अपि, इत्यहं सम्भावयामीत्यर्थः । वीर एव वीरस्य चरितं ज्ञातुमर्हति नतु दुर्बलसारथिरिति भावः । तु किन्तु वयम् अन्ये मित्यर्थः, वाल्याद्यात्मिकभावबाहुल्येन वस्तुतः । विस्मयेन अस्याश्चर्यकार्यावलोकनादद्भुतरसेन परवन्तः पराधीनाः जाता इति शेषः । चन्द्रकेतुरस्य सामर्थ्यादिकं परिमातुं जानाति, अहं केवलम् अलौकिककार्यमालोक्य किंकर्तव्यविमूढः देवोऽयं दानवोऽयं वेति निर्णेतुमपि न शक्नोमीति भावः ।

(ल) भो भो राजान इति । अश्वरक्षणाय चन्द्रकेतुसहयायिनो राज्ञः सम्बोधनमिदम् । राजान इत्यनेन तेषामुत्कर्षकरं सम्बोधनञ्च वक्ष्यमाणक्षोभार्थे उपयुज्यते ।

(१२) संख्यातीतैरित्यादि । संख्याम् अतीताः इति संख्यातीताः 'द्वितीयाश्रितातीत'त्यादिना समासः । तैः असंख्यैः संख्यातुमशक्यैरिति यावत् । द्विरदतुरगस्यन्दनस्थैः द्वौ रदौ दन्तौ येषां ते द्विरदा हस्तिनः तुरगाः अश्वाः, तुरोपपदात् गमेर्डः इति डः । स्यन्दना रथाश्च अत्र द्विरदतुरगस्यन्दनं सेनाङ्गत्वात् समाहारैकवचनम् । तस्मिन् तिष्ठन्तीति तथोक्तैः । तथा कवचनिचितैः, कवचेन वर्मणा निचिताः आच्छादिताः तैः आवरणावच्छिन्नैः कवचरचितकायैरित्यर्थः । कालज्येष्ठैः कालेन वयसा वयस्कैरिति यावत्, ज्येष्ठाः वयसाधिकैः भवद्भिः । एकस्मिन् अद्वितीये पदा-

* अपरवयः इति पाठान्तरम् ।

अथ । [सक्षोभम् ।] कथमनुकम्पते नाम । [विचिन्त्य] भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि । [इति ध्यानं नाटयति ।] (च)

चारी इति यावत्, पदातौ पादचारिणि । पद्भ्यामतति इति पदाति पादशब्दोपपदात् अतते इञ् पौषादित्वात् पादस्य पदादेशश्च । तथा मेध्यचर्मोत्तरीये मेध्य पवित्र "पूतं पवित्रं मेध्य मि"त्यमरः । चर्म अजिनम् उत्तरीयं प्रावारः यस्य स तथोक्तस्तस्मिन् पक्षान्तरे कोमलाजिन प्रावाराच्छादितगात्रे अर्थात् चर्मधारिणि इत्यर्थः । अभिनवस्य काम्यकाये अभिनवेन बालकत्वादति-नव्येन वयसा यौवनकालीन काम्य कमनीय अतिशयकोमल काय शरीर यस्य तस्मिन् बालकत्वादनतिकठिनदेहे बाणाघातासहे इत्यर्थः अत्र अस्मिन् कुमारे लवे युधि युद्धविषये वः युष्माकं सर्वं परिकर उद्यम यत्न क्रम इत्यर्थः । तेन हेतुना व युष्मान् धिक् अनायुधधारिणं प्रति युद्धप्रवृत्तत्वादयुक्तकारितया, तज्जगुप्सनीया यूयमित्यर्थः । गुप्ताः तेना तदहमपि निन्दनीय इत्याशीत्यर्थः । चर्मस्फोटानां दृढबन्धावनद्धदेहानां प्रौढत्वमापन्नानां दृढाङ्गानां हस्त्यश्वरथारूढानां युष्माकमस्मिन् अतिकोमलाङ्गे बालके युद्धाय एकत्र समागमनं बहुवैरतया युद्धोद्यम अतीव निन्दनीय युष्माकमवश्यमपयशोऽस्तीति सरलार्थः । अत्र केनोरात्मनिन्दा प्रति अभ्यपिक्षितनिन्दायाः हेतुत्वकथनात् काव्यार्थहेतुकं काव्यलिङ्गम् । अत्यातोतैरित्यादीनां रामविशेषणानां साभिप्रायत्व तथा परिकरं वदन्ति । उभयपक्षयोः अतिवैषम्यात् नाय युद्धसमुद्यम शोभते इति विषमालङ्कारो व्यक्त ।

(च) सक्षोभमिति । क्षोभेण चन्द्रकेतोर्वचनश्रवणात् चित्तचाञ्चल्येन सह वर्तत इति सक्षोभम् आहेति शेष । कथं केन हेतुना अनुकम्पते त्रायते नाम नामेति क्रोधेऽव्ययम् । "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः । अयम् च मत्समपि मां प्रति करुणामय इवाचरति इत्यर्थः । मम दौर्बल्यमाशङ्क्य परिजिहीर्षतीत्यर्थः । नाहम् अनया सदयया वाचा तुष्यामि परं जिहेमीति भाव । विचिन्त्य किञ्चित् विमृश्य आह भवतु अस्तु । मयि सदयो निर्दयो वायं भवतु नैतेन मे किमप्यायाति याति वेति भाव । कालहरणप्रतिषेधाय कालस्य समयस्य हरणं क्षेप विलम्बनं तस्य प्रतिषेधाय निवारणाय सुदूरैरपि सैन्यैः सह युद्धेन यत् तथा कालकर्तनं तस्य निरासार्थमित्यर्थः । जृम्भकास्त्रेण जृम्भकाख्यानां अस्त्राणां प्रयोगेणेत्यर्थः । तावत् सैन्यानि एतानि हस्त्यश्वादिबलसमन्वितानि बलानि संस्तम्भयामि मोहयामि निश्चेष्टानि करोमि इति यावत् । जृम्भकास्त्रप्रभावैः तान् योधान् निद्राभिभूतानिव व्यापारात् निःस्पन्दान् करोमीत्यर्थः । तस्मिन् सैन्यावस्थापने न पुनर्भविष्यतो इति एव विचिन्त्य । ध्यानं जृम्भकास्त्राणां प्रयोगमन्त्रचिन्तनं नाटयति अभिनय प्रदर्श-यतीत्यर्थः ।

सुमन्त्रः। तत् किमकस्मात् अस्मत्सैन्यघोषः प्रशाम्यति ? (अ)

लवः। पश्याम्येनमधुना प्रगल्भम्। (ब)

सुमन्त्र। [ससम्भ्रमम्।] वत्स ! मन्ये कुमारेणानेन जृम्भकास्त्रमामन्त्रितम्। (स)

चन्द्र। अत्र कः सन्देहः। (द)

व्यतिकर इव भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्य्यं जृम्भते जृम्भकास्त्रम् ॥ १२ ॥

[१२। तामसो वैद्युतश्च भीमो व्यतिकर इव प्रणिहितमपि ग्रस्तमुक्तं चक्षुः हिनस्ति। अथ एतत् अस्पन्दं सैन्यं लिखितमिव आस्ते, नियतं अमितवीर्य्यं जृम्भकास्त्रं जृम्भते। इत्यन्वयः]

(अ) तदिति। तत् तदा अकस्मात् हठात् अस्मत्सैन्यघोषः अस्माकं सैन्यानां बलानां घोषः कोलाहलः किं कथं प्रशाम्यति विरमति ? नूनं कश्चिदाकस्मिको विपत्पातः, येन एवं सैनिका निवृत्तकोलाहलाः संवृत्ता इति भावः।

(ब) पश्यामीति। एनं इमं प्रगल्भं सगर्व्वं साहङ्कारवाक्प्रयोगिणं चन्द्रकेतुं पश्यामि, इदानीमस्य शौर्य्यवीर्य्यपरीक्षा कर्त्तव्या, येते जृम्भकस्तम्भिताः योधाः इदानीं कालक्षेपं कारयितुं न शक्नुवन्तीति भावः। सप्रगल्भमिति पाठे तु प्रगल्भशब्दस्य धर्म्मपरतया सप्रगल्भशब्देनैव प्रगल्भतायुक्तबोधनात् साधुत्वमिति।

(स) ससम्भ्रममिति। ससम्भ्रमं सत्वरं यथा स्यात् तथा आह। अनेन एतेन कुमारेण मुनिबालकेन जृम्भकास्त्रम् आमन्त्रितं मन्त्रोच्चारणपूर्व्वकं आहूतं प्रयुक्तमित्यर्थः, इत्यहं मन्ये। अन्यथा कथमकस्मात् सैन्यकलकलः प्रशाम्यतीति भावः।

(द) अत्रेति। अत्र अस्मिन् जृम्भकास्त्रामन्त्रणविषये कः सन्देहः संशयः नूनमनेन जृम्भकास्त्रेणास्माकं सैन्यानि मोहितानि, नात्र सन्देह इत्यर्थः।

(१२) जृम्भकास्त्रप्रभावं स्वयं समर्थयते—व्यतिकर इति। भीमः भयानकः तामसः तमसः अन्धकारस्यायम् इति तामसः तमःसम्बन्धी, वैद्युतश्च विद्युतः तडितः अयं इति वैद्युतश्च विद्युत्सम्बन्धी च व्यतिकर इव सम्बन्धः सम्पर्क इव तमस्तडितोरेकदा संयोग इत्यर्थः। अत्र अत्यन्तविरोधिनोः तमस्तेजसोरेकत्र समावेशस्य असम्भवनात् उत्प्रेक्षा। तमस्तेजसोः युगपदाविर्भूय लिखित इति यावत्। केचित्तु इह पाठे इह तैमिर्य्यं प्रविहितमपि चक्षुरित्यन्वयः।

आश्चर्य्यमाश्चर्य्यम् । (ञ)

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-

रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।

कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्य्यते *

मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

[१४ । पातालोदरकुञ्जपुञ्जिततमःश्यामैः उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैः मीलन्मेघतडित्कडारकुहरैः विन्ध्याद्रिकूटैः इव जृम्भकैः नभः अवाकीर्य्यते । इत्यन्वयः ।]

अविचलितमपि दृष्टव्यविषयोपलब्धये प्रणिधानेन एकाग्रतयार्पितमपि, अतिप्रयत्नेन निश्चिन्त-मपीति यावत्, चक्षुर्नेत्रम् । अत्रासुक्तम् आदौ यत्तं तमसा आच्छादितम् अन्धीकृतम् । तमस्य-स्तमुखकल्प्यस्वच्छत्वम् । पश्चान्मुक्तं ज्योतिषि च कार्य्यकरत्वात् ततो मुक्तत्वमिति बोध्यम्; तामसावरणात् निर्मुक्तं आतदर्शनशक्तिकमिति यावत् । खञ्जकुलादिवत् पूर्व्वकालेत्यादिना समासः । आदौ तमःसम्पर्कादन्धीकृत्य पश्चात् विद्युत्सम्पर्कात्तमोऽपावरणाद्दृष्टिकृत्य छिनत्ति पीडयति; अथ तादृशस्य अन्धकारप्रभासमवायस्य नयनपीडनादनन्तरम् एतत् चक्षुः निःस्पन्दं दीनं लिखितमिव चित्रार्पितमिव आस्ते वर्त्तते । नियतं निश्चितं अमितवीर्य्यम् अपरिमित-सामर्थ्यम् अप्रतिहतशक्तिकं कुत्रापि न व्यर्थीभूतमित्यर्थः । जृम्भकास्त्रं जृम्भकाख्यं समन्त्रप्रयोग-संहारम् अस्त्रं जृम्भते प्रादुर्भवति । अस्यैव प्रभावेणायतसेनिका निःस्पन्दा निश्चलमास्ते सहसा आयाते, जृम्भकास्त्रप्रयोगं विना नैतत्सर्वं सम्भवतीति । अत्र लिखितमिवेत्युत्प्रेक्षालङ्कारः, चैतन्यां निःस्पन्दतया चित्रार्पितत्वसम्भावनात् । केचित्तु उपमामपि वर्णयन्ति, तन्मते लिखित-मस्य आलेख्यमूर्त्तिवत् लिखितमिव आलेख्यमूर्त्तिरिवेत्यर्थः । अत्यन्तं स्थिरम् आस्ते इत्यर्थः । प्रागुक्तपादविशेषाक्षरविच्छित्तिवशेन जृम्भकप्रादुर्भावनरूपसाध्यस्य प्रागुक्तसाधनज्ञानात् निश्चितानुमानालङ्कारश्च । मालिनी वृत्तम् ।

(ञ) आश्चर्य्यमिति । एतदतीव विस्मयकरमित्यर्थः । आधिक्ये द्विरुक्तिः ।

(१४) तदेव आह—पातालोदरेति । पातालोदरकुञ्जपुञ्जिततमःश्यामैः पाता-लस्य रसातलस्य "अधोभुवनपातालं बलिसद्म रसातलम्" इत्यमरः । उदरं म...मध्य कुञ्ज-मर्थे गर्त्तं कुञ्जं वनादिपिहितोदरं स्थानं तत्र पुञ्जितानि उपचितानि ... प्राप्तानि

*अवाकीर्य्यते इति क्वचित् पाठः ।

सुमन्त्रः । कुतः पुनरस्य जृम्भकास्त्राणामागमः स्यात् ? (क)

चन्द्र । भगवतः प्राचेतसादिति मन्यामहे । (ख)

राशीभूतानीति यावत्, यानि तमांसि तिमिराणि तानीव श्यामानि अङ्गानि ते, तथोक्ताः । "उपमानानि सामान्यवचनै"रिति समासः । सूर्यकिरणसम्पर्करहिततया गाढान्धकाराच्छन्न-रसातलनिकुञ्जनिलीननिबिडान्धकारसमूहमेचकैरित्यर्थः । तथा उत्तप्तस्फुरदारकूटकपिल-ज्योतिर्ज्वलद्दीप्तिभिः उत्तप्तम् अग्निसन्तापितत्वादद्भुतम् अतएव स्फुरत् तेजिष्ठं सन्दीप्यमानं यत् आरकूटं धातुविशेष पित्तलमिति यावत्। 'रीति. स्त्रियामारकूटो न स्त्रिया'मित्यमरः । 'रीति' स्त्रिया स्यन्दप्रचारयो पित्तले लोहकिट्टे चे'ति मेदिनी। तस्य यत् कपिलं पिङ्गलं ज्योतिः द्युति तद्वत् ज्वलन्ती दीप्यमाना दीप्तिः कान्ति येषां ते तथोक्ताः । अग्नि-सन्तापसन्तापितस्य पित्तलस्य प्रभासदृशपिङ्गलवर्णैः जृम्भकनामास्त्रैः । अत्र स्वर्णादि कपिलवर्णोपमाने प्रसिद्धे काञ्चनं यत् पित्तलसाम्य वर्णितं जृम्भकास्त्रस्य, तदस्त्राणां कपिल-वर्णानामपि तेजसि पाटल्यमाभासयितुम्, द्रवीभूतानां स्वर्णानां तेजसि यथा [illegible] प्रतीतिर्न तथा द्रवीभूतस्य पित्तलस्येति हृदयम्। कल्पान्तपवनकठोरभैरवमरुद्भिः [illegible] प्रलयः दिनत्रयस्य युगस्य च. आतप. अवसान तस्मिन् महाप्रलयकाले इत्यर्थः। 'संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपी'त्यमरः । 'कल्प. शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने' इति मेदिनी। कठोरा अतिरूक्षा प्रचण्डाः भैरवा भीषणाश्च ये मरुतः वायवः तैरुन्मथितानि विशीर्णानि तथोक्तैः। युगान्तकालप्रचण्डप्रभञ्जनचालितैः। नीलाम्भोधरतडित्कडारकुहरैः नीलाः प्रकाशमाना. मेघा कृष्णवर्णजीमूता इव तानि । तथा तडिद्भिः कडाराणि कपिलानि कुहराणि, 'अथ कुहरं सुषिरं बिल'मित्यमरः । गह्वराणि येषां तानि ततो नीलाम्भोधराणि च तानि तडित्कडारकुहराणि चेति तैस्तथोक्तैः। अथवा नीलतनुषु मेघेषु [illegible] कडारायीत्यादि। मेघसम्पर्कघनीभूतत्वात्. विद्युत्प्रभापातपिञ्जरितकुहरैरेव। [illegible] विन्ध्याद्रेः विन्ध्यनामाचलस्य कूटं. शिखरैः 'कूटोऽस्त्री शिखरं शृङ्ग'मित्यमरः। [illegible] आकाशम् अवाकीर्यते आच्छाद्यते। अत्र कल्पान्तमरुतः प्राधान्यात् आकाशोत्क्षेपेति [illegible] वस्तुतस्तु प्रचण्डमारुतोन्नमद्भिः पर्वतोन्नतशिखरादिः [illegible] । शार्दूलविक्रीडितं वृत्तम् ।

(क) कुत इति। कुतः. कस्मात्स्थानात् पुनः अत्र अस्य कुमारस्य जृम्भकास्त्राणां [illegible]-णाम् आगमः प्राप्तिः स्यात् सम्भवेत्। रामचन्द्रः खलु विश्वामित्राद्गृहीतवान्, [illegible] तस्मात् प्राप्तवानिति न तथा ज्ञातमित्यर्थः ।

सुमन्त्र । नास्य व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु । यतः, (ग)

कृशाश्वतनया ह्येते कृशाश्वात् कौशिकं गताः ।
अथ तत्सम्प्रदायेन रामभद्रे व्यवस्थिताः ॥ १५ ॥

[(१५)। एते कृशाश्वतनया हि कृशाश्वात् कौशिकं गताः अथ तत्सम्प्रदायेन रामभद्रे व्यवस्थिताः । इत्यन्वयः ।]

(ख) अपीति। प्राचेतसात् प्रचेतसोऽपत्यं पुमानिति प्राचेतसः वाल्मीकिः तस्मात् जृम्भकास्त्राणामागमः सम्भवेति शेषः । इति एवं मन्यामहे अनुमिमीमहे ।

(ग) नेति। अस्त्रेषु विषये अस्य वाल्मीकेः व्यवहारः शिष्येभ्य उपदेशः आत्मना वा प्रयोगः न अस्तीति शेषः । अतः त्वदुक्तरीत्या एतदागमनं न घटते। विशेषतः विशेषरूपेण जृम्भकेषु जृम्भकास्त्रेषु अस्य व्यवहारो नास्तीत्यर्थः । जृम्भकास्त्राणां प्राचेतसादेवागमः इति विशेषतो न घटते एवेत्यर्थः । भगवतः प्राचेतसस्य धनुर्वेदविद्याभिज्ञतायामपि तेन कुशलवाभ्यां स्वयमध्ययनस्य कुशलवित्तविद्यासमर्पणस्य चासम्भवात् तदोक्तिः सङ्गता। तदेव एवमपि व्याख्या सम्भवति, यत् अस्त्रेषु विषये अस्य व्यवहारः प्रसिद्धिः न अस्तीति, तथाहि— केऽपि प्राचेतसं धनुर्वेदव्यवहारे न प्रमाणयन्तीति भावः । पर्यायमेवम् । तत्तद्रहस्यानां जृम्भकास्त्राणामादिविगमः तस्य कथमपि न सम्भवेदिति भावः ।

(१५) तदेव प्रतिपादयितुमाह—कृशाश्वेति। एते जृम्भकास्त्रदेवताविशेषाः जृम्भकास्त्ररूपा वा कृशाश्वतनयाः कृशाश्वस्य प्रजापतेः तनयाः कृशाश्वनाम्ना मुनिना प्रथमं समुत्पादिता इत्यर्थः । हीति प्रसिद्धौ। तस्मात् कृशाश्वात् कौशिकं विश्वामित्रं गताः प्राप्ताः । अथ अनन्तरं तत्सम्प्रदायेन तस्य कौशिकस्य सम्प्रदायेन सम्प्रदीयते इति सम्प्रदायः गुरुपरम्परोपदेशः तेन विश्वामित्रोपदेशेनेत्यर्थः । रामभद्रे रामचन्द्रे व्यवस्थिताः रामभद्रमाश्रिताः, रामभद्रस्य व्यवहारयोग्या एव इत्यर्थः । एते इत्यादिपदानां जृम्भकास्त्रदेवतायामपि विधेयस्य कृशाश्वतनयत्वस्य प्राधान्यात् पुंस्त्वयोगो न दुष्टः । अथवा तेषां पुरुषदेवतात्वात् तथा तत्तदभिप्रायकः प्रयोगो न विरुद्धः । कृशाश्वादिपुरुषमुनीनां परम्परोपदिष्टानि कृशाश्वात् कौशिकं कौशिकाच्च रामभद्रमुपसंक्रान्तानि व्यतिविषयतया प्राचेतसस्य तद्व्यवहारासम्भव इति भावः । अत्र जृम्भकास्त्ररूपकं गाथायां विशेषोपदेशतया पर्यायोक्तमाह । कृशाश्वस्य कृशाश्वेति पुनः प्रयोगात् कथितं स च तथात्वेऽपि पाठेन समाधेयः ।

चन्द्र । अपरेऽपि परमोपचीयमानसत्त्वप्रकाशाः स्वयं हि सर्व्वमन्त्रदृशः पश्यन्ति । (च)

सुमन्त्रः । वत्स ! सावधानो भव, परागतः प्रवीरः । (छ)

कुमारौ । [अन्योऽन्यं प्रति ।] अहो प्रियदर्शनः कुमारः ।

[सस्नेहानुरागं निर्वर्ण्य] (ज)

यदृच्छासंवादः किमु किमु गुणानामतिशयः
पुराणो वा जन्मान्तरनिविड़बन्धः परिचयः ।
निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

[१६ । एतस्मिन् दृष्टे यदृच्छासंवाद किमु, गुणानाम् अतिशयः किमु, जन्मान्तरनिविड़बन्धः पुराणः परिचयो वा विधिवशात् अविदित. कः अपि निजः सम्बन्धः किमु, (यतः) मम हृदयम् अवधानं रचयति । इत्यन्वय. ।]

(च) अपीति । अपरेऽपि भवदुक्तेभ्य. अन्येऽपि न केवलं कथान्वयीषिकराजमन्त्रा इत्यर्थः । परमोपचीयमानसत्त्वप्रकाशा. परमम् अधिकम् उपचीयमानं वर्द्धमानं यत् सत्त्वं बलम् आर्षं तेज इति यावत्, यद्वा सत्त्वं सत्त्वगुण, तस्य प्रकाशः आविर्भावो येषां ते तथोक्ताः आनुकम्पन्वितप्रकाशाः, योगाभ्यासैरन्तर्व्याद्रजस्तमोऽभिभवेन प्राप्तसत्त्वगुणैकप्रकाशाः इति । सर्व्वमन्त्रदृशः सर्व्वान् मन्त्रान् पश्यन्ति ये ते तथोक्ताः वेदादीनां मन्त्राणां सर्व्वदा साक्षात्कर्त्तारः । योगिनः स्वयं हि आत्मनैव सम्प्रदायव्यतिरेकेणापि विदन्ति । योगिनः सत्त्वप्रकाशपरिशुद्धात्मानो निखिलमिदं चराचरं जगत् करतलगतकुवलयफलवदवलोकयन्ति, अतो अयम् अस्त्रैः प्रतिलब्धास्त्रप्रकाशागमो नास्ति काप्यनुपपत्तिरिति भाव. ।

(छ) वत्सेति । सावधानो भव अवधानं देहि इत्यर्थः । अत्र पराक्रमप्रकाशनसमये च एकाग्रचित्तो भव इत्यर्थः । प्रवीरः प्रकृष्टः वीरः शूरः स त्वम इत्यर्थः । परागतः समुपस्थितः । यतोऽस्माकमजितुमागच्छति अत. अवलम्बेन त्वया ज्ञातव्यमिति भावः । अन्यथा शूरैरजित वाहुल्येन तत्सैन्यानां प्रभावस्य भवात् इत्यर्थः ।

(ज) अहो इति । अत्राश्चर्य्यं अहोशब्दः । प्रियदर्शनः प्रियं प्रीतिकरं दर्शनं यस्य स तथोक्तः कुमारः लवः चन्द्रकेतुश्च । सस्नेहानुरागं निर्वर्ण्य स्नेहेन वात्सल्यातिशयेन अनुरागेण प्रीत्या च सह वर्त्तमानं यथा तथा निर्वर्ण्य दृष्ट्वा इति भावः ।

(१६) यदृच्छेति । एतस्मिन् कुमारे लवे चन्द्रकेतौ च । दृष्टे अवलोकिते सति...

सुमन्त्र । भूयसा जीवधर्म एषः, यद्रसमयो कस्यचित् क्वचित् प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं वा † चक्षूराग इति तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति । (छ)

यदृच्छासंवाद यदृच्छया दैवगत्या हेतु विना इत्यर्थ, संवाद समागम किमु, यद्वा यदृच्छया दैवेन संवाद समागमो यस्य स तथोक्त । यद्वा यदृच्छया संवाद सादृश्यं यस्य । रामादिगुण सर्वैरेकरूप इति हृदयम् । तथाविध गुणानामतिशय गुणानां कुमारद्वये अनुभूयमानानां शौर्यवीर्यादीनाम् अतिशय आधिक्य किमु । वा अथवा पुराण प्राक्तन जन्मान्तर निविडबन्ध अन्यत् जन्म इति जन्मान्तर मयूरव्यंसकादयश्चेति समास । तस्मिन् अन्यस्मिन् जन्मनीत्यर्थ । निविड दृढ बन्ध बन्धनं संश्लेषण यस्य स तथोक्त परिचय संस्तव वासनेति यावत् । अन्यजन्मन्युत्पन्न हृदये दृढमारूढ प्राक्तन परिचय इत्यर्थ । वा पक्षान्तरे अथवेत्यर्थ । विधिवशाद्दैवनियमात् हेतो । 'विधिविधान दैव च'त्यमर । अविदित अज्ञात कोऽपि निर्वक्तुमशक्य कश्चिदपि । निज आत्मीय सम्बन्ध स्वजनसम्पर्क इत्यर्थ । किमु किम् ? मम हृदय चित्तम् अवधान प्रणावहितभावम् एकाग्रमिति यावत्, रचयति जनयति अन्यचिन्ता परिहीनोऽहमेकान्तमत्रानुरक्तो भवामीत्यर्थ । यद्वा यत एव ततो म हृदयं कर्तृ अवधानं व्यापारान्तरराहित्य रचयति करोति । अथवा एतस्मिन् दृष्टे सति मम हृदय कस्य गुणातिशयो किंतु अवधानम् अवहितं रचयति करोति । कथमिमं कुमारमवलोकयतो मे हृदयमन्यचिन्ता विनिवृत्तमेकान्तमानन्दितमवहितञ्च भवति । किमु कारणमत्र दैवप्रचोदितो नामास्य रमणीय दर्शनलाभ, किमु वास्य गुणातिरेकप्रयुक्तो मोह जन्मान्तरे वा तथानेन मे प्रगाढ परिचय आसीत् येनेदानीं प्रगाढसंस्कारसमुद्भावितपूर्वभावान्तरधिकवता ? किमुत दैवविपर्यासेन अविज्ञात कश्चन सन्निकृष्ट स्वजनसम्पर्क ? नदनमत्र कनाप्यसाधारणेन कारणेन भाव्यम्, येनैव बहिरविकलोऽप्यन्तर्विकल सहसा सहर्षोऽस्मि अत प्रतिभावशेन समुत्थितबहुकोटिक संशयस्य निश्चयेन पर्यवसानाभावात् ग्रह समयानुसार चतुर्थपादस्य पूर्वपादत्रय प्रति हेतु त्वेनोपन्यासात् काव्यलिङ्गमलङ्कारश्च अनवीकृतत्वदोषश्च पुन पुन किमुपदप्रयोगात् । शिखरिणी वृत्तम् ।

(१) जन्मान्तरज्ञातपरिचयस्मरणं परेषामपि कवीनां निबन्ध यथा—'मनो हि जन्मान्तरसङ्गतिज्ञम्' ।

(२) 'तदेतस्या जगति मृगमदोऽप्यपूर्व भावस्थिराणि जननान्तरसौहृदानि' च ।

(छ) भूयसेति । भूयसा बाहुल्येन एष अयं जीवधर्म्म ज धर्म्म

---

† लौकिकाना व्यवहार इति क्वचित् पाठ ।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ १७ ॥

[१७। यः पक्षपातः अहेतुः तस्य प्रतिक्रिया नास्ति। स हि स्नेहात्मकः तन्तुः अन्तर्मर्माणि सीव्यति। इत्यन्वयः।]

स्वभाव इत्यर्थः । यत् कस्यचित् जनस्य क्वचित् कस्मिंश्चित् जने रसमयी अनुरागात्मिका प्रीतिः स्वाहं जायते यत् कञ्चित् पश्यतः कस्यचित् चित्तं प्रीतिस्निग्धं भवति स एव लौकिकस्वभाव इति भावः । अत्र प्रीतेः रसमयत्वव्यवस्थापनादलौकिकतापि प्रतिपाद्यते, तच्च अग्रस्थश्लोक-रसस्वरूपपर्यालोचनेनैव व्यक्तीभविष्यति । प्रथमदर्शन एव प्रेमप्रवणहृदयस्य कुशचिदकस्मात् समासन्नस्य कारणमाह—यत्रेति, यत्र प्रीतौ तारामैत्रकं तारयोः कनीनिकयोः, मित्रस्य भावः मैत्रकं 'तारकाक्ष्णोः कनीनिके'त्यमरः । सख्यम् अन्योऽन्यतारकातेजःसम्पर्कजनितमर्थः । चाव समुच्चये । चक्षूराग इति चक्षुषोः अन्योऽन्यनेत्रयो रागः अनुरागः इति लौकिकानां लोकशास्त्रान्तविदाम् उपचारः व्यवहारः । तथाहि—लौकिकाचारपारङ्गमाः कामिनः प्रीतिं तारामैत्रकं चक्षूराग इति निर्दिशन्ति । सकृदेव दर्शनेन कञ्चित् प्रति कस्यापि हृदयमनुरक्तं भवति, स खलु प्राणिनां स्वभाव एव । तारामित्रकम् एव तारामैत्रकमिति वा । यद्धि लोकाः परस्परं चक्षुस्तारकातेजःसम्पर्कमात्रेणैव रागवन्तो जायन्ते, चक्षुषो रागश्च तत्रैव व्यवतिष्ठते, तत एव तां प्रीतिं तारामैत्रकं चक्षूरागो वेति प्रेमतत्त्वाभिज्ञाः कथयन्ति, दृश्यते चैवं संसारे प्रणयसम्बन्धो बहुधा इति । चक्षूराग आदरादोक्षणम् । तं प्रेमाणं प्रणयम् अप्रतिसंख्येयं प्रतिसंख्यातुम् इयत्तया समवधारयितुमशक्यम् । अनिबन्धनं निबध्यते अनेनेति निबन्धनं कारणं, नास्ति निबन्धनं यस्य तं तथोक्तम् अहेतुकं स्वतः उत्पन्नम् आमनन्ति कथयन्ति प्रेमतत्त्वज्ञा इति शेषः । 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः । ईदृशं प्रेम दैवादीश्वरेच्छया जायते, अतो निर्निमित्तमेवेदमिति भावः ।

(१७) तदेव विवृणोति—अहेतुरिति । अहेतुः अकारणः उपकारादिकमनपेक्ष्यैव जायमानः यः पक्षपातः पक्षे पातः पक्षपातः पक्षाश्रयणम् आसक्तिविशेष इत्यर्थः, आत्मीयत्वप्रतिसन्धानमूलकानुकूल्यरूप इति यावत् । तस्य प्रतिक्रिया प्रतीकारः निवर्तकव्यापारः नास्ति । कारणविशेषमन्तरेण समुत्पद्यमानो हि तादृशः प्रणयः केन-मपि न निवारयितुं शक्य इत्यर्थः । हि यस्मात् स तथाविधः आसक्तिविशेषः । स्नेहा-त्मकः स्नेह एवात्मा स्वरूपं यस्य तादृशः प्रीतिस्वरूपः तन्तुः सूत्रम् अन्तर्मर्माणि हृदयसन्धिस्थानानि सीव्यति वध्नाति । उभयोर्हृदयं तुल्येनप्रेमसूत्रेण संबध्य एकी-करोतीत्यर्थः । अत्र कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । अहेतुरपक्ष-

कुमारौ। [अन्योऽन्यम् उद्दिश्य]।

एतस्मिन् मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे ।
यत्प्राप्तौ मम परिरम्भणाभिलाषात्
उन्मीलत्पुलककदम्बमङ्गमास्ते ॥ १८ ॥

[(१८। मसृणितराजपट्टकान्ते एतस्मिन् शरीरे सायकाः कथमिव मोक्तव्याः। परिरम्भणाभिलाषात् यत्प्राप्तौ मम अङ्गम् उन्मीलत्पुलककदम्बम् आस्ते। इत्यन्वयः।]

किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः ।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

[(१९। किन्तु आक्रान्तकठोरतेजसि शस्त्रं विना का नाम गतिः। तेन शस्त्रेण अपि किं यस्य ईदृशः विषयः न जायेत। आयुधे उद्यते अपि युद्धविमुखं माम् अयमेव किं वक्ष्यति। दारुणरसः वीराणां समयः स्नेहक्रमं बाधते। इत्यन्वयः।]

निवर्तनं यत्स्फुरितरूपकम्, केऽपि तन्मुखारोपणमात्रादेव अन्तर्गतमपि पुष्पस्य मधोर्वा सम्बन्धीत्यस्य आरोपप्रत्ययात्।

(१८) एतस्मिन् इति। मसृणितराजपट्टकान्ते पट्टे राजेति राजपट्टः नीलवर्णपट्टवस्त्रं, मसृणं करोतीति मसृणात् मसृणशब्दात् कर्मणि क्त इति मसृणितम्। मसृणितं श्लक्ष्णीकृतं यत् राजपट्टं तद्वत् कान्ते कोमले मनोहरे। राजपट्टः हीरकादिमणिभेदो वा। एतस्मिन् शरीरे देहे सायकाः शराः कथमिव केन प्रकारेण वा मोक्तव्याः निक्षेप्तव्याः नहीति शेषः। अत्यन्तकोमले मनोहरकान्तिशालिनि अस्मिन् देहे वज्रकठिननिशितायाः बाणाः कथमपि निक्षेप्तुं न शक्यन्ते इति भावः। यस्य शरीरस्य प्राप्तौ आसादने सतीत्यर्थः। परिरम्भणाभिलाषात् [illegible] आलिङ्गनस्य अभिलाषं स्पृहा तस्मात् [illegible] मम अङ्गं शरीरम् उन्मीलत्पुलककदम्बम् उन्मीलन्ति पुलकानां कदम्बानि यस्मिन् तथाभूतमिति विग्रहः। [illegible], कदम्बमिव कदम्बं कदम्बकुसुमाकारम् उन्मीलत्पुलकं [illegible] इति वा। आस्ते वर्तते। अस्य दर्शनमात्रेणैव [illegible] आलिङ्गनाभिलाषी [illegible] अस्मिन् बाणं को मूढः शरान् पातयितुं शक्नोतीति भावः। [illegible] राजपट्टकान्तमित्यत्र लुप्तोपमालङ्कारः। प्रहर्षिणी वृत्तम्।

मुमन्त्र । [तव निर्व्वर्ण्य मामन्त्रागतम् ।] हृदय । किमन्यथा परि-कल्पसे ? (ज)

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम् ।
लतायां पूर्व्वलूनायां प्रसूनस्यागमः कुतः ॥ २० ॥

---

(१९) किन्त्विति । किन्तु परन्तु पूर्व्वोक्तात् अन्यदित्यर्थः । अस्य देहे शरवेधेच्छा न जायते सत्यं तथापीत्यर्थः । आक्रान्तकठोरतेजसि आक्रान्तं प्राप्तं कठोरं तीक्ष्णम् उज्ज्वलमिति यावत्, तेजः पराभिभवनसामर्थ्यं येन तस्मिन् । अस्त्रमेधाभ्रयज्ञेन मम प्रतिपक्षभूते अस्मिन् लवे । "भो भो लव महाबाहो" इत्यादिना युद्धार्थं स्पर्द्धापूर्व्वकाह्वानकारिणि मामाक्रम्य तिष्ठति चन्द्रकेतौ चेत्यर्थः । अस्त्र बिना शरनिक्षेपमन्तरेण का नाम, 'नाम सम्भावनाप्रश्नयोः' इति, कः उपायः । अस्त्रसाधनकयुद्धादृते किं कर्त्तव्यमस्ति न किमपीत्यर्थः । ननु शरीरस्यौजस्यानु-रोधेन शस्त्रन्यासः क्रियतामित्यत्राह—शस्त्रेणेति । यस्य शस्त्रस्य ईदृशः एवंविधवीर्य्यवीर्य्यशाली महावीरः विषयः गोचरः प्रयोगस्थानं न जायेत न भवेत्, तेन शस्त्रेणापि आयुधेन वा किं, किं फलं साध्यते । यदीदृशेन ओजोगुणवीर्य्यशालिना वीरेण सह न युध्ये, तदा [illegible] अनर्थ्यमित्येति भावः । तर्हि सौकुमार्य्यवीर्य्ययोः प्राबल्यदौर्ब्बल्यविचारेण [illegible] [illegible] शस्त्र विहाय सामप्रयोगः क्रियतामित्यत्राह—उपनेऽपीति । आयुधे शस्त्रे उपयाते मां प्रकर्षेण अनुचिते अपि न केवलं योद्धुं शक्तोऽस्मि, अस्त्रमुक्तोऽस्य प्रकर्षेण मारयितुमपि इत्यर्थः । युद्ध-विमुखं अनेन सार्द्धं संग्रामात् पराङ्मुख नाम अयमेव, तिष्ठतु तावदन्ये, न तु युद्धपराङ्मुख एव कुमार एव इत्यर्थः । किं वक्ष्यति । निश्चितं मां भीरु दुर्ब्बलं कापुरुषं मंस्यते इत्यर्थः । ननु युद्धे कुत उपक्रमः इत्यत्राह—वीराणामिति । हि यतः दारुणः निष्ठुरः भयङ्कर इति यावत्, एष क्षात्त्रस्वरूप यस्मिन् स तथोक्तः वीराणां शूराणां समयः आचारः 'समया शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । यो हि क्रमः यो हि प्रेम' पूर्व्वं क्रमं परिपाटीमिति यावत्, बाधते निवर्त्तयति रुणद्धीति यावत् । पर्य्यायोक्तमलङ्कारः, स च सामान्येन विशेषसमर्थनरूप । शार्दूलविक्रीडितं छन्दः । अत्र [illegible] प्रतीयमान-प्रतीतिर्व्यञ्जनव्यापारतया विशेषावमर्शेनैव ।

(ज) अपमिति । सार्वं अवीच वड इति यावत् अनृचि निवृत्तेत्यर्थः । 'अपः सार्वे शर्वे पुंसि क्षोपनस्तुचि ओचिनि' इति मेदिनी । त्वं निर्व्वर्ण्य निमीष्य इत्यर्थः । [illegible] आह—हृदयेति । अन्यथा अन्यप्रकारेण अविद्यमानात् निष्ठीऽयम् इति [illegible] [illegible] नव इति किं अर्थं परिकल्पयसि चिन्तयसि, यथा मे कल्पना औचित्येति [illegible]

[(२०। मनोरथस्य यत् बीजं, तत् दैवेन आहृतः अन्तम्। लतायाः पूर्वलूनायाः प्रसवस्य कुतः आगमः। इत्यन्वयः।]

चन्द्र। अवतरामि आर्य्य सुमन्त्र! स्यन्दनात्। (भ)

सुमन्त्रः। तत्कस्य हेतोः? (ञ)

चन्द्र। यतस्तावदयं वीरपुरुषः पूजितो भवति, अपिच खलु आर्य्य! क्षात्रधर्मः परिपालितो भवति। न रथिनः पादचारमायोधयन्तीति शास्त्रविदः परिभाषन्ते! (ट)

---

(२०) रामापत्यप्रकारकल्पनाया अनौचित्यं प्रतिपादयति—मनोरथस्येति। मनोरथस्य अभिलाषस्य...निष्ठरामापत्यत्वस्य, लवोऽयं रामस्यापत्यमीदृशाभिलाषस्य इति यावत्, यत् बीजं सीतारूपं कारणं तत् कारणं दैवेन प्रतिकूलादृष्टेन आहृत आदौ पूर्वमेव गर्भिण्यवस्थायामेवेति यावत्। इतं विनाशितं हिंस्रजन्तुसङ्कुले वने मया निर्व्वासिता आपन्नसत्त्वा सीता कथमपि नासादीत्, तत् कथमयं तद्गर्भजः इति इयं कल्पनेति भावः। तदेव दृष्टान्तेन विशदीकरोति—लतायामिति। लतायां कस्याञ्चित् व्रतत्यां पूर्व्वलूनायां आदौ छिन्नायां सत्यां प्रसूनस्य पुष्पस्य आगमः उत्पत्तिः कुतः कस्मात् कारणाद्भवेदिति शेषः। यथा कुसुमोद्गमात् प्राक् छिन्नायां लतायां तदुत्पत्त्यभिलाष, तथा प्रागेव विनष्टायां सीतायाम् अद्य तदपत्याभिलाष इति बिम्बप्रतिबिम्बभावादत्र दृष्टान्तालङ्कारः।

(भ) अवेति। आर्य्य श्री मान्यनीय सुमन्त्रसारथे! स्यन्दनात् रथात् अवतरामि भूमौ अवरोहामि अहमिति शेषः। चन्द्रकेतो. सुमन्त्रात्प्रार्थनार्थमियमुक्तिः।

(ञ) तदिति। तदवतरणं कस्य हेतोः किमर्थं त्वमवतरितुमिच्छसीत्यर्थं।

(ट) यत इति। यतः यस्मात् कारणात्, मम स्यन्दनावतरणस्य इदमेव कारण-मित्यर्थः। तत्कारणमेव कथयति—अयमित्यादिना। अयं वीरपुरुषः महावीर्य्यसम्पन्न एष लवः तावत् नूनं पूजितः सत्कृत. सम्मानित भवति। एतेन पादचारिणा साकं पादचारि-णैव मया यौद्धव्यं तेनैतस्य परिहारादस्य गौरव स्यादिति भाव। अपिच किञ्च न केवलमस्य गौरवं अन्यच कारणमस्तीत्यर्थः। खलु निश्चये। क्षात्रधर्म्मः क्षत्रियाणामयमिति क्षात्रः स चासौ धर्म्मश्चेति समासः, क्षत्रात्ः छिरि अदिति [illegible] ततः अत्रायते इति [illegible] [illegible] आयतीः ...[illegible], इति अतः, ततः अण्। अभिधाचारः प्रतिपालितः रक्षितः [illegible] भवति इति यावत्, भवति। रथादवतीर्य्य भूमिष्ठेन सह भूमिस्थस्य मम यु[illegible] [illegible] आचारस्य ...[illegible] आदिति भावः। ननु कुत्र कोदृशोऽयं क्षात्रधर्म्म इति [illegible] आहेति

[illegible] मानमृतत्वे इत्याह—नेति। रथिनः स्यन्दनारूढ़ा योधाः पादचा[illegible] पादाभ्यां चारी

सुमन्त्रः। [स्वगतम्] कष्टां दशामनुप्रपन्नोऽस्मि। (ठ)

कथं न्याय्यमनुष्ठानं माद्दशः प्रतिषेधतु।
कथं वाप्यनुजानातु साहसैकरसां क्रियाम्॥ २१॥

[(२१। माद्दशः कथं न्याय्यमनुष्ठानं प्रतिषेधतु, कथं वा साहसैकरसां क्रियाम् अपि अनुजानातु। इत्यन्वयः।)]

चन्द्र। यदा तातमिश्रा अपि पितुः प्रियसखं धर्मार्थसंशयेषु आर्य्यमेव पृच्छन्ति, तत्किमार्य्यो विमृशति। (ड)

असमं यस्येति विग्रहः। पदाति योद्धारं न आयोधयन्ति नाभियुञ्जते न युध्यन्ते शास्त्रविदः शास्त्रं विदन्ति ये ते तथोक्ताः क्षत्रधर्मप्रतिपादकार्थशास्त्रज्ञाः मन्वादयः "रथी च रथिना सार्द्धं पदातिश्च पदातिना। कुञ्जरस्थो गजस्थेन योद्धव्यो भृगुनन्दन॥" इति चतुर्वर्गचिन्तामणिः। परिभाषन्ते उपदिशन्ति वदन्ति। रथिना पादचारिणा सह योद्धुमनौचित्यात् भूम्यवतरणं भूम्यवरोहणेनैव च पादचारिणा सह युद्धेन क्षात्रधर्मस्य महावीरत्वख्यातेश्च परिरक्षणात् मे निर्बन्ध इत्यर्थः।

(ठ) कष्टामिति। कष्टां कं शङ्करीं दशाम् अवस्थाम् अनुप्रपन्नः प्राप्तः अस्मि, इदानीं कर्त्तव्यावधारणाक्षमतया व्याकुलो भवामीति भावः।

(२१) तदेवाह—कथमिति। माद्दशः युद्धाचाराभिज्ञः मनुष्यः स्थविरः जनः कथं केन प्रकारेण न्याय्यं न्यायात् अनपेतं यथाशास्त्रमित्यर्थः। अनुष्ठानं रथादवतरणरूपं कार्य्यं प्रतिषेधतु निवारयेत्, मद्विधजनस्य शास्त्रानुमोदिते कर्म्मणि अननुमोदनम् अनुचितमिति। तस्मात् चन्द्रकेतोः रथादवतरणं निषेद्धुं न शक्यते इति भावः। तर्हि अनुमन्यतां पादचारिणा योद्धुमित्याह—कथमित्यादि। साहसैकरसां साहसम् अविमृश्यकारित्वम् तदेकरसामिति यावत्। तदेव एकः मुख्यः रसः युद्धप्रवर्त्तकोऽनुरागविशेषो यस्य तां क्रियां रथादवतरणरूपं कार्य्यं वा कथं केन प्रकारेण अनुजानातु अनुमन्येत अनुमन्तुं शक्नुयात्। यदि चन्द्रकेतुं रथादवतीर्य्य युद्धकरणात् नाहं निवारयामि तर्हि महावीरेणानेनाशु पराजय इत्यापत्स्यतीति ज्ञात्वापि माद्दशः क्षत्रियाचाराभिज्ञो जनः कुमारं न्याय्यपथावलम्बने निषिध्य विहितानुष्ठानप्रतिकूलवर्त्तित्वेन प्रत्यवायी वा कथं भवामि, तदिदानीमेतद्वीरेकतरावधारणाक्षमतया नितरां व्याकुलोऽस्मीति भावः। अतएव दशेयं कष्टतमेति बोध्यम्।

(ड) यदेति। तातमिश्राः अपि पूज्यपादाः पितरः रामचन्द्रप्रभृतयः अपि धर्मा-

सुमन्त्रः । आयुष्मन् ! एवं यथाधर्ममभिमन्यसे । (ढ)

एष सांग्रामिको न्याय एष धर्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

[(२२। एष सांग्रामिकः न्यायः, एष सनातनः धर्मः, रघुसिंहानाम् इयं वीरचारित्र-पद्धतिः। इत्यन्वयः।]

चन्द्र। प्रतिरूपं वचनमार्य्यस्य । (ण)

इतिहासं पुराणञ्च धर्मप्रवचनानि च ।
भवन्त एव जानन्ति रघूणाञ्च कुलस्थितिम् ॥ २३ ॥

[illegible]: अपीति अपिशब्दार्थः। पितुः प्रियसखं तेषां जनकस्य दशरथस्य प्रियं मित्रम् आर्य्यं मान्यं भवन्तम् एव नान्यम्। धर्म्मार्थसंशयेषु धर्म्मार्थयोरनुष्ठेयसन्देहेषु शास्त्रविहिताचार-रूपस्य धर्मस्य तथा अर्थस्य कर्त्तव्यस्य च संशयेषु सन्देहेषु सत्सु पृच्छन्ति जिज्ञासन्ते, सन्देह-निरासाय भवतोऽभिमतम् अपेक्षन्ते अविद्याचारेषु धर्म्मार्थेषु भवतोऽतीव वैचक्षण्यादिति भावः। तत् तथा सम्प्रति अतिविचक्षणानामस्मत्तातपादानां संशयनिरासकर्त्ताऽपि इत्यर्थः। आर्य्यः मान्यः भवान् किं कथं विमृशति विवेचयति, भवादृशस्यातिविदुषः अत्र किं विमर्शव्यमस्ति नार्य्यं पुत्रः प्रत्तः बलवं यथाभिमतमनुमन्यतामिति भावः।

(ढ) आयुष्मन्निति। एवं रथादवतरण यथाधर्म्मं धर्म्मम् अनतिक्रम्येति यथाधर्म्मं धर्म्मानुमोदितं यथाचारकरणमिति यावत्, अभिमन्यसे इच्छसि। रथादवतीर्य्य यत् योद्धु-मिच्छसि तत् साध्विति भावः।

(२२) तदेव दर्शयति—एष इति। एष, अयं सांग्रामिकः संग्रामे भवः संग्रामसम्बन्धी न्यायः नियमः रथिनां पादचारिभिः सह युद्धाकरणरूप इति सांग्रामिकयोद्धाभिमत एवेत्यर्थः। एष सनातनः शाश्वतः धर्मः आचारः अभियमैर्वैरीदृश एवाचारः चिरं प्रतिपालितः। इयं [illegible] हि निश्चितं रघुसिंहानां रघवः सिंहा इव ते तेषां रघुकुलश्रेष्ठानां शूराणां वीर-चारित्रपद्धतिः वीरचारित्रस्य वीरजनोचिताचारस्य पद्धतिः पन्थाः 'पद्धतिः पद्धतिश्च नो'रिति [illegible]। वीरव्यापारपरिपाटीति यावत्। एतेनैवाचारेणास्मा रघुकुलवीरपुरुषाः समरान्ते [illegible] लालपादादीनामनभिमता नितरामादृता एवेति भावः। अत्र एतत्पादार्थस्य [illegible] विशेषतया अनेकपदार्थेन सांग्रामिकन्यायादिना समुदितेन अभिसम्बन्धात् तुल्य-[illegible]।

([illegible]) [illegible]। आर्य्यस्य पूज्यनीयस्य भवतः वचनम् "एष [illegible] इत्यादि-[illegible] [illegible] अनुरूपं योग्यमिति यावत्। भवादृशानां पार्थि[illegible] [illegible] एव [illegible] भावः।

[(२३ । भवन्त एव इतिहासं पुराणं च धर्मप्रवचनानि च रघूणां कुलस्थितिं जानन्ति । इत्यन्वय ।]

सुमन्त्रः । [सर्वहासं परिष्वज्य] (त)

आतस्य ते पितुरपीन्द्रजितो निहन्तु-
वत्सस्य वत्स कति नाम दिनान्यमूनि ।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥ २४ ॥

[(२४ । हे वत्स, इन्द्रजितः निहन्तुः वत्सस्य ते पितुः अपि आतस्य कति नाम अमूनि दिनानि । तस्य अपि अपत्यं वीरवृत्तमनुगच्छति । दिष्ट्या दशरथस्य कुलं प्रतिष्ठां गतम् । इत्यन्वयः ।]

---

(२३) अनुरूपवचनप्रयोगे हेतुं दर्शयति—इतीति । भवन्त एव नान्ये इत्येवकारार्थः । इतिहासं पुरावृत्तं रामायणभारतादिकम् । "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् । पूर्ववृत्त-कथायुक्तमितिहासं प्रचक्षते" । पुराणञ्च पञ्चलक्षणान्वितं शास्त्रम् । "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥" धर्मप्रवचनानि च धर्माः धर्मा-म्नायाः नित्यनैमित्तिकादयः प्रोच्यन्ते एभिरिति करणाधिकरणयोश्चेति ल्युट् । मन्वादिस्मृति-शास्त्राणीत्यर्थः । तथा रघूणाम् इक्ष्वाकुकुलोत्पन्नानां कुलस्थितिं वंशमर्यादाम् आचारमिति यावत्, जानन्ति विदन्ति । अतएवानुरूपं वक्तुमर्हन्ति भवन्त इति भावः । अत्र जानन्तीत्येकक्रियायाः कर्मतासम्बन्धेन इतिहासादिषु अनेकेषु सम्बन्धात्तुल्ययोगितालङ्कारः । भवन्त एव इत्येवकारेण अन्यव्यपोहनात् परिसंख्यापि प्रोच्यते । पथ्यावक्त्रं वृत्तम् ।

(त) सर्वहासेति । सर्वः हासः यस्मिन् कर्मणि वात्सल्येन अतीव आनन्दातिशयात् यथा तथा परिष्वज्य चन्द्रकेतुमालिङ्ग्य सुमन्त्र आहेति शेषः ।

(२४) चन्द्रकेतोः क्षात्रधर्मानुपालनप्रवृत्तिमवलोक्य सन्तुष्टः सुमन्त्रः तं प्रशंसति— आतस्येति । अयि वत्स चन्द्रकेतो ! इन्द्रजितः युद्धे देवराजस्यापि जयिनः मेघनादस्य निहन्तुः व्यापादयितुः सकलस्य प्रेमास्पदस्य जिष्णोः ते तव पितुर्लक्ष्मणस्य वत्सस्य अपि आतस्य कस्मात् उत्पन्नस्य सतो वा । अमूनि जन्मन आरभ्य अद्यावधिदिनानि दिवसाः कति नाम कियन्ति अल्पान्येवेत्यर्थः । वत्सस्य लक्ष्मणस्य जन्मतः अल्पान्येव दिनानि अतिवाहितानीत्यर्थः, कति नाम अतीतानीति शेषः । तस्यापि लक्ष्मणस्य अपत्यं सन्ततिः चन्द्रकेतुरित्यर्थः । वीरवृत्तं शूराणामाचारम् अनुगच्छति अनुसरति प्रतिपालयतीत्यर्थः

चन्द्र । [सकष्टम् ।]

अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥ २५ ॥

[(२५) रघुज्येष्ठे अप्रतिष्ठे नः कुलस्य का प्रतिष्ठा इति दुःखेन नः अपरे त्रयः पितरः तप्यन्ते । इत्यन्वयः ।]

सुमन्त्र । अहह ! हृदयमर्म्मदारणानि एतानि चन्द्रकेतोर्वचनानि ।(थ)

लव । हन्त ! मिश्रीकृतो रसक्रमो वर्त्तते । (द)

यथेन्दावानन्दं व्रजति समुपोढ़े कुमुदिनी
तथैवास्मिन् दृष्टिर्मम कलहकामः पुनरयम् ।

यावत् । दिष्ट्या भाग्येन दशरथस्य कुलं वंशः प्रतिष्ठा वंशसन्तानजनिता प्रसिद्धिः स्थायित्वम् अविच्छेदमिति यावत्, गतं प्राप्तम् । इतोऽन्यत् किं नः आनन्दकारणमस्तीति भावः । अत्र लक्षणवत्त्वविषयसमानत्वरूपवस्तुवर्णनेन भङ्ग्या अनुमितयोरावयोः चन्द्रकेतोरतिप्रियत्वप्रकटना त्पर्य्यायोक्तालङ्कारः, स च अन्तिमपादार्थं प्रति पूर्व्वपादार्थानां हेतुत्वात् वाक्यार्थहेतुककाव्य लिङ्गानुप्राणित । वृत्तं वसन्ततिलकम् ।

(२५) अप्रतिष्ठ इति । रघुज्येष्ठे रघूणां ज्येष्ठे तस्मिन् रघुवंश्यगरिष्ठे रामे अप्रतिष्ठे नास्ति प्रतिष्ठा वंशस्थितिः यस्य तस्मिन् प्रतिष्ठासम्पादकापत्यरहिते सति नः अस्माकं कुलस्य गोत्रस्य का कीदृशी प्रतिष्ठा स्थितिः इति अनेन दुःखेन कष्टेन हेतुना नः अस्माकम् अपरे रामचन्द्रात् अन्ये पितरः भरतलक्ष्मणशत्रुघ्नाः तप्यन्ते मनस्तापं प्राप्नुवन्ति । कुलज्येष्ठस्य सकल-गुणाकरस्य रामचन्द्रस्यानपत्यत्वे सत्यपि तत्कनिष्ठानां भरतादीनामपत्येषु अस्मासु रघुवंशस्य प्रतिष्ठा न सम्भवतीति सम्भाव्यते इति भावः । रघुज्येष्ठस्य अप्रतिष्ठत्वपदार्थं विशेषणगत्या प्रतिष्ठाभावप्रयोजकतया प्रतीयत इति पदार्थहेतुकं काव्यलिङ्गम् ।

(थ) अहहेति । अहहेति खेदसूचकमव्ययम् । एतानि इत अव्यवहितपूर्व्वमेव कथितानि चन्द्रकेतोर्लक्ष्मणात्मजस्य वचनानि वाक्यानि हृदयमर्म्मदारणानि हृदयस्य मर्म्म सन्धि स्थानं दार्य्यते एभिरिति दारणानि भेदनानि, अर्थ्यतानि वचनानि श्रुत्वा हृदयं मर्म्माणि च विदीर्य्यन्त इत्यर्थः ।

(द) हन्तेति । हन्तेति हर्षे । 'हन्त हर्षेऽनुकम्पायां'मित्यमर ॥ रसाद्यः ... तेषां क्रमः पर्य्यायः मिश्रीकृतः मिलितः वात्सल्यवीररसयोरेकत्र समावेशः ... वर्त्तते । कदाचित् वात्सल्यरसस्य विभावः कदाचित् वा वीररसस्येत्यर्थः ।

झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्बणरसः * ॥ २६ ॥

[(२६) इन्दौ समुपोढे कुमुदिनी यथा आनन्दं व्रजति, मम दृष्टिः अस्मिन् तथा, पुनः कलहकामः अयं बाहुः झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनुर्धृतप्रेमा विकचविकरालो- ल्बणरसः । इत्यन्वयः ।]

चन्द्र। [अवतरन्] आर्य्ये ! सावित्रश्चन्द्रकेतुः अभिवादयते । (ध)

(२६) तदेव श्लोकेनाह—यथेति । इन्दौ चन्द्रे समुपोढे उदिते सति, कुमुदिनी कुमुद्वती यथा यद्वत् आनन्दं विकाशमित्यर्थः । व्रजति प्राप्नोति । चन्द्रोदये कुमुदिनी यथा प्रफुल्ला जायते । अस्मिन् कुमारे मम दृष्टिः नेत्रं तथैव तद्वदेव आनन्दं व्रजति प्रीतिप्रफुल्लतां यातीत्यर्थः । कुमारमिमं दृष्ट्वा मे आनन्दातिशयो जायते इति भावः । पुनः किन्तु कलहकामः कलहः विरोधः संग्रामः कामयते यः सः तथोक्तः, समराभिलाषीत्यर्थः । अयम् एव मम बाहुः भुजः, झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनुर्धृतप्रेमा झणत्कारेण झण झणेति ध्वनिना क्रूरम् अतिकर्कशं यथा तथा क्वणितः शब्दितः यो गुणः मौर्वी तेन गुञ्जत् शब्दायमानं यत् गुरु महत् धनुः कार्मुकं तस्मिन् धृतं कृतं प्रेम प्रणयः ग्रहणाकाङ्क्षारूपो येन सः तथोक्तः । तथा विकचविकरालोल्बणरसः विकचः सुव्यक्तः विकरालः भयङ्करः 'करालो दन्तुरे तुङ्गे भीषणे चाभिधेयव'दिति मेदिनी । उल्बणरसः रौद्ररसयोगेन समुद्धतः वीररसः यस्मिन् सः तथोक्तश्च जात इति शेषः । इमं मनोहररूपं कुमारं दृष्ट्वा मम नेत्रद्वयं परमानन्दं लभते, किन्तु मे बाहुरनेन सह युद्धार्थम् अविरतं ज्याया आस्फालनेन ध्वानेन दिक्चक्रवालमापूर्य्य बाणान् निक्षेप्तुमभिलषति तत्रैव रतिक्रोधस्थायिकयोः शृङ्गारवीरयोर्मेलनाद्रसयोर्मिश्रीभूततेति लक्ष्यते । "पुंभाव मनसा ययु"रिति न्यायेन कुमुदिनीदृष्टान्तात् शृङ्गारोत्पत्तिरिति बोध्यम् । अत्र उपमा वृत्त्यनुप्रासश्च । 'रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपी'ति दर्पणोक्तेरत्र रसगतः स्वशब्दोक्तिदोषः । गुञ्जद्गुरुधनुरित्यत्र ख्यातिविरुद्धतादोषः भ्रमरादिष्वेव गुञ्जनस्य प्रसिद्धत्वात्, दोषपरिहारस्तु गर्ज्जत्प्रभृतितादृशशब्दपरिवर्त्तनेन कर्त्तव्य इति । शिखरिणी वृत्तम् ।

(ध) आर्य्येति । अवतरन् रथाच्चन्द्रकेतुरिति शेषः । आर्य्येति सुमन्त्रस्य सम्बोधनम् । सावित्रः सवितुः सूर्य्यस्य अपत्यं पुमान् इति सावित्रः, सूर्य्यवंशीयः चन्द्रकेतुः अहमित्यर्थः । अभिवादयते प्रणमति भवन्तमिति शेषः । अत्र सावित्र इति विशेषणोपादानादात्मनः गौरवातिशयं द्योतयति सेवकस्य महत्त्वे सेव्यस्य महत्त्वं सुतरां भवत्येवेति बोध्यम् । अभिजन- प्रकाशेन च नमस्कारस्य नियमः ।

* विकटविकरालोल्बणरसः इति पाठान्तरम् ।

सुमन्त्र। अजितं पुण्यमोजस्ते काकुत्स्थस्येव ते महः।
श्रेयसे शाश्वतो देवो वराहः परिकल्प्यताम् ॥ २७ ॥

[(२७) शाश्वत देव वराह काकुत्स्थस्य इव ते अजित पुण्यम् ओजस्वि महः श्रेयसे परिकल्प्यताम्। इत्यन्वय।]

अपिच। (ग)

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि।
ऐन्द्रं वैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ २८ ॥

[(२८) य ते गोत्रस्य पिता देव सविता (स) त्वा समरे धिनोतु। य ते गुरू-णाम् अपि गुरुः मैत्रावरुणि (स) त्वाम् अभिनन्दतु। अथ ऐन्द्र वैष्णवम् आग्निमारुतं सौपर्णम् ओज ते अस्तु, रामलक्ष्मणधनुर्ज्याघोषमन्त्रश्च जयं देयात् एव। इत्यन्वय।

---

(२७) अजितमिति। शाश्वत सनातन उत्पत्तिविनाशरहित। 'शाश्वतस्तु ध्रुवो नित्य सदातनसनातना'वित्यमर। वराह गृहीतवराहरूप देव विष्णु काकुत्स्थस्य इव ऐक्ष्वाकस्य पुरञ्जयाभिधानस्य सुप्रसिद्धस्य राज्ञ इव ते तव अजितम् अप्रतिहतम् शत्रुभिरनभिभूतं पुण्य पावनं 'पुण्य धर्मे मनोज्ञे च पावने च प्रकीर्त्तित'मिति विश्व। ओजस्वि बलिष्ठ महः तेज 'महस्तूत्सवतेजसो'रित्यमर। श्रेयसे कल्याणाय। तादर्थ्ये चतुर्थी। परिकल्प्यतां सम्पाद्यतां भवताभवत इति शेष। पुरा कस्मिंश्चित् इन्द्रस्य ककुद्वाहनस्य असुरै सह युध्यमानस्य इक्ष्वाकु कुलोद्भवस्य पुरञ्जयस्य देहं भगवान् विष्णु शक्तिरूपेण आपूर्य देवासुरसमरे यथा विजय दत्तवान्, तथा अस्मिन् युद्धे स भगवान् ते शरीरं निजमहसा बलिष्ठं विधाय तुभ्य विजय ददातु इत्यर्थ। अत्र वराहपदोपादानेन भगवत सामर्थ्याधिक्य प्रतीयते वराहावतारेणैव तेन प्रलयार्णवमग्ना भूमिरुद्धृतेति तस्य वीर्यातिशयो बोध्य। अथवा वराहदेवस्य प्रथमदैत्यहिर ण्याक्षनिहन्तृत्वेनादिवीरत्वात् तत एव अस्य साधन युज्यते। यद्वा सूर्यवंशीयानां [illegible] गम्योपास्यत्वा इति वराहपदोपन्यासे बीजम्।

(ग) अपि चेति। अपि च अन्यच्च न केवलम् अजितम् [illegible] नं वक्ष्य-माणमपीत्यर्थः।

(२८) देव इति। यो ते तव गोत्रस्य वंशस्य 'सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ' इत्यमर,

लव। कुमार! अति हि नाम शोभसे रथस्थ एव; कृतं कृतमत्यादरेण। (प)

चन्द्र। तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु। (फ)

लव। आर्य्य! प्रत्यारोपय रथोपरि राजपुत्रम्। (ब)

कुलम्' 'गोत्रं कुलान्वयौ'रित्यमरमेदिनीकारौ। पिता जनक आदिपुरुषः। अतोऽयं वंश उत्पन्न इत्यर्थः। स देव सविता सूर्य्यः त्वां समरे रणे धिनोतु प्रीणातु प्रीणन् विजयं दत्त्वा वर्द्धयतु इत्यर्थः। तथा यस्ते गुरूणां पूजनीयानां पित्रादीनाम् अपि गुरुः पूज्यः स मैत्रावरुणः मित्रस्य वरुणस्य तौ मित्रावरुणौ देवतास्य इत्यण्। तयोरयमित्यर्थे तस्येदमिति अणन्तः। एकस्मिन् काले मित्रस्य कल्पान्तरे च वरुणस्य पुत्रत्वेन अस्येय सत्त्वा। वसिष्ठ अपि त्वां अभ्युदयशालिना सर्वर्द्धयतु, तस्याशीर्वादबलेन तव जयोऽस्तु इत्यर्थः। पुनर्वाक्यारम्भेऽत्राशीरनन्तः। अथो ऐन्द्र इन्द्रस्य इदमित्यैन्द्र माघवतं विष्णोरिदं वैष्णव नारायणसम्बन्धि आग्निमारुतम् अग्निश्च मरुच्चेति देवताद्वन्द्वे इति आनङि अग्निमारुतौ तयोरिदमित्यणि उभयपदवृद्धि, "इद्वृद्धौ" इति इद्विमति उत्तरपदे अग्नेरिदादेशे आग्निमारुतं सिद्धम्। वह्निवायुसम्बन्धि इत्यर्थः। तथा सौपर्णं सुपर्णस्य गरुडस्य इदं सुपर्णो गरुत्मान्, गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः। नागान्तको विष्णुरथः सुपर्णः पन्नगाशन इत्यमरः। मातृत्राणार्थं चीजः अर्णं ते तव अस्तु। अमृतापहरणकाले इन्द्रेण वज्रेण ताडितस्याप्यस्य पत्रच्छेदो माभूदित्यस्य सुपर्णनामाभवदिति पौराणिका। तथा रामलक्ष्मणधनुर्ज्यायोषमन्त्र, रामलक्ष्मणयोः राघवयोर्विद्वद्वरयोः धनुषी कार्म्मुके तयोः ये ज्ये मौर्व्यौ तयोः घोष टङ्कार एव मन्त्र जय देयात् वितरतु। अश्वमेधीयाश्वो-रामलक्ष्मणयोर्धनुर्गुणनिनादो यथा सर्व्वत्र विजयते, त्वमपि तथा जयी भव। तयोरिव ते सामर्थ्यमस्तु इति भावः। तव इन्द्रादीनां तेज इव तेज अस्तु इति बिम्बप्रतिबिम्बभावोपमालि-दर्शनालङ्कारः। तत्र प्रीणनादिक्रियाणां बहूनां यौगपद्यप्रतीतेः समुच्चयालङ्कार इति केचित्। शार्द्दूलविक्रीडितं वृत्तम्।

(प) कुमार इति। रथस्थ स्यन्दनावस्थित एव त्वम् अति अतिशयेन हि निश्चितं शोभसे नाम इत्यहं सम्भावयामीति। अत अत्यादरेण रथावतरणरूपपरमादरप्रदर्शनेन कृतं कृतम् अलमलम् सम्भ्रमे द्विर्व्वचनम्। अत्यादरः न कार्य्यः रथारूढ़ेनैव भवता शोभमानेन स्थीयताम्।

(फ) तर्हीति। तर्हि मम रथावस्थानं चेत्तवाभिमतं तद्दीत्यर्थः। महाभागः अपि महान् भाग भाग्यं यस्य स तादृश' भवान् अपि अन्यम् अपरं रथम् अलङ्करोतु आरोहणेन शोभयतु। भवानप्यपरिमेयरथारोहणेन एव युद्धार्थं सज्जतां भवत्विति भावः।

(ब) [illegible] राजपुत्रं राजकुमारं चन्द्रकेतुं रथोपरि [illegible]

सुमन्त्रः। त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम्। (भ)

लवः। को विचारः स्वेषु उपकरणेषु। किन्तु अरण्यसदो वयमनभ्यस्तरथचर्य्याः। (म)

सुमन्त्रः। जानासि वत्स! दर्पसौजन्ययोर्यथोचितमीरयितुम्, यदि पुनरीदृशं त्वामैक्ष्वाको रामभद्रः पश्येत् तदा अस्य स्नेहेन हृदयमभिष्यन्देत। (य)

लवः। आर्य्य! सुजनः स राजर्षिः श्रूयते। [सलज्जमिव] (र)

आरोहय। चन्द्रकेतुकृतसख्यसम्बन्धात्तस्य गुरुत्वेन लवस्यापि सुमन्त्रे गुरुत्वव्यवहारात्तेन सुमन्त्र, आर्य्येति सम्बोध्यते। राजपुत्रमिति विशेषणमाहात्म्या चन्द्रकेतोरुपस्थापनात् अयं राजपुत्रः रथारोहणे एव युद्धे अभ्यस्तः अतः अस्य पादचारेण कष्टातिशयो भविष्यतीति रथारोपणे हेतुरभिप्रयते।

(भ) त्वमिति। त्वम् अपि चन्द्रकेतोर्वचनं "महाभागोऽप्यस्य" मित्यादि वाक्यं अनुरुध्यस्व न उपेक्षस्व। यदि त्वं रथमारोहसि तदा एनमपि रथमारोपयामीत्यर्थः।

(म) क इति। स्वेषु आत्मीयेषु स्वसम्बन्धिषु इत्यर्थः। उपकरणेषु संग्रामोपकरणीभूतेषु वस्तुषु रथादिषु निजव्यवहार्य्ये रथाद्युपकरणे व्यवहर्त्तुमित्यर्थः। कः विचारः वितर्कः। आत्मनः व्यवहार्य्यद्रव्यव्यवहारविषये नास्ति कोऽपि विचारावसरः स्वेच्छया व्यवहर्त्तुं शक्यते इति भावः। किन्तु अरण्यसद अरण्ये वने सीदन्ति वसन्तीति तथोक्ता वनवासिन वयं, अरण्यसदः इत्यत्र बहुत्वम्, अहमित्यर्थः। अतएव अनभ्यस्तरथचर्य्याः रथस्य चर्य्या रथचर्य्या न अभ्यस्ता शिक्षिता रथचर्य्या रथारोहणचालनादिव्यवहारः यैस्ते तथोक्ताः। रथारोहणादौ न वयमुपदिष्टाः तत् कुमारस्य वाक्यं प्रतिपालयितुं नार्हामीत्यर्थः।

(य) जानासीति। दर्पसौजन्ययोः गर्व्वविनययोः यथोचितम् उपयुक्तं दर्पोचितं सौजन्योचितञ्चेत्यर्थः। ईरयितुं वक्तुं जानासि शक्नोषि, स्वेषूपकरणेषु को विचार इत्युक्त्या ते महत् सौजन्यं प्रकाश्यते। रथिनः रथं विनापि यास्यामहमित्यनर्गलगूढार्थश्च ध्वनितः। एकेनैव ते वाक्येन दर्पः सौजन्यञ्च प्रकटितम् इत्यर्थः। यदि पुनः किन्तु चेत् ईदृशम् एवं दर्पसौजन्यादिसकलवीरगुणभूषितं त्वाम् ऐक्ष्वाकः इक्ष्वाकुकुलभूषणं रामभद्रः पश्येत् विलोकयेत् तदा तर्हि अस्य रामस्य हृदयं चित्तं स्नेहेन प्रेम्णा अभिष्यन्देत परिप्लुतं भवेत्। इ[illegible] सीतावीरतायां आत्मनीव प्रविशस्य वंशधरतया रामभद्रस्यात्यन्तगुणग्राहित्वात्स्वाहर्य्य [illegible] हृदा स्निग्धो प्रीतिमापद्येत, वीरा हि वीरं सुजनं लभमानाः परितुष्यन्तीति भ्य [illegible]।

(र) आर्य्येति। स राजर्षिः सकलसंयमादिगुणयोगात् ऋषिकल्पः नृपतिः स रामभद्रः सुजनः सज्जनः साधुरिति यावत्, श्रूयते रामायणकथायाम् इति शेषः। सलज्ज-

वयमपि न खल्वेवंप्राया: क्रतुप्रविघातिनः
क इह च गुणैस्तं राजानं न वा बहुमन्यते।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत्॥ २८॥

[(२९। वयमपि न खलु एवंप्राया क्रतुप्रविघातिन, इह च क वा तं राजानं गुणैः न बहुमन्यते। तदपि तुरङ्गमरक्षिणां स खलु व्याहार अखिलक्षत्राक्षेपप्रचण्डतया मे विकृतिम् अकरोत्। इत्यन्वय।]

चन्द्र। [सलज्जितम्] किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः। (ख)

मिव एव सुजनस्यापि रामस्य यज्ञियाश्वावरोधाधर्माचरणात् लज्जितमिव यथा तथा वक्ष्यमाण-माहेति शेष।

(२९) ननु सुजनयत् रामचन्द्रस्तत् यज्ञियाश्वमवरुध्य दौर्जन्यानुष्ठानं युष्माकमत्यन्तानु-चितमित्याह—वयमपीति। वयमपि एवंप्राया प्रायेण बाहुल्येन एवम् इत्येव प्राया. सुप्सुपेति समास। ईदृशा क्रतुप्रविघातिन क्रतु यज्ञ प्रविघ्नन्तीति तथोक्ता 'यज्ञ सवोऽध्वरो याग: सप्ततन्तुर्मख क्रतु'रित्यमर। मखविध्वंसिन उद्धतास्तथ दुश्चरिता इत्यर्थ। न भवाम इति शेष। भवामो वा अन्यान् प्रति तादृशा, रामराजं प्रति तु नैवेत्याह—क इह च इति। च किञ्च इह जगति क को जन तं राजानं रक्षकं तं रामचन्द्रं गुणैः सौजन्यशौर्य-वीर्यादिभि उत्कर्षाधायकै धर्म्मै न वा बहुमन्यते न आद्रियते, अपितु सर्व्व एव तद्गुण-गणाकृष्टा तं प्रशंसन्ति सुतरां वय तं सर्व्वथा बहुमन्यामहे न क्रतुद्वेषिण. नापि रामद्वेषिण इत्यर्थं तर्हि कथ तदश्वावरोधेन विरोध क्रियते इत्याह—तदपीति। तदपि तथापि रामस्य बहुमानास्पदतया तेन सह विरोधाचरणस्यान्याय्यत्वेऽपीत्यर्थ। तुरङ्गमरक्षिणां तुरङ्गमस्य यज्ञियाश्वस्य रक्षिणां रक्षकाणां स व्याहार "अयमश्व पताकेयम्" इत्यादि वचनम्। अखिल-क्षत्राक्षेपप्रचण्डतया अखिलानां सकलानां क्षत्राणां राजन्यानाम् आक्षेपेण अवमानेन अवज्ञयेति यावत्, हेतुना प्रचण्डतया अतिभीषणतया दुःसहतयेति भाव.। खलु निश्चितं मे मम विकृतिं चेतसोऽन्यथापत्तिं कोपमित्यर्थ। अकरोत् जनयामास। इदमेवाश्वधारणकारणमित्यर्थः। निखिलवीरजनावज्ञासूचकवचनात् क्रोधेनाश्व तुरङ्गम मयावरुद्ध इत्यर्थः। न च निसर्गदौर्जन्य-वशादिदमाचरितमिति भाव:। अत्राप्रस्तुतेन क इह गुणैस्तं राजानं न बहुमन्यते इति सामान्यवचनेन प्रस्तुतस्य विशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कार। अर्थापत्तिश्च, तयोरङ्गाङ्गिभाव: सङ्कर:। हरिणी वृत्तम्।

(ख) किन्नु इति। तातप्रतापोत्कर्षेऽपि तातस्य पितृव्यस्य ज्येष्ठतातस्य रामचन्द्रस्य

लव:। अस्मिन्नामर्षो मा भूद्वा, एतत्तु पृच्छामि,—दान्तं हि राघवं राजानं शृणुमः, स किल नात्मना दृप्यति, नास्य प्रजासु दृप्तत्वं जायते ; तत् किमस्य मनुष्या राक्षसीं वाचं वदन्ति। (ब)

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्व्ववैराणां सा हि लोकस्य निर्ऋतिः ॥३०॥

[(३०। ऋषय: उन्मत्तदृप्तयो: वाच राक्षसीम् आहुः। सा सर्व्ववैराणां योनि:, सा हि लोकस्य निर्ऋति:। इत्यन्वय:।]

य: प्रताप: प्रभाव: कोषदण्डजं तेज इत्यर्थ:। 'स्यात् प्रताप: प्रभावश्च यत्तेज: कोषदण्डज'-मित्यमर:। तस्य उत्कर्षेऽपि अतिशयेऽपि विषये भवत: अमर्ष: असहिष्णुता। रामचन्द्रस्यापि प्रतापोत्कर्षवचनं मत्तो निशम्य किं न सोढुं शक्नोषि इत्यर्थ:। स पाशुपतं शरासनं सावज्ञं बभञ्ज, त्रिभुवनविख्यातपौरुषं सकलसुराणां पराभवितारं दशाननं यमसदनं लम्भयामास ; यशांस्यानपि वीरत्वविशेषानसाधारणान् जगति विस्तारयामास, तस्यापि तथाविधस्य तात-पादस्य साधं न वक्ष्ये इति परो हासहेतुरेवेति भाव:।

(ब) अस्मिन्निति। इह अस्मिन् रामप्रतापोत्कर्षविषये अमर्ष: असहनम् अस्तु भवतु आस्तां वा न वा भवत्वित्यर्थ:। एतत् पृच्छामि तु किन्तु एतत् इदं वक्ष्यमाणं पृच्छामि ज्ञातुमिच्छामि। राजानं नृपतिं राघवं रामचन्द्रं, हि निश्चये, दान्तं निरहङ्कारमेव इन्द्रियजयशीलं गुणवन्तम् एव शृणुम: लोकमुखात् आकर्णयाम:। स किल, किलेति वार्तायां 'वार्ता सम्भाव्ययो: किले'त्यमर:। स रामचन्द्र आत्मना स्वयं न दृप्यति दर्पं प्राप्नोतीति। अस्य रामस्य प्रजासु प्रकृतिवर्गेषु अपि दृप्तत्वम् अहङ्कारित्वं न जायते अस्य प्रजा अपि न दृप्यन्तीत्यर्थ:। प्रधानानुयायिनो जनव्यवहारा भवन्तीति न्यायात् राज्ञ: शीलत्वात् प्रजानामपि तत्तु तरां विनयमेवेति भाव:। तत् तस्मात् रामस्य तत्प्रजानाञ्च अदृप्तत्वादित्यर्थ:। अस्य राघवस्य मनुष्या: अभिज्ञा: पुरुषा: सैनिका इति यावत्। किं कथं राक्षसीं असभ्यां वाचं वार्तां वदन्ति उदीरयन्ति।

(३०) राक्षसीं वाचं विवृणोति—ऋषय इति। ऋषय: सर्वज्ञा मुनय:। उन्मत्त-दृप्तयो: उन्मत्त: उन्मादकधातुना मादकद्रव्येण वा प्रमत्त: दृप्त: धनादिना गर्वित: तौ तयो: वाचं गिरं राक्षसीं राक्षसोचितां क्रूराम् अतिकर्कशाक्षराम् आहु: वदन्ति। सा ' वाक् सर्व्ववैराणां सर्व्वेषां सर्व्वप्रकाराणां विरोधानां योनि: कारणम्। तथा स ।र्त लोकस्य जनस्य निर्ऋति: निर्गता ऋति: यस्या: सा अमङ्गलविधायी दे ,पा इत्यर्थ:। "अलक्ष्मीस्तु निर्ऋति'रित्यमर:। 'ऋतिर्घृणी इत्यादौ शुभाख्ये ऋती-

'कृति.यं च यां निन्दन्ति, यथेतरामभिष्टुवन्ति । (ग)

कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्त्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ३१ ॥

[(३१। या वाक् कामान दुग्धे, अलक्ष्मीं विप्रकर्षति, कीर्त्तिं सूते, दुष्कृतं हिनस्ति, धीराः सूनृतां तां चापि एतां वाचं मङ्गलानां धेनुम् आहुः । इत्यन्वयः।]

ऽपिधेति रभसः। ईदृशीं गर्व्वितां वाचं श्रुत्वैव लोकाः क्रुद्धाः सन्तो वैरमुत्पादयन्ति तथा च वाचा सर्व्वविधमशुभं घटते इति भाव.। अत्र सा इति पदप्रतिपाद्यायां राजसां वाचि निर्ऋतित्वारोपात् रूपकालङ्कार.। 'सा सर्व्ववैराणां योनि'रित्यनेन तव वैराणां तादृशवाक्ये-नाङ्कुरः प्रभविष्यतीति 'सा हि लोकस्य निर्ऋति'रित्यनेन—कुशलम् श्रियम् लक्ष्मीः परित्यज्य अलक्ष्मीमेव समापयिष्यतीति च वस्तु व्यज्यते, तेन वस्तुना रूपकालङ्कारेण [illegible] वस्तुध्वनिः।

(ग) इति हेति। इति हेत्येकमव्ययम्। "पारम्पर्य्योपदेशे स्यादैतिह्यमिति [illegible]"-मित्यमरः। अत्यतीतार्थकम। तां राजसीं वाचं निन्दन्ति च, यथेति .भिन्नवाक्यारम्भे, इतरां वक्ष्यमाणाम् अन्यां राजसीभिन्नां वाचम् अभिष्टुवन्ति प्रशंसन्ति च, आर्य्या इति शेषः। राजसायाः वाचः सकलवैरकारणतया नितरामलक्ष्मीस्वरूपतया च पुराणा आर्य्यास्तां परित्यज्य अन्यां वाचं व्याहर्तुमुपदिशन्तीत्यर्थः।

(३१) ताम् इतरां वाचं विवृणोति—कामानिति। या वाक् कामान् अभिलाषान्, मनोरथानिति यावत्, दुग्धे प्रपूरयति। यया वाचा श्रोतारः प्रीताः सन्तः वक्तुरभिलाषान् पूरयन्तीत्यर्थः। तथा अलक्ष्मीं निर्ऋतिम् अशुभं विप्रकर्षति निराकरोति दूरीकरोतीत्यर्थः, सर्वशुभकारणत्वादमङ्गलपरम्परां नाशयतीति भावः। कीर्त्तिं यशः सूते जनयति, यस्याः कृते साधवः सर्व्वत्र प्रशंसन्तीति भाव.। दुष्कृतं पापं हिनस्ति नाशयति, तादृशवाग्विनिवेशनेन कृता-भावतादिवत् पापनाशे सामर्थ्यादिति भावः। तामेतां मङ्गलानां शुभानां [illegible] मातरं जनयित्रीं निखिलमङ्गलकारणभूतामित्यर्थ., सूनृतां सत्यां प्रियाञ्च, 'सूनृतं [illegible] प्रियसत्ये वचस्यपि' इति अमरः। वाचं वाणीं धीराः ज्ञानशीलाः विद्वांसः धेनुं [illegible] कामधेनुवत् सकलाभीष्टदायिनीम् आहुः वदन्ति, कामधेनुरिव सूनृता वाक् [illegible] [illegible] गम्यते। अत्र दुग्धे विप्रकर्षतीत्याद्यनेकक्रियाणां [illegible] [illegible]। यथा तां वाचं [illegible] [illegible] [illegible] रूपो निदर्शनालङ्कारः। शालिनी वृत्तम्॥

सुमन्त्रः। परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदति अयमभिसम्पन्नमार्षेण संस्कारेण। (घ)

लव। यत् पुनश्चन्द्रकेतो! वदसि,—किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष इति; तत् पृच्छामि,—किं व्यवस्थितविषयाः क्षत्रधर्मा इति? (ङ)

सुमन्त्र। नैवं खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि; तद्विरम विरम अतिप्रसङ्गात्। (च)

(घ) परिपूतेति। प्राचेतसान्तेवासी प्राचेतसस्य वाल्मीकेः अन्तेवासी शिष्यः परिपूतस्वभावः परिपूतः अतिपवित्रः स्वभावः चरित्रं यस्य स तथोक्तः निर्मलचरित्रः अयम् एष [illegible] अयः आर्षेण ऋषिजनोचितेन। अभ्युपपन्नमार्षेण इति क्वचित् पाठ, तत्र उत्पन्ना [illegible] इति अर्थ. कर्तव्य। संस्कारेण वासनया ज्ञानविशेषेण व्युत्पत्त्या इति यावत्, अभिसम्पन्नम् अनुगत संयुक्त वचनमिति शेष। वदति वक्ति। अनेन ऋषिवाक्यवत् सयुक्तिकं [illegible] वचनम् उच्यते इत्यर्थ।

(ङ) यत् पुनरिति। हे चन्द्रकेतो! त्व यत् पुनः वदसि कथयसि तातप्रतापोत्कर्षेऽप्यमर्षं इति, रामचन्द्रस्य प्रभावाधिक्यावगमेऽपि किन्तु भवत. अमर्षः असहिष्णुतेति यत् भा[illegible]:। तत् तस्मात् पृच्छामि त्वा जिज्ञासे—क्षत्रधर्मा. क्षत्रस्य राजन्यस्य धर्माः शौर्यादयो गुणाः किं व्यवस्थितविषया. व्यवस्थित: निर्दिष्टः विषय. आश्रयः येषां ते तथोक्ता., रामचन्द्रमात्रनियताधिकरणका इत्यर्थ.। क्षत्रजातिः शौर्यप्रतापादय. स्वभावाः किं कुत्रचित् निर्दिष्टे पात्रे देशे काले वा विधिना व्यवस्थिताः, रामादौ शौर्यादीनां क्षत्रधर्माणाम् उत्कर्षे [illegible] पुरुषान्तरे किं तेषाम् अतिशयो भवितुं नार्हति? इति तात्पर्यं:।

(च) नैवेति। खलु निश्चये। ऐक्ष्वाकम् इक्ष्वाकोरपत्यं पुमान् तम् इक्ष्वाकुवंशोद्भवं देवं राजानं "राजा भट्टारको देव" इत्यमर:। त रामचन्द्र न जानासि एव अलौकिकशौर्य[illegible]कारं तं रघुपतिं रामं त्वं नूनं न वेत्सि। अत्रार्थे हेतुमाह—यदिति। यत् यस्मात्, एवम् इत्थं प्रगल्भं वदसि भाषसे। रामस्य लोकोत्तरशौर्यादिकं त्वं यदि जानीयाः तदा नैवं वदितुं शक्नुयाः। सर्वथा अपरिचय एव तवेदृशप्राग[illegible] भावः। [illegible] [illegible] अतिप्रसङ्गात् अनिष्टप्र[illegible] तं प्रति [illegible] विरम विरम, [illegible]। [illegible] [illegible] तवैतत् वदर्थं वच, न शोभते अतः तस्माद्विरतो भवेत्यर्थः।

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया ।
जामदग्न्यस्य दमने नैव निर्बन्धुमर्हसि ॥ ३२ ॥

[(३२) त्वया सैनिकानां प्रमाथेन ओजायितं सत्यम् । जामदग्न्यस्य दमने एवं निर्बन्धुं न अर्हसि ॥ इत्यन्वयः ।]

लव । [सहासम्] आर्य्य । जामदग्न्यस्यापि दमनः स राजा इति—कोऽयमुच्चैर्वादः । (च)

सिद्धं ह्येतद्वाचि वीर्य्यं द्विजानां
बाह्वोर्वीर्य्यं यत्तु तत् क्षत्रियाणाम् ।
शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन् दान्ते का स्तुतिस्तस्य राज्ञः ॥ ३३ ॥

[(३३) एतत् सिद्धं यत् द्विजानां वीर्य्यं वाचि (स्थितम्) । यत् तु बाह्वोः वीर्य्यं

---

(३२) सैनिकानामिति । सैनिकानाम् अस्माकं तरक्षरक्षिसैन्यानां प्रमाथेन विमर्देन पराजयेन हेतुना त्वया ओजायितम् ओजस्विनेवाचरितं ओजस्विता प्रदर्शिता इत्यर्थः । सत्यं निश्चितमेव । यत् त्वमसहायो बालकोऽपि अस्मात्सैन्यसङ्घात् जिगयिथ तत् तवातुलवीर्य्यं प्रकाशयति नात्मत्र सन्देहः । किन्तु तथापि जामदग्न्यस्य क्षत्रियकुलान्तकस्य जमदग्निपुत्रस्य परशुरामस्य अद्वितीयवीरस्येत्यर्थः दमने विजेतरि रामे एवम् ईदृशं सदर्पं "किं व्यवस्थितविषया क्षत्रधर्म्माः" इत्येवप्रकारमित्यर्थः । निर्बन्धुं निर्णेतुं औद्धत्यं भाषितुमित्यर्थः, न अर्हसि शक्नोषि । य खलु निःक्षत्रकृत् क्षत्रान्तकारिणः परशुरामस्य विजेता, तस्य शौर्य्यादिकं त्वादृशैर्नूनं सम्भवितव्यमेवेति भावः । ओजायितमिति ओजस्वीभूततद्भावे इत्यनेनान्वयः, ओजोऽस्यास्तीति वाचि वर्त्तत इति सलोपः ततो भावे क्तः, ओजस्विनापि त्वया कथञ्चित् सम्प्रति सैनिकानां प्रमाथेन हेतुना ओजस्विना जातमिति न ते स्वाभाविकमोजस्वित्वमतो वीरत्वेन रामचन्द्रं प्रति कटाक्षनिक्षेपोऽनुचित इत्ययमर्थोऽभूततद्भावविहितेनायप्रत्ययेन लभ्यते । इति केचित् । अत ओजायितमित्युपमा, सा च क्यङ्प्रत्ययसमुत्पादिता, 'आधारे कर्म्मविहिते द्विविधे च क्यचि क्यङि । कर्म्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा तत ।' इति दर्पणवचनात् ।

(च) आर्य्येति । सहासं सोपहासं यथा तथा आह । स राजा रामचन्द्रः जामदग्न्यस्यापि ब्राह्मणस्य परशुरामस्य अपि दमनः विजेता इति अस्माकं पित्रोः अग्रे कः कोऽयम् उच्चैर्वादः प्रशंसावाक्यम् । ब्राह्मणकुमारस्य तस्य पराजयेन का वा राज्ञः क्षत्रियस्य गौरवं वापि गौरवम्; ।

तत् क्षत्रियाणाम्, जामदग्न्यः शस्त्रपाणी ब्राह्मणः, तस्मिन् दान्ते तत्र रामस्य का स्तुतिः। इत्यन्वयः।]

चन्द्र। [सोन्मादमिव।] आर्य्य! आर्य्य! अलमुत्तरोत्तरेण। (ख)

कोऽप्येष सम्प्रति नवः पुरुषावतारो
वीरो न यस्य भगवान् भृगुनन्दनोऽपि।
पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद॥ २४॥

[२४। सम्प्रति कः अपि नव एव पुरुषावतारः, भगवान् भृगुनन्दनः अपि यस्य न वीरः। यः च पर्य्याप्तसप्तभुवनाभयदक्षिणानि पुण्यानि तातचरितानि न वेद। इत्यन्वयः।]

---

(२९) अथ हेतुं दर्शयति— सिद्धमित्यादि। एतत् इदं हि निश्चितं सिद्धं सर्व्वलोकप्रसिद्धं, सर्व्वलोकविदितं वा। यत् द्विजानां ब्राह्मणानां वीर्य्यं बलं वाचि वाक्ये स्थितम् इति शेषः। ब्राह्मणाः तपस्विनो दुर्व्वासप्रभृतयः सिद्धवाचः, अतः शापप्रदानेन महान्तमपि दमयितुमर्हन्ति न ते भुजवीर्य्यशालिन इति भावः। तथा च ताण्ड्यमहाब्राह्मणे—'ब्राह्मणो मुखेन वीर्य्यं करोति मुखतो हि सृष्ट' इति। तु किन्तु बाह्वोः भुजयोः यत् वीर्य्यं बलं तत् क्षत्रियाणां राजन्यानां न तत् ब्राह्मणानामस्तीति शेषः। ब्राह्मणानां विराजो मुखसम्भवत्वात् मुखे एव तेषां वीर्य्यं, बाहुजत्वात् क्षत्रियाणां बाह्वोः बलं प्रसिद्धम् इति भावः। स ब्राह्मणो जामदग्न्यः पुनः शस्त्रजोऽसौ विप्रः शस्त्रपाणी शस्त्रधारी, निर्वीर्य्याभ्यां बाहुभ्यामस्त्रं धारयन्नपि क्षत्रियवत् पराक्रमितुं न शक्नोतीति भावः। अतः तस्मिन् निर्वीर्य्यभुजत्वात् शस्त्रप्रयोगाक्षमे जामदग्न्ये दान्ते विजिते सति तत्र रामस्य का स्तुतिः का प्रशंसा नापि इत्यर्थः। ब्राह्मणस्यास्य विजयादात्मनः न किमपि गौरवमित्यर्थः। कमपि वीरं क्षत्रियं विजेतुं चेत् शक्नुयात् तदेव सत्यं प्रशंसेति भावः। अत्र बाह्वोर्वीर्य्यं क्षत्रियाणाम् इत्यनेन न तद्ब्राह्मणानाम् इत्यर्थापत्त्या अन्यव्यपोहात् परिसंख्यालङ्कारः। वृत्तं मालिनी नाम।

(ख) सोन्मादमिव उन्मादेन मर्म्मपीडया सह वर्त्तमानं यथा तथा। "उन्मादः कृष्णके आत्मातपे वातकी प्रमाद्" इति मेदिनी। आर्य्य आर्य्य इति क्रोधे द्विरुक्तिः। उत्तरोत्तरेण उत्तरात् उत्तरम् इति उत्तरोत्तरं वाक्यात् परं वाक्योच्चारणं तेन अलम् अलम्। ... रामपराजयेच्छयाभिमानशालिना वा ... स्तिमवृत्ति- ... बाहुल्यापरिचायकं, तथा वाक्यालापो न कर्त्तव्यः इत्यर्थः।

(३०) कविस्वाभिमतकथं दर्शयति—कोऽप्येष इत्यादिना। ... कोऽपि अनिर्दिष्टस्वभावः अनिर्वचनीय इति यावत्, नवः नूतनः अदृष्टपूर्व्वः एषः अयं पुरुषावतारः

लव । को हि रघुपतेश्चरितं महिमानञ्च न जानाति, यदि नाम किञ्चिद्वक्तव्यमस्ति, अथवा शान्तम् । (ख)

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु, किं वर्त्तते *

सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते ।

यानि त्रीण्यपराङ्मुखान्यपि † पदान्यासन् खरायोधने

यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३५ ॥

पुरुषरूपेणावतीर्णः । यस्य नवावतीर्णपुरुषस्य समीपे भगवान् सर्व्वशक्तिसम्पन्नः भृगुनन्दन परशुराम अपि न वीरः न शूरः वीरत्वेन न गण्य इत्यर्थः । यः किं समस्तक्षत्रियकुल मूलच्छेत्तारं जामदग्न्यमपि वीरं न मन्यते स नूनम् अलौकिकशक्तिसम्पन्नः कोऽपि देवयोनि-विशेषोऽत्र भुवने मनुष्यरूपमास्थायावतीर्णोऽस्ति इत्यर्थ च किञ्च यः पर्य्याप्तसप्तभुवनाभय-दक्षिणानि सप्तानां भूर्भुवःस्वरादीनां भुवनानां समाहारः सप्तभुवनं, पर्य्याप्ता "क्लान्तं प्रकामं पर्य्याप्तं यथेप्सित"मित्यमरः । इत्थं परिपूर्णा सप्तभुवनस्याभयं भयनिवारणं तदेव दक्षिणा प्रत्युपकारनिरपेक्षं स्वाभ्युदयमुद्दिश्य दानं येषु, यद्वा दक्षिणा यज्ञान्ते ब्राह्मणेभ्यो दीयमानं कर्म्मसाद्गुण्यार्थं गोहिरण्यादिकं, अत्र दक्षिणाशब्दस्य दानमिति लाक्षणिकोऽर्थः । अभयस्य दक्षिणादानम् इत्यर्थः । अभयमेव दानमिति वा तानि तथोक्तानि । अखिललोककण्टकस्य रावणस्य सवंशोन्मूलनात् समस्तलोकवासिनामभयदायकानीत्यर्थः । यद्वा पर्य्याप्तं यत् सप्त भुवनानाम् अभयं तत्र दक्षिणानि अनुकूलानि निपुणानि वा । पुण्यानि पवित्राणि तात-चरितानि तातस्य ज्येष्ठतातस्य रामचन्द्रस्य चरितानि आचरणानि शुभकार्य्याणि न वेद न बुध्यते ; तन्मन्ये नूनमयं विधातृविहितः नूतनो भूतविशेष इति भावः । तद्दर्शने तत्र उचितमनुचितं वा निर्णयेति तात्पर्य्यम् । अत्र रामचरितसत्यवक्ता जगदभयदानमेव दक्षिणेति वर्णनादनुपमालङ्कारः । तथा प्रतीयमानः लवस्यानभिज्ञत्वादिकं भङ्ग्यन्तरेणाभिहितमिति पर्य्यायोक्तमलङ्कारश्च । भृगुनन्दनोऽपि इत्यपिशब्देन अनुक्तस्य तदन्यजनानां सुतरां वीरत्वा भावप्रत्ययात् अर्थापत्तिरपि । वसन्ततिलकं वृत्तम् ।

(ख) क इति । रघुपतेः रामचन्द्रस्य चरितम् आचरणं कर्म्मेति यावत्, महिमानं च प्रभावञ्च । कोऽपि न जानाति कः जनः हि निश्चितं न वेत्ति अपितु सर्व्व एव जानातीत्यर्थः । यदि यद्यपि नामेति कुत्सायामव्ययम् । यद्वा यदि नामेति किन्तु इत्यर्थः । किञ्चित् ईषत् वक्तव्यं वाच्यं रघुपतिचरितस्य किञ्चित् कुत्सितं वाच्यमस्ति इत्यर्थः । अथवा शान्तमर्हति तत् निष्प्रयोजनं तच्चरितालोचनेनालमित्यर्थः ।

* हुं वर्त्तते इति क्वचित् पाठः ।

† अकुतोमुखानि इति पाठान्तरम् ।

[(२५) वृद्धाः ते न विचारणीयचरिताः, तिष्ठन्तु, किं वर्ण्यते। सुन्दस्त्रीदमने अपि अखण्डयशसः ते हि लोके महान्तः। खरायोधने यानि त्रीणि अपराङ्मुखानि अपि पदानि आसन्; इन्द्रसूनुनिधने यद्वा कौशलं तत्र अपि जनः अभिज्ञः।] इत्यन्वयः।

---

(२५) ननु कथं नालोचनीयमित्यत आह—वृद्धा इति। वृद्धाः प्रवयसः स्थविरा इति यावत्, ते रामादयः न विचारणीयचरिताः विचारणीयं सत् असत् वा इति समालोचनीयं चरितं कर्म येषां ते तथोक्ता न भवन्ति, वर्षीयसां तेषामाचरणस्यालोचनं न कर्त्तव्यमित्यर्थः। अतः तिष्ठन्तु आसताम्। किं वर्ण्यते वर्णनीयं किमस्ति, वर्णनायान्तु दोषोद्घाटनमेव स्यादिति आस्तां तावत्तद्वर्णनम्। बालकेन मया वयोवृद्धस्य तस्य चारित्रविचारः न कार्य्य इति भावः। सुन्दस्त्रीदमनेऽपि सुन्दस्य तन्नामकस्य स्त्री पत्नी ताडका, तस्याः दमने हनने कृतेऽपि स्त्रीहत्या-जनितमहापातके कृते सत्यपीत्यर्थः। अखण्डयशसः अखण्डं सम्पूर्णं यशः कीर्त्तिर्येषां ते तथोक्ताः। ते हि रामादयः लोके भुवने महान्तः गुरवः पूजनीया इति यावत्, स्त्रीहत्यारूप-गर्हितं कर्म्म कृतवतोऽपि तस्य यशो न मलिनीभूतं, न वा गौरवहानिरिति सोपहासोक्तिः। तथा खरायोधने खरस्य खरेण सह वा आयोधने युद्धे 'अभ्यमर्दोऽयोधनं युद्धं प्रधनं प्रविदारणम्'इत्यमरः। यानि त्रीणि अपराङ्मुखानि अविमुखानि अदर्शितपृष्ठानि अपि पदानि, अत्यन्तमासन्नो भूत्वा खरः स्थितः, तदा रामः पादत्रयं निहत्य न जघानेति प्रसिद्धिः, पश्चादपसरणरूपाणि आसन् अभवन्। रामस्येति शेषः। अपिच, वा अथवा, इन्द्रसूनुनिधने इन्द्रस्य शक्रस्य सूनुः पुत्रः तस्य वालिनः वानरराजस्य निधने विनाशने यत् कौशलं नैपुण्यं चातुरीति यावत्, अन्तर्धान-पूर्व्वकवधरूपम् इत्यर्थः। सुग्रीवेण सहारब्धसंग्रामे वालिनि प्रच्छन्नेन रामेण यत् बाणपातः कृत इत्यर्थः। तथापि तस्मिन्नपि वीरजनगर्हिते गौरवापकर्षके रामाचरिते जनः लोकः अभिज्ञः, एतत् सर्व्वं लोकः जानातीत्यर्थः। न केवलं रावणवधेन रामस्य भुवनभारहरणजन्ययशः एव जनो जानाति, ताडकावधखरसमरवालिनिधनवृत्तान्तानपि जानातीत्यभिप्रायः। अत्र ताडका-वधादिषु रामायणप्रमाणमनुसन्धेयं, यथा—"नहि ते स्त्रीवधकृते घृणा कार्य्या नरोत्तम" इत्यादि। "विव्यथः स कृतो बाणैः खरो रामेण संयुगे" इत्यादि। रावणः वाणक्षेपावकाशो यथा न भवति तथोपर्य्युपर्यापतन्तं खरं दृष्ट्वासन्नौ धनुर्व्यापारो न स्यादिति खरशरीरे तद्रुधिर-कामलिप्ता च त्रीण्यपि पदानि त्वरितपदन्यासो वामं सव्यदेव पृष्ठतोऽपासर्पत्; अनेन महावलत्वं खरस्योक्तम्। अथवा आत्मरक्षार्थमेव रामः त्रिभिः पदैरपसर्पणं कृतवानिति ... गार्वेण-तया खरायोधने रामः पलायितवान् इति कटाक्षितवानिति बोध्यम्, ... नस्ता-वीर्य्यजनकत्वादिति। तथा लोकस्य कपटयुद्धादिकं च वीरजातीय गर्हितम् ...। इत्यास्य-भ्रातृवधनानामनुसन्धेयम्। धर्म्मवीरभक्तिया आज्ञानुवर्त्तितया च तान्यपि न दर्शितानि। अत्र

चन्द्र। आः तातापवादभिन्नमर्य्याद ! अति हि नाम प्रगल्भसे। (ग)

लवः। अये मय्येव भ्रुकुटीधरः संवृत्तः। (घ)

सुमन्त्र.। स्फुरितमनयोः क्रोधेन। तथाहि—(ङ)

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः *
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥३६॥

[३६। आकूतजः वेपथुः चूडामण्डलबन्धनं तरलयति स्वयं कोकनदच्छदस्य किञ्चित् सदृशे नेत्रे रज्यतः, वक्त्रं अकाण्डताण्डवितयोः भ्रुवोर्भङ्गेन उत्कटलाञ्छनस्य चन्द्रस्य उद्भ्रान्तभृङ्गस्य कमलस्य च कान्तिं धत्ते। इत्यन्वयः।

वक्तुनिष्टस्य रामदोषस्य तिरस्कृत्यनेन विशेषप्रतिपत्तये निषेधाभासाक्षेपालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।

(ग) आः इति। आः इति क्रोधसूचकमव्ययम् "आस्तु स्यात् कोपपीडयो"रित्यमरः। तातापवादभिन्नमर्य्याद। तातस्य ज्येष्ठतातस्य रामभद्रस्य अपवादेन जुगुप्सया भिन्ना खण्डिता मर्य्यादा सदाचारपद्धतिर्येन स तत्सम्बोधनम्। रामभद्रविषयदोषारोपेणातिक्रान्तसदाचार! त्रिभुवनविख्यातमाहात्म्यस्य रामचन्द्रस्य तिरस्कारात् बालकस्य तवास्य मर्य्यादालङ्घनमिति बोध्यमिति भावः। अति हि नाम, हि शब्द अवधारणे "हि हेतावधारणे" इत्यमरः। नामेति क्रोधोपगमे, "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने"रित्यमरः। अति हि अत्यन्तमेव प्रगल्भसे विकत्थसे, रामचन्द्रमायात्मनौर्य्यं प्रकटयसीत्यर्थः। अचिरादेव तवैतदगर्व्व-चूर्णनं मया कर्त्तव्यमिति भावः।

(घ) अये इति। अये इति भयप्रासूचकसम्बोधनम्। मय्येव साक्षात् तवापमान-विमर्दने महावीर्य्यशालिनि मयि एव भ्रुकुटीधरः कोपयुक्तभ्रूभङ्गान्वितमुखः संवृत्तः जातः। भ्रुवोः कुटीति भ्रुकुटी तस्या धरः इति विग्रहः। अथ भ्रु' सादीनामिति कायम् इति पक्षे भ्रकुटी भृकुटीरपि भवति। दुर्ष्पितसैन्यानि मया एकेनैव निर्ज्जितानि इति जानतोऽप्यस्य निर्भय एव मयि यत् कुप्यति तत् सर्व्वमेव ते बालबुद्धिताधाः समुचितं कार्य्यं सम्भाव्यत इति भावः।

(ङ) स्फुरितमिति। अनयोः कुमारयोः चन्द्रकेतुलवयोः क्रोधेन कोपेन स्फुरितं चापचलितं भावे क्तः। अनयोरतीव कोपः प्रकाशितः इत्यर्थः। तदेव दर्शयन्नाह—चूडेत्यादि।

---

* क्रोधेनोद्धतधूतकुन्तलभरः सर्व्वाङ्गजो वेपथुः इति पाठान्तरम्।

कुमारौ । तदितो विमर्दक्षमां भूमिमवतरावः । (च)

इति निष्क्रान्ताः सर्वे । (छ)]

इति कुमारविक्रमो नाम पञ्चमोऽङ्कः । (ज)

---

(३६) चूडेति । आकूतजः आकूतादन्योऽन्यविमर्दनाभिलाषात् जायते यस्तयोक्त । 'आकूतं स्यादभिप्राय' इति हलायुधः । परस्परपराजयाभिप्रायजनित वेपथुः कम्प. चूडा- चञ्चलचलनं चूडाचञ्चलस्य शिखासमूहस्य "शिखा चूडा केशपाशी"त्यमर. । चञ्चलं संयमनं तरलयति चञ्चलं करोति क्रोधातिशयवशादनयोः मूर्धानौ मुहुः कम्पेते इत्यर्थः । कोकनद- च्छदस्य कोकान् चक्रवाकान् नदति नादयतीति कोकनदम् । तस्य कोकनदस्य रक्तोत्पलस्य छदस्य दलस्य 'रक्तोत्पलं कोकनदम्' 'दलं पर्णं छद पुमा'निति चामरः । किञ्चिदोषत् सदृशी तुल्ये लाञ्छनवतः ईषद्रक्ते नेत्रे नयने स्वयम् आत्मना क्रोधोपगमात् इत्यर्थः, रज्यतः रक्तीभवत । स्वभावादीषद्रक्तवर्णे अनयोर्नेत्रे कोपवशात् अतिमात्र रक्तिमानमापद्येते इत्यर्थः । तथा वक्त्रम् अनयोः मुखं आत्याच्छायामिकत्वम् भ्रकान्त भ्रमवसरे तात्कालिकयोः भ्रुवोर्भ्रूलतयोः उत्क्षिप्तयो- रित्यर्थः । भ्रुवोः भङ्गेन पृथग्भावेन भयङ्कर्यो भ्रुकुट्या इत्यर्थं । उत्कटलाञ्छनस्य उत्कट' सुव्यक्तं लाञ्छनं कलङ्क यस्य स तथोक्तस्य "कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षण"- मित्यमरः । प्रकटाङ्कस्य चन्द्रस्य विधो । उद्भ्रान्तभ्रमरस्य च उद्भ्रान्ता' उपरि पतन्त' भ्रमरा. भ्रमरा यस्य तथोक्तस्य कमलस्य पद्मस्य कान्ति शोभा धत्ते धारयति । अनयोरानमवर्ण्य वक्त्रपद्मतुल्यं च मनोभिरामं कमलस्यमदवन नान्या इति तात्पर्यम् । अत्र उत्कटलाञ्छनस्य विधोः आक्षिप्तभ्रमरस्य पद्मस्य च या कान्ति. तत्सदृशी कान्तिरिति बिम्बप्रतिबिम्बभावापन्नता- [illegible] निदर्शनालङ्कार., तथा विचित्रितवशाद्रक्तनेत्रतादिभिर्लिङ्गै. क्रोधस्य बोधस्य ज्ञानात् अनुमानालङ्कार, अनयोरङ्गाङ्गिभावसङ्कर. । अनुप्रासश्च । शार्दूलवि- क्रीडितं वृत्तम् ।

(च) तदितीति । तस्मात् इतो. विमर्दक्षमा युद्धकर्मयोग्यां भूमि स्थानम् अव- तराव: गच्छाव:—परस्परविक्रमप्रकाशनार्थं कुमारौ युद्धक्रिया तदनुकूलं स्थान निष्क्रमितवन्तौ इत्यर्थः ।

(छ) इतीति । सर्वे नटाः निष्क्रान्ताः रङ्गालयाद्विनिर्गताः ।

(ज) इतीति । कुमारविक्रमो नाम कुमारयो: लवस्य चन्द्रकेतोश्च [illegible] पराक्रम: यत्र वर्णितः । कुमारविक्रम इति नाम्ना प्रसिद्धः । पञ्चमः अङ्क परिच्छेद. समाप्तः । 'इति श्रीकुमारविक्रमनामाङ्कविवरणमिति'शेषः ।

षष्ठोऽङ्कः ।

[ततः प्रविशति विमानेनोज्ज्वलेन विद्याधरमिथुनम् । (क)]

विद्याधरः । अहो खलु अनयोर्विकर्त्तनकुलकुमारयोः अकाण्ड-कलहप्रचण्डयोः उद्योतितधामलक्ष्मीकयोः अद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि । तथाहि—(ख)

प्रिये । पश्य पश्य—(ग)

भयभ्रमितकञ्चुकस्खलितकिङ्किणीकं धनु-
र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम् ।

(क) ततः इति । युद्धस्य दृश्यत्वप्रतिषेधात् विष्कम्भकेन तदाह—विद्याधरमिथुन-मित्यादिना । उज्ज्वलेन रत्नादिखचितत्वात्तेषां किरणैः उज्ज्वलं दीप्यमानं तेन विमानेन व्योमयानेन विद्याधरमिथुनं विद्याधरः कामचारी देवयोनिविशेषः । विद्याधरी च विद्याधरश्च विद्याधरौ तयोर्मिथुनं युग्मम् इति एकशेषः प्रविशति रङ्गभूमिमिति शेषः ।

(ख) अहो इति । अहो आश्चर्यम् । अकाण्डकलहप्रचण्डयोः अकाण्डे अनवसरे यः कलहः विवादः तेन प्रचण्डौ भीषणौ तयोः उभयोरप्येककालेन नाशकहेतुत्वेनैव क्रूरौ, अकारणसमरप्रवृत्तयोरित्यर्थः । अकस्मादुत्पन्नेन समरेण भीमयोरिति वा । उद्योतितधाम-लक्ष्मीकयोः धामलक्ष्मीम् इति धाम्नी उद्योतिता उद्दीपिता धाम्नी [illegible] लक्ष्मी-र्यो याभ्यां ययोर्वा, तौ तयोस्तौ तयोः, समासान्तकप्रत्ययः । प्रकटितवीर्यसम्पदोः. विकर्त्तन-कुलकुमारयोः विकर्त्तनस्य सूर्यस्य 'विकर्त्तनार्कमार्त्तण्डमिहिरारुणपूषणः' इति सूर्यपर्यायेऽमरः; कुलं वंशः तज्जातकुमारौ बालकौ तयोः सूर्यवंशीयबालकयोः [illegible] अद्भुतोद्भ्रान्त-देवासुराणि अद्भुतेन अद्भुतरसेन उद्भ्रान्ता विक्रान्ता [illegible] देवा असुराश्च यैः तानि विक्रान्तचरितानि विक्रमानुष्ठानानि [illegible] इत्यर्थः । [illegible] रतयोः [illegible] देवा असुराश्च विस्मयेन परवशा जाताः इत्यर्थः । तथाहि तं विक्रमप्रकारमेव आलोकि ।

(ग) प्रिये इति विद्याधरीं सम्बोधयति । [illegible]

वितत्य किरतोः शरानविरतस्फुरच्चूडयो-

र्विचित्रमभिवर्द्धते भुवनभीममायोधनम् ॥ १ ॥

[१ । झणज्झणितकङ्कणक्वणितकिङ्किणीकं ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलं धनुः वितत्य शरान् किरतोः अविरतस्फुरच्चूडयोः भुवनभीमं विचित्रम् आयोधनम् अभिवर्द्धते । इत्यन्वयः ।]

विजृम्भितञ्च दिव्यस्य * मङ्गलाय द्वयोरपि ।

स्तनयित्नोरिवामन्द्रं † दुन्दुभेर्दुन्दुमायितम् ॥ २ ॥

[२ । द्वयो अपि मङ्गलाय स्तनयित्नोः इव दिव्यस्य दुन्दुभेः आमन्द्रं दुन्दुमायितं विजृम्भितम् इव । इत्यन्वयः ।]

---

(१) झणेति । झणज्झणितकङ्कणक्वणितकिङ्किणीकं झणज्झणित झणझणेत्या-कारकशब्दान्वितं यत् कङ्कणं कराभरणं तद्वत् क्वणित रणित यासां ता. तथोक्ताः ताडश-शब्दवत् क्वणिताः शब्दिता इति वा किङ्किण्यः क्षुद्रघण्टिकाः यस्य तत् तथोक्तम् । ध्वनद्-गुरुगुणाटनीकृतकरालकोलाहलं ध्वनता शब्दं कुर्वता महता गुणेन मौर्व्या अटनीभ्याम् धनुरग्रद्वयेन च कृतः जनितः करालः भीषणः कोलाहलः कलकलः शब्दः यस्य तत् तथोक्तम्, गुणाटनीसङ्घर्षात् उत्पद्यमानविकटशब्दं धनुः कार्मुकं वितत्य विस्तार्य शरान् बाणान् किरतोः निक्षिपतोः अविरतस्फुरच्चूडयोः अविरतं निरन्तरं स्फुरन्त्यः कम्पमानाश्चञ्चला इति यावत्, चूडाः शिखा ययोः तथाभूतयो शरनिक्षेपात्कम्पात् चालितशिखयोः अनयोः कुमारयोः, भुवनभीमं जगतां भयङ्करं विचित्रं विस्मयावहम् आयोधनं युद्धम् अभिवर्द्धते उत्तरोत्तरं वृद्धिं गच्छति । झणज्झणादि समासगता उपमा, अनुप्रासस्तु स्पष्टः । पृथ्वी वृत्तम् ।

(२) विजृम्भितमित्यादि । द्वयो. अपि अनयोः चन्द्रकेतुलवयोः कुमारयोः मङ्गलाय कल्याणाय विजयलाभायेत्यर्थः. स्तनयित्नोरिव मेघस्येव इव दिव्यस्य स्वर्गीयस्य दुन्दुभेः दुन्दुभिरिति शब्देन भातीति दुन्दुभिरिति अमरटीकायां रघुनाथः । वाद्यविशेषस्य आमन्द्रं गम्भीरं दुन्दुमायितं दुन्दुमेत्याकारः शब्दः विजृम्भितम् प्रादुर्भूतम् । अनयोः कुमारयोर्मङ्गलार्थं देवाः दिवि माङ्गल्यं दुन्दुभिशब्दं कुर्वन्तीत्यर्थः । दुन्दुमायित-

---

* दिव्यास्त्रम् इति पाठान्तरम् । जृम्भितश्च विचित्राय इत्य कचिद्-दृश्यते ।

† आमन्द्रदुन्दुभेरिति पाठान्तरम् ।

तत् प्रवर्त्तताम् अनयोः प्रवीरयोः अनवरतम् अविरलललित-विकचकनककमलकमनीयसंहतिः अमरतरुतरुणमणिमुकुलनिकर-मकरन्दसुन्दरः पुष्पनिपातः। (ग)

विद्याधरी। ता किंत्ति उण अआण्डविप्फुरिदतडिच्छडाअडारं विअ अम्बरं झत्ति संवुत्तं। (घ)

[(घ) तत् किमिति पुनरकाण्डविस्फुरिततडिच्छटाकडारमिव अम्बरं झटिति संवृत्तम्। इति सम्।]

विद्याधर। तत्किम् खलु अद्य! (ङ)

मिति अव्यक्तानुकरणाद्दुमिति शब्दात् डाचि द्वित्वे दुन्दुमा, ततः लोहितादिडाज्भ्यः [illegible] क्यषप्रत्यये दुन्दुमायेति नामधातो भावे क्त।

(ग) तदिति। तत्तस्मात् प्रवीरयोः प्रकृष्टवीरयोः अनयोः कुमारयोः उपरीति शेषः। अविरलललितविकचकनककमलकमनीयसंहतिः अविरलानि सान्द्राणि प्रचुराणि ललितानि सुन्दराणि मनोहराणीति यावत्, विकचानि विकसितानि यानि कनककमलानि हेमसरोरुहाणि तैः कमनीया मनोहरा संहतिः समूहः यस्य स तथोक्तः। तथा अमरतरुतरुणमणिमुकुल-निकरमकरन्दसुन्दरः अमरतरूणां सुरपादपानां मन्दारादीनां तरुणानि नवोद्गतानि यानि मणिमुकुलानि मणिमयकलिकाः तेषां निकरस्य समूहस्य मकरन्दैः पुष्परसैः मधुभिः सुन्दरः मनोहरः पुष्पनिपातः सुरतरुप्रसूनवृष्टिः अनवरतं निरन्तरं प्रवर्त्तताम् आरभ्यतां विधीयता-मित्यर्थः। देवा अपि दुन्दुभिवादनादिभिर्यत् आनन्दं प्रकाशयन्ति, [illegible] पारिजातकुसुमसङ्घातयुक्ता पुष्पवृष्टिरनयोरुपरि कर्त्तव्येत्यर्थः सर्वैर्लोकाभिनन्दनीयावेतौ इति भावः।

(घ) ता इति। तत् किमिति प्रश्ने अव्यय पदम्। पुनरित्यव्ययं 'पुनरप्रथमे भेदे' इत्यमरः। अकाण्डविस्फुरिततडिच्छटाकडारम् अकाण्डे अनवसरे असमये विस्फुरितानां विजृम्भितानां तडितां विद्युतां छटाभिः दीप्तिभिः कडारं पिङ्गलम् अम्बरम् आकाशं [illegible] हठात् संवृत्तं जातम्। [illegible] पिङ्गलवर्णे हेतौ इति विद्याधर्याः प्रश्नः।

(ङ) तदिति। तत् किं नु खलु नु किमिति प्रश्नार्थकं [illegible]। [illegible] नावधारणार्थेऽव्ययः। तत्र वाक्यार्थे [illegible] [illegible]

त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः ।
पुटभेदो ललाटस्थनीललोहितचक्षुषः ॥ २ ॥

[२। त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः ललाटस्थनीललोहितचक्षुषः पुटभेदः (किं नु जातः)। इत्यन्वयः ।]

[विचिन्त्य] आं ज्ञातं, वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निच्छटासम्पातः । सम्प्रति हि,—(च)

वाक्यम् । उज्ज्वलः ललाटस्थनीललोहितचक्षुषः पुटभेदो नु इति द्वितीयं वाक्यम् । अथवा एकमेवेदं वाक्यम् ।

(१) त्वाष्ट्रयन्त्रेति । त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः त्वष्टुर्विश्वकर्म्मण इदं त्वाष्ट्रं आहवं यन्त्रं कुन्दाख्यं शाणयन्त्रं तस्य भ्रमिः आवर्त्तनं तया भ्रान्तः आवर्त्तितः सञ्चालितः यो मार्त्तण्डः सूर्य्यः तस्य ज्योतिः प्रभा तद्वत् उज्ज्वलः भास्वरः । ललाटस्थनीललोहितचक्षुषः ललाटस्थं भालस्थितं, नीललोहितस्य कण्ठे नीलः केशेषु लोहितः इति नीललोहितः तस्य शिवस्य चक्षुः नेत्रं तृतीयनेत्रमित्यर्थः । तस्य पुटभेदः पुटयोः आवरणयोः भेदः उन्मीलनम् उन्मेषः इति यावत्, अथ किं जातः । जगत्संहारार्थं किं रुद्रस्य ललाटस्थितं तृतीयं नेत्रमुन्मुक्तं यथाग्निःशताग्निज्वालाकलापः विश्वकर्म्मणा शाणोल्लिखितस्यादित्यस्य तेजःपुञ्ज इव जगदिदं दग्धुं नभोमण्डलं समुल्लासयति किम् ? इति सन्देहः । अतएव अत्र कुमारद्वय-प्रयुक्तास्त्रप्रभासु उपमयवाचिःसंशयात् गूढसन्देहालङ्कारः । अत्रेयं पुरातनी वार्त्ता यथा—पुरा किल सूर्य्यस्यातिदुःसहं तेजः आसीत, तत्तु विश्वकर्म्मकन्या सूर्य्यपत्नी संज्ञा सोढुं न शशाक । अथ विवाहवचनानुसारेण सूर्य्यस्यानुमत्या च शिल्पिश्रेष्ठो विश्वकर्म्मा निजशाणयन्त्रे सूर्य्यमण्डलं निधाय सुदूरावर्त्तनम् तस्य तेजोऽल्पत्वञ्च कृतवानिति मार्कण्डेयपुराणम । शिवस्य नीललोहित इति नाम्नः कारणमाह स्कान्दपुराणे यथा—'नीलं येन ममाङ्गं तु रक्ताक्तं लोहितं शिवा । नीललोहित इत्येव ततोऽहं परिकीर्त्तितः ॥' इति ।

(अ) विचिन्त्येति । विचिन्त्य सविशेषचिन्तयावधार्य्य आहेति शेषः । आं ज्ञातम् आमिति आत्मावधारणार्थं ज्ञातं मया बुद्धं, तस्यनाकवाक्यार्थः कार्य्यः । वत्सेन स्नेहास्पदेन चन्द्रकेतुना कुमारावलोकेन प्रयुक्तम् उत्सृष्टम् आग्नेयम् अग्निः देवता अस्येति सर्व्वमासियविषिख्यां प्रत्ययः इति ढक्प्रत्ययः, अग्निदैवतम् अस्त्रमित्यर्थः । यस्य अस्त्रस्य, अयम् ... दृश्यमानः अग्निच्छटासम्पातः अर्चिः छटाः ज्वालाः तासां सम्पातः प्रसरः अग्नि ... , हि कुतश्चित् कुमारेण कुशलो सम्पूर्णतायोगीतिनायकः ।

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः ।
दधति ध्वजांशुकपटाञ्चलेष्विमाः
क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ॥ ४ ॥

[४ । सम्प्रति अवदग्धकर्बुरितकेतुचामरैः विमानमण्डलैः अपयातम् एव हि । इमाः शिखाः ध्वजांशुकपटाञ्चलेषु क्षणकुङ्कुमच्छुरणविभ्रमं दधति । इत्यन्वयः ।

आश्चर्यं, प्रवृत्त एवायम् उच्चण्डवज्रखण्डावस्फोटपटुः * सत्-सर्पिस्फुलिङ्गगुरुः उत्तालतुमुललेलिहानज्वालासम्भारभैरवो भगवान् उषर्बुधः । प्रचण्डश्चास्य सर्वतः सन्तापः । तत् प्रियामङ्केनाक्रम्य दूर-मपसरामि । [तथा करोति] (ख)

(क) अवदग्धेति । अवदग्धकर्बुरितकेतुचामरैः । केतवश्चामराणि चालव्यजनानि चेति केतुचामराणि अवदग्धानि प्रायेण प्लुष्टानि प्रान्तदग्धानि इत्यर्थः । अतएव कर्बुरितानि धवलीकृतानि, कर्बुरशब्दात् तत्करोतीति ण्यन्तात् कर्म्मणि क्तप्रत्ययः । केतुचामराणि येषां तैः, 'चित्रं किर्म्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः । आग्नेयास्त्रापितस्फुलिङ्गस्पर्शात् प्रायशो दग्धानि अतएव विचित्रवर्णानि येषां ध्वजचामराणि जातानि तैरित्यर्थः । विमानमण्डलैः देवयानसमूहैः सम्प्रति अपयातमेव अपसृतमेव पलायितमेवेति यावत् । रणावलोकनकौतूहलेनागतानाममरकिन्नरादिदेवयोनीनां विमानानि अग्निशिखापातप्लुष्टानि दूरं गतानीत्यर्थः । इमाः एताः शिखाः ज्वालाः ध्वजांशुकपटाञ्चलेषु ध्वजानां केतुदण्डानाम् अंशुकानां ध्वजदण्डाग्रे स्थापितानां वस्त्राणां 'वस्त्रप्रान्तो मतोऽञ्चलः' इति हलायुधः । 'अंशुकोऽस्त्री रुचिः शिखा'-मित्यमरः । पटाञ्चलेषु वस्त्रप्रान्तेषु क्षणं मुहूर्त्तं व्याप्य कुङ्कुमच्छुरणविभ्रमं कुङ्कुमस्य कुसुम्भकुसुमस्य छुरणं रञ्जनं कुङ्कुमरागेण रञ्जनम् इति यावत् । तस्य विभ्रमं शोभां 'शोभायामपि प्रयुज्यन्ते लक्ष्मीः श्रीः कान्तिविभ्रमाः' इति हलायुधः । दधति धारयन्ति । अग्निशिखास्पृष्टा ध्वजांशुकप्रान्तभागाः कुङ्कुमरागरञ्जिता इव क्षणं शोभन्ते इत्यर्थः । अत्र निदर्शनालङ्कारः, मञ्जुभाषिणी वृत्तम् ।

(ख) आश्चर्यमिति । उच्चण्डवज्रखण्डावस्फोटपटुः उच्चण्डानाम् अतितीव्राणां

---

* उच्चण्डवज्रखण्डावस्फोटपटुतरतत्स्फुलिङ्गविसृमरतिः इति जीवानन्दसम्मतः पाठः । उच्चण्डवज्रावस्फोटपटुः चपलस्फुलिङ्गगुरुः इति च क्वचित् पाठान्तरं दृश्यते ।

विद्याधरी । दिट्ठिआ एदेण विमलमोत्तिअफलसीदलसिणिद्धमसिणमंसलेण णाहदेहप्फंसेण आणन्दमन्दमउलिदघुम्मन्तलोअणाए मे अन्तरिदो ज्जेव सन्दावो । (ञ)

[ञ । दिष्ट्या एतेन विमलमौक्तिकफलशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णमानलोचनाया मे अन्तरित एव सन्तापः । इति मम ।]

विद्याधर । अयि किमत्र मया कृतम् ? अथवा—(झ)

वज्रमुक्तानां कुलिशच्छेदानाम् अवस्फोटे दहने भेदने इत्यर्थः । पटु समर्थः । यद्वा वज्रमुक्तावस्फोटपटु, अशनिवज्रवत् प्रबल । उत्सर्पिस्फुलिङ्गगुरु उत्सर्पिभिः उद्गच्छद्भिः स्फुलिङ्गैः अग्निकणैः गुरुः, महान् । तथा उत्तालतुमुलकेलिहानज्वालासम्भारभैरव उत्ताला तालप्रमाणा उन्नता प्रवृद्धा इति यावत् । अथवा उत्ताला अतिदुर्धर्षा तुमुलं सङ्कुलं यथा तथा केलिहाना भृशं वर्धमाना या ज्वाला अर्चिः तासां सम्भारेण समूहेन भैरव, भयङ्कर । भगवान् महाप्रभावः उषर्बुध वह्निः प्रहृत एव प्रज्वलितुमारब्ध एव । अत एव सन्ताप प्रचण्ड अतीव प्रबल सुदुःसह इत्यर्थः । सर्वतः समन्तात् सर्वासु दिक्षु प्रसरतीत्यर्थः । तत् तस्मात् हन्त प्रियां विद्याधरीम् अनेन निजदेहेन [illegible] आहत्य दूरं विप्रकृष्टस्थानम् अपसरामि गच्छामि यतोऽग्निसन्ताप अतितीव्रः प्रियाया अङ्गम् अत्यर्थं पीडयति । तत् स्थानमिदं परित्यज्य सत्वरं पलाये इत्यर्थः ।

(ञ) दिट्ठेति । दिष्ट्येत्यानन्दे । विमलमौक्तिकफलशीतलस्निग्धमसृणमांसलेन मुक्ता एव मौक्तिकानि तानि फलानीव इति मौक्तिकफलानि विमलानि स्वच्छानि विशदानि यानि मौक्तिकफलानि तानीव शीतलं स्निग्धं रूक्षतारहितं मसृणं श्लक्ष्णं मांसलं स्थूलं च तथोक्तं तेन, एतेन अनुभूयमानेन नाथदेहस्पर्शेन नाथस्य विद्याधरस्य देहः शरीरं तेन यः स्पर्शः तेन । आनन्दमन्दमुकुलितघूर्णमानलोचनाया आनन्देन स्पर्शसुखजन्याह्लादेन मन्दं ईषत् यथा तथा मुकुलिते मुद्रिते घूर्णमाने चञ्चले लोचने नयने यस्याः तथोक्तायाः, मम सन्ताप अग्निज्वालाजनितगात्रसन्ताप: अन्तरित: एव दूरीकृत एव तत्करोतीति [illegible] कर्मणि [illegible] । [illegible] विद्याधरी सुखमनुभवतीति भावः ।

(झ) अयीति । अयि प्रिये ! मम [illegible] [illegible] ?
[illegible] । [illegible] इति भावः ।

यत्किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ ५॥

[५। अन्वयोऽस्य द्वितीयाङ्के द्रष्टव्यः।]

विद्याधरी। कहमविरलविलोलघुम्मन्तविज्जुलदाविलाससमुज्जलेहिं मत्तमोरकण्ठसामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं। (अ)

[अ। कथमविरलविलोलघूर्णविद्युल्लता विलाससमुज्ज्वलैर्मत्तमयूरकण्ठश्यामलैरवस्तीर्यते नभ.स्थलं जलधरैः। इति सम्।]

विद्याधरः। हन्त हन्त कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम्। कथमविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तं पावकास्त्रम्। (ट)

विद्याधरी। पिअं मे पिअं मे। (ठ)

[(ठ) प्रियं मे प्रियं मे। इति सम्।]

---

(५) यत्किञ्चिदिति। श्लोकोऽयं द्वितीयाङ्के व्याख्यात., तत्र पुनर्व्याख्यायते। *

(अ) कहमिति। अविरलविलोलघूर्णविद्युल्लताविलाससमुज्ज्वलैः अविरलं सन्ततं विलोलाश्चञ्चला. घूर्णन्त्य. अस्थिराश्च या विद्युल्लता तडिद्दामानि तासां विलासेन विलासेन आविर्भावतिरोभावेनेत्यर्थं, समुज्ज्वलै शोभितै। तथा मत्तमयूरकण्ठश्यामलैः मत्ताः सुरतोत्कण्ठायुक्ता ये मयूराः बर्हिणः तेषां कण्ठा इव गलदेशा इव श्यामला मेचका. तैः जलधरैः मेघैः नभःस्थलम् आकाशमण्डल कथम् अकस्मात् अवस्तीर्यते आच्छाद्यते। कथं हठादतिनिबिडैः कृष्णवर्णमेघैः नभोमण्डलमास्तीर्य प्रभूतचपलाविलासश्च दृश्यते इत्यर्थः।

(ट)। हन्तेति। हर्षार्थकमव्ययमेतत्। हर्षातिशये तस्य द्विरुक्तिः। कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम्। कुमारेण लवेन चन्द्रकेतुप्रयुक्ताग्नेयास्त्रप्रभावनाशाय निक्षिप्तं यत् वारुणास्त्रं वरुणदैवताकम् अस्त्रम् आयुधं तस्य प्रभावः सामर्थ्यं खलु अयं निश्चितं जलधरप्रवाहः। वारुणास्त्रप्रयोगात् इत्यर्थं मेघानामागम इति। अविरलप्रवृत्तवारिधारासहस्रसम्पातैः अविरलं यथा तथा प्रवृत्तानि निरन्तरं प्रादुर्भूतानि यानि वारिधाराणां जलसम्पातानां सहस्राणि वृष्टिधारासमूहा. तै. पावकास्त्रम् पावकः देवता अस्येति पावकं तच्च तदस्त्रञ्चेति समासः। आग्नेयम् अस्त्रम् आयुधं कथं प्रशान्तं निर्वापितम्। कथमकस्मादनवच्छिन्नात् वारिधारापातैः आग्नेयास्त्रप्रभावः विनाशित इत्यर्थः।

(ठ)। पियमिति। जीवनसम्पादकाग्नेयास्त्रनाशविधायकम् मे मम प्रियं जीवनसमर्थं जातं, हर्षातिरेके द्विरुक्तिः। आग्नेयास्त्रनाशका कल्याणी विद्याधरी जीवनरक्षयितुं समर्थास्तीति भावः।*

विद्याधरः। हन्त हन्त ! भोः !! सर्व्वमतिमात्रं दोषाय, यत् प्रबल-वातावलिक्षोभगम्भीरगुलुगुलायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धम् * एकवारविश्वग्रसनविकचविकरालकालकण्ठकन्दरविवर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्व्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते †। (ङ)

(ङ)। अथ समुपस्थितेऽपि लवप्रयुक्तवारुणास्त्रकृतारम्भोपशमे प्रचण्डान्धकारघोर-जीमूतवर्षमभिवीक्षमाणः पुनर्विपर्य्यासमाशङ्कमानो विद्याधरः सातिशयधारापातभीषणं मेघ-मेदुरमम्बरं जलदवर्षाच्च निर्वर्णयति—हन्त हन्तेत्यादिना। तथाच महासमुद्रद्विरदश्च-मातिशयव्यसनार्थं विवृणोति। सर्व्वं सकलं वस्तु हितं वा अहितं वा इत्यर्थः। अतिमात्रम् अति-क्रान्ता मात्राम् अतिमात्रम् अत्यादयः क्रान्ताद्यर्थे द्वितीयया समस्यन्त इति, केचित्तु अति-क्रान्ता मात्रा येनेति प्रादिभ्यो धातुजस्येति बहुव्रीहिरिति वदन्ति। परिमाणबहिर्भूतम् अपरि-मितम् इत्यर्थः। दोषाय अनिष्टाय भवतीति शेषः तथाहि—हितमपि वस्तु परिमाणबहिर्भावेन सेव्यमानं मानुषाणामनिष्टं कठोरमुत्पादयति तथाच श्रूयते—"सर्व्वमत्यन्तगर्हित"मिति। परे तु अति अतिरिक्ता अधिका इत्यर्थः। मात्रा परिमाणम् इत्यर्थः, यस्य तत् अति-मात्रम् अतिरिक्तम् अत्यधिकम् इत्यर्थः। दोषाय भवतीति। इदमेव वक्ष्यमाणवचनेन समर्थयति—यदिति। यत् यस्मात् कारणात् प्रबलानां तरस्विनाम् उत्कटानां प्रचण्डानामित्यर्थः। वातानां प्रभञ्जनानां या आवलयः समूहाः तासां क्षोभेण चालनेन अभिघातेन उत्-कटताडनेनेति यावत्, गम्भीरं मन्द्रं मांसलमित्यर्थः, यथा स्यात् तथा गुलुगुलायमानाः गुलुगुलुशब्दं ध्वानं कुर्व्वाणाः आमन्द्रं गर्ज्जन्त इति यावत्, ये मेघाः लवप्रयुक्तवारु-णास्त्रसम्भूता जलधराः तैः मेदुराणि निविडानि यानि अन्धकाराणि तमांसि तैः नीरन्ध्रं परिपूर्णं निरन्तरालमित्यर्थः, यथा तथा निबद्धम् आक्रान्तम् इति वक्ष्यमाणस्य भूत-जातमिति पदस्य विशेषणम्, तथाच लवप्रयुक्तवारुणास्त्रसम्भूता जलधराः [illegible] प्रचण्डैः प्रबलैः सुतरामभिहन्यमानाः सुगभीरं गर्ज्जन्ति, तैश्च गभीरमारुचितैरम्बर-तलं निरवकाशं परिपूर्णं भूतजातञ्च सहसा तिमिरोपहतं सत् कर्म्ममूकमिव अवतिष्ठत इत्यर्थः। अपिच एकेन वारेण एकेनैव कालेन प्रथमचेष्टयैव इति तात्पर्य्यम्। विश्वस्य भुवनस्य ग्रसनं ग्रासः कवलीकरणम् इत्यर्थः। तस्मिन् विकचः व्यादानेन विस्फारितः विकरालः

* नीरन्ध्रनिबद्धमिति विद्यासागरधृत. पाठः।

† विकम्पते इति पाठभेदः।

साधु वत्स चन्द्रकेतो ! साधु, स्थाने वायव्यास्त्रमीरितम्, यतः—(ढ)

विद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः ॥ ६ ॥

जीवस्य: कालकण्ठस्य शितिकण्ठस्य संहारसमुद्यतस्य रुद्ररूपिणो महेश्वरस्येत्यर्थः । यः कण्ठः स एव कन्दरं महागह्वरं तस्मिन् विवर्त्तमानं रुद्रस्य ग्रासचेष्टाविनाशेन भाव्यमानम् इवेति । तथाहि—सम्प्रति तथा भुवनमवतिष्ठते यथा जगद्विध्वंसपरायणो भूतभावनो लीलावसानमिव जगतः सम्पादयितुमुद्योगी जातः, तस्य च जगद्ग्रासार्थं विस्फारितविशालमुखस्य नीलकण्ठो-गह्वरकण्ठे कण्ठाभ्यन्तरे जीवजातं ग्रासचेष्टापरिकल्पित विवर्त्तत इत्यर्थः । अपि च युगान्ते युगावसाने प्रसुप्त इत्यर्थः । स योगः चित्तवृत्तिनिरोधरूपं कर्म तथाच "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलसूत्रम् । स एव निद्रा तया निरुद्धानि समाहृतानि सर्व्वाणि सकलानि द्वाराणि सुखशोभाविप्रभवोनि यस्य तथाभूतस्य नारायणस्य भगवतो महाविष्णोः उदरे कुक्षौ निविष्टं प्रविष्टम् इव । तथा च महाप्रलये महाविष्णु शान्तस्य बहिर्मुखीं वृत्तिमन्तर्मुखीं कुर्वन् निर्व्यवधीनसुप्ते, जीवजातं च पुटान्तर्गतमिव तस्य महायोगयुक्तस्य निरुद्धसर्वद्वारे ब्रह्माण्ड-भाण्डे उदरे निलीय निरुद्धमवतिष्ठते, साम्प्रतमपि जीमूतान्धकारनिरवकाशे ब्रह्माण्डभाण्डे घोरविकृतिमवाप्नुवन्ति जीवाः सर्वतो वाडवाग्निसम्भूतोपद्रवपरित्रस्ताः. तथा कल्पयन्ति वयं विस्मयमवाप्य विलयमनुप्रवणो विमर्दता प्रचण्ड महाप्रकृतिवयं गीर्णमाननं व्यादाय जगद्ग्रासमग्नो जातः, सर्वे च जीवा सुतरां तदाकर्णयन्तसमन्ततः कण्ठगह्वरमेव प्रविशन्ति, किमुत महाप्रलये प्रलयसागरतरङ्गैरतिमात्र समुन्मादितविपर्य्यासे त्वत्प्रपर्य्याये जलधाराधौ निरुद्धसान्द्रनिमग्नायत भगवतो महाविष्णोरुदरान्तरं निविशन्ति समवसितं जगत्, यतः पतितो विलोडनान्धकारविभ्रमैरवकीर्णानि भुवनानि भूयो वारिधरधारासारैः परिभूता वसुन्धरा मेघवृन्दैरवरुद्धप्रसरा वात्याविक्षोभप्रपुञ्जिता च मुहूर्त्तेन समजनि अत्र जीवा मज्जमानाः सुतरां परिकम्पन्त इत्यर्थः ।

(ढ) साध्विति । हे वत्स ! चन्द्रकेतो ! साधु भद्रं त्वया बोधनमनुष्ठितमिति भावः । इयोरिश्चये द्विर्वचनम् । स्थाने युक्तं, वायव्यास्त्रमीरितं वायुदैवतम् आयुधम् ईरितं निक्षिप्तम् । त्वत्प्रेरितवारुणास्त्रनिवारणार्थं त्वया यत् वायव्यास्त्रं प्रेरितं तत् युक्तमेव । यथोचितास्त्रप्रयोगादिव तव साधुत्वमिति भावः ।

(६) तदेवाह—विद्येत्यादिना । यतः यस्मात्, विद्याकल्पेन तत्त्वमस्यादिवाक्यविहितज्ञान-प्रायकल्पेन, 'ब्रह्मतत्त्वप्रकाशकं विद्ये'ति शङ्कराचार्य्याः, तत्तुल्येन इति वा, मरुता वायुना

[(ड) विद्याकल्पेन महता मूर्च्छताम् अपि मेघानां विवर्त्तानां ब्रह्मणि इव क्वापि विप्रलयः कृतः। इत्यन्वयः।]

विद्याधरी। णाह! को दाणिं एसो ससम्भमुक्खित्तकरब्भमिदपट्टञ्चलो ‡ दूरदो ज्जेव महुरवअणपडिसिद्धजुज्झवावारो एदाणं कुमाराणं अन्तरम्मि विमाणवरं ओदरावेदि। (ढ)

[(ढ) नाथ! क इदानीमेष ससम्भ्रमोत्क्षिप्तकरभ्रमितपट्टाञ्चलो दूरत एव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोरन्तरे विमानवरमवतारयति। इति सम्।]

— —

कर्णां, भूयसां बहुतराणां मेघानां वायव्यास्त्रसमुद्भूतानामित्यर्थः। ब्रह्मणि—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म' इति श्रुतेः। निर्विशेषचिन्मात्रे कूटस्थचैतन्ये विवर्त्तानामिव अधिष्ठानविषयसत्ताकव्यावहारिकघट-पटादिविकल्पानामिव विप्रलयः निवृत्तिः कृतः। इदं चार्थं तत्प्रक्रियायां व्याख्यातम्। परमार्थन्तु विद्याकल्पेन ब्रह्मसमानाकाराविच्छिन्नवृत्तिसन्तानात्मकसविकल्पसमाधिरूपेण महता, ब्रह्मणि निखिलचेतनाचेतनशरीरके सगुणब्रह्माख्यचक्रे जीवति नारायणे, विवर्त्तानामिव विशेषणी-भूतचिदचिद्वस्तुविलक्षणविकारभूतदेहेन्द्रियादीनामिव विप्रलयः कृतः। तदुपादानस्य ब्रह्मणः कार्य्यात्मविवर्त्तनाकल्पनदावलयपर्यान्तिकलय एव तदनुपपत्तिविशिष्टस्वभूतजीवस्य मोक्षः। स च 'तमेवं विदित्वा—' इत्यादिश्रुतिभिः प्रतिपाद्यते इति। एवमुक्तिः सर्व्वं च सम् ब्रह्माप्नोति इत्युक्तेः। अयमर्थं सरलार्थः—यथा सद्गुरूपदेशबलेन तत्त्वमस्यादिमहावाक्यस्य सततपर्य्यालोचनया उत्तरविद्वद्ब्रह्मज्ञाने समुत्पन्ने सति नामात्मकापरस्य जगत्प्रपञ्चस्य पृथक् सत्ताविषयको बोधः विलीयते, जागतिकं ज्ञानमन्तर्हितं भवति केवलं सर्व्वत्र ब्रह्माकारं ज्ञानम् अवभासते, तथात्र चन्द्रकेतुप्रयुक्तस्य वायव्यास्त्रस्य प्रभावेण समुत्प्रेरितवायव्यास्त्रोत्पन्नमेघसमूहा अपि कुत्रापि अन्तर्हिताः; सुमहत् अतीमन्दलस्य दृश्यते भवति भूतजातं निर्म्मलं सम्भूत-मिति भावः। अत्रार्थी गीती च उपमा।

(ण) नाथेति। एष दूरे दृश्यमानः अयं कः किमभिधानः कुमारौ वा ससम्भ्र-मोत्क्षिप्तकरभ्रमितपट्टाञ्चलः ससम्भ्रमं ससत्वरं यथा तथा उत्क्षिप्तः उत्तोलितः यः करः हस्तः तेन अर्द्धं प्रसारितपाणिना भ्रमितः सञ्चालितः पट्टाञ्चलः पट्टवस्त्र अञ्चलः प्रान्तदेशः येन स तथोक्तः संग्रामनिरतयोः कुमारयोः अनयाक्रमंवार्थं युद्धं निषेधुकामः दूरतः निषेधवाक्यमधुरवाक्यप्रबन्धवता जर्झप्रेक्षीक्षितक[illegible] पर्व्व सर्व्वा-

‡ करभ्रमितपट्टाञ्चल इति पाठान्तरम्।

विद्याधर। [हन्त] एष शम्बूकवधात् प्रतिनिवृत्तो रघुपतिः। (ख)

शब्दं महापुरुषसंविहितं निशम्य
तद्गौरवात् समुपसंहृतसम्प्रहारः।
शान्तो लवः प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसङ्गमनेन राज्ञः॥ ७॥

[(७) महापुरुषसंविहितं शब्दं निशम्य तद्गौरवात् समुपसंहृतसम्प्रहारः लवः शान्तः चन्द्रकेतुः च प्रणत एव। सुतसङ्गमनेन राज्ञः कल्याणम् अस्तु। इत्यन्वयः।]

लयन् रथनिवर्त्तकं हि पताकामस्खलनमिति सामरिकविधानस्मरणादिति भावः। यद्यपि वैजयन्तीसञ्चालनेन युद्धव्यापारविरतिरीतिर्जगति सर्व्वत्र विलसति। मन्ये एषा प्राचीनार्य्य-वर्य्यप्रचलितपद्धतिरेवाधुनिकैर्य्यूरोपीयैरनुसृता इति। दूरत एव विप्रकृष्टस्थानादेव मधुर-वचनप्रतिषिद्धयुद्धव्यापार मधुरेण वात्सल्यपूर्णेन प्रेममयेनेति यावत्, वचनेन वाक्येन प्रतिषिद्धः निवारितः युद्धव्यापारः यथावकर्णयाम इति यावत्, येन स तथोक्तः। एतयोर्हर्म्यमानयोः कुमारयोर्लवचन्द्रकेत्वोः अन्तरे मध्यदेशे विमानवरं श्रेष्ठं व्योमयानं पुष्पकाख्यम् अवतारयति अवरोपयति। 'व्योमयानं विमानोऽस्त्री'त्यमरः। 'वरो जामातरि श्रेष्ठे देवतादेरभीप्सिते' इति मेदिनी।

(ख) एष इति। एषः अयं रघुपतिः रामचन्द्रः शम्बूकवधात् शम्बूकस्य तन्नामकस्य तपस्विनः शूद्रस्य वधात् वधं विधाय इत्यर्थः। प्रतिनिवृत्तः आगतः।

(७) शब्दमिति। महापुरुषसंविहितं महान् पुरुषः महापुरुषः तेन अतिशयगुणशालिना रामेण संविहितम् अभिहितम् उच्चारितं शब्दं वाक्यं रथाविरतौ भवतमिति विशेषणम्-मिदर्थः। निशम्य श्रुत्वा तद्गौरवात् तस्य पुरुषस्य रामस्य गौरवात् गुरुत्वबोधात् महानुभावत्वात् बहुमानातिशयात् इत्यर्थः। समुपसंहृतसम्प्रहारः समुपसंहृतः सम्यक् परित्यक्तः सम्प्रहारः युद्धं येन स तथोक्तः, लवः शान्तः अभिमानशून्यः महानुभावस्य वचनगौरवात् युद्धव्यापारं विहाय विनीतः संवृत्त इति भावः। चन्द्रकेतुश्च प्रणत एव युद्धं त्यक्त्वा रामचरणयोः पतितः सन् प्रणाम एव। सुतसङ्गमनेन सुतयोः पुत्रयोः कुशलवयोः सङ्गमनेन समागमनेन साक्षान्मिलनेन इत्यर्थः। विद्याधरैव स्थलमात्रं सुतोक्तिः। राज्ञः रामचन्द्रस्य कल्याणं मङ्गलम् अस्तु भवतु। आशिषि लोट्। अत्र वीरोचितशान्तरसस्य लवचन्द्रकेतोश्चर्य्याचैव प्रशमस्य रामविषयकरतिभावाङ्गत्वात् समाहितालङ्कारः। वसन्ततिलकं वृत्तम्।

तदितस्तावन्निर्गच्छाव:। (त)

[इति निष्क्रान्तौ (थ)]

विष्कम्भकः (द)।

—०—

[ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च (ध)]

राम। [पुष्पकादवतरन्।] (न)

दिनकरकुलचन्द्र चन्द्रकेतो
सरभसमेहि दृढं परिष्वजस्व।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः॥ ८॥

[८। दिनकरकुलचन्द्र चन्द्रकेतो! सरभसम् एहि, दृढं परिष्वजस्व, तुहिनशकलशीतलैः तव अङ्गैः मम चित्तदाहः अपि शमम् उपयातु। इत्यन्वयः।]

(त)। तत् तस्मात् इतः अस्मात् स्थानात् निर्गच्छावः प्रतिष्ठावहे अथवा चावयोरति-सन्निधानतया स्थितयोः अनयोः विघ्नः स्यात् हृदयभावप्रकाशव्याघातप्रसङ्गात्, अथवा तत् तस्मात् विरोधस्य विरामात् इदानीं पुनर्युद्धोद्यमस्य अवसरेण इत्यर्थः। युद्धदर्शनकाम्यया एव विद्याधरयोरत्रागमनस्य प्रयोजनं तदभावस्यानादिति भावः।

(थ)। इतीति। इति उक्तप्रकारं उक्त्वा निष्क्रान्तौ रङ्गस्थलाद्बहिर्गतौ विद्याधरदम्पती इति शेषः। नाटके साक्षाद्युद्धदर्शननिषेधात् कविना विष्कम्भकेऽत्र विद्याधरयुगलमवतारितं तेनैव युद्धविवरणं वर्णितं तदवसाने च निष्क्रान्तं तदिति।

(द)। विष्कम्भेति। मध्यमाभ्यां विद्याधराभ्यां प्रयोजितत्वात् शुद्धोऽयं विष्कम्भकः अत्र इतानां कुमारयोः युद्धविषयकाणां वर्णिष्यमाणानां ताभ्यां सह रामस्यालापादीनां कथां-शानां निदर्शनत्वम् अवगन्तव्यमिति। लक्षणन्तूक्तम्।

(ध)। तत इति। विद्याधरमिथुननिष्क्रमणानन्तरं लवः प्रणतः रामचन्द्रचरणाभि-वादनपरः चन्द्रकेतुश्च प्रविशति रङ्गस्थलमिति शेषः।

(न)। पुष्पकादिति। राम पुष्पकात् पुष्पकनामविमानात् अवतरन् अवरोहन् सन् वक्ष्यमाणमाहेति शेषेणान्वयः।

(८) दिनकरेति। दिनकरकुलचन्द्र! दिनकरस्य सूर्य्यस्य कुलं वंशः तस्य चन्द्र इवाह्ला-दकः तत्सम्बोधने हे सूर्य्यवंशाह्लादजनक चन्द्रकेतो! सरभसं एव वर्णनीयं यथा तथा 'रभसो वेगहर्षयो'रिति विश्वः। सवेगम् एहि मत्समीपम् गाढं परि-ष्वजस्व आलिङ्ग मामिति शेषः। तुहिनशकलशीतलैः तुहिनस्य शकलानि खण्डानि तद्वत्

चन्द्रकेतुः । अभिवादये । (प)

रामः । [उत्थाप्य सस्नेहास्रं परिष्वज्य ।] अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य? (फ)

चन्द्र० । कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन । तद्विज्ञापयामि,—मामिव विशेषेण वा मत्तः स्निग्धेन चक्षुषा * पश्यतु वत्सं महावीरप्रकाण्डं तातः । (ब)

शीतलानि हिमानि तैरार्द्रौ तव अङ्गे देहे मम चित्तदाहं चित्तस्य हृदयस्य दाहः सन्तापः अपि शमं शान्तिं निर्वाणम् उपयात् प्राप्नोतु न केवलं तवालिङ्गनाभ्यां गात्रदाहः शाम्यति मनःसन्तापोऽपि इत्यपिशब्दार्थः । सूर्य्य प्रति चन्द्रत्वाभावेनास्य तं प्रत्यपि चन्द्रत्वमाधिक्यं पर्य्यवस्यति । अतएव ममापि चित्तदाह इत्युक्तिः सङ्गच्छते । ममापि एवमत्यन्तसन्तप्तस्यापीति वा । अनेन सहजभानुतापापेक्षयापि स्वतापस्याधिक्यं गम्यते । अत्रापिशब्दस्य चित्तदाह इति पदेनान्वये सति न केवलं गात्रदाहः चित्तदाहोऽपीत्यर्थान्तरापत्ते अर्थापत्तिरलङ्कारः । उपमा च । पुष्पिताग्रा वृत्तम् ।

(प) । अभिवादये प्रणमामि भवन्तमिति शेषः ।

(फ) । उत्थाप्येति । उत्थाप्य पादयोः पतितं चन्द्रकेतुमुत्तोल्य सस्नेहास्रं स्नेहेन सह वर्त्तत इति तथोक्तम् अस्रं यस्मिन् तत् अथवा स्नेहेन जातम् अस्रं तेन सह वर्त्तमानं यथा तथा सानन्दाश्रुपातं यथा तथा परिष्वज्य आलिङ्ग्येति शेषः । दिव्यम् अस्त्रं आयुधं तस्य धरः इति दिव्यास्त्रधरः, यो देहस्तस्य उत्तमायुधधारिणः तव शरीरस्य । दिव्यास्त्रधरः देहः यस्येति वा । तव अपि नाम कुशलं मङ्गलं किम्? अपिः प्रश्ने, नाम सम्भावनायाम् । युद्धे अस्त्राघातेन दिव्यास्त्रधरस्य तव देहे न व्रणं कच्चित्?

(ब) । कुशलमिति । अत्यद्भुतक्रियस्य अत्यद्भुता अतिविस्मयावहा क्रिया संग्रामव्यापारो यस्य तथोक्तस्य प्रियदर्शनस्य प्रियं प्रीतिकरं दर्शनं यस्य निसर्गसौम्याकारस्य लवस्य लाभाभ्युदयेन लाभः एवाभ्युदयः तेन प्राप्तिसम्पदा कुशलं मम मङ्गलं वर्त्तते निजरूपेणेदृशरूपगुणसम्पन्नस्य जनस्य प्राप्तेरभावात् किमपरं मङ्गलं सम्भवेदिति भावः । तत् तस्मात् मम स्निग्धवत्सलावेक्षी: चक्षुः एतं महावीरप्रकाण्डं महान् वीरः इति महावीरः प्रशस्तः महावीर इति महावीर-

---

* मामिव अविशेषेण मत्तः स्निग्धतरेण चक्षुषा इति पाठभेदः ।

रामः । [लवं निरूप्य] दिष्ट्या अतिगम्भीरमधुरकल्याणाकृतिरयं वत्सो वत्सस्य † । (अ)

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोषस्य ‡ गुप्त्यै ।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥ ९ ॥

[९ । लोकान् त्रातुं कायवान् परिणत अस्त्रवेद इव ब्रह्मकोषस्य गुप्त्यै तनुं श्रित क्षात्रः धर्मः इव सामर्थ्यानां समुदय. इव गुणानां वा सञ्चय. इव जगत्पुण्यनिर्माणराशिः आविर्भूय स्थित इव । इत्यन्वय ।]

प्रकाण्डं सर्वश्रावणेयमिति समासः । 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ, प्रशस्तवाच-कान्यमूनी'त्यमरः । माम् इव विशेषेण आधिक्ययुक्तं न स्निग्धेन मङ्गलमयेन च चक्षुरेव चक्षुषा मैवेव पश्यन् आलोकयतु । वा अथवा मम मदपेक्षया विशेषेण आधिक्यं न, प्रेमस्निग्धचक्षुषा अमुं कुमारं पश्यतु । तात ज्येष्ठतातो भवान् इति विज्ञापयामि अहं मामये ।

(अ)। लवमिति । रामः निरूप्य विशेषेण लवं दृष्ट्वा । दिष्ट्या हर्षेण अतिगम्भीर-मधुरकल्याणाकृतिः अतिगम्भीरा गाम्भीर्यगुणयुक्ता अमधुरा मधुरा दृष्टा कल्याणी मङ्गलमयी आकृतिर्मूर्तिर्यस्य स तथोक्तः । अयं एषः वत्सस्य मम वयस्यः वयसि तुल्ये वयस्यः । अत इति वयस्यः सुहृत् । एतस्मादिनामुं च हृदयाङ्गमवलोकयामीति भावः ।

(९) तदेव विवृणोति—त्रातुमिति । लोकान् जगन्ति त्रीन् भुवनानि त्रातुं रक्षितुम् अयुक्तापातात् पातुं कायवान् मूर्तिमान् परिणतः कृतदेहपरिग्रहः अस्त्र. अस्त्रवेदः धनुर्वेद इव । ब्रह्मकोषस्य ब्रह्म वेदः 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः । तदेव कोषः रत्नराशिः 'कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः । इति ब्रह्मकोषः तस्य । ब्राह्मणस्येति वा । गुप्त्यै रक्षणाय वेदवर्गस्य रक्षणस्य रक्षार्थं ब्राह्मणस्य वा रक्षार्थं तनुं देहं श्रितः आश्रितः गृहीतः क्षात्रः क्षत्रियस्य धर्मः शौर्यादिः इव । सामर्थ्यानां शक्तीनां समुदयः समवायः समूहः इव ।

---

† अतिगम्भीराकृतिरयं इति विद्यासागरधृत पाठः ।

‡ ब्रह्मकोशस्य इति पाठान्तरम् ।

लवः। अहो! पुण्यानुभावदर्शनोऽयं महापुरुषः। (म)

आश्वासस्नेहभक्तीनामेकमालम्बनं महत्।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसञ्चरः॥ १०॥

[१०। आश्वासस्नेहभक्तीनाम् एकं महत् आलम्बनं प्रकृष्टस्य धर्मस्य मूर्त्तिसञ्चरः प्रसादः वा। इत्यन्वयः।]

गुणानां शौर्यवीर्यादीनां सञ्चयः साकल्यम् इव आकारविशेषमवलोक्य एकत्र शौर्यादिसर्व्व-गुणनिवहः समुदितो वा इति सम्भावयामि। अथवा जगत्पुण्यनिर्म्माणराशिः निर्मीयते अभि-रिति निर्म्माणानि जगतां भुवनानां पुण्यानां सुकृतानां निर्म्माणानि इति तथोक्तानि तेषां पुण्यजनककार्य्याणाम्। निर्म्माणपदस्य भावसाधने तु जगत्यनुष्ठितानि पुण्यानि निर्म्माणानि कर्म्माणीत्यर्थं, तदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात्। राशिः समूहः आविर्भूय शरीरं परिगृह्य स्थित इव। अयं लवः स्वतेजसा तथा प्रतीयते यथा अस्त्रविद्या शरीरं परिगृह्य लोकरक्षणार्थं विहरति वेदकोषरक्षार्थं वा क्षात्रधर्म्मः समवतीर्णः, मूर्त्तिमान् वा शक्तिसमवायः गुणसम्पदां वा जगतां पुण्यप्रसरो वा गृहीतदेह इति अयो महातेजाः गुरुगम्भीरः पूतश्लोकश्चेति निष्कर्षः। अत्रोत्प्रेक्षापञ्चकस्य समावेशात्पञ्चोत्प्रेक्षासङ्करः। अद्भुतोपमेति हस्ती। मन्दाक्रान्ता वृत्तम्।

(म) अहो इति। अहो आश्चर्य्यम्, अयम् एव महापुरुषः पुरुषश्रेष्ठः पुण्यानुभावदर्शनः अनुभावस्य प्रभावस्य दर्शनस्य साक्षात्कारस्येति अनुभावदर्शने पुण्ये पवित्रे अनुभावदर्शने यस्य स तथोक्तः। 'अनुभावः प्रभावेऽपी'त्यमरः। अयमतीवोन्नततेजाः दर्शनमात्र समधिकश्रेयसां निदानमित्यर्थः।

(१०) महापुरुषत्वमेव दर्शयति—आश्वास इति। एष महापुरुषः। आश्वासस्नेह-भक्तीनां आश्वासः परित्राणम्, हर्षाभाव इति वा, स्नेहः प्रणयः भक्तिः पूज्येषु अनुरागः; तेषां एकम् अद्वितीयं मुख्यं महत् विपुलम् आलम्बनम् आधारः धामेति यावत्। अयं महापुरुषः प्रशान्तेनाकृतैव शक्तिमानुभावेन अपरिचितानामपि जनानां मनःसु प्रथममेव भक्तिपूर्व्वकं भावं विश्वासश्चोपजनयतीत्यर्थः। दृष्टेऽस्मिन् स्वयमेव जनः श्रद्धया भक्तीभवति, स्नेहश्चाङ्कुरः आश्वासश्च जायते इति भावः। तथा अयं प्रकृष्टस्य उत्कृष्टस्य, लोकोत्तरस्येति यावत्, धर्म्मस्य सुकृतस्य मूर्त्तिसञ्चरः मूर्त्त्या देहेन सञ्चरति इति मूर्त्तिसञ्चरः शरीरी प्रसादः प्रसन्नता इव केनचित् स्थित इति शेषः। उक्तञ्च "रामो विग्रहवान् धर्म्म" इति। प्रकृष्टधर्म्मकर्म्मानुष्ठान-वशादुपजायमानः मनःप्रसादः शरीरमाश्रित्य बहिःस्थित इव इत्यर्थः। रामे तादृशसम्बन्ध-सम्भावनात् उत्प्रेक्षालङ्कारः। आश्वासादीनां प्रकृतानामेव रामे स्वयमेव एकाश्रितत्वात्कारः।

आश्चर्यम् । (य)

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ ११ ॥

[११ अस्मिन् दृष्टे विरोधः विश्रान्तः, निर्वृतिघनः रसः प्रसरति तत् औद्धत्यं क्वापि व्रजति, विनयः मां प्रह्वयति, झटिति किमपि परवान् अस्मि, यदि वा तीर्थानाम् इव महतां कः अपि महार्घः अतिशयः । इत्यन्वयः]

राम । तत् किमेकपद एव दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्, अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् । (र)

(य) आश्चर्यमिति वक्ष्यमाणेन सम्बन्धः । वक्ष्यमाणं श्लोकोक्तं सर्वं विस्मयकरमित्यर्थः ।

(११) तदेवाह—विरोध इति । अस्मिन् महापुरुषे रामे दृष्टे अवलोकिते सति विरोधः वैरं विश्रान्तः विरतः, निर्वृतिघनः निर्वृत्या आनन्देन घनः सान्द्रः रस्यते आस्वाद्यते इति रसः अपराजावभावस्वरूपः अनुरागः इत यावत्, प्रसरति आविर्भवति उच्छलति । निविडा नन्दपूर्णभावहृदयम् उन्नमयति इत्यर्थः । तत् पुराकालीय विपुलम् औद्धत्यं दर्पाभिमानहेतुक चापल्यं क्वापि कुत्रापि देशे व्रजति गच्छति विलीयते । तथा विनयः महाजनसन्निधौ स्वाप-कर्षानुसन्धानरूपः मां प्रह्वयति नमयति अस्मादहमत्यपकृष्टत्वबोधः मां विनयीकरोतीत्यर्थः । किमपि अस्मादतोऽधिकतया अनिर्वचनीय इति वा, परवान् परतन्त्रः अस्मि भवामि, महात्मानमेनं दृष्ट्वा आत्मानमहं प्रभवामीत्यर्थः । यदि वा अथवा तीर्थानां गङ्गादिपावनसलिलानां पुष्कराद्दीनामिव महतां महात्मनां महार्घः महान् अर्घः मूल्यं यस्य सः अमूल्यः कोऽपि लोको त्तरः निर्वक्तुमशक्यः अतिशयः उत्कर्षः महिमा तत्रैव वर्तते इति शेषः । यथा वाराणस्यादि पुण्यतीर्थदर्शनेन स्नानसत्क्रियामाहात्म्यवशाद् निर्दुर्विनीता पापात्मान अपि निष्पापाः शान्त स्वभावाः भवन्ति, तथा महापुरुषाणामपि दर्शनात् लोका अतिशयवशाः अभिमानादिरहिताः जायन्ते इत्यर्थः । अत हि आत्मनः परवत्ता प्रति साधके एकस्मिन् विरोधविश्रामादौ सत्यपि प्रसरतीत्यादिना कारणान्तरस्यापि तत्करणोदानात् समुच्चयमिदं । अस्मिन् ... सामान्येन अर्थान्तरन्यासः समर्थनात् अर्थान्तरन्यासमिदं स च तीर्थानामिवेत्युपमा ... शिखरिणी वृत्तम् ।

(र) तदिति । तत् किमिति प्रश्नसूचकमेतद्वचनम् । एकपदे ... तत्क्षणमेव

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

[१२ । आन्तरः कोऽपि हेतुः पदार्थान् व्यतिषजति । प्रीतयः बहिरुपाधीन् न खलु संश्रयन्ते । पतङ्गस्य उदये पुण्डरीकं हि विकसति, हिमरश्मौ उद्गते चन्द्रकान्तः द्रवति च । इत्यन्वयः ।]

तुल्ये द्वयः सपदि च स्मृते" इति हलायुधः । युगपदेव समकालमेवेति यावत्, दुःखविधायं, दुःखस्य निहन्ति ददाति करोति तथा कुतोऽपि कस्मादपि अनिर्धारितात् निर्वक्तुमशक्यात् निमित्तात् कारणात् अन्तरात्मानम् अन्तःकरणम् उपक्लेदयति स्नेहपरवशं करोति कुमारोऽयमिति शेषः । अथवा पूर्वोक्तपक्षाभावे । स्नेहश्च, चकारः समुच्चये । निमित्तसव्यपेक्षः अपेक्षया सह वर्तते इति सव्यपेक्षः निमित्तेन कारणेन सव्यपेक्षः इति तथोक्तः हेतुसापेक्षः । स्नेहः किमपि निमित्तमपेक्ष्य एव जायते इति यत् लोकवचनं तत् एतत् विप्रतिषिद्धं विरुद्धं आचरितम् । किमपि बाह्यं कारणं विनापि स्नेहः जायते, अन्यथा कथमस्य दृष्ट्वा मम स्नेहाविर्भाव इति भावः । यद्वा स्नेहश्च निमित्तसव्यपेक्षेति विप्रतिषिद्धम् एतत् व्यवहारायोग्यम् । अयमर्थः— स्नेहस्य न निमित्तसव्यपेक्षत्वमात्रं निमित्तानपेक्षत्वमपि स्नेहस्य दर्शनात् । तथा च यावत्सु स्नेहेषु निमित्तसापेक्षत्वव्यवहारो विप्रतिषिद्ध इति ।

(१२) उक्तमेवार्थं श्लोकेन अनक्ति—व्यतीति । आन्तरः अन्तर्भवः अन्तःकरणवर्तीति यावत्, कोऽपि अनिर्वाच्यः हेतुः पदार्थान् वस्तूनि अन्तरिन्द्रियादिगम्यमनुभूतमित्यर्थः । व्यतिषजति अन्योऽन्यासक्तान् स्नेहसूत्रेण अन्योऽन्यं सम्बद्धान् करोति । अन्तर्भावितण्यर्थोऽत्र धातुः । कर्तरि कर्मव्यतिहाराभावादात्मनेपदम् । प्रीतयः प्रेमाणः परस्परानुकूलत्वप्रोत्पन्नाः स्नेहाः बहिरुपाधीन् बाह्यसम्पर्कान् गुणलक्षणरूपादियाथार्थ्यविशेषलक्षणकारणानीत्यर्थः । "उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले विशेषणे पुंसि" इति मेदिनी । न संश्रयन्ते न अवलम्बन्ते खलु निश्चितं, न कोऽप्याश्रयत्वेनापेक्षन्ते इति यावत् । यतः सुखलक्षण-प्रवृत्तिभिर्निमित्तैः प्रीतिर्न उत्पद्यते केनापि अनिर्दिष्टेनान्तरेण हेतुना वा जायते इत्यर्थः । तदेव समर्थयति—विकसतीति । हि यतः पुण्डरीकं पद्मं पतङ्गस्य सूर्यस्य 'पतङ्गः पक्षि-सूर्ययोः' इत्यमरः । उदये प्रकाशे सति विकसति प्रस्फुटति । तथा हिमरश्मौ हिमाः शीतलाः रश्मयः किरणा यस्य तथोक्ते चन्द्रे उद्गते उदिते सति चन्द्रकान्तः तदाख्यमणिविशेषः द्रवति च निःस्यन्दते जलरूपतां धत्ते इति । यथा सूर्याचन्द्रमसोरुदये पद्मं किमपि बाह्यं कारणं विनैव

लव. । चन्द्रकेतो ! क एते ? (ङ)

चन्द्र । प्रियवयस्य ! ननु तातपादाः । (च)

लव. । ममापि तर्हि धर्मतस्तथैव, यतः प्रियवयस्य इत्यात्थ ; किन्तु चत्वारः खलु भवतामेवंव्यपदेशभागिनः तत्रभवन्तो रामायण-कथापुरुषाः, तद्विशेषं ब्रूहि । (छ)

विकसति चन्द्रकान्तनामा मणिभेदश्च जलञ्च क्षरति, तथा ममाप्यस्मिन् कुमारे बहिर्निमित्त-मन्तरेणैव को ऽप्याविर्भाव इति सदर्थः । अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासा-लङ्कारः । तृतीयचतुर्थपादार्थयोर्बिम्बप्रतिबिम्बभावप्रत्ययात् दृष्टान्तालङ्कारेण सङ्कर इति परे वदन्ति । मालिनी वृत्तम् ।

(ङ) चन्द्रे ति । हे चन्द्रकेतो ! एते के गौरवाद्बहुत्वम्, अयं क इत्यर्थः । एष साक्षात् दृश्यमानः महापुरुषः किंनामा कुतस्त्यो वेति पृष्टोऽर्थः ।

(च) प्रियेति । प्रियवयस्य वयसि भव वयस्यः समानवयाः सखेति यावत्, प्रियश्चासौ वयस्यश्चेति तत्सम्बोधने । ननु भोः तातपादाः पूज्यतमा ज्येष्ठताताः । पादशब्दः पूज्यत्व-द्योतकः । अत्रापि बहुवचनं गौरवात् ।

(छ) ममेति । तर्हि तदा तव तातपादत्वेन तद्दर्शने । ममापि न केवलं तव ममापीत्यपि-शब्दार्थः । धर्मतः धर्मेण लोकाचाररूपेणेत्यर्थः । पुण्यादिति वा, तथैव तातपादा एव, यतः यस्मात् हेतोः प्रियवयस्यः प्रियसुहृत् इति एवम् माम् ब्रवीषि, त्वं मां प्रियवयस्य इत्यामन्त्रयसीत्यर्थः । मित्रस्य पिता मम पितेति लोकव्यवहारः—तत्पितृविषये यादृशमनुवर्त्तनं तादृशं मित्रपितृ-विषयकं भवति नैवति मन्यते इति । वयस्यसम्बन्धेन हेतुना तव पित्रादिषु गुरुजनेषु ममापि पित्रादित्वमस्त्येव, एवं च स सम्बन्धहेतुकपितृत्वमानित्यर्थं । इत्येव लौकिकाचारः । किन्तु परन्तु एवंव्यपदेशभागिनः व्यपदिश्यन्ते ज्ञायन्ते अनेनेति व्यपदेशः संज्ञा, एवम् ईदृशं व्यपदेशं भजन्ति ये ते तथोक्ताः तत्रभवन्तः पूजनीयाः रामायणकथापुरुषाः रामायणकथानायकाः तत्र विशेषेण वर्णिताः ; यद्वा एवं व्यपदेशस्य तातपादशब्दस्य भागिनः स्वामिनः । भागो हि स्वं, अतः भागी स्वामी, तातपादशब्दस्य वाच्यतया स्वामिनः, अर्थप्रत्यायकत्वाच्छब्दस्य वाच्यमेवत्वं वाचकस्य । चत्वारः खलु भवतां तातपाद इति सम्भवन्तः, तातपादवाच्या इति यावत्, चत्वार एव । तत् तस्मात् विशेषं तेषु चतुर्षु मध्ये कतमोऽयम् इ[illegible] यावत्तेषां कथा जानता ब्रूहि कथय । यद्वा तद्विशेषं तातपादत्वव्यापार[illegible] वैशिष्ट्यम् । रामायणकथाविभावां प्रधानभूतास्चत्वार एव तव पितृपर्यायाः [illegible] नामधेयः कथय इत्यर्थः ।

चन्द्र। ननु ज्येष्ठतातपादा इति प्रवेहि। (च)

लवः। [सोल्लासम्।] कथं रघुनाथ एव! * दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः। [सविनयकौतुकं निर्वर्ण्य] तात! प्राचेतसान्तेवासी लवोऽभिवादयते। (छ)

रामः। [सस्नेहम्] आयुष्मन्! एह्येहि। [सस्नेहं परिष्वज्य।] अयि वत्स! कृतं कृतमतिविनयेन, अनेकवारमपरिश्लथं परिष्वजस्व। (ज)

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः।
नन्दयति चन्द्रचन्दननिस्यन्दजडस्तव स्पर्शः ॥ १२ ॥

[१२। परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः चन्द्रचन्दननिस्यन्दजडः, तव स्पर्शः नन्दयति। इत्यन्वयः।]

(च) नन्विति। ननु भो लव! एते ज्येष्ठतातपादाः, अयं ज्येष्ठतात इत्यर्थः। इति वदन् प्रवेहि त्वं जानीहि।

(छ) सोल्लासमिति। उल्लासेन सह वर्तमानं सोल्लासं सहर्षं यथा तथा आहेति शेषः। कथं किं रघुनाथः रघुपतिः रामचन्द्र एव, न कश्चित् तदन्यः भरतादिः, इत्यत्र तात्पर्यम्। दिष्ट्या हर्षेण। अद्य सुप्रभातं शोभनं दिनमुखम्। यत् यस्माद्धेतोः अयं एषः देवः, भगवती विश्वोरंभरतालादेवस्य देवत्वम्। दृष्टः मया साक्षात् कृतः। मातृप्रभृत्यादिवाक्यैः दर्शनं जातं तस्मात् सुप्रभातमद्य इत्यवधेयम्। सविनयकौतुकं विनयः नम्रता कौतुकं अपूर्ववदर्शनाद्यानन्दः। ताभ्यां सह वर्तमानं यथा तथा निर्वर्ण्य विलोक्य आह— तात! प्राचेतसान्तेवासी प्रचेतसोऽपत्यं पुमानिति प्राचेतसः वाल्मीकिः तस्य अन्तेवासी शिष्यः लवः। अभिवादयते भवन्तं प्रणमति।

(ज) सस्नेहमिति। एहि एहीति आदरातिरेके द्विरुक्तम्। सस्नेहं परिष्वज्य गाढालिङ्गनमालिङ्ग्य आहेति शेषः। अयीति कोमलसम्बोधनम्, वत्स बालक! अतिविनयेन अत्यन्तनम्रतावलम्बनेन कृतं कृतम् अतिविनयो न कर्त्तव्यः। कृतमिति निषेधे अव्ययम्, अत्रापि आदरे द्विरुक्तिः। अनेकवारं बहुवारम् अपरिश्लथं दृढम् अशिथिलमिति यावत्, परिष्वजस्व आलिङ्ग मामिति शेषः।

(१२) परिणतेति। परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः परिणतं, परिपक्वं सम्यक् विकसितमिति यावत्, अतएव कठोरं प्रौढम् उपचितावयवं यत् पुष्करं कमलम्

* 'कथं रघुनाथः एव' इति वा पाठान्तरम्।

लव । [अपवार्य] ईदृशो मां प्रति अमीषामकारणस्नेहः, मया पुनरेभ्य एव अभिद्रुग्धमज्ञेन, यदायुधपरिग्रहं यावत् अध्यारूढो दुर्विनयः । [प्रकाशम्] शृण्वन्तु इदानीं लवस्य बालिशतां तातपादाः । (ख)

राम । किमपराद्धं वत्सेन ? (क)

गर्भच्छदः वातपायनभिन्नतम् अन्तर्गतदलं तदिव पीन मांसल स्थूल इति यावत्, मसृण स्निग्ध दन्तुरतारहित सुकुमार, अदुलच सम्पूर्णविकसितपद्ममध्यपत्रवत् अतिकोमल इत्यर्थ । अम्बुजवृन्दनिस्यन्द मद चन्द्र हिमकर चन्दनस्य निस्यन्द द्रव: तौ इव नद्ध कोमल तव अङ्गैः आलिङ्गितैः मां नन्दयति प्रीणयति । हिमकरकरवत् चन्दनरसवत् तवाङ्गस्पर्शं अतिशीतलत्वात् मम तापोपशमाय भवतीति भाव । अत्र स्पर्शे जायमानधर्म्यात् अम्बुचन्दन निस्यन्दाभ्यां पीनमसृणसुकुमारत्वसाधर्म्याच्च पुष्करगर्भच्छदेन सह साम्यात्, समासगतत्वात् लुप्तोपमालङ्कार । आर्या जाति ।

(ख) ईदृश इति । मां प्रति मयि विषये अमीषां रघुनाथादीनाम् ईदृश, एवंविध अतिशयित इत्यर्थः । अकारणस्नेह नास्ति कारणं यत्र स तथोक्तः, अनिमित्तकः स्नेह वात्सल्यमस्ति, आत्मीयत्वज्ञानमरहितमपि माम् एते लालितवत् विश्वासीनाम । पुन किन्तु अज्ञेन धीरोदात्तविवेकरहितेन मया एभ्य श्लाघितेभ्य एव अभिद्रुग्धं वैरायितं हिंसाकरणाय चेष्टितम् । एतेषां तदुद्धर्षविषयता चतुर्थी, क्रियया यमभिप्रैतीत्यनेन वा चतुर्थी । क्रुधद्रुह: इत्यस्य क्वाऽपि प्रयोगविषयतया भावे क्तप्रत्यय समावेशः, "नपुंसके भावे क्तोऽस्त्रियां क्तिन्" इति प्रमाणात् । अत्र केचिदभिद्रुग्धमिदमस्ति द्रुग्धमिति पठन्त अतिपदस्य क्रियाविशेषणतयाभि-धानीयतया एव इति चतुर्थी निरपवादत्व कल्पयन्तीति सुधीभिर्विभाव्यम् । यत् यस्मात् आयुधपरिग्रहं यावत् आयुधग्रहणम् आरभ्य "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमर: । दुर्विनः अविनय विनाश: अध्यारूढ: आश्रितः मतः । अध्यारूढ इति क्वचित् पाठ । यद्वा दुर्विन: दुष्टाभिनिवेश: अत्रैनिजचन्द्रकेतुयोधेभ्य इति यावत् । आयुधपरिग्रहं यस्मात् तस्मात् आयुधग्रहणमारभ्य अध्यारूढ: प्राप्त: । एते माम् ईदृशं स्नेहयुक्ता पश्यन्ति, अहं पुनरेषां आयुधग्रहणादपि तद्द्रोही इति भाव । प्रकाशम् आहेति शेष । लवस्य मम बालिशतां मूर्खतां "मूर्खवैधेयबालिशा:" इत्यमर । शृण्वन्तु आकर्णयन्तु तातपादा: पूज्यपादा भवन्त: । पितृतुल्या मया अकारणमपराद्धम् अतएव मे मम निजकार्यत्वेन पितृपादा: पूज्यतया भवन्त: आकर्णयन्त्वित्यर्थः ।

(क) किमिति । वत्सेन पुत्रस्थानीयेन त्वया किम् अपराद्धं को अपराध: कृत इत्यर्थ: ।

चन्द्र । अश्वानुयायिभ्यः तातप्रतापाविष्कारमुपश्रुत्य वीरायितमनेन । (ख)

लव । ननु अयमलङ्कारः क्षत्रस्य । (ग)

न तेजस्तेजस्वी प्रसृतमपरेषां विषहते *
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥१४॥

[१४ । तेजस्वी प्रसृतं परेषां तेजः न विषहते । प्रकृतिनियतत्वात् स तस्य स्वः अकृतकः भावः । यदि देवः दिनकरः मयूखैः अश्रान्तं तपति, आग्नेयग्रावा निकृत इव किं तेजांसि वमति । इत्यन्वयः]

(ख) अश्वेति । अश्वानुयायिभ्यः अश्वरक्षणाभियोगाधिकारिभ्यः, 'जुगुप्साविराम—' इति पञ्चमी । तातप्रतापाविष्कारम् तातस्य भवतः प्रतापस्य पराक्रमस्य अलौकिकतेजसः इति यावत्, आविष्करणं प्रकाशनम् उपश्रुत्य आकर्ण्य अनेन लवेन वीरायितं वीरैरिवाचरितं पराक्रम: प्रकाशितः, वीरत्वमाचरितम् इत्यर्थः । लवो हि अश्वानुयायिवचनात् ज्ञातपराक्रमात्मानं मन्यमानः, रामस्य महावीरत्वमपि अश्वावरोधेऽसमर्थो जातः । चन्द्रकेतुश्च तथाविधं दृष्ट्वा तदुत्तरं दत्तवान् इति ।

(ग) नन्विति । अत्रस्य क्षत्रियजातेः अयम् एव वीरत्वादाचरणमित्यर्थः; "स्त्रियाः पुंवद्भाषितपुंस्कात्—" इति पुंवत् । अलङ्कार भूषणम् एव । ननु अवधारणे । क्षत्रियस्य पराक्रमप्रकाशः न दोषाविष्करणं ।

(१४) तदेव समर्थयति—न तेज इति । तेजस्वी प्रतापवान् शौर्यवीर्यसम्पन्नो वीरः इति यावत् । प्रसृतं व्याप्यमानमर्थं व्याप्त विस्तीर्णम् अपरेषां अन्येषां तेजः पराभिभवकारकं न विषहते न क्षमते इति यत् स अकृतकमित्यर्थः । विधेयप्राधान्यात् पुंस्त्वम् । तत्र तेजस्विनः प्रकृतिनियतत्वात् प्रकृत्या स्वभावेन नियमितत्वात् उपाधानकारणप्रभवत्वात् अकृतकः अकृत्रिमः स्वभावजः स्वः स्वकीयो भावः धर्मः । अस्यार्थस्यापि दृष्टान्तमाह । तदेव समर्थयति—मयूखैरिति । यदि देवः दिनकरः भास्वान् मयूखैः किरणैः अश्रान्तम् अविरतं तपति तदा किं आग्नेयग्रावा सूर्यकान्तमणिः, 'अग्निर्जोतिर्विभावसुः' इत्यमरः । निकृत इव तिरस्कृत इव किं [illegible]

* प्रकृतौ इति पाठान्तरम् ।

चन्द्र॰। तात! अमर्षोऽप्यस्य शोभते वीरस्य। पश्यतु हि तातः—प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि। (घ)

राम। [विलोक्य] वत्स लव! संह्रियतामस्त्रमिदम्। त्वमपि चन्द्रकेतो! निर्व्यापारविलक्षाणि सान्त्वय बलानि। (ङ)

लव॰। यथा आज्ञापयति तातः। [इति प्रणिधानं नाटयति।] (च)

किं त्रिमिर्त तेजांसि दाहात्मकं सामर्थ्यं वमति उद्गिरति। वमतेर्गौणार्थे प्रयोगात् ग्राम्यत्व-दोषाः। “निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥” इति दण्डी। अचेतनोऽपि सूर्यकान्तमणिर्यत् सूर्यकिरणसन्तापेन परिभवं प्राप्त इव वह्न्यात्मकं स्वतेजो निःसार्य तेजस्विनं सूर्यमपि पराभवितुमिच्छति तत् किं सचेतनो वीरस्तादृशोऽयं पर-पराक्रममुपलभ्य न पराक्रमेत इति भावः। पूर्वार्द्धप्रतिपाद्येन अप्रस्तुतेन सामान्येन प्रस्तुतस्य विशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः। पूर्वार्द्धेन सामान्यतः प्रक्रान्तस्य तेजस्विनां परतेजः-सहनाभावस्य परार्द्धेन विशेषेण समर्थनात् सामान्यस्य विशेषेण समर्थनरूपोऽर्थान्तरन्यासश्च। अत्र अर्थान्तरपुनरुक्ततादोषः। एतदनुरूपमाहोक्तिः यथा शाकुन्तले—“शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः। स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति॥” “प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया।” इति किरातार्जुनीयेऽपि। शिखरिणी वृत्तम्।

(घ) तातेति। अस्य एतस्य वीरस्य शूरस्य अमर्षोऽपि क्रोधः अपि अक्षमतापीति यावत्, शोभते भाति युक्त एव इत्यर्थः। हि यत प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि प्रियवयस्येन अनेन कुमारेण लवेन विनियुक्तं प्रेरितं निक्षिप्तं यत् जृम्भकास्त्रं तन्निक्षेपेण स-र्वतोऽभिभवितुमिच्छन्तम् आयुधं तेन निष्कम्पं निश्चलं यथा तथा स्तम्भितानि जडीकृतानि सर्वतः सर्वासु दिक्षु अवस्थितानि सर्वतः सामस्त्येनेति वा, सैन्यानि अस्मद्बलानि। तातः भवान् तत् पश्यतु इत्यन्वयः। अतएवास्य महावीरस्य परोत्कर्षासहिष्णुता युज्यते एवेति।

(ङ) विलोक्येति। विलोक्य निरीक्ष्य सैन्यानि इति। वत्स लव! संह्रियताम् अस्त्रमिदं जृम्भकास्त्राणि आयुधानि संह्रियन्तां संह्रियतां निर्व्यापाराणि विलक्षाणि।' तथा चन्द्र-केतो!' अपि, अत्र हेत्वाधारः अपिशब्दः। त्वमपि बलानि सान्त्वय निर्व्यापार-विलक्षाणि निर्व्यापाराणि विक्षेपतया व्यापाररहितानि अतएव विलक्षाणि-विस्मयान्वितानि लज्जितानि वा। बलानि अस्मत्सैन्यानि सान्त्वय च।

(च) यथेति। तातः श्रेष्ठतातो भवान् यथा यादृशं आज्ञापयति आदिशति। तथा॰

चन्द्र । यथादिष्टम् । [इति निष्क्रान्तः] (छ)

लवः । प्रशान्तमस्त्रम् । (ज)

राम । वत्स ! सरहस्यप्रयोगसंहरणानि अस्त्राणि आम्नायवन्ति । (झ)

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्राः शरदस्तपांसि ।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

[१५ । ब्रह्मादय पुराणा गुरवः ब्रह्महिताय परःसहस्रा शरद तपांसि तप्त्वा एतानि स्वानि तपोमयानि तेजांसि एव अपश्यन् । इत्यन्वय ।]

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष गुरुपूर्वानुक्रमः । कुमारस्य तु कः सम्प्रदाय इति पृच्छामि । (ञ)

अनुतिष्ठामि इति शेष । अस्त्राणि प्रतिसंहरामीत्यर्थः । इति एवमुक्त्वा प्रविधानम् [illegible] ध्यानमन्तर्ध्यानं समाधिमिति यावत्, नाटयति अभिनयेन दर्शयतीत्यर्थः ।

(छ) यथेति । आदिष्टम् अनतिक्रम्येति यथादिष्टम् आदेशानुरूपं यथा तथा [illegible] करवाणीत्यर्थं । यद्वा भवता यथा यादृक् आदिष्टम् आज्ञापितं तथा करोमि ।

(ज) प्रेति । अस्त्रं जृम्भकाख्यम् आयुधं प्रशान्तं निवृत्तं निर्व्यापारं जातमित्यर्थः ।

(झ) वत्सेति । सरहस्यप्रयोगसंहरणानि प्रयोगश्च संहरणञ्च प्रयोगसंहरणे रहस्येन सह वर्तमाने सरहस्ये तादृशे प्रयोगसंहरणे येषां तानि अस्त्राणि आयुधानि आम्नायवन्ति सम्प्रदायसिद्धानि गुरूपदेशापेक्षीणि, गुरूपदेशमन्तरेण प्राप्तिर्न सम्भवतीत्यर्थः ।

(१५) ब्रह्मादय इति । अयञ्च श्लोकः प्रथमाङ्क एव व्याख्यातः ।

(ञ) अथेति । ब्रह्मादय इति श्लोकेन जृम्भकास्त्राणां पुरातनगुरुसेवनत्वं [illegible] तत्सम्प्रदायं यथाक्रमं व्यनक्ति—अथैतदित्यादिना । [illegible] सम्पन्नः, तथाच [illegible] ' इत्यमरः । कृशाश्वः, एतन्मन्त्रपारायणोपनिषदमिति [illegible]

लव । स्वतःप्रकाशानि उभयोरस्त्राणि । (ट)

राम. । [विचिन्त्य] किं न सम्भाव्यते, प्रकृष्टपुण्योपादानजन्मा कोऽपि महिमा स्यात् ? द्विवचनन्तु कथम् ? (ठ)

अयनं गमनं प्राप्तिरिति यावत्, यस्मात् मन्तुन तदेव उपनिषत् रहस्यम् ज्ञानम् यथा मन्त्र-पारायणोपनिषत् तां मन्त्रात्मिकां प्रकृतास्त्रविद्यामित्यर्थः । पर.सहस्रपरिवत्सरान्वेषाविति सहस्रात् परे इति परःसहस्राः, राजदन्तादित्वात् सहस्रशब्दस्य परनिपातः, "पारात् सत-सहस्रायो"रिति पारस्करादित्वात् सुट्प्रत्ययश्च तादृशाः परिवत्सराः संवत्सराः, तान् व्याप्य यत्ने वसतीति तस्मै, सहस्राधिकान् संवत्सरानभिव्याप्य शिष्यपदमध्यासीनाय शिष्यार्थमिकार्थं गुरुपाद-मूलमधिष्ठितायेत्यर्थः । कौशिकाय कुशिकनन्दनाय विश्वामित्राय प्रोवाच प्रकृष्टम् उपदिदेश, स तु प्रोक्तः भगवान् विश्वामित्र इत्यर्थः । मह्यं रामायेत्यर्थः प्रोवाच इति शेषः । प्रोवाचे-त्यत्र [illegible] उपदेशस्य प्रकर्षसूचनात् सकलाम् विद्यायाः प्रकर्षो गम्यः । इति [illegible] एव गुरुपूर्वानुक्रमः गुरूणाम् उपदेष्टॄणां विद्यादातॄणां पूर्वानुक्रमः पूर्वतोऽनुक्रमः [illegible] [illegible] एतद्गुरुपरम्परया [illegible] विद्या यस्मात् [illegible], एतस्यां विद्यायां अन्यस्य संक्रमस्य विज्ञानं नास्ति इत्यर्थः । न किन्तु कुमारयोः [illegible] [illegible]-मर्थः । कः सम्प्रदायः गुरुपरम्परोपदेशः इति पृच्छामि ज्ञातुमिच्छामि । यदन्तु प्राप्तगुरु-परम्परया सरहस्यं जृम्भकास्त्रं विज्ञातवन्तः, तत् नु क उपदेष्टा इत्यस्त्रविज्ञानेन नितरां [illegible] पृच्छामि अतु कथमिमौ वेदविद्यासम्पादितवदिति भावः ।

(ट) स्वत इत्यादि । आवयोः कुमारयोरित्यभिप्रायः । स्वयमेव जन्मतः प्रभृति जृम्भ-[illegible] । अस्माकमपि जृम्भकास्त्राणि स्वतःप्रकाशानि स्वत स्वभावतः उपदेशादि-[illegible] । प्रकाशः प्रतिभासः विज्ञानमिति यावत्, येषां तानि [illegible] [illegible] भवन्तीति शेषः । तथाहि—आवयोः जृम्भकास्त्राणि जन्मतः प्रभृत्येव [illegible] न तु गुरूपदेशादिनिमित्तं तत्र विद्या इति भावः ।

(ठ) विचिन्त्येति । विचिन्त्य विमृश्य, जृम्भकास्त्रस्य स्वतःप्रकाशरूपाद्भुतवार्त्ताश्रवणेन संप्रबोधिता चिन्तेति बोध्यम् । किं वस्तु न सम्भाव्यते अपीति शेषः । अत्र सर्वमेव सम्भाव्यतया बोधयितुं शक्यते, यतः पुण्यप्रभावस्य किमपि नास्तीति । प्रकृष्टपुण्य-[illegible] प्रकृष्टं अतिशयितया [illegible] । प्रकर्षमतीव पुण्यस्य [illegible] परिपाकः, परिपाकः [illegible] [illegible] एव [illegible] कोऽपि अनिर्वचनीयः स्वाभाविक महिमा [illegible] स्यात्, यदि, तत्र कृपाकल्पतरौ विचिकित्सा । तथाहि— तथैव

लव। भ्रातरौ आवां यमजौ। (ड)

राम। स तर्हि द्वितीयः कः? (ढ)

[नेपथ्ये।] भाण्डायन, भाण्डायन! (ण)

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे तथेति।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु॥ १६॥

[१६। ननु आयुष्मतः लवस्य नरेन्द्रसैन्यैः आयोधनं किल,—सखे किं आत्थ,—तथा इति? अद्य भुवनेषु अधिराजशब्दः अस्तम् एतु, क्षत्रस्य शस्त्रशिखिनः अद्य शमं यान्तु। इत्यन्वयः।]

कन्यावयोरभ्यर्थं शून्य तस्मात् साहाय्यमसाधारणमपि सम्भावयति, अतो गुरुपदेशमन्तरेण कथमक्स्मात् तत्त्वज्ञानप्रतिभास इति प्रश्नो न स्थिरतामवलम्बते, पुण्यपरिपाकपर्य्यालोचनेनैव तदपगमात् इति भाव.। द्विवचनान्विति, तु किन्तु अयमपि तथासम्भवे इत्यर्थः। कथं केन हेतुना द्विवचनं, आवयोरिति पदेन द्विवचन प्रयुज्यते तथेति शेष। त्वमेक एव कुशकाशप्रयोगसंस्कारयोः पात्रदर्शी दृश्यसे, तत्कथ द्विवचनं युज्यते इति भाव।

(ड) भ्रातराविति। आवां यमजौ युग्मतया जातौ, एककालीनैकगर्भजातौ इत्यर्थः। अथवा द्वितपूर्वैकगर्भाद्भ्रमणौ इति केचित्। भ्रातरौ भ्रातृत्वसम्पर्कवन्तौ, अत द्विवचनं यमजशब्दस्य भ्रात्रोर्द्वित्वप्रतिपत्त्यर्थं नेनैव रामवचनस्योत्तरसम्भवात्।

(ढ) स तर्हि इत्यादि। तर्हि यदि युवां द्वौ भ्रातरौ तदा इत्यर्थः। सः त्वदुक्तः द्वितीयः द्वयोः पूरकः कः किमभिधानः, त्वं यत् कथयसि युवां द्वौ भ्रातरौ तत्त्वामेव केवलमेकाकिनं पश्यामि अपर को नाम, स मया जिज्ञासाविषयीक्रियते इत्यर्थः। द्वितीयः क इति केचित् पठन्ति तत्रायमर्थ.। द्वितीयः क कुत्र त्वन्तु अत्र दृश्यसे सः अपरः कुत्र वर्तते इत्यर्थः। अनेनोपक्रमेण कुशस्य सूचनात् “नानुचितं विभेत्पातम्” इति नियमो न बाधितः।

(ण) नेपथ्य इत्यादि। भगवता प्राचेतसेन विरचितस्य रामायणकथाभागस्य भरतायत्नप्रापणार्थं प्रस्थितानां मुनिशावकानां परिरक्षणाय प्रेषितस्य: प्रतिनिवर्तमानः, कुशो वटेन रघुकुलसैन्यानामायोधनं शृण्वन् वीररसवशो भाण्डायनं इत्थंभूतपरिज्ञानार्थमामन्त्रयति भाण्डायनेति, स च चतुर्थाङ्कस्य आदौ विष्कम्भके उपस्थितः कश्चिन्मुनिबालकः प्राचेतसान्तेवासी। अत्र सम्भ्रमे द्विरुक्तिः। एतदंशस्य वक्ष्यमाणश्लोकेनान्वय.।

(१६) भाण्डायन इति सम्बोध्य वक्तव्यार्थं प्रतीति—आयुष्मत इति। आयुष्मतः प्रशस्तायुषः;

रामः। अथ कोऽयमिन्द्रमणिमेचकच्छवि-
ध्वनिनैव दत्तपुलकं करोति माम्।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम्॥ १७॥

[१७। अथ इन्द्रमणिमेचकच्छविः कः अयं ध्वनिना एव दत्तपुलकं मां नवनील-
नीरधरधीरगर्जितक्षणबद्धकुड्मलकदम्बडम्बरं करोति इत्यन्वयः।]

दीर्घायुष इत्यर्थः। लवस्य कनिष्ठतया वात्सल्येन तथोक्तिः लवस्य तदाख्यस्य कुमारस्य इत्यर्थः।
नरेन्द्रसैन्यैः नरेन्द्राणां यानि सैन्यानि तैः राजकीयसैनिकैः युध्यमानस्य स्थितैरिति तात्पर्यम्।
तत्र पदार्थे रामविजयातिशयसाधकत्वसमर्थनेन स्वप्रभावप्रकाशे समुपयुज्यते। आयोधनं युद्धं
परस्परं मारकव्यापार इत्यर्थः। किमु इति वार्तायाम तथापि—एवं श्रूयते यत् राजकीय-
सैनिकैः सह श्रीमतो लवस्य युद्धव्यापारः समवृत्तः, तत् किं सत्यम् उत केवलं जनप्रवाद एव
इति भाण्डायनं प्रति कुशस्य प्रश्नः। नेपथ्यस्थितेन भाण्डायनेन पुनः प्रोक्त इव वचनं प्रतीति—
अन्वितिः। ननु भो सखे समप्रायवस्था! [illegible] भाण्डायनस्य, लवविपद्दुःखातुरतया
अनया कुशवृत्तान्तात् सत्यवचनवादित्वदार्ढ्याय प्रयुक्तम्। किम् आत्थ किं कथयसि, तथा
इति राजकीयसैनिकैर्लवस्य युद्धसम्प्रहारः तथ्य इ? तर्हि अद्य प्रभृति दिवसे सेनावृत्तकीर्तनस्य
युद्धदिने इत्यर्थः। भुवनेषु जगत्सु अधिराजशब्दः अधिकाः, राजानः अधिराजाः तेषां शब्दः
वाचकः मातृगानुपूर्वीविशिष्टः वर्णो इत्यर्थः। ज्ञाताधिकवचनम्। [illegible] अधि-
राजतया बोध्यन्ते स स इत्यर्थः। अतम् एव विशेषं लभत इत्यर्थः। सर्वेषामिदानीं राज्ञां
परिचयसम्पादनेन वाच्याभावात् वाचकस्यापि अनवस्थितत्वात्। भवत्विति भावः। अत्र
भुवनेष्विति बहुवचनं विवक्षित तथाच अद्य रघुकुलापराधेन समस्तान्येव भुवनानि अधिराज-
शून्यानि विधाय अधिराजशब्दोच्चारणं विलोपयिष्यन् इत्यर्थः। अपि च अद्य चरस्य अविरजातिः
[illegible] अस्त्राणि एव [illegible] इत्यर्थः। अत अस्त्राणां विध्वंसकत्वरूपेण
धर्मेण साधर्म्यम्, अथवा अस्त्राणां विपक्षनिधनसाधने निःशेषोपयोगात् दारुकत्वधर्मेण
साधर्म्यम्, अपि च उपशमप्रायेण माहात्म्यम् अपेतम्। शमं शान्तिं नियतं यान्तु। यथा
वह्निज्वालादिभिरुपशाम्यति तथाच सम्प्रयुक्तानि पातकान्यपि शान्तिमायान्ति अस्त्राणि परपक्षमर्दन-
सामर्थ्यपरिहीणानि जायन्तामित्यर्थः। अत्र अस्त्रनिकरम् इति बहुवचननिर्देशेन यानि यानि अस्त्राणि
प्रतिपक्षेः प्रतिकूलतया परिज्वालयिष्यन्ति तानि तान्येव मया [illegible] शाखयिष्यन्ते
इति भावः समाश्वासयति। अस्त्रनिकरम् इत्यत्र अनयोः निश्चितत्वादपि [illegible] संरम्भात्
समाश्वासनवचनम्। वक्ष्यमाणार्थ इत्यम्।

लव'। अयमसौ मम ज्यायान् आर्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः। (त)

(१७) परोक्षस्थितेन सम्भ्रान्तेन कुशेन प्रोक्तां वीरवचनप्रवृत्तिमुपश्रुत्य श्रीरामचन्द्र कमप्यनिर्वचनीयं भाव लभमानो रोमाञ्चिताङ्गावस्थां निर्वर्णयति—अयीत्यादिना। अयीति प्रश्ने समुदितश्लोकस्यैव प्रश्नात्मकत्वात् अनुनाथप्रार्थनयसरान्तेति। इन्द्रनीलमणिमेचकच्छवि इन्द्रनील इन्द्रनीलवत् मेचका नीला कृष्णेव छवि, द्युति यस्य स नीलकुसुमवनील-कलेवर इति तात्पर्यम्, इन्द्रनीलमणेराश्रयत्यातिशयतया वर्णस्य प्रातिप्रथमाङ्गादकत्वं गम्यते। अत्र उपमानानुपपदो बहुव्रीहि उत्तरपदलोपश्च। क अविज्ञात इत्यर्थ.। अथ पूर्वतन-वाक्यप्रयोक्ता ध्वनिना शब्देन "भाण्डायन भाण्डायन" इत्यादि वाक्योच्चारणेन इत्यथ। एव दत्तपुलकं दत्त समर्पित पुलक रोमाञ्च यस्मिन् त रोमाञ्चितकलेवर मा नवनीलनीरधरधीर गर्जितप्रबलकुड्मलकदम्बवत्त नवा नूतना आवरणशीतसलिलसम्भारसम्भृता इत्यर्थ। अतएव नीला कृष्णवर्णा, जलपूर्णानामेव जलधराणामभ्यन्तरस्थनिविडजलबन्धेन नीलिमाप त्तिरिति। अथवा नूतना इति अचिरजाता इत्यर्थं। जीमूतानां तदुपादानधर्मविशिष्टताया वर्षाकालवर्त्तित्वात् इति भाव। तादृशा ये नीरधरा, मेघा तेषां धीरगर्जितानि गम्भीरध्वनय तै समुत्पन्न य हर्ष महोत्सव तेन बद्धा विकसिता संहृष्टा वा कुड्मला कोरका यस्मिन् तादृश कदम्ब नीपतरु तस्य डम्बरं सादृश्यं यत् तादृशं करोति जनयति। अथवा नवनीलनीरधरधीरगर्जितानां अर्थे वर्षाकाल इत्यर्थं। बद्धा' विलग्ना. कुड्मला यस्मिन् तादृशी य कदम्ब इत्यादि। तथाहि—यथा वर्षासु जलधराणां जलसम्भृतानाम् आनन्द' ध्वानमनुपश्चत्य विकसितकुड्मला नीपतरव' प्रतीयन्ते, तथा परोक्षस्थितस्य वीरबालकस्य वीर-रसमयीं वचनप्रवृत्तिमाकर्ण्यप्रतितरामुन्मनायितो रोमाञ्चकञ्चुकितकलेवर सम्वृत्तोऽस्मि इति भाव.। अत्र मेघेन कुशस्य तद्गर्जनेन कुशवचनस्य श्रीरामचन्द्रेण कदम्बपादपस्य रामकलेवरस्योत्पुलकीय कदम्बकोरकाणां साम्यमधिगन्तव्यम्। अत्र एका समासगता अपरा च वाक्योपमा। पृथ्वी वृत्तम्।

(त) अयमसावित्यादि अयं असौ "भाण्डायने"त्यादि वाक्यप्रयोक्ता मम ज्यायान् अग्रज' वयसा श्रेष्ठ इत्यर्थ। ज्यायसशब्दादिष्ठनो कृते "ज्य च च" इति ईयसुनस्य आदेशेन तत्पदसिद्धि'। आर्यः अग्रजतया पूज्य' कुशो नाम नाम्ना कुश कुशनामधेय इत्यर्थ। भरताश्रमात् भरतस्य मुनेर्नाट्याचार्यस्य तदाख्यस्य मुने' आश्रमात् आवासात् प्रतिनिवृत्त प्रत्यागत। तद्दिनमेव मे ज्यायांसम् अग्रेतु प्राप्तानिति भाव।

राम । [सकौतुकम् ।] वत्स ! इत एवाश्चर्यतममप्यायुष्मन्तम् । (घ)

भव । एवम् । [इति परिक्रामति] (ङ)

[ततः प्रविशति कुशः] (च)

कुश । [साङ्गतहर्षधैर्य धनुरास्फालयन् ।] (छ)

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
र्दृप्तानां दमनाय दीपितनिजक्षत्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

। १८ भगवतः वैवस्वतात् मनोः आ दत्तेन्द्राभयदक्षिणैः दृप्तानां दमनाय दीपितनिजक्षत्रप्रतापाग्निभिः आदित्यैः नृपतिभिः सह यदि विग्रहः ततः दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं मम एतत् धनुः धन्यम् इत्यन्वयः ।

[विक्रमं परिक्रामति] । (ज)

(घ) सकौतुकमित्यादि तथाद्भुतस्य वाग्वचनप्रयुक्तिकारिणो बालकस्य दर्शनात् उत्पन्नमानं कौतुकं तेन सह वर्तमानं यथा तथा इति सकौतुकम् आहात गम्यक्रियायाः विशेषणम् । तवाद्भुततिन्यायतोऽपि कुशस्य ताहृशं वीरवचनप्रयोगमधिगम्य तद्दर्शनकौतूहला क्रान्तः प्राह इति भावः एतन्नामि इममपि आयुष्मन्तं प्रशस्तायुषं दीर्घजीविनम् आश्चर्यतमम् आश्चर्यमनुपश्यत यतः कुशः अस्याधिक्यं व्यज्यते । कुशमित्यर्थः । इत एव अत्रैव मत्समीप एव । इत इति पदम् समभ्यस्यतामिति आत्रय समागन्तव्य यदस्य पश्यामीति भावः ।

(ङ) एवमिति स्वीकारसूचकमव्ययम् भवान् यथा वदति तथा एव करोमि, इत एव अत्र पूर्वज समाधयामीति भाव । इति एतदुक्त्वा इत्यर्थः परिक्रामति सर्वत्र पदकुविकृति ।

(च) ततः इत्यादि । ततः तदनन्तरं लवस्य परिक्रमणात् परमित्यर्थः । कुशः प्रविशति रङ्गस्थलमिति शेषः लवस्य परिक्रमणं पार्श्वे रामः पार्श्वान्तरे च आकर्षति इव कुशस्य प्रवेश इति तत्रैव च पार्श्वान्तरे लवस्य परिक्रमणम् इति नानुपपत्तिः ।

(छ) साङ्गतहर्षेत्यादि । अङ्गतं विस्मय नेत्र चक्षुरादुपस्थितम् दृष्टमात्, हर्ष वीर प्रतिपक्षलाभेन उत्साहः, धैर्य धीरता तत्र अमन्दमन्दाकाश्यहानिसम्भावनात् वीर्यगौरव परिज्ञानिग्रहनाद्वा, तैः सह वर्तमानं यथा तथा धनुः कार्मुकं आस्फालयन् समाकर्षन् ज्याकर्षणेन विस्फारितं कुर्वन्नित्यर्थः प्राहेति सम्बन्धनीयमाह्य, कैश्चित् न क्रियायाः विशेषणमिदमिति मन्यन्ते, तत्र न सम्भवति कुशः कुशः इति पाठस्वरूप

(१८) दीप्तप्रतिपक्षलाभेन वीरमाश्चर्यमभिलक्ष्यमाणमिदम् - इत्यादि

राम — कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः ! (क)

भ्रात् भगवन् यङ् सूर्यशालिन वैवस्वतात् विवस्वत सूर्यस्य अपत्य पुमान् वैवस्वत तस्मात् मध्यमकाले मना मन्वन्तराधिपात वा वैवस्वतात मनोरित्यत्र मर्यादार्थस्य आङ्भन्दस्य योगेन पञ्चमी । भगवन् वैवस्वत मनुमारभ्य इत्यर्थं इन्द्राभयदक्षिणे दत्ता वितीर्णा इन्द्राय वासवाय इत्यप्रभृतिभीताय अभयदात्रा अभयवचनेन समाश्वासन ये, अथवा अभयदक्षिणा अभयरूपा अभयवचना त्मिका दाक्षिणा पारितोषिक ५ तथाभूते तथाच इन्द्रस्य अभयवचनादिभि भवत भयादपरिरक्षकस्तथा तस्य पारितोषिकतया च दैत्यादिपरिमर्दनेनाभयरूपा दक्षिणा पारिकाल्पतवन्तः एतेन सूर्यवंशीयान महावीरत्व सूच्यते । इमानः वक्ष्यदर्पण प्रवक्तानां वन्याभिमानकौतानामिवय दहनाय गर्वविध्वंसाय समुन्मूलनायेति यावत्, दीपित प्रज्वलित तेज भाव यस्याः अस्थियाऽसौ प्रताप सामर्थ्य तेज इति यावत्, स एव अग्नि भवन्त ये तथाभूते आदित्य आदित्यस्य अपत्यानि पुमास आदित्या ते सूर्यवंशीये नृपतिभि राजन्यवग यदि विवद युद्ध, यदीति सम्भावनायां, यदि सम्भवेदित्यर्थ तत तदा, समस्याये तच्छन्दासाद । दीप्तास्त्र इत्युद्दीप्तिविच्छामित्राभिनतज्य दीप्तानि भास्वराणि यानि अस्त्राणि प्रहरणानि तथा स्फुरन्त्य वलन्त्य समन्ततो विस्फुरन्त्य प्रसरन्त्य या अस्या, भीषणा दीधिति-शिखा किरणज्वाला ताभि नीराजित नीराजनया मङ्गलिकोपचारेण समर्चिता ज्या गुण यस्य तथाभूतं उज्ज्वलानामायुधानां समन्तत प्रसरन्त्या दीप्तिज्वालया समाश्लिष्टमित्यर्थः । एतत इत्याश्रित मम धनु धन्य प्रशस्ततम, सुदाग्य प्रतिपक्ष लभमानस्य युद्धकर्मणा प्रहरण प्रशस्तमिति भावाद । तथा चायमर्थ —वैवस्वतात् मना प्रभृति ये तपनान्वयमहावीरा दानवभयविद्रुताय सुरेन्द्रायापि दत्तवन्तोऽभय, येषाञ्च क्षत्रियतेज प्रभावो भस्मशर्हितानां सर्व बन्ध कम्पमत्यन्त ज्वलति, तान्यादित्यवंशवीरानद्य यदि प्रतिपक्षभावेन लभमानो योधयितुं शक्नुयां तदा एव साफल्य मे धनुर्व्यापारस्य तदैव च धन्या मे धनुर्ज्या प्रवकृतनीराजनेति प्रतिपक्षा-प्राप्त्यनन्तमुत्कर्ष प्रकाशय ते मह युद्ध न सम्भवापि प्रकाप, सूच्यते, तथाच "वंशवीर्यश्रुतादीनि वर्णयित्वा त्वपारयि । मन्मथासाद्यनास्त्केन्धेयन्तस्य प्रतीच्यतो' ति । अत्र द्वितीयपादे धनुर्ज्यायां दक्षनशाध्यन आपत्यारोपात् रूपकम् शार्दूलविक्रीडितं वृत्तम् ।

(ख) विकटेत्यादि । विकट भयानक तमोदीप्तभावेनत्यर्थः । तादृशमहावीर विजयाय प्रयोजनीयस्य विपुलतेजोभारस्य धरणादित्यर्थं । परिकामति पश्यति प्रशस्या धनुष्यतीत्यर्थ

(ग) कोऽप्यस्मिन्निति । अस्मिन् पुरो दृश्यमाने क्षत्रियपोतके क्षत्रियपोतके क्षत्रिय-

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रस किमयमित्युत दर्प एव ॥ १८ ॥

[(१८) (अस्य) दृष्टि तृणीकृतजगत्त्रयसत्त्वसारा, धीरोद्धता गति धरित्रीं नमयति इव । कौमारके अपि गिरिवत् गुरुतां दधान किम् अयं वीर रस उत उत दर्प एव (इति)। इत्यन्वय]

— — — — —

बालत्वेन विहारकाले प्रतिपालितक्षात्रधर्मस्य लवस्य एव एतादृशत्वात् अविद्यैर्विवेकाचार पर्यालोचनाचेति मन्तव्यम् कोऽपि अनिर्वचनीय अनन्यसाधारण इत्यर्थ । धीरस्य पुंस्त्व वर्णना वीर्यस्य अतिरेक आधिक्यम् अतिशय इत्यर्थ तथा च अत्र क्षत्रियबाल अचिरा चिरन्तनसाधारणं तेज समालक्ष्यते इति भाव

(१८) कुमारस्य अनन्यसाधारणमेव वीरभावं प्रमाणेनोपपादयति—दृष्टिरित्यादिना अस्य क्षत्रियबालकस्य कुमारस्य दृष्टि दर्शनं नेत्रविक्षेपातनमित्यर्थ । तृणीकृतजगत्त्रयसत्त्वसारा तृणीकृत अतितुच्छतया गणित अतिलघुतया सम्भावित इति यावत्, जगत्त्रयस्य अशेषत्रिभुवन वितयस्य सत्त्वसार बलसारभाग यया तथा भूता, तथा च अस्य तेजोदीप्तदृष्टिपातेन त्रैलोक्यमेव जगत् तुच्छं सम्भाव्यते इत्यर्थ अथवा तृणवत् गणयति दृष्टि 'अक्षमापि धी'ति कर्मणि करणे विप्रत्यय, चक्षुरिन्द्रियमित्यर्थ तत् पर्यालोचनेन जगत्त्रयस्य बलसारं लघुतया मन्यते इति भाव तथा धीरा गाम्भीर्यशालिनी उद्धता वीरत्वगर्वेण प्रोद्दामभावा गति पाद विक्षेप धरित्रीं सर्वंसहां पृथ्वीं नमयति अधोगमयति इव तथा च अस्य गाम्भीर्यसम्पन्नौद्धाम पादविक्षेपेण सर्वंसहा वसुन्धराऽपि पातालमनुप्रविष्टेव सम्भाव्यते इति भाव कौमारके कुमारस्य इदं सदैव कौमार तस्मिन् वयस्यपि अवस्थायाम् गिरिवत् पर्वत इव गुरुत्व दुरतया अप्रतिहतभावं दधान समाश्रयमाण भावयन्निति यावत् सैन्य हि दृष्टपतितादेव एवं गुरुत्ववन्तो भवति न तु इतरेऽपि न हि कार्ये पार्थिवता गुरुत्वसुपालभ्यन्ते इति गिरिसाम्य साधनम् कि प्रश्न अयं वीर अनुभावव्यभिचारिभावक रस मूर्तिमान् इत्यर्थ । उत अथवा इति, उत अथवा दर्पं वीरत्वगर्व मूर्तिमान् इत्यन्वय, इति तथा च वीरोऽपि अस्य अवस्थितम् तथा अप्रतिहत गुरुत्वं यथा वीरो रस वीर गर्वितोऽयमेव इत आविर्भवतीति प्रतीयते इति महान् विस्मयमित्यत्र जनकाना "आत्मा वा अय पुत्रनामासि" इत्याद्युपनिषद्वाक्यैः अत्र विस्मयवता तथाच दृष्ट

लवः । [उपसृत्य] जयति आर्य्यः । (च)

कुशः । नन्वायुष्मन् ! किमियं वार्त्ता युद्धं युद्धमिति ? (छ)

लवः । यत्किञ्चिदेतत् । इमभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्त-ताम् । (ज)

कुशः । किमर्थम् ? (झ)

लवः । अत्र देवो रघुपतिस्तिष्ठति, स च जिज्ञासति पादयोर्वत्सलत्वं च युष्मत्सन्निकर्षस्य । (ञ)

क्रियासमाश्रयं यथा—"धीरा दृष्टिर्गतिश्चित्रा विलासे सविलं वचः" इति । अत्र पूर्वार्द्धे गती धरित्रीगमनक्रियाया एव शब्देन सम्भावनात् भावाभिमानिनी क्रियोत्प्रेक्षा, द्वितीयार्द्धे च कुक्षी धीरस्य दर्पस्य च अन्यवस्तुनः कविप्रतिभोत्थितसंशयात् सन्देहालङ्कारः, गिरिवदित्यत्रोपमा च । अत्र वस्त्वन्तरतृप्तता यथा शाकुन्तले—"मदनकेतनो धीरं वाल्मोऽयं प्रतिभाति मे" इति ।

(च) उपसृत्येति—रामचन्द्रादिष्टकुमारसमीपकर्मेण प्रस्थितः कुशसमीपे समुपस्थाय इत्यर्थः । आर्य्यः पूजनीयः अग्रज भवानित्यर्थः । जयति उत्कर्षेण वर्त्तते । अत्र केचित् जयतेर्लोटि प्रयोगाभावात् लोट्प्रयोगस्थले लट् प्रयुज्यते इति प्रकृतेऽपि तथैवेति वदन्ति ; तन्न, कनिष्ठेन लवेन ज्यायसः कुशस्य जयाशंसनस्यायोग्यत्वात् इति । वस्तुतस्तु जयतेरात्मनेपदस्य एव प्रयोगो दुःसहः न तु लोट्प्रत्ययस्य इति ।

(छ) नन्वायुष्मन्निति—आयुष्मन् दीर्घजीवन, वात्सल्येनोक्तमिदम् । युद्धं युद्धम् इति एतत्प्रकारा इयम् इतः पूर्व्वमेव श्रुता वार्त्ता कथा किं कीदृशी ? तदाख्याहि । अथवा युद्धं प्रारब्धमिति तत्र को हेतुभाव इति प्रश्नात्मकं वाक्यं, किंशब्दस्याव्ययत्वमिति न विरोधः । अथवा किं किम्भूतं वस्तु इति विशेषप्राधान्येन बोध्यम् । युद्धं युद्धमिति द्विरुक्तिः सम्भ्रमे, युद्धसंवादेनैव कनिष्ठस्य विपत्पातसंशयात् सम्भ्रमोत्पत्तेः ।

(ज) यत्किञ्चिदिति । एतत् युद्धरूपं वस्तु यत्किञ्चित् अतिसाधारणम् अतितुच्छ-मित्यर्थः । यथैव यस्य वीरस्य वीरत्वं सूच्यते, तथाभूतसूर्य्यवंशीयवीराणां प्रतिपक्षेऽपि युद्धस्य साधारणत्वप्रकाशनात् । अतितुच्छतया इदमाख्यातं, धीरत्वं तु सूचितमिति भावः । धीरत्वमेव व्यनक्ति—इमेति । आर्य्यः अग्रजः भवान् इमभावं गर्व्वितत्वम् धीरत्वमित्यर्थः । उत्सृज्य परित्यज्य अस्मिन् निकटवर्त्तिनि श्रीरामचन्द्रे इत्यर्थः । विनयेन नम्रतया वर्त्तताम्, तथाच श्रीरामचन्द्रे भवता विनीतेन स्थीयतामिति भावः ।

(झ) किमर्थमिति । किमर्थं, कस्य हेतोः भवान विनीतेन स्थातव्यं इमभावस्य परि-त्यागस्य इति शेषः ।

(ञ) अत्रेति । अत्र अस्मिन् स्थाने इत एवादूरे इत्यर्थः । देवः महाराजः रामाभिधानोऽधिप-

कुश। [सतर्कम्] स रामायणकथानायको ब्रह्मकोशस्य गोपायिता? (ल)

लव। अथ किम्? (व)

कुश। आशंसनीयपुण्यदर्शनः स महात्मा, किन्तु वयमस्याभिरूपगन्तव्या इति न सम्प्रधारयामि। (श)

देवस्वरूपो वा रघुपतिः रघूणामधिराजः श्रीरामचन्द्र इत्यर्थः। तिष्ठति चलि, स च श्रीरामचन्द्रः आवयोः त्वयि मयि च [illegible] भवति। युष्मत्सन्निकर्षस्य युष्माकं सन्निकर्षं सान्निध्यं तस्य भवतः समीपोपसर्पणस्य इत्यर्थः सम्बन्धविवक्षया षष्ठी, यद्वा कथञ्चित् [illegible] गमनात् षष्ठी। उत्कण्ठते आस्ते, तव तत्समीपोपगमनाय स नितरामुत्कण्ठितः आस्ते इत्यर्थः। [illegible] पूर्ववदन्वयः युष्माकमिति [illegible] बहुत्वं [illegible] सूचयति, अथवा [illegible] भावमादाय बहुत्वमभ्युपेत्य, तेन चायमधिकार्थं पर्यवस्यति, यत्—यथा स भवतः [illegible] उपसर्पणमर्थयितुमिच्छति तथा मामकेनापि इति। अयं भावः—यत् श्रीरामचन्द्रो भवतो यथा [illegible] तथा [illegible] मयि प्रीतिमवलम्बते इति। [illegible]

(ल) सतर्कमिति तर्कं प्रकल्प्येति तेन सह वर्तमानं यथा तथा [illegible] विचुलः [illegible]। रामायणकथानायक रामायणस्य [illegible] कथा [illegible] तस्या नायकः [illegible] प्रधानपुरुष ब्रह्मकोशस्य [illegible] गोपायिता परिपालकः [illegible] प्रतापेन [illegible] जगत् परित्रायक। [illegible] विघ्नकारिणो राक्षसराजस्य रावणस्य [illegible] श्रीरामस्य [illegible] तथा [illegible] वेदस्य परिरक्षक [illegible]। तथाच [illegible] वेदस्य [illegible] ताम् [illegible] इति [illegible] श्रीरामभद्री [illegible] इति द्विधा समाधेयम्।

(व) अथेति। [illegible] श्रीरामचन्द्रमव्ययम्। त्वं यथा वदसि तथैव, अयं स [illegible] भुवनपालको वा रामायणकथाप्रधानपुरुषः श्रीरामचन्द्र इत्यर्थः।

(श) आशंसनीयेति। स पूर्वकथित महात्मा महान् [illegible] आत्मा [illegible] स [illegible] श्रीरामचन्द्र इत्यर्थः। आशंसनीयपुण्यदर्शन. आशंसनीयं [illegible] पुण्यं पवित्रं [illegible] इत्यर्थः। तस्य [illegible] इति भाव.। दर्शन [illegible] [illegible] रामस्य [illegible] तीय-

लवः। यथा गुरुस्तथोपचारेण। (च)

कुशः। अपि कथं नामैतत्? (छ)

लवः। अत्युदात्तः सुजनचन्द्रकेतुः शौर्मिलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते, तेन तत्सम्बन्धेन धर्मतात एवायं राजर्षिरिति। (ज)

तस्य साक्षात्कार इत्यर्थः। अथवा आर्यं श्लाघनीयं पूजनीयं पुण्यं पवित्रं दर्शनं यस्य इति, तथाच तस्य दर्शनं पुण्येनैव सम्भवतीति तस्य दर्शने सम्पन्न पुण्यसम्पत्तिरभिव्यज्यते इत्यर्थः। किन्तु एवमार्यश्लाघनीयपुण्यदर्शनत्वेऽपि अस्माभि त्वया मया च इत्यर्थः। अत्रापि बहुवचनं प्रागुक्तरीत्यैक-वचनाभिप्रायकं, कथं केन प्रकारेण कीदृशोपचारसाहाय्येन इत्यर्थः। उपगन्तव्य उपसर्पणीयः अभ्यर्थनीय इति यावत्, इति इदं पूर्वोक्तं न सम्प्रधारयामि निश्चिनोमि, निर्धारयितुं न शक्य इत्यर्थः। ईदृशस्य महतो रामचन्द्रस्य साक्षात्कारे योग्यमुपचारं कमपि नोपलभ्यामीति भावः।

(च) यथेति। यथा येन प्रकारेण यादृशेन उपचारेणेति यावत्, गुरुः पित्रादिगुरुजनः उपगन्तव्य इति शेषः। तथा तादृशेन उपचारेण उपकरणेन अयम् उपगन्तव्य इति शेषः। तथाच विनयोपचारेण भगवन्तं रामचन्द्रमुपसर्पन्तु भवन्त इति भावः।

(छ) अपीति। अपीति प्रश्ने, समुदितवाक्यस्यैव प्रश्नात्मकत्वात्। एतत् गुरूपसर्पण-योग्योपचारेण श्रीरामचन्द्रोपसर्पणं कथं नाम कस्य हेतोः?

(ज) अत्युदात्त इति। अत्युदात्तः अति अत्यर्थम् उदात्तः उदारचेताः महोदारस्वभाव इत्यर्थः। सुजनः श्रीमद्गुणयुक्तः शौर्मिलेयः ऊर्मिलाया अपत्यं पुमान् इति ऊर्मिला-शब्दात् ढक्, ऊर्मिलापुत्रः। प्रकृते प्रणयप्रकर्षस्य वक्तव्यतया प्रणयं प्रति कोमलत्वमुप-यातीति अवश्यम्भावेन कोमलत्वस्य स्थितावनतिरेकेण सत्त्वात् चन्द्रकेतुहृदयस्य कोमलत्वातिशय-प्रतिपादनार्थं [illegible] पतिव्रतामापन्नसत्त्वामेकाकिनीं सीतां परित्यज्य अयोध्या-प्रत्यागतस्य कठोरहृदयस्य पितुर्नाम्ना अनभिहितम्, मातृपरिचयेन निर्देशः। चन्द्रकेतुः तदात्मजः। वयस्यवाचः प्रियवयस्य, प्रियबन्धुः इति एवंवादिन इति कथयित्वेति यावत्, सख्येन बन्धुत्वेन मैत्र्या इति यावत्, माम् उपतिष्ठते समभ्युपैति। अत्र उपपूर्वस्य स्थाधातोर्मैत्रीकरणार्थे आत्मनेपदम्। तेन प्रियवयस्योपस्थानेन इत्यर्थः। तत्सम्बन्धेन तस्य चन्द्रकेतोः सम्बन्धेन सम्पर्केण तातत्वरूपेण राजर्षिरित्यर्थः। अथवा चन्द्रकेतुना प्रतिष्ठापितेन मैत्रसम्बन्धेन हेतुना अयं राजर्षिः पितृतुल्यो राजा पवित्रतादिगुणयोगादिति शेषः, धर्मतातः धर्मेण धर्मानुसारेणेति यावत्, तातः ज्येष्ठतातः इति अस्मात् हेतोरित्यर्थः, गुरुयोग्योपचारेण सः अभ्यर्थनीय इति शेषः।

कुश । सम्प्रति चरवणीयो * राजन्योऽपि प्रश्रयः ! (ख)

लव. । पश्यतु एनम् आकारानुभावगाम्भीर्य्यसम्भाव्यमानविविधलोकोत्तरचरितातिशयमार्य्यो महापुरुषम् । (क)

कुश. । [निर्वर्ण्य ।] (ग)

अहो प्रासादिकं † रूपमनुभावश्च पावनः ।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् * ॥ २० ॥

[२० । अहो प्रासादिकं रूपं पावनः अनुभावश्च रामायणकविः देवीं वाचं स्थाने व्यवीवृतत् । इत्यन्वयः ।]

(ख) सम्प्रतीति । सम्प्रति धर्म्मतत्त्वातत्त्व सिद्धे राजन्येऽपि मूर्द्धाभिषिक्ते क्षत्रियेऽपि प्रश्रय विनयः चरवणीयः, अनिष्टनीय । तथाच तेजोहमाना क्षत्रियाणां तेजस्विषु क्षत्रियेषु विनीततयावतिष्ठमानानां तेजोऽभावप्रतीतिरेव भवति, किन्तु साम्प्रतं श्रीरामचन्द्रस्य तात्त्विके सिद्धे वयं अपराधवशतया अस्य राजर्षेः सम्बन्धे विनयं गृहीतवानिति जना परिकल्पयितुं न प्रवर्त्तिष्यन्ते इति भाव ।

(क) पश्यत्विति । आर्य्य, पूज्य एनम् अदूरस्थितम्, आकारेत्यादि—आकारेण शरीरसंस्थानेन अनुभावेन प्रभावेण गाम्भीर्य्येण गम्भीरतया सम्पदि विपदि वा चाञ्चल्यपरिहीनतया सम्भाव्यमान अनुमीयमान विविधानां बहुप्रकाराणां लोकोत्तराणां लोकातिक्रान्तानाम् अलौकिकानां चरितानाम् आचरितानाम् अतिशय, आधिक्य यस्य तथाभूतम्, तथाच यस्य आकारं प्रभावं गाम्भीर्य्यञ्चावलोक्य अलौकिकानि कर्म्माणि सम्भाव्यन्ते तादृशमित्यर्थः । महापुरुषं प्रधानपुरुषं पश्यतु । अनयोक्त्या महापुरुष श्रीरामचन्द्र तदग्रिमेव प्रश्रयावलम्बनमुचितं इत्युक्तवान् ।

(ग) निर्वर्ण्येति निर्वर्ण्य निरूप्य दर्शनमभिनीय इत्यर्थः । प्राहेति शेष ।

२० । लवोक्ताः गुणावलीः श्रीरामचन्द्रे निर्वर्ण्य तदनुमानात् रामायणकविरौच्चित्यमेव महापुरुषमाश्रित्य कविवाणी प्रवृत्ते यथार्थमिति इति च व्यनक्ति—अहो इत्यादिना । अहो इत्याश्चर्य्ये । प्रासादिकं रूपम् प्रसन्नतया सदानन्दप्रफुल्लताविकाशम् इति यावत्, संकटेऽपि अविकारमित्यर्थः । अनुभावः प्रभावः पावन इव तस्मिन् अयं प्रासादिकं प्रसादगुणोपादानमिति

---

* चरवणीय इति पाठान्तरम् ।

† अलौकिकम् इति क्वचित् पाठ ।

* व्यवीवृतत्, व्यवीवृधत् इति पाठभेदौ ।

[उपसृत्य ।] तात ! प्राचेतसान्तेवासी कुशोऽभिवादयते । (ग)

राम । एह्येहि आयुष्मन् ! (घ)

अमृताध्मातजीमूतस्निग्धसंहननस्य ते ।
परिष्वङ्गाय वात्सल्यादयमुत्कण्ठते जनः ॥ २१ ॥

[(२१) अयं जनः वात्सल्यात् अमृताध्मातजीमूतस्निग्धसंहननस्य ते परिष्वङ्गाय उत्कण्ठते । इत्यन्वयः ।

— — — — — — — —

केचित्, रूपम् आकृतिः, तथाच—"रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपी"ति मेदिनी । अस्याकृतिः सुप्रसन्ना अदृष्टपूर्वतया विस्मयमिव समुपजनयति इत्यर्थः । अस्य अनुभावः तेजोदीप्तता पावनः पवित्रताजननः, तथा च अस्य तेजोभावं शरीरसंस्थानं पश्यद्भ्यो नूनमलौकिकं पुण्यमुपचरति । रामायणकविः रामायणाख्यग्रन्थस्य कविता महामुनिः प्राचेतसः इत्यर्थः । अनेन राममिवाश्रित्य तस्य काव्यनिर्माणत्वं व्यज्यते । दैवी वाक् वाग्देवता त्वामेव युक्तं यथा तथा व्यचीकृतत् विस्तारयामास । विपूर्वकस्य कृतेर्भावयतनात्मकविस्तारार्थत्वप्रसिद्धावपि प्रकृते धातूनामनेकार्थत्वमनुसन्धेयम् । अस्य आकृतिरतिप्रसन्ना प्रभावश्च पवित्रताजननः तदिममाश्रित्य प्राचेतसो यद्गीत्याक्षराणि विरचयामास तद्युक्तमेवेति । अथवा त्वामेव तादृशं पावनविषयं श्रीरामचन्द्ररूपं विषयं इत्यर्थः । व्यचीकृतत् तत्कथितत्वं रामायणकथां प्रथितवानित्यर्थः । अत्र केचित् व्यचीकृतत् इत्यत्र व्यचीकृपत् इति पठन्ति, तत्पक्षेऽपि पूर्व एवार्थः । तनादिगणीयकृधातोः पूर्ववत्स्वार्थपरीक्षारेव पराक्रमेऽपि प्रयुक्ते । अथवा "कृप् प्रीतौ" इत्यस्य विपूर्वस्य लुङि व्यचीकृपदिति, तथाच अनेन चरितवर्णनेन वाग्देवता प्रीणयामास इत्यर्थः । एतेन श्रीरामचन्द्रस्य महत्त्वातिरेको व्यज्यते, यस्य चरितनिबन्धनात् वाग्देवतापि प्रीतिमाप इति केचित् । उत्तरार्द्धप्रतिपाद्यार्थं प्रति पूर्वार्द्धप्रतिपाद्यार्थस्य वाक्यार्थीभावेन हेतुताप्रत्ययात् वाक्यार्थहेतुकं काव्यलिङ्गम् । पथ्यावक्त्रं वृत्तम् ।

(ग) उपेति । तात, अनुकीर्तनमन्यकृत्येत्यर्थः । प्राचेतसान्तेवासी प्राचेतसस्य वाल्मीकेः अन्तेवासी शिष्यः कुशः तन्नामधेयः जनः अभिवादयते नमस्करोति अयमिति शेषः । अत्र स्वयं नमस्कर्तृत्वेऽपि कुशस्य नामनिर्देशः नमस्कारविधौ तथाचार्यरीतिसम्पन्नत्वाय तेनैव नमस्कार्यस्य सम्मानातिशयेन प्रतीतेः, तथाच श्रुतिः—"आचार्याणामिदं व्रतं यत् स्वाभिधानं तत् परोक्षेण प्रकटयती"ति ।

(घ) एहीति । आयुष्मन्, एहि एहि आगच्छागच्छ, सम्भ्रमेण आदरेण वा द्विर्वचनम् । उत्कण्ठा प्रतीव कुशदर्शनाकृष्टात्, आलम्बनसम्बन्धितवात्सल्यातिशयस्य सूचकेति वचनस्य अवधानात् ।

(२१) एहि एहीति इत्यनन्तरमेव आलिङ्गनमिति प्रतीयते कुशस्य तमेव निर्दिशन्नाह —

[परिष्वज्य सस्नेहम्।] तत् किमपत्यमयं दारकः ? (क)

अङ्गादङ्गात् सृत इव निजो देहजः स्नेहसारः †

प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेव।

सान्द्रानन्दक्षुभितहृदयप्रस्रवेणेव सृष्टो

गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥ २२ ॥

[(२२) अङ्गात् अङ्गात् सृत निज देहज स्नेहसार इव चेतनाधातु एव प्रादुर्भूय बहिः स्थित इव, सान्द्रानन्दक्षुभितहृदयप्रस्रवेण सृष्ट इव, यत् गात्रं श्लेषे अमृतरसस्रोतसा सिञ्चति इव। इत्यन्वयः।]

[illegible]दि। अहं अत्र रामस्य वात्सल्यात् वात्सल्यरसेन [illegible]परवशीकृतया इत्यर्थः। अथवा-जातशीकृतस्निग्धसंहननस्य अमृतेन सुधारसेन अथवा अमृतं जलं तदेव अमृतं सुधारसः इति श्लिष्टरूपकं, तेन आत्मना परिपूर्णो ऽस्मि सौम्य। मेघा तवत् स्निग्ध[illegible] संहननम् अङ्गं यस्य तथाभूतस्य अमृतभूतानन्दप्रवाहमयशरीरस्य ते तव [illegible] इत्यर्थः। परिष्वङ्गाय आलिङ्गनार्थम् उत्कण्ठते उत्कण्ठां प्रजनि त्वां तथाभूतमालिङ्गितुमिच्छतीत्यर्थः। '[illegible]-सुखास्वादो यस्ततोऽप्यतिमनसि। तत्प्रातोच्छो समहल्लासुत्कण्ठा [illegible] मिदुः।' [illegible] तव स्निग्धस्यास्य शरीरस्य परिष्वङ्गलाभाय अहं कौतूहली—अस्मि, तदेहि मां प्रगाढं परिष्वज्य कौतुकं मे निवर्तयस्व इति भावः। अत्र प्रथमार्द्धे अनाकुलतोपमा। उपमालङ्कारः। छन्दः पूर्ववत्।

(क) परिष्वज्येति। परिष्वज्य आलिङ्ग्य सस्नेहम् सानन्दम् आहेति शेषः। आलि-ङ्गनकालीनगौरवसम्पर्कसंजातलाभ-[illegible] अनन्तरमनुभवति—तदित्यादिना। तत् तस्मात् हेतोः अयं परिष्वङ्गविषयः दारकः बालकः [illegible] अपत्य किमपत्यं [illegible] इत्यर्थः। अथवा [illegible] पूर्वाननुभूतसुखस्य[illegible] सौख्यं [illegible] कुशे [illegible] विस्मयति—तत् किमिति। किंशब्दः प्रश्ने। तत् तस्मात् [illegible] हेतोः अयं दारकः किम् अपत्यं सन्ततिः अस्तीति शेषः। [illegible] सर्वविशेषाभावात् रामो लुप्तवान्, मायम् आनन्दः [illegible] परमप्रीतिरिव इव प्रतिभाति, तत् अननुभूतो मया पुत्रसमागमानन्दः स एवायं वा [illegible] कुशे पुत्रस्नेहं [illegible] इति भावः।

(२२) [illegible] विशेषेण हेतुं निर्दिशति—अङ्गादङ्गादित्यादिना। अङ्गात् अङ्गात्

---

† [illegible] इति पाठान्तरम्।

लव: । तात ! ललाटन्तपो घर्मस्तोयबिन्दुरिव [illegible] सुधर्तं-
मातनपरिश्रमं करोतु तात: । (च)

सर्वेभ्य: गात्रेभ्य, शरीरस्य सकलप्रदेशेभ्य: इत्यर्थ: । गोपायां विगलित । पुन: चरित, विगलित इति यावत्, निज: स्वकीय: देहज, देहात् जात: पञ्चभ्यन्तात् देहस्वेदोऽवयवात् जनेर्ड । शरीरोत्पन्न: स्वेदस्य कनिष्ठअन्नप्रचयस्य सार: स्थिरांश: प्रकृष्टभाव इत्यर्थ: । इव । अयं हि बाल: ललाटपरिश्रमसम्पर्केण शरीरात् बिन्दुशो विगलित: स्वकीयस्वेदस्य सारांश इव प्रतीयत इत्यर्थ: । अथाहं स्वेदस्य परामृतानन्दपदवीमुपगच्छामीति भाव: । अत्र 'अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे' इति श्रुतिप्रमाणेन पुत्रत्वसन्देहस्य गाढता । चेतनाधातु: चैतन्यात्मकं वस्तु चेतना संज्ञा सा एव धातुरित्यर्थात् एव बहि: बहि: प्रदेशे प्रादुर्भूय आविर्भूय शरीरान्तर्भाव इत्यर्थ: । स्थित इव अवस्थित इव । तथा च सर्वेव चेतना मे शरीरं परित्यज्य बहिरेव वर्तते इति जानामि, अतएवात्मनीतस्थितेव हृदयं संक्रान्तं पश्यामीति भाव: । सान्द्रानन्देत्यादि—सान्द्रेण निबिडेन आनन्दरसेन स्वल्पपरिसरे हृदये परिमाणस्याधिक्येन क्षोभकता इत्यर्थ: । आनन्देन आह्लादेन क्षुभितं विस्तृतस्वपरिसरपर्यन्तेन विक्षोभं नीतम् आलोडितं हृदयम् अस्य, हृदयं तस्य च: प्रस्रव: निष्यन्द: मन्थोद्भूत सारभाग तेन स्पष्ट निर्मित इव । तथा च आनन्दनिष्यन्दमयोऽयं बालकस्य मे परमानन्दं जनयन् समीपे प्रवर्तते इति मन्ये अतएवानन्दसमागमेन [illegible] आनन्दरसानाम् आनन्दानाम् अवकाशविधानेच्छयेव हृदयानन्दसारान् बहि: संदेहं [illegible] नावकाशमिव पर्यन्तमगमत् । अथवा सान्द्रानन्दक्षुभितस्य हृदयस्य च, प्रस्रव: तदुद्भवादि [illegible] या बहिरवतार: तेन तथा च परमानन्दसन्दोहमयस्य मे हृदयस्य तदङ्गीभूत: [illegible] वा बहिरंश इवायं प्रतीयते एतमालोकयतो मे [illegible] जातम् इति भाव: । यत् यस्मात् त्वं मे परिष्वङ्गे आलिङ्गने सतीत्यर्थ: । अथवा त्वं मे आलिङ्गनकाल एवेत्यर्थ: । गात्रं शरीरं अमृतरसशीतलया अमृतरसस्य सुधारसस्य शीतलया [illegible] सिञ्चति इव वर्षतीव । [illegible] करोति [illegible] । तथा च आलिङ्गनेनाहं सुधास्वादमिवानुभवतवान् इत्यर्थ: । अयं भाव:—[illegible] मनोरथानाम्, [illegible] चैतन्यम् एतदभिमुखं, [illegible] मे [illegible], [illegible] आनन्दमयी च हृदयं, [illegible] सुधारसस्यान्तरिक्षमिव [illegible] [illegible] मे [illegible] भाव: । अत्र सर्वत्र चेतनाधातोर्बहि: [illegible] भावाभिमानिनी [illegible] संसृष्टि: । अलङ्कारा इयम् ।

(च) तात इति । तात, [illegible]

रामः । इदमिवचरितं वत्साय । (छ)

[उभौ परिक्रम्य उपविशतः ।] (ज)

रामः । [स्वगतम् ।] (झ)

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥ २१ ॥

[२१ । अहो कुशस्य लवस्य च प्रश्रययोगेऽपि गतिस्थित्यासनादयः भावाः साम्राज्यशंसिनः । इत्यन्वयः ।]

वपुरविहितसिद्धा एव लक्ष्मीविलासाः
प्रतिजनकमनीयं कान्तिमत् केतयन्ति ।

अवीलाहद इत्यर्थः । 'अमूर्धमस्तकात्स्वाङ्गादकामे' इति अलुक्समासः । अर्ध्यार्ध्याविति अर्ध्या उष्णा कीर्त्तिताः यत्र तथाभूतं चक्रवर्त्तिनं मूर्ध्नि इत्यर्थः । तत् तस्मात् अत्र अस्मिन् शालच्छायायां शालस्य छाया शालच्छायं तस्मिन् "विभाषा सेनासुराच्छायाशालानिशानाम्" इति षाष्ठिकं क्लीवत्वं, शालतरोः छायायां, इत्यच्छायामण्डपे तस्मिन्नित्यर्थः । तात विश्रम्यताम् अवस्थीयताम् । गुरुणी अवश्यमेव आसनपरिग्रहम् आसनस्य उपवेशनयोग्यप्रदेशस्य परिग्रहं स्वीकारं करोतु, इतस्य शालच्छायामण्डपे सत्यपि अर्धं तातौ विश्राम्यतु यतो गगनमध्यमध्यारूढः सविता इति भावः ।

(छ) वत्सायेति । वत्साय कल्याणिने यत्र कस्य अभिलषितं रोचते "रुच्यर्थानां प्रीयमाणः" इति सम्प्रदाने चतुर्थी । तदेव स्वीकरोमि तुभ्यं यत् रोचते तदेव ममापि क्रियते इत्यर्थः ।

(ज) उभौ इति । उभौ अपि इत्यर्थः । परिक्रम्य किञ्चिद्गत्वा उपविशन्ति आसनं परिगृह्णन्ति ।

(झ) स्वगतमिति । कुशलवयोराचारचेष्टितादिभावाङ्गीकृत [illegible] कुशल-वीरचरितमित्यर्थः । आह इति शेषः ।

(२१) तयोः राजलक्षणं कविः सम्यग्विज्ञापयितुम् आहेति—अहो इति । अहो आश्चर्यम् । प्रश्रययोगेऽपि विनयस्य सम्बन्धे योगेऽपि सम्बन्धेऽपि सतीति शेषः । कुशस्य लवस्य च तदा-गतिस्थित्यासनादयः इत्यर्थः । गतिस्थित्यासनादयः गतिः गमनं स्थितिः अवस्थानम् आसनम् उप-वेशनं तादृश आदिः येषां तथाभूताः, आदिशब्देन शिक्षादिपरिग्रहः । भावाः चेष्टाः साम्राज्यशंसिनः साम्राज्यं सार्वभौमत्वं शंसन्ति इति सार्वभौमलक्षणसूचकाः तद्विज्ञापका इत्यर्थः । तथाच यद्यपि बालकाविमौ विनीतस्वभावतया विनयभावेन मयि स्थितिं कुरुतः तथापि तदाचरित सार्वभौमलक्षणयुक्तमिति विदितैव भवति ।

अमलिनमिव रत्नं रश्मयो मनोज्ञा
विकसितमिव * पद्मं बिन्दवो माकरन्दाः ॥ २४ ॥

[२४ । मनोज्ञाः ते रश्मयः अमलिनं रत्नमिव, माकरन्दाः बिन्दवः विकसितं पद्ममिव, अविच्छिन्नस्निग्धा एव लक्ष्मीविलासाः प्रतिजनकमनीयं कान्तिमत् वपुः केतयन्ति । इत्यन्वयः]

भूयिष्ठाश्च रघुकुलकुमारच्छायामनयोः पश्यामि । (अ)
कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसबन्धुरांसकम् ।

(२४) अपरमपि प्रस्तौति—वपुरित्यादि । मनोज्ञाः मनोहराः ते प्रसिद्धाः रश्मयः कचिसमूहाः अमलिनं मालिन्यरहितं भास्वरमिति यावत्, रत्नम् इव भास्वरं मणिं यथा मनोज्ञा द्युतयः शोभयन्ति तथेत्यर्थः । माकरन्दाः मकरन्दस्य इमे इति मकरन्दशब्दात् "अ" प्रत्ययः । पुष्परससम्बन्धीया इत्यर्थः । बिन्दवः विकसितं समुन्मिषं पद्मं कमलम् इव, तथाच यथा पुष्परसबिन्दवः पद्मं शोभयन्ति तथेत्यर्थः । अविच्छिन्नस्निग्धाः अविच्छिन्नाः सन्ततिमन्तः प्रकृत्यैव सञ्जाता इति यावत्, अतएव स्निग्धा इत्यर्थः । लक्ष्मीविलासाः लक्ष्म्याः कान्तेः सौन्दर्यस्येति यावत्, विलासाः विलसितानि स्फुरितत्वमिति यावत्, लावण्यपरिस्फूर्तिरित्यर्थः । प्रतिजनकमनीयं, जनाः जनाः इति प्रतिजनं तेषां कमनीयम् आकाङ्क्षणीयं सकलचित्ताह्लादकं कान्तिमत् सौन्दर्यशालि वपुः शरीरं केतयन्ति विशेषेण शोभयन्ति । धातूनामनेकार्थत्वात्केतयन्तीत्यस्य शोभयन्तीत्यर्थकत्वमुपपन्नम् । तथाच भास्वराणां मणीनां यथा ज्योतिःसन्तानेन सहजमनोहरत्वं सम्पद्यते तथा विकसितानाञ्च पङ्कजानां पुष्परससम्बन्धेन तथैवानयोः बालकयोः सहजलावण्येन स्वाभाविकशरीरसौन्दर्येण समलङ्कृतयोः प्रत्यक्षतया नास्ति किमपि विलक्षणमानन्दम् । अत्र वपुषा रत्नेन पद्मेन च लक्ष्मीविलासानां रश्मिभिः माकरन्दबिन्दुभिश्च साम्यादिः प्रत्ययात् एकमुपमेयं प्रति अनेकोपमाननिर्देशात् मालोपमालङ्कारः । उत्तरार्द्धे उपमानत्वेन भेदविवक्षया संसृष्टिः । मालिनी वृत्तम् ।

(अ) भूयिष्ठामिति । अनयोः कुमारयोः आधारे सप्तमी । भूयिष्ठाम् अतिशयेन बहुलाम् अतिमात्रामित्यर्थः । बहुशब्दादतिशयार्थे इष्ठन्प्रत्ययात् "बहोर्लोपो भू च बहोः" इति बहुशब्दस्य भूआदेशेन यकारागमेन च सिद्धम् । रघुकुलकुमारच्छायां रघुकुलस्य रघुवंशस्य ये कुमाराः बालकाः तेषां छायां कान्तिं तत्कान्तिसदृशकान्तिमित्यर्थः इति निर्गलितार्थः, छायां प्रतिबिम्बं सादृश्यमिति वा तदर्थे तु उभयत एव । पश्यामि अवलोकयामि, तथाच शैशवावस्थायां रघुकुलकुमाराः यां यां शरीरशोभामधारयन्त तां तां एतयोः कुमारयोः अभिव्यक्तां इति भावः ।

* विकसितमरविन्दम् इति पाठान्तरम् ।

प्रसन्नसिंहस्तिमितञ्च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥ २५ ॥

[२५। कठोरपारावतकण्ठमेचकं द्वयस्य सुबन्धुरांसयं वपु, प्रसन्नसिंहस्तिमितं वीक्षितञ्च, माङ्गल्यमृदङ्गमांसलः ध्वनिश्च। इत्यन्वयः।]

[सूक्ष्मं निरूप्य] अये ! न केवलमस्मद्वंशसंवादिनी आकृतिः ! (८)

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।

(२५) तामेव कुशलवयोः शरीरे परिलक्षितां रघुकुलकुमारच्छायां निरूपयति— कठोरेत्यादि। कठोरपारावतकण्ठमेचकं कठोरः परिपुष्टाङ्गः स, चासौ पारावतः कपोतः तस्य कण्ठः तद्वत् मेचकं श्यामलञ्च परिपुष्टाङ्गकपोतकण्ठवत् श्यामलवर्णम्', द्वयस्य उभयस्य अनयोः एव अनयोः वर्तते तत् मांसलत्वम्, अत्र उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च। वृषस्कन्धसुबन्धुरांसयं वृषस्कन्धवत् सुबन्धुरौ उन्नतौ अंसौ यस्य तादृशं वपुः शरीरं अस्ति तथाभूतं "वृषस्कन्धसुबन्धुरांसयोः" इत्यपरे। अनयोः कुशलवयोः शरीरं अस्तीति शेषः। प्रसन्नसिंहस्तिमितं प्रसन्नस्य अनाकुलस्य सिंहस्य इव स्तिमितं निश्चलं वीक्षितं दृष्टिपातः, तथाच सिंहः प्रसादगुणयुक्तेन यत् यथा निश्चला दृष्टिमावहते तथानयोः अपि निश्चला दृष्टिपात इत्यर्थः। माङ्गल्यमृदङ्गमांसलः माङ्गल्यः मङ्गलोत्सवयोग्यः यः मृदङ्गः वाद्यविशेषः तद्वत् मांसलः पीनः गभीर इति यावत्, अत्र मङ्गलाय हितं इत्यर्थे माङ्गल्यशब्दात् बहुलार्थे ष्यञ् पुनः प्रज्ञादित्वात् माङ्गल्येति पदसिद्धिः। माङ्गल्योत्सवे वाद्यमानस्य मृदङ्गस्येव गभीरः ध्वनिः अपि तयोः वर्तते; अस्तीति शेषः। तथाच अनयोर्वपुः श्यामलवर्णम् अंसौ उन्नतौ, दृष्टिः निश्चला ध्वनिः गभीरः इति सर्वमेव रघुकुलकुमाराणामिव वर्तते इति। अत्र उपमालङ्कारः। वंशस्थविलं वृत्तम्।

(८) सूक्ष्ममिति। सूक्ष्मं नैपुण्येन निरूप्य दृष्ट्वा विविच्य वक्तीत्यर्थः। अये, आकृतिः देहसंस्थानम् अनयोः कुशलवयोरित्यर्थः। केवलं अस्मद्वंशसंवादिनी अस्मद्वंशस्य सादृश्यं ददाति इति तथाभूता अस्मद्वंशसदृशी। न भवति केवलं, तथाच न केवलं अस्मद्वंशसदृशाकारौ इमौ किन्तु सीतायाः अपि सदृशाकारौ इत्यर्थः इति भावः ।

ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २६ ॥

[२६। इह शिशुयुग्मे नैपुण्योन्नेयं जनकसुतायाः अपि तत् तत् आनुरूप्यं स्फुटमस्ति, ननु अभिनवशतपत्रश्रीमत् प्रियायाः तत् आस्यं पुनः मे अक्ष्णोः गोचरीभूतमिव । इत्यन्वयः।]

मुक्ताच्छदन्तच्छविसुन्दरीयं सैवोष्ठमुद्रा स च कर्णपाशः।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव ॥ २७ ॥

[२७। मुक्ताच्छदन्तच्छविसुन्दरी सैव इयम् ओष्ठमुद्रा स कर्णपाशश्च। पुनः नेत्रे यद्यपि रक्तनीले तथापि स एव सौभाग्यगुणः। इत्यन्वय।]

२६। प्रत्युत्पन्नज्ञानापेक्षयोपमेव सीतासादृश्यरूपं वस्तु प्रस्तौति—अपीत्यादिना। इह अस्मिन् दृश्यमाने शिशुयुग्मे बालकयुगले नैपुण्योन्नेयं नैपुण्येन निपुणतया सूक्ष्मदर्शित्वेन इत्यर्थः। उन्नेयम् अधिगम्यम् अनुमेयमिति यावत्, जनकसुतायाः जानक्याः सीताया इति यावत्, अपि न केवलं ममेत्यपिशब्दार्थः, तत् तत् प्रसिद्धं सर्वैरेव द्रष्टृभिः परिलक्षितम् आपातत एव साक्षात्कारपरिस्फुटम् आनुरूप्यं सादृश्यं स्फुटं सुव्यक्तम् अस्ति। तथा च सूक्ष्मभावेन पर्यवेक्षमाणाः सर्व एव सीतासादृश्यम् अस्मिन् बालकयुगले समनुमातुं शक्नुवन्तीति भावः। ननु जानामि अभिनवशतपत्रश्रीमत् अभिनवानि अनतिविकसितानि शतपत्राणि पङ्कजानि तद्वत् श्रीमत् सौन्दर्ययुक्तं सद्योविकसितकमलवत् परिस्फुरितलावण्यमित्यर्थः। अत्र शतपत्रपदेन पद्मपोषणात् सीतावदनस्य लावण्यातिरेकः प्रतिपाद्यते। प्रियायाः प्रियतमायाः सीतायाः आस्यं मुखं पुनः भूयः मे मम अक्ष्णोः चक्षुषोः गोचरीभूतम् इव नयनपथवर्ति जातमिव पश्यामीव इत्यर्थः। तावकमस्य वयःपरिणते शिशौ चिन्ताव्याकुलितत्वं चिन्त्यं उपयुज्यते। इदं बालकयुगलम् अवलोक्य मन्ये तत्समानाकृतिकं सौन्दर्यसमन्वितं सीताया निरुपम वदनं मदीयनयनयोः आनन्दकारि अभिव्यक्त इति भावः। अत्र तथानुरूप्यमित्यत्र तदेव तथानुरूपमिति पठन्ति तत्रायमर्थः, तत्र तत्र सुप्रसिद्धं वदननयनसौन्दर्यादिकं जनकसुताया अनुरूपं मदीयवदनादिसौन्दर्यं चापि आपततमनसोरित्यर्थः। अत्र श्लोके जनकसुताया अपीत्यपिशब्देन रामस्यापि सादृश्यात् अर्थापत्तिः व्यज्यते। उत्तरार्धे प्रियाननस्य गोचरीभूतत्वसम्भावनादुत्प्रेक्षा। अभिनवशतपत्रश्रीमदित्यत्र च लुप्तोपमा। मालिनी वृत्तम्।

(२७) अन्यदपि सादृश्यमाह—मुक्ताच्छेति। मुक्ताच्छदन्तच्छविसुन्दरी मुक्ता इव अच्छाः निर्मलाः धवलाकाराः इत्यर्थः। ये दन्ताः दशनाः तेषां छविभिः कान्तिभिः औज्ज्वल्येनेत्यर्थः। सुन्दरी सौन्दर्ययुक्ता मनोहारिणीति यावत्, इयं दृश्यमाना ओष्ठमुद्रा ओष्ठयोः दन्तच्छदयोः मुद्रा मुद्रणम् अधरोत्तरौष्ठयोः संयोगकाले सम्मेलनस्य आकृति-

तदेतत् प्राचेतसाध्युषितमरण्यं यत्र किल देवी परित्यक्ता, इयञ्च अनयोराकृतिर्मधुरा *। यद्यपि स्वतःप्रकाशानि अस्त्राणीति, तत्र विमृशामि,—अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमुद्भूतं† स्यात्! न हि असाम्प्रदायिकानि अस्त्राणीति पूर्वेषामपि अनुशुश्रुम, अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विस्रम्भयते, भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या गर्भभार आसीत्। [साश्रम।] (ठ)

तात्पर्यमेव प्रकृतार्थव्याघातप्रसङ्गात्। अर्हमुद्रिताधरोत्तरौष्ठौ इत्यर्थः। तथा च "भावि विहित. कृत्प्रत्ययो द्रव्यवत् प्रकाशते" इति। अथवा ओष्ठरूपा मुद्रा आवरणं दन्तच्छद इति न व्यर्थोऽपि दन्तप्रभापतनप्रतिषेध। रैव निश्चित पूर्व्वानुभूता सीतासम्बन्धिन्येव ततसदृशो एव इत्यर्थः। तथा च यथा मे सीतायाः वदनच्छदौ मुक्ताभास्वरदन्तकान्तिभिः सन्ततं शोभितौ अभवतां, तथैवानयोरपि इवदुच्चविदग्धद्युतिभिः अन्यमुद्रितमोष्ठद्वयं शोभत इत्यर्थः। सुन्दरीय मिलय दन्तरिश्मिति पाठे तु दन्तद्युतिभिः सम्प्रतावनतवत् प्रतीयमानेत्यर्थः। तथा. च च किरणानां विच्छुरण तथौचित्यं यत किरणानां स्वल्पपातः तत्र अवनतत्वं प्रतीयते इति भावः। कर्णपाशश्च रमणीयश्रुतिपृथुल जातोविक्रमवत् प्रथमार्थे च पुरातनग्रन्थः। तथा च "पाशः केशादिपूर्वः स्यात् ततस्तदे कर्णपूर्वकः सुकर्णे च—" इति मेदिनी। सः सीतासम्बन्धी एव तत्सदृश इत्यर्थः। पुनः अत्र नेत्र नयनौ यद्यपि दक्षणीर्नेत्र अपाङ्गयोः शोभनौ नीले च कनीनिकाभ्या कृष्णवर्णं वर्णोत्कर्षात कृष्णभावः। तथापि, नेत्रयोः दक्षिणीनेत्र दाक्षिण्य पुरुषधर्म्म इति तत्साम्य वैसादृश्य मत्यपोत्यर्थः। स एव सीतासम्बन्धी अत्र सौभाग्यगुण सुलभता भाव सौभाग्यं सौन्दर्यं रमणीयता तदेव गत सौन्दर्यप्रकर्षः तथा च नेत्रयोरक्षिणीनत्व दक्षिणाक्षमेव सीतायाः वैसादृश्य वर्तमानेऽपि सौन्दर्यप्रकर्षस्य अभवत साम्येन सीतासादृश्य मनसीयपराम्रे इति भावः। अत्र श्लोके मुक्ताच्छटावत समासगतोपमा, द्वितीयचतुर्थपादयोय हीनेन्द्रादि पदोपात्तत्व अनुभूतपदार्थस्य प्रकृते तादात्म्याध्यवसायेन तत्सादृश्येन साध्यार्थपदे मनोऽभ्यासिदर्शनालङ्कारः। इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करप्रोपजातिवृत्तम्।

(ठ) तदेतदिति। यत्र अरण्ये देवी सीता परित्यक्ता किल श्रूयते लक्ष्मणेनेति शेष एतत् दृश्यमानं तत् प्राचेतसेन वाल्मीकिना अध्युषितम् आश्रितम् अरण्यं वनं वाल्मीकितपोवन मित्यर्थः। अनयोः कुमारयोः इयम् ईदृशी सीताशरीरसंस्थानानुरूपा आकृतिः शरीरयो संस्थानं यद्वत् अवयवाः, अनयोः प्रतिकृतिः अथवा सीताकृतानानुरूपा रघुकुलकुमारी

* इयञ्चानयोराकृतिर्मधुरानुभावा इति पाठान्तरञ्च दृश्यते।

† अपि नाम खलु तच्चित्रदर्शनप्रसङ्गात् अस्त्राभ्यनुज्ञानमुद्भूतं स्यात् [illegible]

पुरारूढे स्नेहे परिचयविकासाभ्युपचिते
    रतो विस्रब्धाया अपि सहजलज्जाजडहृदः ।
मयैवादौ ज्ञात करतलपरामर्शकलया
    द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ २८ ॥

[२८। पुरारूढे स्नेहे परिचयविकासात् उपचिते रतो विस्रब्धाया अपि सहजलज्जा जडहृदः गर्भग्रन्थि मया एव करतलपरामर्शकलया आदौ द्विधा ज्ञात तदनु कैरपि दिवसैः तया (ज्ञात)। इत्यन्वय ।]

भिन्ना च इति भाव । यद्यपि यत्र कुमारेण कथितम् इति शेष । ज्ञात प्रकाशानि स्वयम् एव ज्ञानविषयतामापन्नानि अन्यानि अप्रकाशितानि इति तत्र तस्मिन विषये विस्मयामि विवेचयामि अपीत्यादि वक्ष्यमाणमित्यर्थ । अपि स्वल् प्रश्न कि खलु इत्यर्थं । तत् पूर्वकथित विवर्तन सीताया स्वजनवियोगविधुराया परिसान्त्वनाय लक्ष्मणेन दर्शनमानम् चित्रस्य पश्चात्तीर्णं, तत्र प्रसङ्ग अर्थ लक्ष्मणमुखविकसितनयनस्य प्रस्तावे जात अत्राभ्यनुज्ञाने "सर्वथा इत्यादौ तत्परम्परितमुपभ्यासवशी स्नेहेन अप्रकाशायाः सीतासन्ततिसकलानुज्ञा, तदूत काकवचन परिश्रान्त कथनस्य स्यात् भवेत्, सम्भावनाया लिङ्। अप्रकाशि ज्ञानकाशानि नहि न खलु अनात्मप्रत्ययविषयाणि सम्प्रदाय गुरूपदेश विनापि कश्चिदुपलक्षणमित्र मतानि इति पूर्वेषामपि पूर्वेभ्योऽपि, सम्भवविषयका यतो। अनुष्ठानम् सुतयन् वदनिति शेष । अनुपूर्वक प्रयोगेर्निष्टि प्रयोग । अथवा मे मम हृदयस्य अन्त करणस्य सुखातिशय एतद्दर्शनेन सञ्जात. प्रवर प्रमोद मनुभवमानम् उत्तरस्त एतयो सुतत्वाभसया मोहमितम् आत्मान भूयिष्ठं बाहुल्येन विस्मयती विस्मक करोति, एतयोरवलोकनेन समुच्छलितहृदयानन्द सुतरां तयो पुत्रत्वबोधे बहुभाव ततोऽस्मि इत्यर्थं । अथवा भूयिष्ठेति पदाये अन्व ति, तथा च मया खल्वप मया एव न्या सीताया गर्भभार द्विधा अवगतम् यमलप्रसविनी गर्भास्यमेवेत्यत । ज्ञातपक्ष परस्मात आसीत् इति। अत प्रत्येकमेव बाल कुशलवयो रत्वबोधे अनुपयुज्यते। तथाच लक्ष्मण गर्भभारमन्थरा जानकी यथैव परित्यक्तिा, अनुपस्थितभावम् च सहन शृणुते कुशलयोरानयो, अन अरण्यतत्त्वक हि भूयसा मनोहरयोर् मञ्जुल विकसायते, तत् द्विधाप्रतिपन्नगर्भभारया नूनमिमौ सीताया एव वा पुत्रौ भवेताम् इति भ व मम अनय नैनापुष्पा यत्र वर्तमानं यथा तथा तथा तदानव पूर्वानुभूतं सीताया। अतीतक अपायाहिक गर्भावस्थ अपि सोदयाया निर्धारणस्य संभूय, तत्र पुत्रस्नाकेन इतीन आहम्।

(२८) अद्य अवधेत—पुरारूढे इत्यादि। पुरारूढे पूर्वे रूढवत्यापि पूर्वभाव इत्यर्थं। तत्र स्नेहे परिचयविकासात परिचयस्य अंकुरवत् विकासदृष्टान्तविस्फारणपूर्वकम्।

[रुदित्वा] तत्किमितो पृच्छामि केनापि उपायेन ? (ड)

लव । तात किमेतत् ! (ढ)

बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥ २९ ॥

[२९ । जगन्मङ्गलं वः आननं बाष्पवर्षेण अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतां नीतम् । इत्यन्वयः ।]

विस्रम्भोपनिपातात् समुद्रेकात् इति यावत्, उपचिते समुन्नते गते प्रवृद्धे इति यावत्, सतीति शेषः । तथाच प्रथमतो न प्रणय प्रगाढः स्यात्, क्रमशो बहुसमागमेन नितान्तसुखानु-भाव समुपगतः प्रणयं प्रगाढतां सम्प्रापयति, तदानीमेव सुखपरम्परा हृदयहारिणीभवति इति । एकः निर्जने विश्रब्धाया विश्वस्तचित्ताया अपि, इदं निर्जनं स्थानं अत्र कोऽपि परो वृद्ध निर्जन-मपि व्यवहारं परिज्ञातुं शक्नुयादिति शिरःकम्पमानतया इत्यर्थः । [illegible] तत्रत्यया सम्भावतः सम्भूतया लज्जया त्रपया मुग्धानमनमुखतया इत्यर्थः । नवे नवीने सुस्निग्धे इति यावत्, इमी चक्षुषी यस्याः तस्याः, प्रियाया इत्यर्थः । गर्भरूपिः गर्भरूपः करतलपरामर्श-रूपया करतलस्य परामर्शः आमर्शनं स एव कला शिल्पं तया स्पर्शनकौशलेनेत्यर्थः । अतिस्निग्धतया कोमलत्वातिरेकेण वा अति स्पर्शने सीतया [illegible] विज्ञानमसमर्थं वा स्यादिति कलाशब्दसार्थक्यम् । मया रामचन्द्रेण इव चारो पूर्वतः प्रिया प्रियकारः मातरेव विरक्ता इत्यर्थं । ज्ञात: अवगतः अहमु तत: परं कैरपि कतिपयैः दिवसैः विश्वनुत्थानाभवं, अपवर्गं हरीना । तथा सीतया ज्ञात इति शेषः । तथाच यदि सा यदि दर्शितामविष्यत्, तदा नूनं सम्मतिवशमती प्राप्नोष्यत, हा हन्त ! सीतांश्यम् इति भावः । अत्र रामे सीतायाञ्च एकस्य ज्ञानसत्त्वमस्पर्शस्य अभिज्ञानमात् [illegible] गुणशोभिता इति वदन्ति । शिखरिणी वृत्तम् ।

(ड) रुदित्वेति । रोदनञ्च कुशलवयोः सम्भावितसीतापुत्रतया सञ्जातेनानन्देन भूत-सीतानिर्वासनतया दुःखोद्रेकेण च मिश्रितभावोदयात् । ततु, अतः सीताया अपि पुत्रयं सम्भावितमासीत् अत इत्यर्थं । किं किन्तु एती बालको कुमारौ केनापि केनचित् उपायेन न्यायेन यावच्छलेन इति यावत्, पृच्छामि जिज्ञासे, तत एव सन्देहनिरासो भविष्यतीति भावः ।

(ढ) तात पितृचरण ! एतत् वक्ष्यमाणं किं कीदृशं कार्यं जातमिति भावः ।

(२९) आनन्दमयचतेन निर्दिशति—बाष्पवर्षेणेत्यादि । कुशा [illegible] एवं कुशल जगन्मङ्गलायनम् भावीकर्षेण जनकः सन्मातोपपाद्यम् एतत् चान [illegible] रुच निर्मीर-नयाईव बहुभिरिन्दुभिः । अवश्यायावसिक्तं अवश्यायेन नीहारेण [illegible] । चारुविलस

कुश । अयि बटो । (ख)

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्थं पृच्छध्वमनधिगतरामायण इव ? ॥ ३० ॥

[३० । सीतादेव्या विना रघुपतेः किमिव दुःखं न हि । प्रियानाशे कृत्स्नं जगत् अरण्यं भवति हि किल । स च तावान् स्नेहः, अयमपि निरवधिः वियोगः, अनधिगतरामायणा इव किमिति एवं पृच्छथ । इत्यन्वयः ।]

तुल्य इति यावत्, पुण्डरीकस्य कमलस्य चारुतां रमणीयतां शोभां दर्शितं, तथाच तव कमलतुल्ये मिथः इदं वर्णनतुल्येनानुभवं प्रकाशते इति भावः । अत्र आननं पुण्डरीकस्य चारुतां शीलमिति वाक्यप्रतिपाद्यया आननस्य पुण्डरीकचारुताश्रये रमणयन्त्याः सहचार्य पर्यवसानात् समाधानमिति निदर्शनालङ्कारः ।

(ख) अयीति । अयि बटो, बन्धावभाजन, सम्बोधनमिदम् । बटवः बटो, बटू-नामग्रणीरित्यर्थः ।

(३०) श्रीरामचन्द्रस्यानुकम्पातनुपवाहस्य तत्कारणं जिज्ञासमानो लवः कुशेन विदित-श्रीरामदुःखकारणेन तन्निवारमनुयुङ्क्ते—विनेत्यादिना । सीतादेव्या देवीभूतया राज्ञ्या वा सीतया विना सीतया वियुक्तस्येत्यर्थः । रघुपतेः रघूणां पतिः प्रभोः, सूर्यवीरस्येव भवबन्धनसार-लेन वा रघुकुलतिलकस्य श्रीरामचन्द्रस्येत्यर्थः । किमिव वस्तु न दुःखं दुःखजनकं, सुखकरम् दुःखकरं वा सर्वमेवास्य नितरां दुःखविधायि भवतीत्यर्थः । सीताविरहविधुरितस्वान्तस्य श्रीरामचन्द्रस्य भवति न किमपि वस्तु सुखकरतया प्रतीयते, विरहे तस्य सकलमेवारण्यमिव भीषणं प्रतिभाति तत एव दुःखदावानलदन्दह्यमानस्य तापपर्यवसायी भवति इति चाप्यासन एव सं भवत् इति भावः । हि यतः प्रियानाशे प्रियायाः पत्न्याः प्रियतमायाः इत्यर्थः । नाशे अदर्शने प्राप्तवियोगे चेति । अत्र नियता प्रियतमता प्रियाः पुत्रो वा या वस्तु नाशे अदर्शने सत्यपि तदुद्भवानामसह्यम् । कृत्स्नं समग्रं जगत् अरण्यमिति सकलम् सर्वः । अरण्यं शून्यम् अरण्यं शीघ्रं कानन भवति किल, यथा हिंस्रजन्तुप्रचुरतया घोरे विपिने कीदृशि विरहिता पाशीवजनपरिहीना. सकलसुखजनकाः पदार्थाः कमनीयाः, विभावितस्वान्तं प्रतिपदं पदभङ्गाशीलेन् तत् नास्ति, तथा संसारसुखानपि विपदनिष्ठाः, यतो रामचन्द्रस्थितो दुःखाङ्कित इति भावः । सः प्रसिद्धः तावान् तावत्परिमितः अद्भुतः इति यावत्, स्नेहः

राम। [स्वगतम्] सखे! तटस्थित आलापः, कथं प्रश्न एव? हन्त हृदय! कोऽयमाकस्मिकस्ते लोकोत्तरप्रसवो विकारः? एवञ्च विभिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि. भवतु तावदन्तरयामि। [प्रकाशम्] वत्सौ! रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिस्यन्दः प्रशस्तिरादित्यवंशस्य, तत्र कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि। (त)

[illegible] कथमपि वर्त्तमान निरवधि नि नास्ति अवधि सीमा पर्य्यन्तभागो यस्य तथाभूत [illegible] बहुकालव्यापीति यावत, वियोग विच्छेद पितरौ सुहृदे वियुक्ततया [illegible] [illegible]। [illegible] विसदृशतया तथाभूतं [illegible] सीताया [illegible] च वर्त्तमान [illegible] न कथमपि [illegible] भाव। एवं सति [illegible] [illegible] इव न [illegible] रामायणं तदाख्यं वाल्मीकिविरचितं काव्य [illegible] इव किमिति [illegible] "तात किमेतत्" इत्यादि पृच्छति जिज्ञासति। [illegible] रामसीतयो [illegible] जिज्ञासत, [illegible] श्रीरामचन्द्रं [illegible] परिपृच्छति। तदेव सीताया निरवधि [illegible] जानीहीति भाव। अत्र प्रथमपादपरिमाणस्य [illegible] दुःखानुभवस्य [illegible] [illegible]। तृतीये पादे [illegible] चतुर्थे पादे अपि [illegible] उपमा [illegible] [illegible]। [illegible]

(त) [illegible] "सखे तटस्थित" इत्यादिना। सखे, आलापः [illegible] तटस्थित [illegible] सीतासुतः। तथा च [illegible] नाम [illegible] राम सीताया [illegible] [illegible] पुत्रस्य [illegible]। उदासीन इव जन [illegible] सीताया [illegible] [illegible] [illegible] इति भाव। [illegible] "तथा [illegible]" [illegible] [illegible] [illegible]

कुश। स खलु एव सन्दर्भोऽस्माभिराहृतः, मृत्युपांसितौ ताव-
दिमौ बालचरितस्याध्यायौ द्वौ श्लोकौ। (थ)

आप्लावन स्नामि इति यावत्, तद्रूप विकार अन्यथाभाव प्रकृतिविपर्य्यास इति यावत्, अथवा खेदेन परिप्लव चञ्चल समन्ततो विप्लव इति यावत्। विकार मानसिकभावान्तरविशेष इत्यर्थः। तथाच, हृदय। कथमिदं सहसा खेदेन समाकुलं सत् प्रकृतिं परित्याज्य वर्तसे इत्यय। अथच दग्धवल्कल सत्वया शौरमन्न जायते तत् दग्धे हृदये वर्त्त रमवत्त्वम वा खेदस सहसा प्राप्तिरिति भावो दर्शति हृदयविशेषणोऽयम्। एवञ्च खेदेनैव प्रकारेण विकृतभावेनेत्यथ। निर्भिन्नहृदयावेग निर्भिन्न विदारितं हृदय येन तथाभूत, आवेग: चित्तविक्षतिर्यस्य तथाभूत अथवा निर्भिन्न प्रकाश गत हृदयस्य मनस आन्तःकरणस्य आवेगः भावान्तरस्य तथाभूत बहि प्रकाशमानमानसक्षोभ अहमिति शेष। निष्ठुरेण बालकेन कुशेन अपि अनुकम्पित "विना सीतादेव्या" इत्यादिवाक्यैः कृपापात्रतां नीतः अस्मि। तथाच अत्र मम विप्लुतबाष्पस्नाव स्नान मत्ताविविरहतापदूनस्य विकलस्य रूपम् दर्शयता निमम्नोऽस्मीति मह सर्वसंवादमधिगम्य कठबाह्नकारवेण सहानुभूतिरावगमिता इति भाव। भवत चन्न, अपगच्छत तावदय दु खसक्षोभ प्रतिबन्धात नेत्राम्बुपानात, वत्स तावत् मञ्जुलम् एव ह सम्मनोभादिकमित्यय अन्तरयामि व्यवधापयामि कवान्तैर्भावान्तरैर्वा समादधामीत्यय। अन्यथा विप्लुतधीरत्वस्य मे नयनासारपरिष्यन्देन धैर्यस्य बाष्पो रक्षोरनाशा वा भवेत् इति भाव। प्रकाम बाष्पपातमोचनं यथा स्यात् तथा। वत्सौ कल्याणभाजनद्वय, रामायणमिति रामायण नाम काव्यमित्यर्थं। भगवत, महेर्वाल्मीकिमुनिन: वाल्मीकि प्राचेतसस्य सरस्वतीनिष्यन्द सरस्वत्या भारतीदेव्या निष्यन्द परिस्रव, यदेव सुदृढ़सुधा अवतसास्य गम्यते तरङ्गवन्नुत एव परिकुतिसव्यवाम। अथवा निष्यन्द, सम्प्रकाश: प्रकाश- नया आविर्भाव स चार्थो धातूनामनेकार्थत्वस्य शास्त्रकारैरुपदिष्टत्वात्। "कुमुदवनेन चास्थैर्य्य यथाश्रव्यन गीयत" इति प्रमाणात्। आदित्यवंशस्य अनन्तकुलस्येति तात्पर्य्य, प्रवृत्ति; प्रवृत्ति- मूलको ग्रन्थविशेष। प्रवृत्तिरिति कवौ निग्रन्थेन प्रवृत्तिसाधनमित्यर्थं, वाल्मीकिना रामायणकथाभिरव सूर्य्यकुलस्य सर्वसाम्प्रकाशनात्। अद्भुता प्रवृत्ति सर्वकुलसविस्तृत रामायणमित्यथ। सूर्य्यवंशस्य कविनामसौ प्रवृत्तिर्यं। तत्र अविन् वत्से कौतूहलेन कौतुकेन अतिशयितोत्सुक्येन इति यावत्, कस्मिंश्चित् पूर्वविशेषे श्लोकद्, परिचितमहः इत्यादि। अथवा नवेति सम्यक्त्वं घटयतं तदवयवविशेषमित्यर्थं। अन्यत् पूर्ववत्। रामचन्द्रस्य स्वोयवंशस्य सम्प्रवक्तावेव कौतुकं नीयते, इति प्रत्ययं बालकौसुपवर्णयति।

रामः । उदीरयतु वत्स ।

कुशः । प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ।

प्रियभावः स तु तया स्वगुणैरेव वर्धितः ॥ ११ ॥

[११ । सीता प्रकृत्या एव रामस्य महात्मनः प्रिया आसीत् । स तु प्रियभावः तया स्वगुणैः एव वर्धितः । इत्यन्वयः ।]

वाल्मीकिर्भगवत इति विशेषणमुपात्तम् । षडैश्वर्यशालिनो भूतभवद्भाविनां यथार्थज्ञानवतो मिथ्याप्रबन्धाबन्धनासम्भवात् ।

(९) स प्रभुर्व इति । युष्माभिः कुशलवप्रभृतिभिरिति भवत्सतीर्थापेक्षया बहुवचनं, महनीयकविषयाभ्यावितसौकर्यवपरिहृष्टत्वात् । सः आदित्यवंशप्रशस्तितो रामायणाख्यो प्रबन्धः प्रभुः समग्रः प्रारभ्यात् आसमाप्तेः एव न तु केवलमेकांशेन इति एवकारार्थः । श्रुतः अध्यस्तः पठित इति यावत् । किन्तु बालचरितस्य शैशवकालस्य रामायणीयबालकाण्डोक्तस्यैव अर्थः । अन्ये अचिन्ति अध्यायौ परिच्छेदविशेषौ श्रुतौ इति शेषः । इमौ बालकाण्डौ द्वौ श्लोकौ द्वे पद्ये तावत् द्वौ श्लोकाविव इत्यर्थः । तावदवधारणे, तथाच "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः । कुशाग्रबुद्धौ श्रुतिपथमात्रौ अधीतनिखिलशब्दार्थावपि केवलमनयोः श्लोकयोरेव अभ्यासः, तावेव च प्रस्तुतौ वक्तुमिति भावः ।

(१०) उदीरेति । वत्स: वात्सल्यपात्रः उदीरयतु कथयतु तौ श्लोकौ इति शेषः । ताभ्यामेव मे कथंचित्तृप्तिः सम्भविष्यतीति भावः ।

(११) पूर्वसूचितौ बालचरितस्य द्वौ श्लोकौ कुशः समुदीरयति—प्रकृत्यैवेत्यादि । सीता जनकनन्दिनी महात्मनः महोदारस्वभावस्य रामस्य रघुपतेः श्रीरामचन्द्रस्य प्रकृत्या स्वभावेन एव न तु कृत्रिमोपचारैरित्यर्थः । प्रिया संजीवननिधिः आसीत् अभूत्, तथाच स्वभावमनोहरा सीतादेवी स्वभावत एव महोदारप्रकृतेः श्रीरामस्य मानसप्रीतिजनकत्वं, स तु स्वाभाविको भावः प्रियभावः प्रियत्वं कश्चित् समुत्पन्नः रामस्य प्रणयः तया सीतया स्वगुणैः स्वस्य आत्मनः गुणाः विनयार्जवादयः तैः । अथवा स्वे आत्मीया ये गुणाः इति कर्मधारयेण वाक्यसिद्धिः । एव न तु श्रीरामस्यापि रामस्य महोदारतामपेक्षितवतीत्यवधारणार्थः । वर्धितः वृद्धिं नीत प्रकर्षः प्राप्त इत्यर्थः । तथा च स्वभावेन स्वतः श्रीरामचन्द्रस्य सीताविषयकप्रेमप्रवाहं स्वगुणकर्षेण वृद्धिं नीतवतीति सीतायाः गुणाविष्कारोऽस्मिन् रामस्य च सीतानुरागकारकत्वं महती महोदारता च सूचिते इति भावः । अत्र एकपद्यमपि प्रयोगात् परिकराङ्कुरालङ्कारः ।

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥ १२ ॥ इति ।

[१२। रामः तथैव सीतायाः प्राणेभ्योऽपि प्रियः अभवत्। हृदयम् एव तु परस्परं प्रीतियोगं जानाति। इत्यन्वयः।]

रामः। कष्टमतिदारुणोऽयं हृदयमर्मोद्घातः। हा देवि! एवं किल तदासीत्। अहो! निरन्वयविपर्यासविरसवृत्तयो विप्रलम्भपर्यवसायिनस्तापयन्ति संसारवृत्तान्ताः। (४)

(१२) द्वितीयमाह—तथैवेत्यादि। तथा एव यथा रामचन्द्रस्य सीता प्राणेभ्य एव प्रिया अभूत् तादृगेव इत्यर्थः। रामः सीतायाः प्राणेभ्योऽपि जीवनादपि प्राणापेक्षयापि इत्यर्थः। प्रियः प्रीतिजनकः अभवत्, रामः सीतामिव सीतापि रामं परमप्रीतिदायकं जीवनादपि गरीयांसममन्यत इत्यर्थः। तु किन्तु परस्परम् अन्योऽन्यं प्रीतियोगं प्रणयसम्बन्धं [illegible] एव [illegible]। जानाति न तु अन्यः [illegible]। [illegible] प्रणयसम्बन्धप्रीतियोगा [illegible] केवलं परस्परं [illegible] तयोरात्मनोरेव [illegible], यत [illegible] जीवनात् [illegible]। [illegible] एकमानसजातमिव [illegible] सर्वदा [illegible]। [illegible] [illegible] तथाच इत्थं [illegible] [illegible]: [illegible] इत्यर्थः। अत्र प्रथमार्धे तथेतिपदेन [illegible] पूर्ववर्तिश्लोकार्थस्य [illegible] [illegible]। द्वितीयार्धे [illegible] परिसंख्यालङ्कारः। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तथा [illegible]— प्रिया तु सीता रामस्य दाराः [illegible] [illegible] [illegible] [illegible]। १। तथाच [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible]। २। इति।

(४) कष्टमिति। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]: [illegible]: [illegible]—कष्टमिति। [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]: [illegible] [illegible] इति [illegible]। [illegible] [illegible]

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः ?
क्व तेऽन्योऽन्यं यत्नाः ? क्व च नु गहनाः कौतुकरसाः ? ।
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययो-
स्तथाप्येष प्राणः स्फुरति न तु पापो विरमति ॥ ३३ ॥

[३३ । निरतिशयविस्रम्भबहुलः तावान् आनन्द क्व ? ते अन्योऽन्यं यत्नाः क्व ? गहनाः कौतुकरसाः च क्व नु ? सुखे वा दुःखे वा हृदययोः तत् ऐक्यं क्व नु खलु तथापि एषः पापः प्राणः स्फुरति न तु विरमति । इत्यन्वय ।]

हृदयमर्माणि भूयो भूयः समभिहन्यन्त इति भाव । हा देवि देवीस्वरूपे, साक्षान्मूर्त्ते इत्यर्थः । तदा पूर्व्वकाले साम्प्रतं केवलं स्मृतिमात्रे इत्यर्थः । एवम् इत्थम् आसीत् किल वर्त्तते वा नूनम् । तथाच सम्मेलनकाले आवयोः परस्परं प्रेममहिमा क्रमोपवर्द्धित एव वर्त्तते इदानीन्तु तस्मै विपर्य्यस्तमिति भूयसा परिकृये । अहो खेदातिशयो । निरन्वयेति—निः नास्ति अन्वयः सम्बन्धः कारणमित्यर्थः, यस्य तादृशः यः विपर्य्यासः विपरिणामः दशाया इत्यर्थः । तेन विरसा नीरसा अस्वादावमापन्ना इति यावत्, इयं वर्त्तमाना दशा इति यावत्, येषां तथाभूताः अकारणोत्पन्नेन दशाविपर्य्यासेन कठोराः इत्यर्थः । विप्रलम्भे प्रियवियोगे पर्य्यवसानं परिणमन्ति ये ते तथाभूताः परिणामे प्रियबन्धूनां वियोगरूपेण परिणता इत्यर्थः । संसारवृत्तान्ताः संसारस्य आडम्बरोपनिबद्धशरीरपरिग्रहात्मकस्य सर्व्वजगतः वृत्तान्ताः वृत्तान्ताः भावा इत्यर्थः । तापयन्ति क्लेशं जनयन्ति तथाच संसारे हि बहवो वस्तुतः प्रियबन्धूनां वियोग एव संसारिणामन्तःकरणं परितापयतीति तादृशस्यापि प्रणयस्य आकस्मिकात्मके प्रियाया विरहदुःखमपारे निपातयत इति भावः ।

(३३) सीता विपर्य्यासं विप्रलम्भात्मन एव विशेषेण निर्द्दिशति—क्व तावानित्यादि । निरतिशयविस्रम्भबहुलः निः नास्ति अतिशयो यस्मात् तादृशः सर्व्वलोकातीतः सर्व्वोत्तम इति यावत्, यः विस्रम्भः विश्वासः प्रणयविश्वस्तेत्यर्थः । तेन बहुलः परिपुष्टः सान्द्र इति यावत्, तावान् तत्परिमितः अतिबहुलपरिमाणः आनन्दः प्रमोदः प्रहर्षभावः क्व कुतः गमितः इति शेषः, स तु इदानीं नानुभूयत इत्यर्थः । ते पूर्व्वानुभूताः अन्योऽन्यं परस्परं प्रति परस्परमित्यर्थः । यत्नाः सम्प्रीत्यतिशयसाधिकाः चेष्टाः क्व । गहनाः निबिडाः घना इति यावत्, कौतुकरसाः कौतुकेषु उत्सवेषु ये रसाः आस्वादाः ते मनोहरा आश्चर्य्या इत्यर्थः । ... कौतुकमपि सर्व्वावि तान्येव रसाः विलासविशेषकलापविशेषाः तान्येव रसाः ... ते च क्व नु कुतः गताः ... सुखे दुःखे वा तत् पूर्व्वसिद्धं हृदययोः मम सीतायाश्च ऐक्यं ... कुत्र

भोः ! कष्टम् । (ग)

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।

य एवं दुस्तरः कालस्तमेव स्मारिता वयम् ॥ १४ ॥

[१४ । प्रियागुणसहस्राणां एकोन्मीलनपेशलः, य एव कालः दुस्तरः, तमेव वयं स्मारिताः । इत्यन्वयः ।]

टःखयोः समविच्छिन्नमित्यर्थः । क नु खलु क पर्यवसितमिति शेषः । पुरा हि मयि कदाचिदपकृते पतिप्राणा सीतादेवी विपन्ना कथमपि मयि प्रहर्षयते प्रहृष्टा च आसीत् कथमपि तस्या विषादे विषादं प्रहर्षे च प्रहर्षमुपागच्छं, किन्त्वद्य तयोरिदानीन्तनतयाप्यालोचनतामभ्यावेन तदनुभूतिरपि दुर्लभेति भावः । यद्यप्येते विषया गभीरविलग्ना गन्धर्वराजनगरवदिव पश्यत एव मे नष्टास्तथापीति तथाविधशब्देन भावार्थो बोध्यः । एषः मदीयः पापः हीनः कष्टजीवार्थमेव गृहीतजन्मेति तात्पर्य्यम्, प्राणः प्राणवायुः जीवनसाधकः प्रधानः प्रभञ्जन इत्यर्थः । पञ्चवायुबोधकत्वाभावेनैकवचनं युज्यते । स्फुरति समुच्छ्वसिति वहति, तु किन्तु न विरमति न निवर्तते । तथा सुखभोगात् पर सम्प्रति कठोरदुःखदग्धस्य मम मरणमेव काङ्क्षणीयमिदानीं सम्भूतमिति भावः । अत्र चतुर्थे पादे प्राणस्य कथितात् स्फुरणादन्यस्य विरामस्य "न विरमती"ति शब्देनैव व्यपोहनात् शाब्दी परिसंख्या, तयोः क्रिययोः एकस्मिन् प्राणे कर्तृभावेऽपि समाप्तेः दीपकञ्च इति । प्राणस्फुरणाभावप्रयोजकानां सत्त्वेऽपि तद्विरहस्य प्राणस्फुरणस्य सद्भावस्य प्राणविरामहेतूनां सत्त्वेऽपि तदभाववर्णनाच्च विशेषोक्तिर्बोद्धव्या । शिखरिणी वृत्तम् ।

(ग) भो इति । भोः कष्टमिति पुनः कष्टान्तरमारचयति । तस्य च वक्ष्यमाणश्लोकेनान्वयः ।

(१४) प्रियासमागममहोत्सवाकुलं पूर्वकालं स्मरन् दुःखपरितप्तः श्रीरामचन्द्रस्तदेव कष्टान्तरं प्रकटीकरोति—प्रियेति । प्रियागुणसहस्राणां प्रियायाः सीतायाः गुणानां स्वभावादीनां सहस्राणि बहुत्वानि तेषां सीतायाः अपरिमितगुणावलीनाम् एकोन्मीलनपेशलः एकं प्रधानं स्वच्छभावापन्नमिति यावत्, उन्मीलनं प्रकाशः आविर्भावः इति यावत्, तेन पेशलः रमणीयः यथा एकं, एकदैव अद्भुतोन्मीलनं तत्र पेशलः दक्षः, तदानीं अतिसन्तोषजननः प्रियायाः रूपादिगुणानां नितरां स्फूर्तिजनकः इत्यर्थः, य एव कालः समयः पूर्वतनः इत्यर्थः । दुःस्तरः स्मृतौ दुःखदायकः, तमेव कालमित्यर्थः । वयं स्मारिताः तत्कालस्मृतौ परिपातिताः इत्यर्थः । अत्र स्मृतेर्ज्ञानार्थत्वेन विज्ञानस्य अप्रेतः प्रयोज्यकर्तुः कर्मसंज्ञाविवक्षायां कर्मणि क्तप्रत्ययात् कर्मणि वयमिति प्रथमा बहुवचनञ्च स्मृतेरत्यन्तदुःखजनकतापतिपादनार्थम् । भावार्थश्चायम्—यत् यस्य कालस्य क्षणमात्रमपि मनः सन्दधाति हि मम सीताया विशेषतामनुभवति, तत्र स्मृतेः महोत्सवसम्पन्नो दृष्टा दृष्टा सर्वं सुखजनकम्, तत्र च अद्यापि तथा दुःखकारिताः

तदा किञ्चित् किञ्चित् कृतपदमहोभिः कतिपयै-

स्तदीषद्विस्तारि स्तनयुगलमासीत्कृतदृशः ।

वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः

प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥ २५ ॥

[२५ । तदा किञ्चित् किञ्चित् कृतपदं कृतदृशः स्तनयुगलं कतिपयैः अहोभिः ईषद्विस्तारि (अभवत्) । यत्र वयःस्नेहाकूतव्यतिकरघनः मदनः हृदि प्रगल्भव्यापारः वपुषि मुग्धस्य स्फुरति । इत्यन्वयः ।]

कुशः । अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवीमुद्दिश्य रघुपतेः श्लोकः । (५)

स्मृतिमध्यारोप्य पर्यितापयन्ति जीवतस्त्वामि, इत्यादौ यस्य बालकस्य वचनैन तस्यैव बालस्य स्मृतिः समुद्दीपिता भूयो मदन्तं तापयति इति ।

(२५) तत्कालविषयानेव क्रमेण निर्वक्ति—तदित्यादिना । तदा तस्मिन् समयीनव-समुद्भूते काले सीतायाः यौवनोद्गमसमुदयेन इत्यर्थः । किञ्चित् किञ्चित् ईषत् ईषत् कृतपदं कृतम् आश्रितं पदम् आस्पदं स्थानमित्यर्थः, येन तत् सम्प्राप्तपदं प्रकाशं गतमिति यावत्, कृतदृशः कृतस्य इति इक् यस्याः तथाभूतायाः हरिणाक्ष्याः स्तनयुगलं स्तनयोः कुचयोः युगलं स्तनद्वयमित्यर्थः कतिपयैः कियद्भिः अहोभिः दिवसैः अल्पकालाभ्यन्तर एवेत्यर्थः । ईषद्विस्तारि ईषत् विस्तारि इति स्वल्पविस्तृतं नात्युन्नतपरिणतम् अभवत् । यत्र यस्यां तस्यामवस्थायां वयसः यौवनस्य स्नेहस्य प्रणयस्य आकूतस्य मानसाकाङ्क्षाविशेषस्य व्यतिकरेण संसर्गेण घनो-इत्यर्थः, घनः निविडः निरन्तरः परिपुष्ट मदनः मानसाभिलाषविशेषः काम इत्यर्थः । हृदि अन्तःकरणे प्रगल्भव्यापारः प्रगल्भः प्रागल्भ्ययुक्तः परिपुष्टरूपः प्रौढभावापन्न इति यावत्, व्यापारः चेष्टा यस्य स तथाभूतः सम्यगुन्नत इत्यर्थः । स्फुरति प्रतिभासते वपुषि शरीरेऽवस्थाने मुग्धः सुकुमारदर्शनश्च, यद्वा अन्यया सर्वदा बहिर्व्यापाराभावात् मूढः प्रतिकलित इव सन्, अनुवर्तीति शेषः । तदा च तदानीं मुग्धवपुषि [illegible] कतिपयैरेव [illegible] समस्तं परिपाकमीयत्यापि समधिगतम् । कामश्च वयसा प्रेम्णा अभिप्रायविशेषेण च परिपुष्टः [illegible] उत्कटो हृदि च सौन्दर्यं समजनि इति सरलार्थः । अत्र प्रगल्भमुग्धत्वयो- र्विरुद्धयोः सामानाधिकरण्यम् इति आपाततः प्रतीयमानस्य विरोधस्य मुग्धप्रगल्भयोः आपिमापि- [illegible] समाधानात् विरोधाभासः अलङ्कारः । एतच्च एव मदनस्य मदनवृत्तान्तस्य [illegible] [illegible] अनवतारः [illegible] [illegible] [illegible] [illegible]

(५) [illegible] कुशः प्रकाशयति—अयञ्च [illegible] [illegible]

त्वदर्थमिव विन्यस्तः शिलापट्टोऽयमग्रतः ।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः ॥ २१ ॥

[१८ । अयं शिलापट्टः त्वदर्थमिव अग्रतः विन्यस्तः । यस्य अभितः अयं केसरः पुष्पैः प्रवृष्ट इव (अस्ति) । इत्यन्वयः ।]

रामः । [सबाष्पातिलेपकरुणम् ।] अस्ति हि नाम मुग्धः शिखण्डी विशेषलक्ष्यस्वरः । हा देवि ! अरसि वा तस्य प्रदेशस्य तस्मात्-विस्तमातिशयप्रसङ्गसाक्षिणः ? कष्टं भोः ! कष्टम् ! (क)

मन्दाकिनी चित्रकूटे । मन्दाकिनीचित्रकूटवनविहारे मन्दाकिनी चित्रकूटोपकण्ठवर्तिनी काचित् स्रोतस्विनी, तथाच रघुवंशे—"मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः" इति । मन्दाकिनी गङ्गेत्यपि केचित् । मन्दाकिनी च चित्रकूटः तदा तदाश्रमतया लक्षितः तेषामिव तयोः वनानि मन्दाकिन्यास्तीरवर्तीनि चित्रकूटस्य च तटवर्तीनि तेषु विहारः अतिशयं प्राक्तनजन्मवृत्तिकं तत्र विहारकाले इत्यर्थः । सीतादेवीम् उद्दिश्य देवीभूता वैदेही इति इत्यर्थः । रघुपतेः श्रीरामचन्द्रस्य श्लोकः पद्यम् ।

(१८) विहारोपयोगितया श्रीरामेण प्रोक्तं तमेव श्लोकार्थं प्रकाशयति—त्वदर्थमिवेति । अयं पुरोभागे दृश्यमानः शिलापट्टः शिलाखण्डः त्वदर्थम् इव तुभ्यम् इदं त्वदर्थमिति विग्रहः । अथवा तमेव अर्थः प्रयोजनमस्येति त्वत्प्रयोजनकमिति क्रियाविशेषणमिदम् । तव शयनादिक्रियार्थम् इति यावत् । अग्रतः अग्रदेशे समीपे इत्यर्थः । विन्यस्तः स्थापितः प्रकृतिदेव्येति शेषः । तथाच प्रकृतिदेवी त्वद्गुणाकृष्टा तव विश्रामार्थं दृश्यमानं शिलाखण्डम् अत्र सन्निवेशितवती, तदत्र विश्रम्यतामिति भावः । शयनादिविश्रामोपयोगितया... शिलादि । यस्य शिलापट्टस्य अभितः समन्ततः सर्वासु दिक्षु इत्यर्थः । अत तत्कालाभिव्यक्त शोभेन अथवा आच्छादितः विकसनात् पतितेति शीतलम् । अयम् अत्र अग्रे स्थितः केसरः बकुलपादपः पुष्पैः कुसुमैः वर्षवर्षितमनोभिरिवार्थः, करणे तृतीया । प्रवृष्टः वर्षकारी इव प्रतीयते इत्यर्थः । इदं कर्मणि प्रयुक्तम् प्रकृष्ट इति, अयमत्र भावः—एवं शिलापट्टमभितः केसरकुसुमैः पतितैः अयमेव विरचिता पुष्पशय्या शीतलैः कुसुमैः शिलापट्टस्य कठोरतादिदोषाणाम् अपनयनमिति । अतएव शीघ्रः प्रणयिजनापेक्षया नातीव प्रयास इति । अत्र उत्प्रेक्षे विशेषोक्तिः च अनुमिता ।

(क) अस्त्येवेति । अस्य शिखण्डी मयूरः सीतयैव पोषितः ...

* शिलापट्टः इति पाठान्तरम् ।

श्रमाम्बुशिशिरीभवत्प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुललाटचन्द्रद्युति ।
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम् ॥ २० ॥

[२०। श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनीमरुत्तरलितालकाकुललाटचन्द्रद्युति अकुङ्कुमकलङ्कितोज्ज्वलकपोलं निराभरणसुन्दरश्रवणपाशसौम्यं मुखं उत्प्रेक्ष्यते इत्यन्वयः ।]

[illegible]नात्, चिरम् ईषद्धास्य तव निःश्वसित समीप एव तथा गोपनीयस्तानामनुराग-मात् । [illegible]: सीतागत: प्रणय:, कथं विरहजन्येन शोकावेगेन तं सह वर्तमानं यथा तथा [illegible] । वयं पूर्ववाक्यद्वयोक्ता [illegible] वाचक हि [illegible] [illegible] मुग्धं मुग्धभावापन्न: [illegible] विशेषत: विशेषात् [illegible] [illegible] [illegible] । तथाच [illegible] [illegible] लौकिक व्यवहारं जानातीति [illegible] विषयं नि:सङ्कोचं वदतीति भाव । हा देवि सीते [illegible], [illegible]—[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भावविशेष: तत्र य: प्रसङ्ग: समुपभोग तस्य [illegible] [illegible] [illegible] [illegible], तथा [illegible] [illegible] [illegible] वा ? इति विकल्पे, [illegible] [illegible] । '[illegible] वा [illegible]' [illegible] [illegible] । कष्टं भो: कष्टम् इति [illegible] [illegible] विचार्य: सीतायाः [illegible]—[illegible] परिवादानां [illegible] [illegible] ।

(२०) तदेवाह—श्रमेति । श्रमाम्बुशिशिरीभवत् [illegible] [illegible] [illegible] [illegible]: [illegible] आतप: [illegible] [illegible], [illegible] शिशिरीभवत् अशिशिरं शिशिरं भवत् शीतलतां व्रजत्, प्रसृतेत्यादि—प्रसृता विस्तृता मन्दा: [illegible]: [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]: तै: तरलिता: [illegible] [illegible] [illegible]: [illegible] [illegible]: तै: [illegible] [illegible] [illegible] परिवृता ललाटरूपस्य चन्द्रस्य सुधांशो: द्युति: दीप्ति: [illegible] [illegible], [illegible] तत् [illegible] । तथाच तदानीं [illegible] [illegible] ललाटे [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] मनोहरमासीदिति भाव: । [illegible] [illegible]
न कुङ्कुमेन कुङ्कुमरागेण कलङ्किती लाञ्छितौ कुङ्कुमरागपरिशून्यावित्यर्थ:

[लज्जित इव स्थित्वा सकरुणम्] अहो नु खलु भोः ! (च)

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः ।
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे*
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ ३८ ॥

[३८ । चिरं ध्यात्वा ध्यात्वा निर्माय पुरतः निहित इव प्रियजनः प्रवासेऽपि आश्वासं न करोति (इति) न खलु । विकल्पव्युपरमे जगत् जीर्णारण्यं भवति हि, तदनु कुकूलानां राशौ हृदयं पच्यत इव । इत्यन्वयः ।]

रक्ताभौ कपोलौ गण्डदेशौ गण्डद्वयमित्यर्थः, यस्मिन् तथाभूतं कुङ्कुमादिकविलेपनं विनाऽपि स्वाभाविकौ भास्वरपीतरक्ताभौ कपोलौ वहदित्यर्थः । 'निराभरणे'त्यादि—निः न सन्ति आभरणानि भूषणानि कुण्डलाद्यलङ्कारा ययोः तथापि सुन्दरौ रमणीयौ श्रवणपाशौ सुन्दरं कर्णद्वयमित्यर्थः । ताभ्यां सौम्यं सौन्दर्ययुक्तं मुखमिदमित्यर्थः । अलङ्कारं विनाऽपि निसर्गसुन्दरौ कर्णौ दधानमित्यर्थः । मुखम् आननं तवेति शेषः, समीपगतमिव दृश्यत इत्यर्थः । तथाच तदानीं वनविहारेषु परिश्रमजातेन बिन्दुभिः स्वेदजलेन ते ललाटं सम्पृक्तमभवत्, तत्र च स्वेदापनोदनकाम्ययेव प्रवहता मन्दानिलेन समान्दोलिता अलकराजयः ललाटोपरि समाश्रिता अर्धचन्द्राकारे ललाटे चञ्चलाः पपात इतस्ततः, कुङ्कुमसम्पर्कपरिशून्यमपि कपोलद्वयं पीतरक्तं कुण्डलादिवर्जितावपि सुन्दरकर्णौ महतीं शोभामुद्भावयत इति सर्वमिदं सङ्कल्पविशेषपरिकल्पनावशात् प्रत्यक्षमिव पश्यामीति भाव । 'अकुङ्कुमे'त्यादौ हि स्मारयति कालिदासकवितां—"किमिव हि मधुराणां मण्डनं नाकृतीना"मिति । अत्र ललाटचन्द्रेति रूपकम्, 'अकुङ्कुमे'ति 'निराभरणे'ति चानयोः पीतरक्तसौन्दर्ययोः तत्कारणव्यतिरेकेणोपपत्तिवर्णनाद्विभावनाविशेषोक्त्योः सन्देहसङ्करमपि कल्पयन्ति आलङ्कारिकाः । अनुप्रासप्रकर्षेण सुव्यक्तः । वृत्तं पृथ्वी ।

(च) लज्जित इवेति । तथाच सीतायाः मुखं सङ्कल्पेन पश्यतो रामस्य सात्त्विकभावसमुदयेन लज्जितत्वम् । तथाभूतं स्थित्वा कियन्तं कालं तूष्णीम्भावं कृत्वेति यावत्, सकरुणं कातरं सदीनमित्यर्थः, आहेति शेषः । 'अहो नु खलु भोः'—आश्चर्यविषादशोकवचनोऽव्ययः, तेन च शल्यमानमाह्वानमिति प्रकाशः ।

(३८) सङ्कल्पवशात्मना कस्मिंश्चित् प्रियजनमूर्तिमात्मसमीपे समुपस्थाप्येव पुर: तदे-

---

* विकल्पव्युपरमे, विकल्पेऽप्युपरते इति पाठभेदौ ।

[नेपथ्ये] (अ)

वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवास्मद्भक्त्या शिशुकलहमाकर्ण्य सभयाः ।
जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः ॥ २८ ॥

स्थावरणि शून्यमिदं जगत पर्यालोचनीयमिति दुःखकारणं निर्दिशति—चिरमित्यादि । चिरं दीर्घकालं यावत्, ध्यात्वा ध्यात्वा सङ्कल्प्य सङ्कल्प्य तच्चिन्तासाहाय्येनेत्यर्थः । निर्माय मूर्तिमन्तं विधाय विरचय्य इत्यर्थः । पुरतः समीपप्रदेशे निहितः स्थापित इव प्रियजनः प्रणयी प्रेमपात्र-मित्यर्थः, प्रवासे दूरदेशावस्थानेऽपि विरहदशायामपीति यावत्, आश्वासं सन्तापशमनं सान्त्वनां न करोति न उत्पादयति इति न खलु निश्चितमेव परिसान्त्वयतीत्यर्थः । "सम्भावनिषेध-निवर्त्तने नञ्द्वयमिति" वामन "द्वौ नञौ प्रकृतार्थं गमयतः" इति चान्ये । तथापि प्रवासिनो विरहपरिवशाः केवलमेकान्तया प्रियजनपरिचिन्तया भूयांसं कालमतिवाहयन्तः प्रियजन मूर्तिमात्मसमीपे परिकल्प्य सर्वं तत्फलमनुभवन्तीव इति भावः । विकल्पस्य उपरमे विकल्पस्य विरतौ सङ्कल्पस्य प्रियजनविषयकस्येत्यर्थः, व्युपरमे अवसाने मनसः प्रियचिन्तानिवृत्तावित्यर्थः, जगत् स्थावरजङ्गमात्मकः समस्तोऽयं संसारः इत्यर्थः, जीर्णारण्यं जीर्णं पत्रपत्रादिविच्युत-शाखापादपादिभीषणं निवासायोग्यमित्यर्थः, भवति हि निश्चितं प्रतीयते । अत्रायमर्थो भावते —यथा विकल्पस्य ब्रह्मणि मिथ्याभूतजगद्विज्ञानस्य व्युपरमे अपगमे विनाशे इत्यर्थः, जगत् जीर्णारण्यमिव भवति जीर्णारण्ये यथा नानुरक्तिः भवति तथा एव जगतो मिथ्यात्वग्रहात् तत्र नासक्तिरिति । तदनु ततः परं जगतो जीर्णारण्यत्वग्रहानन्तरम् इत्यर्थः, हृदयम् अन्तःकरणम् अनुभवसाधनमिति यावत्, कुकूलानां तुषाग्नीनां राशौ राशीभूतेषु तुषानलेष्वित्यर्थः । "कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले" इत्यमरः । पच्यत इव पक्वं भवतीव । कर्मकर्त्तरि प्रयोगः । प्रथमतो विकल्पव्युपरमः ततो जगति जीर्णारण्यत्वज्ञानं तदनन्तरञ्च हृदयस्य सन्ताप-भाव इत्यर्थः । अत्र कुकूलाग्निदाहनिर्देशात् हृदयस्यातितरां दाहकष्टमनुभूयते, तथाहि— तुषानल एव बहूनि दीर्घकालं कठोरतया सन्तापयति, तस्य तुषोपकरणानां शुष्ककाष्ठादि-साम्येन सहसा दाहपरिसमापकत्वाभावात् । अत्र प्रथमपादे ध्यानेन कल्पितायाः मूर्त्तेः समीपोप-स्थापनम् तृतीये जगतो जीर्णारण्यत्वम् चतुर्थे तुषानले हृदयदाहस्य च सम्भावनादुत्प्रेक्षा । शिखरिणी छन्दः ।

(अ) नेपथ्य इति । नवका यवनिकैवेति परत्वं संवादं सूचयन् म् चयथा ।वसापयति ।

[१९। चिरप्रवासप्रणायकं वशिष्ठः वाल्मीकिः दशरथमहिष्यः अथ जनकः अरुन्धत्या सह उभयाः (ख्न.) अथ खलु निष्टूरागमनतया श्रमभग्नाः, त्वरितमनसोऽपि जरात्यन्तेः मन्दैः चिरेण आगच्छन्ति। इत्यन्वयः।]

रामः। कथं भगवन्तौ अरुन्धतीवसिष्ठौ, अम्बा, जनकश्च अत्रैव! कष्टं, कथं खलु एते द्रष्टव्याः? [सकरुणं विलोक्य] अहह! तातजनकोऽपि दैवादत्रैवायाति इति वज्रेण ताडितोऽस्मि मन्दभाग्यः। (ब)

---

(१९) तमेव श्लोकं व्याचष्टे—वसिष्ठ इत्यादि। चिरप्रवासं चिरो व्यापकः चन्द्रकेतोः प्रवासं प्रस्थानं रणस्य संग्रामस्य आकर्ण्य श्रुत्वा वसिष्ठः, रघुकुलस्य चिरं हितार्थी तदाख्यो मैत्रावरुणिः वाल्मीकिः प्राचेतसः, तस्य सर्वार्थदर्शी गुरुः दशरथस्य रघुकुलराजस्य महिष्यः कौशल्यादयः अथ जनकः विदेहराजः, अरुन्धत्या तदभिधानया वसिष्ठपत्न्या सह उभयाः अनेन कुमारयोरन्योऽन्यसङ्घातजन्यदेहक्षतिभयार्थे, सह वर्तमानाः लवचन्द्रकेतुयुद्धेन दूरतया मनःखन्नवान् भीतान्तःकरणा इति यावत्, निष्टूरागमनतया विशेषेण दूरतः दूरवर्त्तिस्थानादागत इत्यर्थः, आश्रमः येषां तेषां भाव तत्ता तया आश्रमस्यातिदूरत्वात् इत्यर्थः। श्रमभग्नाः श्रमेण क्लान्त्या जडा जडीभूताः श्रान्तमनसः इत्यर्थः। त्वरितमनसोऽपि त्वरितं शीघ्रं गन्तुं वर्त्तते आतार्थं इतत् त्वरायुक्तमित्यर्थः। मन मानस येषां ते तथाभूताः शीघ्रगमनाय कृतमनसोऽपीत्यर्थः। तथाहि—तेषामाश्रमो बहुदूरं वर्त्तते, ततः समागच्छतां तेषाम् अतिमात्रः श्रमः समभावत, तेन च सञ्जातेन परिश्रमेण न ते त्वरितम् आगन्तुमर्हन्तीति भावः; (०, जरात्यन्तेः जरया वार्धक्येन यत्तैः आयत्तीकृतैः वार्धक्यवशात् सामर्थ्यहीनैः मन्दैः गात्रैः, 'प्रकृत्यादिभ्य उपसंख्यान'मिति तृतीया। चिरेण कालबहुत्वेन विलम्बेन इत्यर्थः। अपरार्धं इत्येके। आगच्छन्ति लवचन्द्रकेत्वोः संग्रामभूमिमुपगच्छन्ति। बालकानां परस्परं संघर्षेण सम्भावितस्य अनिष्टस्य निराकरणाय सत्वरागमनकाङ्क्षिणोऽपि दूराध्वातिक्रमपरिश्रमात् वार्धक्यदोषाच्च शीघ्रागमनाय विलम्बिताः स्थिताः इति भावः। अत्र चिरेणागमनं प्रति हेतुभूतस्य श्रमभग्नत्वस्य प्रतिपादनात् काव्यलिङ्गमलङ्कारः। अत्रैतेषां प्रस्तुतानां वसिष्ठादीनां आगमनादि रूपैक धर्मेण च तुल्ययोगितापि, शिखरिणी वृत्तम्।

(ब) कथमित्यादि। भगवन्तौ ऐश्वर्यशालिनौ अरुन्धती च वसिष्ठश्च तौ अम्बा कौशल्या जनकश्च विदेहराजः एते पूर्वोक्ताः सर्वे अत्र एव अस्मिन् स्थाने एव कथं केन प्रकारेण किमुद्दिश्य वा उपस्थिता इति शेषः। कष्टं वा दुःखम्। कथं केन प्रकारेण एते अरुन्धतीप्रभृतयः सीतानुरागिणः जना इत्यर्थः, द्रष्टव्याः आलोकयितव्याः। नैव तान् द्रष्टुं शक्नोमीति भाव.। अकारणसीतापरित्यागेन दुष्कर्मणोऽहम् जनकादिभ्यो मुखं दर्शयितुं नितरां कुण्ठितोऽस्मि इति तात्पर्यम्। एतस्मिन्नेव काले सीतायाः परित्यागात् तत्पितुः जनकस्य दुःखोद्रेकादुःखोपनयनशालिनया तदुक्तिः सुकरता। सकरुणं करुणाभावयुक्तं,

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वसिष्ठादिभि-
र्दृष्ट्वापत्यविवाहमङ्गलमहे*तत्तातयोः सङ्गतम् ।
पश्यन्नोऽद्य तमीदृशे पितृसखं हन्त महावैशसे
दीर्णं किं न सहस्रधाहमथवा रामेण किं दुष्करम् ॥४०॥

[४० । सम्बन्धस्पृहणीयताप्रमुदितैः वसिष्ठादिभिः जुष्टे अपत्यविवाहमङ्गलमहे तातयोः सङ्गतं दृष्ट्वा ईदृशे महावैशसे हन्त पितृसखम् ईदृशं पश्यन् अहं किं सहस्रधा न दीर्णः? अथवा रामेण किं दुष्करम्? इत्यन्वयः ।]

तथात्वेन 'कथापितद् भावेनाभिनयात् । विलोक्य नेपथ्याभिमुखमवलोक्य वसिष्ठादीनामागमनवर्त्म अवलोक्य इत्यर्थः । अहहेति सातिशयविषादसूचकमव्ययम् । तात जनक. श्वशुरत्वेन पिता जनकः वैदेहः दैवात् मदीयकर्मजन्यदुरदृष्टात् हेतोरित्यर्थः, अतैव प्रियापरिवर्जनकानन एव आयातः समागतः समुपस्थितः इति हीनो: वध च अजनिना दैवेनेव पातितैनेत्यर्थः । मन्दभाग्यः मन्दं दुःखमयं भाग्यम् अदृष्टं यस्य तथाभूत दुर्भग इत्यर्थः । अहमिति शेषः । ताडित आहत इति । अभिनिपातेन यथा जीवाना वेदना मुत्पद्यति, तथाहम् अतैव तातस्य जनकस्य समागमेन परिपीडितोऽस्मीति भावः । अकारणमेव सीतायामपवादमारोप्य वने तां विसर्ज्य तस्याः पितुः सुतरां परिज्ञातमद्विगृहीतावस्य समीपोपसर्पणं मे परं दुष्करमेव इति भावः ।

(४०) पुनर्भवस्मारणेन दुःखातिशयं विवृणोति—सम्बन्धेत्यादि । सम्बन्धस्पृहणीयता-प्रमुदितैः सम्बन्धस्य वैवाहिकसम्बन्धस्य रघुवंशीयानां विदेहवंशीयानाञ्चेत्यर्थः । स्पृहणीयतया काम्यतया श्लाघनीयतयेत्यर्थः । प्रमुदितैः प्रमोदवद्भिः. सहर्षपरितुष्टैरित्यर्थः । वसिष्ठादिभिः वसिष्ठप्रभृतिभिः पवित्रकर्मभिः मुनिभिः जुष्टे युक्ते अधिष्ठित इत्यर्थः, अपत्यविवाहमङ्गलमहे अपत्यानां रामसीताप्रभृतीनां विवाह. परिणयः स एव मङ्गलः शुभमयः महः उत्सवः रामसीतादीनां विवाहमहोत्सव इत्यर्थः । तस्मिन् तातयोः पितृश्वशुरयोः जनकदशरथयो-रित्यर्थः । तत् पूर्वतनं सङ्गतं सम्मेलनं वैवाहिकप्रसङ्गेन परस्परं समागमनमिति यावत् । दृष्ट्वा समवलोक्य विशेषेण साक्षात्कृत्य इत्यर्थः । ईदृशे एतन्मात्रे सीतानिर्वासनरूपे महावैशसे अत्यन्तनिष्ठुरे कर्मणि इह समुपस्थिते सङ्कटे सतीत्यर्थः । पितृसखं पितुः सखा समप्रायः तं जनकं "राजाहःसखिभ्यष्टच्" इति तत्पुरुषे सखिशब्दात् टच्प्रत्ययः । ईदृशम् अपत्यनिर्वासनेन दुःखार्तं विषण्णमनसं पश्यन् अवलोकयन् किं अहं केन हेतुना सहस्रधा सहस्रखण्डैः इत्यर्थः । न दीर्णो न विदीर्णो भवामि । कर्मकर्तरि प्रयोगः । ईदृशे विपत्सम्पाते पितृसखं जनकं पश्यतो मे वज्रमयो विदीर्णतैव युज्यते । अथवा विदीर्णत्वाभावे रामेण नयैति भाव दुष्करं

* जुष्टं वसिष्ठादिभिर्दृष्टापत्यविवाहमङ्गलमहो इति पाठान्तरम् ।

[नेपथ्ये] कष्टं भोः ! कष्टम् ! (य)

अनुभावमात्रसमुपस्थितश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्-
विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

[४१ । अनुभावमात्रसमुपस्थितश्रियं सहसा एव ईदृशं रघुनाथं वीक्ष्य प्रथमप्रमूढजनकप्रबोधनाद्विधुरा मातरः प्रमोहम् उपयान्ति । इत्यन्वयः ।]

राम । हा तात ! हा मातरः ! हा जनक ! (र)

कर्तुमशक्यम् । तथा च यदहम् एतावतापि न विदीर्य्ये तत् सर्व्वमेव कठोरं कर्म्म मया कर्त्तुं शक्यम् । "सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवती"ति निर्देशेन सुखं सम्यगानन्दमयं महोत्सवमुपगत्य प्रहृष्टौ तातौ दृष्टवतो महाविपत्प्राप्ते समुपस्थिते ज्ञातिविषयं पितृसखं जनकं सन्तोषमात्रस्य प्राणपरिहार एव युक्तः, स च न भवतीति भावः— नास्ति जगति तथाभूतं किमपि कर्म्म यत् सीताविवासनकारिणा रामेण न शक्यते सोढुम् । तदहमतिदुःसहकर्म्मा सर्व्वसहेव सकलसहोऽस्मि इति भावः । अत्र समस्तकार्य्यकारणयोः रूपेण कारणेन तादृशस्यापि सुदारुणस्य शोकस्य सहनरूपकार्य्यसमर्थनादर्थान्तरन्यासोऽलङ्कारः स च ईदृशकठोरकष्टसहनप्रत्ययेन अन्येषां तदपेक्षयान्यूनतराणां सहनस्य अनुमानप्रत्ययात् अर्थापत्तिसङ्कीर्णः । शार्दूलविक्रीडितं वृत्तम् ।

(य) नेपथ्य इत्यादि । पुनरपि वक्ष्यमाणश्लोकेन नेपथ्यस्थानात् कश्चित् मुनिः वशिष्ठादीनाम् अवस्थां परिवर्णयं पारिषदान् ज्ञातवतान् करोति—कष्टं भो कष्टम् इति । अरुन्धत्यादीनां प्रमोहापातेन दुःखोक्तिः ।

(४१) तदवस्थामेव प्रकाशयति—अनुभावेत्यादि । अनुभावमात्रेण केवलेन तेजसा तेजःसंसर्गेण समुपस्थिता ज्ञानविषयीभूता वर्त्तमानेत्यर्थः, श्रीः शोभा यस्य तथाभूतं एतादृशविपत्पातेन शरीरसंस्थानविपर्य्यासेऽपि केवलतेजोयोग्यतेजसैव संसुपलक्ष्यमाणशोभत्वात् सहसा अकस्मात् एवं ईदृशं तथाकारं रघुनाथं रामचन्द्रं वीक्ष्य दृष्ट्वा । प्रथमेत्यादि—प्रथमं पूर्वं प्रमूढस्य विलुप्तचैतन्यस्य मूर्च्छितस्य इत्यर्थः । जनकस्य विदेहराजस्य प्रबोधनात् चैतन्यसम्पादनात् सम्भवेत्यर्थः । विधुरा कातर्य्यमापन्ना मातरः रामस्येति शेषः, कौशल्यादयः प्रमोहं मूर्च्छितभावम् उपयान्ति प्राप्नुवन्ति मूर्च्छन्तीत्यर्थः । तथा च श्रीरामस्य सीताविरहेण शोकार्त्तस्य चिन्तया विशोषितस्य च वनादिषु निरन्तरं पर्य्यटतो ईदृशी कायक्षामताप्राप्तिः, "स वसति विलीनः" इति च ज्ञात्वा विषण्णाः मातरः सहसा दृष्ट्वा मूर्च्छिताः इति भावः । मञ्जुभाषिणी वृत्तम् ।

(र) नेपथ्योक्तेन विज्ञातजनकादिविषादावस्थः तानेव महोत्सवकालस्थितान् शोकार्त्तान् उद्दिश्य रामो विलपति—हा तातेति । दुःखावस्थाया सुखावस्थात्वेन तदवस्थानाम्

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम् ।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि ॥ ४२ ॥

[४२। जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलं तस्मिन् अकरुणे पापे मयि वः करुणा वृथा। इत्यन्वयः ।]

यावत् सम्भावयामि [इति उत्तिष्ठति] (च)

लवकुशौ। इत इतस्तातः। (छ)

[सकरुणं परिक्रम्य निष्क्रान्ताः सर्वे।] (ज)

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः । (झ)

अनुकूलानां करणस्य चमत्काराधिक्यात्। हा तात पित, हा मातर कौसल्यादय, हा जनक, इत्येवां प्रत्येकं सम्बोधनात्मक ।

(४२) ननु कथं मामेवं दुरवस्थमालोक्य भवन्तो मूर्च्छन्ति अयोग्योऽहं भवतां करुणाया इत्याह—जनकानामित्यादि। जनकानां जनकवंशीयानां रघूणां रघुवंशीयानाञ्च यत् सीतारूपं वस्तु कृत्स्नं समग्रं गोत्रमङ्गलं गोत्रयोः वंशयोः जनकरघुकुलयोरित्यर्थं, मङ्गलं कल्याणं यथैव रघुवंशीया जनकवंशीयाश्च मङ्गलवन्त इति भावः । तस्मिन् मङ्गलमयी सीताऽपि कृत्स्नमि अकरुणे निर्दये निर्वासनेन सम्पादितनिष्ठुराचारे पापे पापकारिणि मयि रामे इत्यर्थः । वः युष्माकं करुणा दया वृथा निष्फला करुणाभाजनायोग्ये मयि न युक्त इत्यादिविवक्षितम् अत्र व्यङ्ग्यम् इत्यर्थः । अत्र गोत्रमङ्गलमिति रूपकम् सीतायां मङ्गलत्वस्य आरोपस्य च पदार्थस्य वाक्यार्थहेतुतया करुणाभावं प्रति हेतुत्वप्रत्ययात् पदार्थहेतुकं काव्यलिङ्गम्।

(च) यावदिति। सम्भावयामि सम्मानयामि गुरुजनोपचारेण उपचरामीत्यर्थं । वस्तुतो दुरदृष्टजन्यसमागमानामपि सम्भावनाया अवश्यं कर्तव्यत्वात्। अत्र "यावत् पुरानिपातयोर्लट्" इति भविष्यदर्थे यावत्शब्दयोगेन भविष्यदर्थे सम्भावयामीति लट्। इति पूर्वम् उक्तेति शेषः। उत्तिष्ठति उत्थानयोग्यशरीरचेष्टाम् अभिनयतीत्यर्थं ।

(छ) इत इति। तात पितृसम्बोधनम् इत्यर्थं, इत इत अस्मिन् पथि आगच्छतु भवान् इति शेषः। इदम् सम्भ्रमे तथ्य । इत इत अयम् पन्था वा।

(ज) सकरुणमिति। सर्वेषां करुणभावममयत्वात् रामकातर्यदर्शनेन कुशलवयोरपि तथाभावसम्भवात्। परिक्रम्य पादचारेण भ्रमणं कृत्वा सर्वे रामादयः निष्क्रान्ता रङ्गभूमेः निर्गताः ।

(झ) इतीत्यादि। कुमारौ अभिज्ञायेते अस्मिन्निति अङ्कः । कुमारयोः कुशलवयोः प्रत्यभिज्ञानं यस्मिन् अङ्के अस्मिन् इत्यर्थं सम्बन्धः, अभिज्ञानसूचकत्वेन ... अस्मिन् च तस्माद्विशेषणम्, अथवा कुमा... वी-प्रत्यभिज्ञानं नायिकायाः रामेणानुभूतपूर्वयोः ... अनुमानेन ज्ञानविशेषः यत्र ... सा-दृश्यः अङ्कः नाट्यपरिच्छेदः, समाप्त इति शेषः ।

सप्तमोऽङ्कः ।

[ततः प्रविशति लक्ष्मणः] । (क)

लक्ष्मणः । भोः भोः । अद्य खलु भगवता वाल्मीकिना सब्रह्मक्षत्र-पौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्य्य-गुरगनागनिकायो जङ्गमः स्थावरश्च भूतग्रामः स्वप्रभावेण सन्निधा-पितः । आदिष्टश्चाहमार्य्येण —"वत्स लक्ष्मण ! भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः, तद्गङ्गा-तीरमातोद्यस्थानमुपगम्य क्रियतां समाजसन्निवेशः" इति । कृतश्च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया । अयं तु (ख)—

(क) तत इति । ततः षष्ठाङ्कोपायनिष्क्रमणात् परम् । षष्ठावसानकर्तव्यतोक्तिविरु-द्धवाक्यानन्तरमिति वा । लक्ष्मणः सौमित्रिः प्रविशति लक्ष्मणभूमिकां परिगृह्य कश्चिदभिनेता नटः रङ्गाङ्गनम् आगच्छति इति भावः ।

(ख) भो भो इति । निकटस्थपराणां सम्बोधनमेतत् । अद्य अस्मिन् दिवसे । खलु वाक्यालङ्कारे । सब्रह्मक्षत्रपौरजानपदाः ब्रह्माणः ब्राह्मणाः, 'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापति'रिति मेदिनी । क्षत्राः राजन्याः, पुरे भवाः पौराः नगरवासिनः जानपदाः जनपदेषु भवाः देशवासिनश्च तैः सह वर्तमानाः प्रजाः प्रकृतिपुञ्जान् । अत्र सपौरजानपदा इत्येतेनैव ब्रह्मक्षत्रयोरपि लाभात् पृथगुपादानं सर्वसमवायेषु तयोः प्राधान्यज्ञापनार्थमिति । अस्माभिः आहूतैः राजपरिवारैः सह आहूय आमन्त्र्य कृत्स्न एव समग्र एव सदेवासुरतिर्य्य-गुरगनागनिकायः, देवाश्च असुराश्च दनुजाश्च, तिरश्चां पशुपक्षिणाम् उरगाणां सर्पाणां च नागानाम्, 'नागो मतङ्गजे सर्पे प्रधानपुरुषयो'रिति हैमचन्द्रः । नैतावन्तः एव तयोर्भेदः तेषां निकायैः समूहैः, 'निकायस्तु पुमान् लक्ष्ये सधर्मिप्राणिसंहतौ । समूहे संहतानां निकाये परमात्मनि'इति मेदिनी । निकृष्टत्वाविशिष्टत्वेऽपि निकाय इति विवेकः । तथा जङ्गमः गमनशीलः पतङ्गादिः चतुष्पादश्चैतदपि रूपम् । स्थावरः स्थितिशीलः पर्वतादिः तरुविवृताद्देवादिश्च भूतग्रामः भूतानां ग्रामः समूहः, 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबे त्रिषूचिते' इति-विश्वः । 'संघातेऽपि ग्रामो वृद्धावपि शब्दादिपूर्वकः स्वराणा'मिति यादवः । स्वप्रभावेण स्वकीयतपः

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य्य इत एवाभिवर्त्तते ॥ १ ॥

[१ । राज्याश्रमनिवासी अपि प्राप्तकष्टमुनिव्रतः आर्य्यः वाल्मीकिगौरवात् इत एव अभिवर्त्तते इत्यन्वयः ।]

वाल्मीकेन सन्निधापितः समावेशितः एतच स्थापितं । भगवान् वाल्मीकिः स्वनिजेन लोकाति- शायिना तपोबलेन जगतां स्थावरजङ्गमात्मकान् सर्व्वविधप्राणिसङ्घान् एतत्र समावेशितवान् . अत्रैव तदद्भुतदर्शनार्थमामन्त्रितवान् इत्यर्थः । आदिष्टयति चकारः अप्यर्थे अपिशेषार्थः । आर्य्येण पूज्यतमेन भयजेन रामेण अहं आदिष्टः आज्ञापितः--वत्स कन्याभागनं लक्ष्मण सौमित्रे ! भगवता अनिमाद्यष्टैश्वर्य्यशालिना वाल्मीकिना प्राचेतसेन महर्षिणा स्वकृतिं स्वस्य आत्मनः कृतिं स्वयं विरचितं किमपि दृश्यकाव्यविशेषम् अप्सरोभिः उर्व्वशीप्रमुखाभिर्देवाङ्गनाभिः प्रयुज्यमानां अभिनीयमानां द्रष्टुम् अवलोकयितुम् उपनिमन्त्रिताः वयम् आहूता भवामः । तत् तस्मात् गङ्गातीरं गङ्गाया जाह्नव्याः तीरं तटम् आतोद्यस्थानं आतोद्यस्य चतुर्व्विधवाद्यविशे- षस्य स्थानं रङ्गभूमिमित्यर्थः । 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंश्यादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्व्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः । चराचरसकल- प्राणिवर्गसमावेशयोग्ये अतिविपुलायतने सीताया गङ्गाजलादुद्गमनसौकर्य्यार्थं गङ्गातीरस्य रङ्गस्थलत्वम् । अपिच तत्रैव नाटकाभिनयस्य प्राचेतसेन प्रस्तावितत्वात्तस्य रङ्गालयत्वसङ्गतिः । उपगम्य गङ्गातीरस्थरङ्गालयं गत्वा समाजसन्निवेशः समाजस्य सदसः सन्निवेशः संस्थापनं क्रियतां विधीयतां प्राणिसमुदायस्य यथार्हस्थानासनव्यवस्थापनं क्रियतामित्यर्थः, इति तेनाह- माज्ञिप्त इत्यन्वयः । मर्त्यामर्त्यं च मर्त्यौ मरणधर्म्मा मानवादिः अमर्त्यः च सुरः तथाविधस्य भूतग्रामस्य भूतानां जन्तूनां ग्रामस्य समूहस्य समुचितस्थानेषु समुचितेषु यथायोग्येषु स्थानेषु आसनादिषु समुपवेशनं सन्निधापनं स्थापनं च मया कृतं विहितं, प्राचेतसाज्ञया समवेतसकल- प्राणिवर्गैः यथोपयुक्तासने समुपवेशितं मयेत्यर्थः । तद्भवन्तोऽपि उपविशन्तु इति भावः । अयन्तु इति वक्ष्यमाणश्लोकेनान्वितः ।

(१) राज्याश्रमेति । राज्यं पृथिवीपालनात्मकम् तदेव एव आश्रमः अर्थात् राजधर्मप्रतिपालकनियमविशेषः, सुखाभ्युदयसमुदयस्थानं राज्ये आश्रमस्थलेऽपि, तत्र निवासे- ऽपि अवस्थितावपि तदवस्थायामपि प्राप्तकष्टमुनिव्रतः प्राप्तम् आसादितं कष्टं दुःखजनकं मुनिव्रतं कौपीनादिधारणादिव्रतं मुनीनाम् इव क्लेशकरः नियमः । राजा- श्रमस्थः मुनितुल्यः सकलसुखभोगवर्जित इत्यर्थः । आर्य्यः रामः । वाल्मीकि- गौरवात् वाल्मीकेः प्राचेतसस्य वाल्मीकौ वा गौरवात् गुरुत्वप्रतिपत्त्या ५ अत्रागुरुत्वार्थेन

[ततः प्रविशति रामः ।] (ग)

राम । वत्स लक्ष्मण ! अपि स्थिता रङ्गप्रेक्षकाः ? (घ)

लक्ष्मण । अथ किम् ? (ङ)

राम । इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थानप्रतिपत्तिं लम्भयितव्यौ । (च)

लक्ष्मण । प्रभुस्नेहप्रत्ययात्तथैव कृतम् । इदन्तु आस्तीर्णं राजासनमुपविशतु आर्य्यः (छ)

मत्यातिमर्द्दीनेति यावत् । इत एव अस्मिन्नेव स्थाने आभवतने आगच्छति । विसर्ज्जितसकलविषयाभिलाषाऽनिद्रु स्थितोऽपि राम वाल्मीकि बहुमानार्थं न तु रङ्गदर्शनकौतुकेन अस्मिन्नेव स्थाने आगच्छति नचान्यत्र तिष्ठतीत्यर्थं अथवा वाल्मीकिगौरवादेव इत अभिवर्त्तते न तु प्रक्रान्ताभिनयदर्शनकौतूहलेनेति विषयान्तरस्य कथितवस्तुनो व्यपोहप्रतीत्या परिसंख्या, एव मन्दस्थास्थानविवेशनाक्रमतादोषपात कल्प परिसङ्ख्याविच्छित्तिसम्भवेन लघु एव । राज्यनिवासेन मुनिव्रतस्य विरोधात् नियमवर्त्तितया खण्डनाच्च विरोधाभासोऽलङ्कार ।

(ग) तत इति । तत लक्ष्मणस्य रामप्रवेशसूचनानन्तर, "नासूचित विशेत् पात्र"मिति नियमेन असूचितजनप्रवेशस्याविहितत्वात् ।

(घ) वत्सेति । अपि स्थिता रङ्गप्रेक्षका अपि प्रश्न । रज्यतेऽस्मिन्निति रङ्गः नाट्यालयः तस्य प्रेक्षका दर्शका अभिनयदर्शनोत्कण्ठिता प्राणिवर्गा इत्यर्थं । स्थिता अपि यथास्थानमुपविष्टा किम् ?

(ङ) अथेति । अथ किमिति स्वीकारार्थकमेकमव्ययं नाटकादौ प्रयोज्यं रङ्गप्रेक्षकाणां यथास्थानेषु स्थितिस्वीकारं सूचयतीत्यर्थं ।

(च) इमाविति । इमौ एतौ वत्सौ स्नेहास्पदीभूतौ कुशलवौ तदाख्यौ कुमारौ पुनरथाप्रथमे । 'पुनरप्रथमे भेदे' इत्यमर । चन्द्रकेतुसदृशीं चन्द्रकेतुसमानां स्थानप्रतिपत्तिं स्थानस्य उपवेशनयोग्यस्य आसनस्य प्रतिपत्तिं प्राप्तिं आदरो वा तां लम्भयितव्यौ प्रापयितव्यौ यादृशासने चन्द्रकेतुरुपविशति इमौ कुमारौ अपि तादृशे राजकुमारोपवेशनार्हे आसने उपवेश्य इत्यर्थः । यद्वा प्रतिपत्ति सम्माननीयत्वधी तां लम्भयितव्यौ । चन्द्रकेतुसदृशौ आत्मना अनयोर्विवेचा इत्यर्थः ।

(छ) प्रभुस्नेहेति । प्रभुस्नेहप्रत्ययात् प्रभौ स्वामिनि अधिपतौ भवत स्नेहः अनयोः प्रेमातिशय. तस्य प्रत्ययात् विश्वासात् पीतौ कुशलवौ प्रति भवतः समधिकं स्नेहं इत्यर्थः । तथैव कृतं तथा तदत् एव चन्द्रकेतुसदृशम् एव न तु किञ्चिन्न्यूनं स्थानं कृतं कल्पितम् ।

[राम उपविशति सर्वे चोपविशन्ति । (ज)]

लक्ष्मणः । प्रस्तूयतां भोः ! (झ)

सूत्रधारः । [प्रविश्य ।] भो भो ! भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति,—यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं करुणाद्भुतरसञ्च किञ्चिदुपनिबद्धम्, तत्र कार्य्यगौरवादवधातव्यमिति * । (ञ)

यादृशमासनमधिष्ठित कुमारचन्द्रकेतु रमायपि तादृशमेवासनं वाञ्छितो । तु किन्तु इदं पुरोवर्त्ति वाल्मीकेः स्थापितं सिंहासनस्यास्तीर्णत्वासम्भवेऽपि अन्यजनस्योग्यमासनमास्तीर्णमिति मन्तव्यम् । अत्र च सदेवासुरस्थावरजङ्गम सन्निधापित इत्याद्युक्त्या ब्रह्मोपेन्द्रादीनामासनसान्निध्याय राजासनं राम आसनं नृपतियोग्य पीठम् इत्यर्थं सुपगम्य राजयोग्यस्य वाल्मीकिवासनस्यैव युक्तत्वात्, न तु राजासनस्येति । महार्हे पीठे वरं न इति भावः । आर्य्य-भवान् उपविशतु तत्रेति शेष । अतएव "स चापि रामः परिषद्गतः शनैः बुभूषयासक्तमना बभूव ह" इति बालकाण्डश्लोके परिषद्गत इति सिंहासनादवरुह्य परिषदि जनानामुत्थानाभावस्या शनैः स्थित इति व्याख्यातम् ।

(ज) राम इति । रामः उपविशति तत् राजार्हम् आसनमधिरोहति सर्वे च सकला-सामाजिकाश्च उपविशन्ति यथोचिते आसने इति शेषः । राज्ञोपवेशनानन्तरमेव प्रजानामुप-वेशनौचित्यात् राजनि रामे उपविष्टे सति सर्वे सभ्याः उपविशन्तीत्यर्थः ।

(झ) प्रेति । भोः नटाः ! प्रस्तूयताम् आरभ्यतां नाटकाभिनयः इति शेषः । सभ्यानां यथास्थानमुपवेशनापेक्षणात् नाटकाभिनेतृन् नटान् सम्बोध्य नाटकाभिनयप्रस्तावानुमोदनम् ।

(ञ) प्रविश्येति । सूत्रधारः प्रस्तावनोक्तप्रकारः नाटकीयकथारम्भकपात्रविशेषः । प्रविश्य रङ्गभूमिमिति शेषः । अत्र गर्भाङ्कोदरप्रविष्टस्य आमुखादिसूचितस्य गर्भाङ्कस्य सूत्रधार इति ज्ञेयम् । 'अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् । अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि" इति लक्षणात् । भो भो इति सभ्यसम्बोधनम् । हे सभ्यजनाः इत्यर्थः । भगवान् ऐश्वर्य्यान्वितः । भूतार्थवादी भूतं सत्यम् अर्थं वदितुं शीलमस्येति तथोक्तः सदा सत्यवादी यथार्थवक्तेति यावत् । "युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरः । प्राचेतसः वाल्मीकिः सजङ्गमस्थावरं स्थावरैः स्थितिशीलैः पर्वतादिभिः शैलैः कीट-

* कार्य्यगौरवात् इति पाठान्तरम् ।

दाम। एतदुक्तं भवति,—साक्षात्कृतधर्माणो महर्षयः, तेषामृतम्भराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानीति। (ट)

[नेपथ्ये]

हा अज्जउत्त! हा कुमार लक्खण! एआइणीं मन्दभाइणीं असरणं अरण्णे आसण्णप्पसववेअणं हदासं सावदा मं अहिल-

पतङ्गादिभिः सह वर्त्तमानं सचराचरं जगत् विश्वम् आज्ञापयति आदिशति। किमाज्ञापयतीत्याह—यदिति। अस्माभिः मयेत्यर्थः। आर्षेण ऋषिसम्बन्धिना भूतभविष्यद्वर्त्तमानादिषु तुल्यदर्शिना ज्ञानचक्षुषा योगप्रत्यासत्तिसहकृतपरिशुद्धान्तःकरणेन इत्यर्थः। अनुदृश्य नयनेन समुद्वीक्ष्य सम्यगवलोक्य ज्ञात इत्यर्थः। पावनम् अतिपवित्रं स्वदर्शनादन्येषां शुद्धिजननमित्यर्थः। अनेन 'काव्यालापांश्च वर्जयेत्' इति निषेधोऽन्यपर एव इति सूचितम्, करुणाद्भुतरसं च करुणः शोकजनकः अद्भुतः विस्मयकरः रसः यत्र तथोक्तम् इष्टजनवियोगजन्यदुःखानुभूतिरूपः शोकः। सहकारिभूतविभावादिदर्शनकालकाव्यनिपुणनटचेष्टादिदर्शनात् सामाजिकैर्भाव्यमानो निरतिशयस्वप्रकाशानन्दसमरसतां प्रतिपाद्यते इति रसविदां सम्प्रदायः। अद्भुतश्च तथाविधः विस्मयः। गङ्गाप्रवाहपतनतदन्यप्रस्रवणवर्णनादिनाद्भुतरसयुक्तत्वम्। किञ्चित्रूपकमित्यर्थः। उपनिबद्धं रचितं रचितम्। तत्र तस्मिन् रूपके काव्यगौरवात् काव्यस्य वर्णनीयस्य वस्तुनः गौरवात् बहुमानात् आदरणीयत्वाद्धेतोः अवधातव्यम् इति मनसो विषयान्तरराहित्यरूपमवधानं कर्त्तव्यम्, तत्र मनो निवेशयितव्यमित्यर्थः। इति भगवान् आज्ञापयतीत्यन्वयः।

(ट) एतदिति। एतत् यदिदमित्यादि महर्षिवचनस्य तात्पर्यमित्यर्थः। उक्तं प्रकटितं भवति साक्षात्कृतधर्माणः साक्षात्कृतः प्रत्यक्षीकृतः धर्मः अलौकिकश्रेयःसाधनरूपो यैः तथोक्ताः महर्षयः महात्मानः "ऋषयः सत्यवचसः" इत्यमरः। तेषां तादृशानां भगवतां माहात्म्यवताम् ऋषीणाम् ऋतम्भराणि ऋतं कैवल्यम् एव बिभ्रति यत्र तानि मुक्तिप्रवर्त्तकानि परोरजांसि रजसः परस्तात् इति तथोक्तानि अतिक्रान्तरजोगुणानि सत्त्वमयानि परिशुद्धानीत्यर्थः। प्रज्ञानानि प्रमादरहितानि ज्ञानानि तत्त्वज्ञानानीति यावत्, क्वचित् कुत्रापि किमपि कार्येषु न व्याहन्यन्ते न व्यर्थानि भवन्ति। इति हेतोः अनभिशङ्कनीयानि न सन्देहितव्यानि महर्षिभिर्ज्ञानचक्षुषा दृष्टानि तत्त्वानि कुत्रापि अयथार्थानि भवितुं नार्हन्ति, अतो वाल्मीकिना यदुपनिबद्धं तत्र कदापि सन्देहोऽपि न भाव्यमिति भाव।

सुन्ति, साहं दाणिं मन्दभाइणी भाईरहीए अत्ताणं णिक्खिवेमि । (ठ)

[(ठ) हा आर्यपुत्र ! हा कुमार लक्ष्मण ! एकाकिनीं मन्दभागिनीम अशरणामशरण्य आसन्नप्रसववेदनं हताशा श्वापदा मामभिलषन्ति, साहमिदानीं मन्दभागिनी भागीरथ्यां आत्मानं निक्षिपामि । इति छाया]

लक्ष्मण. । [आत्मगतम्] । कष्टं वताप्यदेव किमपि । (ड)

सूत्रधार । विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने ।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति ॥ २ ॥

[२ । राज्ञा महावने त्यक्ता विश्वम्भरात्मजा देवी प्राप्तप्रसवम् आत्मानं गङ्गादेव्यां विमुञ्चति इत्यन्वय ।]

[इति निष्क्रान्ताः । (ढ)]

(ठ) नेपथ्ये इति । नेपथ्यवचनम् सुगमम् । एकाकिनीं सहायरहिताम् अशरणाम् न विद्यते शरणं रक्षितृ यस्याः ताम् तथोक्ताम्, मन्दभागिनीं दुर्भगाम् आसन्नप्रसववेदनाम् आसन्ना उपस्थिता प्रसवस्य गर्भमोचनस्य वेदना व्यथा यस्याः सा प्राप्तप्रसवयातना हताशा हता नष्टा आशा जीवनाद्याकाङ्क्षा यस्याः सा ताम् तथोक्ता मां श्वापदा शुन पदानीव पदानि येषां ते तथोक्ता हिंस्रजन्तव अभिलषन्ति भक्षयितुमिच्छन्ति । साहम् ईदृशी निरुपाया मन्दभागिनी दुरदृष्टशालिनी इदानीम् अधुना भागीरथ्यां गङ्गायां गङ्गाप्रवाहे इत्यर्थः । आत्मानं शरीरं निक्षिपामि विसृजामि । सर्वथा आत्मरक्षणाक्षमाया मम अयं गङ्गाया देहार्पणमिति भाव ।

(ड) कष्टमिति । वतेत्यव्ययं खेदे वर्तते । अन्यदेव अन्यप्रकारं एव, मनसा अचिन्तितं तस्मात् भिन्नमेव किमपि अनिर्वाच्यम् इदं प्रवृत्तमभिनेतुमित्यर्थः । प्रागन्यत् किमप्यार्यं विलम्बकार्य रूपकमभिनीतमासीदिति लक्ष्मणो मन्यते, अधुना एतत् कदापि अभिनेतव्य विषयं निर्देष्टुं न शक्नोति अतएव किमपीत्युक्तम् ।

(२) विश्व इति । राज्ञा रामेण महावने निर्जने कानने त्यक्ता विहृता निर्वासिता विश्वम्भरात्मजा विश्वं जगत् बिभर्त्ति धारयति या सा तथोक्ता तस्याः आत्मजा वसुन्धरापुत्री अर्थात् सीतापि सीताया वचना तयया व्यथाय, यत सत्यसहायतापि सा वेदनाव्यहिंता गङ्गायाम आत्मानो विसर्जन वर्तते । देवी सीता, प्राप्तप्रसवं प्राप्त उपगत प्रसव [illegible] इत्यर्थः, [illegible] आत्मानं देहं "आत्मा देहं धृतौ" जीवे स्वभावे [illegible] गङ्गादेव्यां भागीरथीप्रवाहे विमुञ्चति [illegible] नेपथ्य सीताया [illegible] आदि । सीतादेव्या आत्मरक्षाहोषनिवारणाय कविना गङ्गादेव्यामित्युक्तम्, गङ्गाया शरण भाष इत्यर्थः ।

राम — देवि! क्षणमपेक्षस्व। (ण)

लक्ष्मण। आर्य्य! नाटकमिदम्। (त)

राम। हा देवि! दण्डकारण्यवासप्रियसखि! एष ते रामाद्दैव-दुर्विपाकः। (थ)

लक्ष्म। आर्य्य! दृश्यतां तावत् प्रबन्धार्थः। (द)

राम — एष सज्जोऽस्मि वज्रमयः। (ध)

[ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता। (न)]

— —

…) इतीति। निष्क्रान्तः सूत्रधारः प्रविश्य। राम उन्मत्तवत् गङ्गाप्रवाहनेच्छ।

(ण) देवीति। अयि किञ्चित्कालम् अपेक्षस्व विलम्बस्व। हे देवि सीते! मम वचनात् कालविलम्ब्य गङ्गायामात्मनिक्षेपं विधेहि अहमपि ते सहचरो भवामीति भावः।

(त) आर्य्य हे प्रभो अग्रज इदं नाटकम् अवधारय विलम्ब, इदम् अत्राभिनेयमानं नाटकं रूपकं प्राचेतसवर्णितनाटकाभिनय एव न तु वस्तुत एव सत्यम्, न ते एतत्कृते उद्वेजनं युक्तमिति भावः।

(थ) हा इति दण्डकेति विशेषणसाभिप्रायम् मतमस्य त्वदधीनं त्वत्सुखस्य मदधीनमित्यभिप्रायः। दण्डकारण्यवासप्रियसखि! दण्डकानाम अरण्ये तत्र वासे तस्य प्रियसखी प्रियसहचरी तस्याः सम्बुद्धौ। रामात् मत्त इत्यर्थः ते तव एष अयं गङ्गाप्रवाहे देहत्यागरूपः दैवदुर्विपाकः दैवस्य अदृष्टस्य दुर्विपाकः दुष्टः परिणामः जात इति शेषः। या त्वं सततं कान्तारवासगामिनी प्रियचिकीर्षकामो तस्यास्तवागमः आत्मत्यागो मयैव विहितः तस्मात् मम दुष्कृतमिति भावः।

(द) दृश्यतामिति। प्रबन्धार्थं प्रबन्धस्य अभिनेयस्य अर्थं विषयं महाकविना वाल्मीकिनापनिबद्धस्य रूपकमिदम्य अर्थः वस्तु इति वा दृश्यताम् अवधीयतां दृश्यतामिति सामान्यवाची। अथवा प्रत्यक्षीक्रियतामित्यर्थः।

(ध) एष अहम् वज्रमयः वज्रवत् कठोरहृदयः अन्यथा कथं न विदीर्ये इति भावः। सज्जः अस्मि अभिनयावलोकने दत्तावधानो भवामि सीताविपत्तिनाटकं दृष्ट्वा वज्रपरिणतोऽस्मीति वा।

(न) तत इति। उत्सङ्गितैकैकदारकाभ्याम्। एक एक इति एकैक आद्रेकस्य विभक्तिलोपः। एकैकस्यासौ दारकश्चेति उत्सङ्गितः क्रोडमारोपितः उत्सङ्गादित्वप्रत्ययः। एकैकदारकः शिशुः याभ्यां ते ताभ्यां पृथ्वीगङ्गाभ्यां धरामागीरथीभ्याम् अवलम्बिता धृता सती सीता प्रविशति नाट्यालयमिति शेषः।

राम। वत्स लक्ष्मण! असंविज्ञातमनिबन्धनम् अन्धतमसम् इव प्रविशामि, धारय माम्। (प)

पृथ्वी। समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्द्धसे।
अन्तर्जले प्रसूतासि रघुवंशधरौ सुतौ॥ २॥

[२। कल्याणि वैदेहि, समाश्वसिहि, दिष्ट्या वर्द्धसे। रघुवंशधरौ सुतौ अन्तर्जले प्रसूता असि, इत्यन्वयः]

सीता। [समाश्वस्य] दिट्ठिआ दारए पसूदम्हि, हा अज्जउत्त! (फ)

[(फ) दिष्ट्या दारकौ प्रसूतास्मि हा आर्यपुत्र! इति मम]

[इति मूर्च्छति]।

लक्ष्मण [पादयोर्निपत्य] आर्य! आर्य! दिष्ट्या वर्द्धामहे, कल्याण-प्ररोहो रघुवंशः। [विलोक्य] हा! हा! कथं क्षुभितबाष्पोत्पीडनिर्भरः प्रमुग्ध एव आर्यः। [इति वीजयति] (ब)

(प) असमिति। न संविज्ञातम् अज्ञातम्, अविदितपूर्व्वमिति यावत्। अनिबन्धनम् अनिमित्तम् अकस्मादुपनतं तम अन्धकारं प्रविशामि इव। सीताविपत्तिनाटकाभिनयदर्शनान्मोह उपगत, अत अचात्मनो मां धारय अवलम्बस्व त्वं।

(ब) समिति। हे कल्याणि मङ्गलवति वैदेहि सीते! समाश्वसिहि आश्वस्ता भव धैर्य्यमवलम्बस्वेत्यर्थः। दिष्ट्या आनन्दार्थम् अव्ययं, वर्द्धसे दैवेन प्रसन्न त्वं श्रेयस्विनी भवसि इत्यर्थः। रघुवंशधरौ रघुसन्तानैकरक्षकौ रघुकुलवर्द्धनौ इत्यर्थः। सुतौ पुत्रौ अन्तर्जले जलस्य अन्तरित्यव्ययीभावे अन्तर्जलं गङ्गाया जलमध्ये इत्यर्थः। प्रसूता असि, अत्रादिकर्म्मणि क्तः, कर्त्तरि। पुत्रौ जातौ इत्यर्थः यत गङ्गाप्रवाहाभ्यन्तरे दारकद्वयं प्रसूतवती अतो दिष्ट्या वर्द्धसे इत्यन्वयः। दिष्ट्या दैवेन, दुःखावसरसंपत्त्यभावात् प्रसूतिप्रतिबन्धकमहापादविनिवारणात् कारणमिति भावः। मुखराकाव्याद्दिष्ट्यापदस्य दैवेनेत्यर्थः अर्थो वर्णित.।

(फ) दारेति। दारकौ बालकौ प्रसूता अस्मि पुत्रौ किं प्रसूतवती। हा आर्य्यपुत्र! इति खेदे अव्ययम्। इति मूर्च्छति इत्युक्त्वा मोहमुपगता। गर्भावस्थायामेवात्मनो निर्वासनात् रामस्यातीव दुःखम् अवश्यमासीत्, किन्तु यदधुना आर्य्यपुत्र. सन्निहि तदा किंवा नानन्दः स्यादिति मनसि विचिन्त्य तदभावात् शोकमोहमेव संजातौ।

(ब) आर्य्येति हर्षे द्विरुक्तम्। दिष्ट्या भाग्यं वर्द्धामहे वयं कल्याण-प्ररोहः कल्याणः शुभकरः प्ररोहः अङ्कुरः यस्य स तथोक्तः रघुवंश। रघुकुलस्य मङ्गल-

पृथ्वी। वत्से! समाश्वसिहि समाश्वसिहि। (भ)

सीता। [आश्वस्य] भअवदि! का तुमं इअं अ? (म)

[(म) भगवति! का त्वमियञ्च? इति सम ।

पृथ्वी। इयन्ते श्वशुरकुलदेवता भागीरथी। (य)

सीता। भअवदि! णमो दे णमो दे। (र)

(र) भगवति! नमस्ते नमस्ते। इति सम]

भागी। चारित्रोपचितां कल्याणसम्पदमधिगच्छ। (ल)

लक्ष्मणः अनुगृहीताः स्मः। (व)

तनक, वद्गुर मात्रमि इत्यय । एम इन वक्ष वेगधन्वय, तस्य प्रवाह वद्गुर इति वक्त-प्रस्य श्लिष्टतया श्लिष्टपरम्परितरूपकालङ्कार । विलोक्य राम इष्टा …भनवाष्पाम्पाव-निर्भर: सुभिन्नेन अत्यर्थम् उच्छलितेन वाष्पाणाम् अश्रूणाम् उत्पीडन समर्दन निर्भर परिपूर्ण, वाष्पाग्रमात्र आर्द्र, अयमौ राम, प्रमुग्ध मूर्च्छित एव सीताया दारकद्वयप्रसवाभिनयप्रव-र्त्तमानावतरणनिर्वासनादिकमाक्षिप्य आवयो … अभिभूतो मोहमुपगत इत्यर्थ, इति भाग्यति तात्कालिना वायु सञ्चालयति इत्यर्थं ।

(भ) वत्से इति। वत्से पुत्रि सीते। समाश्वसिहि आश्वस्ता भव दुःखं मा कुरु। अवधारणे द्विरुक्तिः।

(म) आश्वस्य सुस्थीभूय आहेति शेष त्वं का किमभिधाना इयञ्च एषा च का कुतस्त्या किंपरिचया।

(य) इयमिति। ते तव श्वशुरकुलदेवता श्वशुरस्य दशरथादेः कुलं वंशः तस्य देवता सौगर्भमनिर्व्याहिका भागीरथी। साभिप्राय नामेदम् गङ्गादेवीयम्। कपिलशापनिर्दग्धानां सगरसन्ततीनाम् उद्धारकर्त्तृत्वादियं गङ्गा सगरवंश्यानां विशेषेणोपास्या इत्यर्थः।

(र) भगवतीति। भगवति षडैश्वर्यशालिनि! ते तुभ्यं नमः; गङ्गाया रघुकुलदेवतात्वेन सीतायाश्च रघुकुलवधूतया नमस्कारस्य द्विरुक्त्या अतिमात्रं कर्त्तव्यत्वं द्योत्यते।

(ल) चारीति। चारित्रोपचिता चारित्रेण पातिव्रत्यलक्षणेन साध्वाचरणेन उपचिता वृद्धिं प्रापिता कल्याणसम्पदं श्रेयःसम्पत्ति मङ्गलसमृद्धिम् अधिगच्छ लभस्व। कल्याणम् एव सम्पत् कल्याणसम्पेति इति विग्रहः। चरित्रोत्कर्षेण सकलकल्याणभाजनं भवेति भावः।

(व) अन्विति। अनुगृहीता वः अनुकम्पिताः भवाम:। भागीरथीवाक्यस्यावितथतया सीता अवश्यमेव कल्याणसम्पद्भागिनी भविष्यति, तस्याः कल्याणे अस्माकमपि तथैवाभिन्नत्वात् सीतायैवैव वर्द्धेम इति हृदयम्।

भागी। इयन्तु जननी ते वसुन्धरा। (क)

सीता। हा अम्ब! ईदिसो अहं तुए दिट्ठा। (ख)

[(ख) हा अम्ब! ईदृश्यहं त्वया दृष्टा।]

पृथ्वी। एहि वत्से! एहि पुत्रि! [इति सीतामालिङ्ग्य मूर्च्छति] (ग)

लक्ष्मण। [सहर्षम्] दिष्ट्या पृथ्वीभागीरथीभ्यामभ्युपपन्ना आर्य्या। (घ)

राम। [अवलोक्य] करुणतरं खलु एतद्वर्त्तते। (ङ)

भागी। विश्वम्भरापि नाम व्यथत इति जितमपत्यस्नेहेन, यद्वा सर्वसाधारणो ह्येष मोहग्रन्थिरन्तश्चेतनावतामनुपप्लवः संसारतन्तुः। * वत्से वैदेहि! देवि भूतधात्रि! समाश्वसिहि, समाश्वसिहि। (च)

(क) इयमिति। इयम् एषा [illegible]। ते तव जननी जनयित्री माता वसुन्धरा पृथिवी।

(ख) हेति। हा अम्ब हे मातः। ईदृशी एवंविधा विपद्ग्रस्ता तथा चारित्रापवाद-दोषाटनपूर्व्वकं निर्व्वासितेत्यर्थः। त्वया दृष्टा अवलोकिताहम्। अथ यत् त्वया दृष्टे, तदतीव लज्जे इति भावः।

(ग) एहीति। वत्से पुत्रीति सम्बोधनद्वयेन स्नेहातिशयः सूच्यते। इति एवम् आभाष्य सीतामालिङ्ग्य परिष्वज्य मूर्च्छति मातापि [illegible] सती मूर्च्छति सञ्ज्ञाहीना भवतीत्यर्थः

(घ) सहर्षमिति। दिष्ट्या आनन्दे पृथ्वीभागीरथीभ्यां वसुन्धराजाह्नवीभ्याम् आर्य्या सीता अभ्युपपन्ना प्राप्ता। अनुगृहीतेत्यर्थः [illegible] इति बोध्यम्।

(ङ) अर्थात् अवलोक्य पृथ्वीभागीरथीभ्यामनुकम्पिता सीता दृष्टा आह। एतत् मातुः पुत्रीपरिष्वङ्गात् पर मूर्च्छारूपं करुणान्तरं दुःखातिरिक्तं खलु। यतः सकलाश्रय-भूताया मम पत्न्याः मातायाः अपि पृथ्वीभागीरथीभ्यामाश्वासने निरतिशयदुःखजनकमिति भावः।

(च) विश्वेति। विश्वम्भरा अपि विश्वं जगत् बिभर्त्ति या सा सकललोकधात्री [illegible] अपि व्यथते

* क्वचित् पुस्तके विश्वम्भरा इत्यारभ्य संसारतन्तुः इत्यन्तः पाठः। [illegible] वैदेहि दृश्यते।

पृथिवी। देवि ! सीतां प्रसूय कथमाश्वसिमि ? (ख)

एकश्चिरं राक्षसमध्यवासः

साङ्गो द्वितीयश्च सुदुःसहोऽस्याः। *

भागी　को नाम पाकाभिमुखस्य जन्तु †

द्वाराणि दैवस्य पिधातुमीष्टे ॥ ४ ॥

४। एक अस्या चिर राक्षसमध्यवास साङ्ग द्वितीयश्च सुदुःसह। को नाम जन्तु पाकाभिमुखस्य दैवस्य द्वाराणि पिधातुम् ईष्टे इत्यन्वयः।]

नाम कथा। सीता। स्वजन स्वयम् अनुभवति इति स्वगतं। अपत्यस्य स्नेह सन्ततिप्रसवादि जित मध्यानुकर्षेण व्यथतम्। अपत्यस्नेह सकलजन्तुप्रतिभावक स स्वयम् धीरानप्यभिभवतीत्यर्थः। मवसहाया अपि सन्तानदुःखनातिशयक्रान्ततया शोकनात् यावतुल हेम्य अपत्यस्य श्री गतायामिति सन्तत यद्दति पूज्य सम्पातिरिक्तक्रम्पशोतकम। एष अयम् अपत्यरूप मोह-ग्रन्थि मोह एव ग्रन्थि ममतावन्धन मोहात्मक विभागाभावप्रतीजकसम्पर्कजनक इत्यर्थः। सर्वसाधारण सर्वेषां सुरासुरप्रभृतीन प्राणिन साधारण समान तुल्यभावेन वर्त्तमान प्राणिसमूहेषु न केषाञ्चित् लघु केषां वा गुरु इत्यर्थ न केवल विश्वम्भरैवापत्यस्नेहेन अपितु सर्व्व एवेति भाव। अतमानतं चतन्यशालिना प्रवाहता वा अन्तयव अन्त अन्त-करण चरतीति तथोक्त अन्तःकरणवर्त्ति अनुपप्लव नास्ति उपप्लव विनाश यस्य स दुरुच्छेद संसारतन्तु संसारस्य तन्तु सूत्र संसारसम्बन्धक इत्यर्थः अनेनैवाकर्षकसूत्रेणाकृष्टा जीवा पुन पुन संसरन्ति इत्यर्थ। अनन्तरं वदति विदेहनन्दिनि सीते। देवि सूतवावि सुताना जननी धात्री धरित्री तत्सम्बोधन हे वसुन्धरे। समाश्वसिहि आश्वस्ता भव। यद्वा दधातीति धात्री पोषयित्री दधन्ति तामिति धात्रीति वा प्राप्नोति वर्द्धयतीत्यर्थः। इदं विशेषणं पृथ्वी प्रति अभिप्रायगर्भम्।

(ख) देवीति। सीतां प्रसूय जनयित्वा कथं केन प्रकारेण आश्वसिमि विगतदुःखा भवामि, यस्या मे पुत्री सीता निरन्तरमेव दुःखदहनज्वालया दह्यते सा केन प्रकारेण तस्या दुःखशान्ति करणाय कथं वा आश्वस्ता भवामि तस्मात् मे सुखमिति भाव।

(४) सुताया दुःखसमूहमनाह—एक इति। एक प्रथम अस्या सीताया चिरं दीर्घकालं व्याप्य राक्षसमध्यवास राक्षसानां मध्ये रावणेनापहरणात् तत्र लङ्कायामशोकवने इत्यर्थः।

* भागी द्वितीयश्च सुदुःसहोऽस्या इति पाठान्तरम्। † जन्तो इति पाठान्तरम्।

पृथिवी भागीरथि ! सहृदयमुक्तम्। युक्तमेतद्रामभद्रस्य। (ग)

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः।
नाहं न जनको नाग्निर्नानुवृत्तिर्न सन्ततिः ॥ ५ ॥

[५। बाल्ये पीडितः पाणिः न प्रमाणीकृतः। अहं न, जनको न, अग्निः न, अनुवृत्तिः न, सन्ततिः न, (प्रमाणीकृता)। इत्यन्वयः।]

बाष्प स्थिति अतिक्रम्य वर्त्तमित्यर्थः। सार्हे अर्द्धे लोकापवादनिबन्धनवादपे च मे बहु वर्त्तमान। न कदा राजसमध्यवासनानतम् अस्याः एव तत्रापि पतिनिबन्धनबहुवचनाद् युक्तम्। द्वितीयस्य लोकापवादभयेन अनपराधायाः सुहृदयस्य जनीव श्रवणानन्दं चरित्रदोषमारोप्य निर्वासनात् तत् साधुजन आत्तु न शक्तोऽतीत्यर्थं एतत् न दुःख प्रथमतो गतीय इति भावः। इति पृथ्वीवाक्यम् नाम कथावनायाम। क अन्यं प्राणी पाकाभिमुखस्य फलोपधानप्रधानस्य पादपाभीप्सं स्वस्य एवस्य सुकृतस्य मालकभाग्यस्य हाराय अनुभवमानान विधातुं तातम् सोऽयम् इत प्रभवात न कोऽपीत्यर्थं, एवविध एतस्य स्वात्मात् सीताया एताहृशी निरन्तरं दुःखमनुभवति मानवेद्रपत॥ तद्दस्या कृते अन्याया न कर्तव्य, निर्यति कृत वाद्य इति भाव इति गङ्गावाक्यम् यथायोग्यत्वात्, सुहृदयलक्ष्यपेक्षया च उभयत्र पञ्चतयायोग्यात् तुल्ययोगिता च। इन्द्रवज्रा वृत्तम्।

(ग) भाग त मन्त्रम् उचित योग्यम् उक्त कथितं त्वया इति भाव। द्वयतुः पाकादवाच्य उपनीत दुःखजातम् न केनापि स्वसमीयामान युज्यते। रामभद्रस्य रामचन्द्रस्य एतत् सीताया दुर्वचनाय विश्वासव्यापन युक्त वा किम् उचित वाच्यं पत्नीत्वम्। किन्तु रामणापि महत् नोचित नाटके मात्रा स्वीकरोमि रामस्यावता न तथापि भाव

(५) बाल्ये बाल्ये बाल्ये बालेन कुमारेण पीडितः विवाहकाले गृहीत पाणि न प्रमाणीकृत मुद्रकारिणा निश्चयहेतुर कृत पाणिगृहीताया सर्व वा रक्षणीयत्व अप तत्याज्या त्याग कृत गृहीत इत्यनुक्ता पीडित इत्युक्तस्य भाव — बाल्यादेव तस्य दत्ता त्वय राम मतमुतापा अस्य भाव न त्वाज्याग्यकरणीयत्वं द्वारा नैव सम्य त्वयानुभवा इति सूचनाय इदं पाणि गृहीतस्य विवक्षयारित, अन्यथा पाणिग्रहणस्य हानवस्थायाः संबन्धकत्वादिति भावयम् 'प्रमाणीकृत' इति पदस्मरणेन लिङ्गविपरि म, नाहम् अह विश्वस्य न प्रमाणीकृता यस्या जननी देवी भूतधात्री सा कथं दुःख कुर्यात इत्यवम अविचार्य तद्विचारेण विधाय अवश्य अविचार पतेन यथा जनक

सीता । हा अज्जउत्त ! सुमरावेदि मं । (घ)

[(ङ) हा आर्य्यपुत्र स्मारितास्मि । इति सम्]

पृथिवी । आः कस्तवार्य्यपुत्रः ? (ङ)

सीता । सलज्जास्रम्] जहा वा अम्बा भणादि । (च)

(च) यथा वा अम्बा भणति, इति सम्]

राजर्षिर्विदेहाधिपतिरपि न प्रमाणीकृतः विशुद्धतया विश्रुतः तस्यापि कन्या सन्मार्गलङ्घिनी कथं भवेदित्यपि तेन न विचारितमित्यर्थः । अतिविशुद्धचरितस्य पितुः कन्या न खलु दूषिता भवेत् । 'आकरे पद्मरागाणां जन्म काचमणेः कुतः' इति भावः । एतेन जनकोऽपि तेनावमानित इति । तथा न अग्नि वह्निरपि न प्रमाणीकृतः । यातु तावदा-दर्शगौरवं भगवान् लोकपावनः वैश्वानरोऽपि न विश्वस्तः, यः खलु लङ्काद्वीपे सर्व्वसमक्षं सीताया विशुद्धिं प्रख्यातवान्, सोऽप्यग्निः प्रमाणत्वे न नाङ्गीकृतः, एतदपि किं तस्यानुरूपमाचरणं जातमिति भावः । नानुवृत्तिः अनुवृत्तिः अनुसरणं न प्रमाणीकृता, या हि निजसुखनिवृत्-सुका आविवाहसमयात् गृहे दुर्गमारण्ये च कायवाङ्मनसानुगामिनी आसीत्, तस्याः अपि चरित्रं कथं न विश्वसनीयम् इत्यपि न तेन विवेचितमिति भावः । तथा न सन्ततिः अपत्यमपि न प्रमाणीकृता । यस्याः गर्भे निहितं निजतेजो वंशस्याविच्छेदकारणं वर्त्तते, तत् किं जडमिना-मापन्नगर्भां निर्वास्य वंशलोपं महत् पापञ्चानुष्ठितमित्यपि तेन नालोचितम् । एतेषु अपरित्याग-हेतुषु सत्स्वपि एषाम् एकमपि हेतुम् अपरिगणय्य यत् सीता निर्वासिता तदस्याविमृश्यकारिता अत्याहितैवेति प्रतीयते इति भावः । अत्र प्रमाणीकृतत्वरूपैकधर्म्मस्य प्रस्तुतपाणिग्रहणादि-बहुपदार्थान्वयात् तुल्ययोगितालङ्कारः ।

(घ) इति । आर्य्यपुत्र नाम श्राविता स्मृतौ प्रापिता अस्मि जनन्येतिशेषः । दीर्घकालं यावत् विस्मरन्त्या मे तन्नामोच्चारणात् स स्मृतौ आविर्भूय नितरां मां क्लिश्नातीति । भ

(ङ) आः इति खेदे, कोपे वा । तव आर्य्यपुत्रः क न कोऽपीत्यर्थः । रामभद्र यदि त्वया तत् कथम् ईदृशी ते दुर्गतिरित्यर्थः । नाहं ते आर्य्यपुत्र इति वक्तव्यं मानुमिच्छामीति भावः ।

(च) जहेति । वा अथवा अम्बा माता पृथिवी यथा भणति वदति तथैव आर्य्यपुत्रे-त्याक्रन्दनं मे व्यर्थमित्यर्थः । यथा अम्बा यथा भणति भवतु ; नाहं निवर्तितपरपक्षम् आर्य्यपुत्रं निन्दामीत्यर्थः ।

राम । अम्ब पृथ्वि ! ईदृशोऽस्मि ! (छ)

भागी । प्रसीद भगवति वसुन्धरे ! शरीरमसि संसारस्य, तत् किमसंविदानेव जामात्रे कुप्यसि ? (ज)

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ।
इक्ष्वाकूणां कुलधनमिदं यत् समाराधनीयः
कृत्स्नो लोकस्तदतिगहनं किं स वत्सः करोतु ॥६॥

[६ । लोके घोरम् अयशः विततम् । लङ्काद्वीपे या च वह्नौ विशुद्धिः इह जनः कथम् इव तां श्रद्दधातु । इक्ष्वाकूणाम् इदं कुलधनं यत् कृत्स्नः लोकः समाराधनीयः तत् अतिगहनम् स वत्सः किं करोतु । इत्यन्वयः]

(छ) अम्बेति । ईदृशः एवंविधः स्वात्मजायाः आत्मपुत्र्याः भाषणानर्हः, अस्मि अहं भवामि । अतिनिष्ठुराचरणात् नाहं तस्याः मातुः पदवाच्यः भवितुमर्हामीति भावः ।

(ज) प्रसीदेति । हे वसुन्धरे भूतधात्रि ! त्वं प्रसीद रामं प्रति प्रसन्ना भव न तस्मै कुप्य इत्यर्थः । त्वं संसारस्य दम्पतिमातृपुत्रस्वसृदुहित्रादिकुटुम्बसम्बन्धवतः जगतः शरीरम् असि शरीरवत् प्रवृत्तिनिवृत्तिनिबन्धनभूतासि, शरीररूपासि, आत्मदेहः यथात्मनः सर्वं वेत्ति तथा सर्वदेहभूता त्वं सर्वेषां वार्तां वेत्सि । उक्तं च 'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मोऽपि जानाति नरस्य वृत्तम्' । तत् तस्मात् किं कथम् असंविदाना इव अविदितवृत्तान्ता इव जामात्रे रामाय कुप्यसि न त्वया कोपितव्यमिति भावः ।

(६) घोरमिति । लोके भुवने, 'लोकस्तु भुवने जने' इत्यमरः । घोरं भयानकम् अयशः दुष्कीर्तिः निन्देति यावत्, सीताविषयिणीत्यर्थः, विततं विस्तीर्णम् । व्याप्तमिति यावत् । ननु अग्निपरीक्षयाधिगतायाः कथमस्या अयशः इत्यत आह—लङ्केति । लङ्काद्वीपे लङ्कावासो द्वीपश्चेति तस्मिन्, द्विर्गताः आपो यस्मिन् स द्वीपः, समासान्तः अत्, द्व्यन्तरुपसर्गेभ्यः अप ईत् इति अप ईत्वम्, द्वीपः । सागरवेष्टितायामतिदूरवर्तिन्यां लङ्कायां वह्नौ हुताशने या विशुद्धिः निर्दोषत्वावगतिः परीक्षेति यावत्, बभूवेति शेषः । इह भारतवर्षे जनः लोकः कथमिव केन हेतुना ताम् अग्निशुद्धिं श्रद्दधातु प्रत्येतु, प्रत्यक्षीभूतमप्यद्भुततमं व्यापारं न प्रत्येति, अतिदूरवर्तिन्यां लङ्कायां वह्नौ सीतायाः अग्निविशुद्धिपरीक्षा अयोध्यावासिभिः विश्वसितुमशक्येत्यर्थः । नैतद्विश्वासकारणमिति भावः । ननु अस्य परीक्ष्य इदं ज्ञात्वा नाङ्गीकारः

लक्ष्मण । अव्याहतान्तःप्रकाशा हि देवता भूतेषु विशेषेण गङ्गा, तदयमञ्जलिस्ते । (झ)

राम । अम्ब ! अनुवृत्तस्त्वया भगीरथगृहे प्रसादः । (ञ)

पृथ्वी । देवि ! नित्यं प्रसन्नास्मि व, किन्त्वापातदुःसहः शोकावेगो नैव ब्रवीमि, न पुनर्न जानामि * सीतास्नेहं रामभद्रस्य । (ट)

रामेण किमायातिमित्यत आह—इक्ष्वाकूणामिति, यत् कृत्स्ना लोकः सकला प्रजा समाराधनीय अनुरञ्जनीय सर्व्वथा परितोषणीय इति तावत्, तत् लोकाराधनम् अतिगहनं अत्यन्त-दुष्करं कार्य्यमिति शेष । इक्ष्वाकूणां इक्ष्वाकुराजापत्यानां कुलधनं कुलक्रमागतं धनं व्रतमित्यर्थः । यथा धनं यत्नेन रक्षति तथा प्रजानुरञ्जनमपि इक्ष्वाकुभिरवश्यं कर्त्तव्यमित्यर्थः । स वत्स रामः किं करोतु सीतादोषश्रवणेन विरक्तानां प्रजानां सीतात्यागमन्तरेण कथमनुरञ्जनं कुर्य्यादित्यर्थः । ततो नास्ति मे वत्सस्य रामस्य कोऽप्यपराध इत्येव वदतीति भावः । सीताविवासनकार्य्यं प्रति नानाकीर्त्तिप्रसारादीनां बहूनां कारणानां सत्त्वे कपोतिकान्यायेन समवधानात् समुच्चयालङ्कारः । मन्दाक्रान्ता वृत्तम् ।

(झ) अव्याहतेति । हि यत देवता देवयोनयः भूतेषु जन्तुषु विषये अव्याहतान्तःप्रकाशाः । अव्याहतः अकुण्ठितः अनवारितः अन्तःप्रकाशः अन्तःकरणवृत्तिपरिज्ञानं परोक्षज्ञानं यासां तास्तथोक्ताः, देवा खलु अन्तर्य्यामितया सर्व्वप्राणिमनोगतभावं जानन्तीत्यर्थः, विशेषेण गङ्गा प्रधानेन गङ्गा भागीरथी देवी अव्याहतान्तःप्रकाशेत्यर्थः । निखिलाभ्यो देवताभ्यो विशेषत्वर्थ्यशालिनी गङ्गेत्यर्थः । तत् तस्मात् सकलदेवताभ्यः अधिकैश्वर्य्यशालित्वाद्धेतोः ते तुभ्यम् एष अयं मया विधीयमानः प्रणामाञ्जलिः प्रणामाय अभिवन्दनाय अञ्जलिः करयुगलसंयोगरूपमुद्राविशेषः "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी"ति । त्वामहं प्रणमामीत्यर्थः ।

(ञ) अम्बेति । भगीरथगृहे भगीरथस्य कुले त्वया भवत्या प्रसादः अनुग्रहः अनुवृत्तः अनुसृतः प्रकाशित इत्यर्थः । भगीरथादिमत्पर्य्यन्तं अविच्छेदेन अनुवर्त्तित । भगीरथपदं कुलस्य भक्तत्वप्रकाशार्थम् ।

(ट) देवीति । व युष्मान् प्रति नित्यं सर्व्वदा प्रसन्ना सन्तुष्टा अस्मि, युष्मद्विषयकं मम कालुष्यरहिता सर्व्वदैव भवामि । किन्तु परन्तु अपत्यस्य सन्तानस्य शोकावेग शोकस्य आवेग प्रसर क्षोभ इति यावत् । आपातदुःसह आपाते आरम्भक्षणे एव दुःसह सोढु-

---

* किन्त्वापातदुःसह शोकावेगोऽपत्यस्य इति क्वचित् पाठ ।

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण सत्त्वेन † प्रजापुण्यैश्च जीवति ॥ ७ ॥

[०। दैवात् वत्सां जानकीं विहाय दह्यमानेन मनसा स लोकोत्तरेण सत्त्वेन प्रजा पुण्यैश्च जीवति। इत्यन्वयः ।]

राम । सकरुणा हि गुरवो गर्भरूपेषु । (ठ)

सीता । [रुदती कृताञ्जलिः ।] होदु मं अत्तणो अङ्केसु विलम्बं अम्बा । (ड)

[(ड) भवतु मामात्मनोऽङ्केषु विलम्बयत्वम्बा । इति छाया]

भयम्. । 'दर्पणस्य आपातस्तु दैवात्कर्मवशे' इति कोषः । 'तदात्वे पात आपात' इति वैजयन्ती । सम्प्रति गतशोकादिस्ववशोत्तरमिवाधीरताज्ञानमात्रवीमि, पश्चात् शोकनिदान पर्यालोचनया मान्द्युदयात् सहनीयं स्यादित्यर्थः । तेन दैवेन एवम् उक्तप्रकारं "कल्याण्यं पुत्र" इत्युक्तरूपं ब्रवीमि । पुत्र किन्तु रामभद्रस्य रामचन्द्रस्य सीतायां सीतां प्रति अनुरागं न जानासि न वेत्सि जानास्येव, "हो मञ्जो चक्कवट्टं गमयन्त"। रामस्य सीतानुरागं जानन्त्यपि दुःखशोकावेगम् असहमाना इत्थं ब्रवीमीति भावः ।

(०) तदेव विवृणोति—दह्यमानेनेति । दैवात् दुर्वारनियतिनियमनात् वत्सां जानकीं विहाय अरण्ये परित्यज्य दह्यमानेन विरहानलेन सन्तप्यमानेन मनसा हृदयेन उपलक्षितः सः रामः लोकोत्तरेण अलौकिकेन सत्त्वेन धैर्येणेति यावत्, प्रजापुण्यैः प्रजानां प्रकृतिपुञ्जानां पुण्यैः सुकृतैः जीवति प्राणितीति । आत्मधैर्यप्रजापुण्यरूपकारणद्वयाभावे रामस्य देहस्य दुःसहशोके अप्यतितीव्रे जीवनमसम्भवं स्यादित्यर्थः । अत्र जीवनस्य हेतुतासम्बन्धे न उभयोः प्रस्तुतयोः सत्त्वप्रजापुण्ययोरन्वयात् तुल्ययोगिता, प्रजाहितपुण्यरूपकारणस्य रामहितजीवनस्य च कार्यस्य भिन्नाधिकरणत्वात् असङ्गतिश्च ।

(ठ) सकरुणेति । गुरवः पूजनीया जनाः श्वश्रूप्रभृतयः गर्भरूपेषु अपत्यस्वरूपेषु जामातृ-प्रभृतिषु सकरुणा हि करुणया दयया सह वर्तमाना इति तथोक्ताः सानुकम्पा एव । अपि जामातुः अपराधे सत्यपि गुरुजनाः तं न गृह्णन्तीत्यर्थः । अत आत्मजाया अहितकर्तृस्वभाव-मापन्नं मां न प्रत्यापेतीति भावः । यद्वा गर्भावासमिव रूपं येषां ते तथोक्तेषु बालकेष्विति शेषः । यथा गर्भस्य अरण्यावस्थानजन्य भवत्यसहनीयत्वं तद्वत् अस्माकं गुरुजनकृपापात्रीयत्वम् इत्यर्थः ।

(ड) वेदिति । रुदती दुःखातिभारात् क्रन्दन्ती सीता कृ　　　तः अञ्जलि करसम्पुटीकरणरूपमुद्राविशेषो यया सा तथोक्ता सती आहेति शेषः　　　अञ्जलि परमा

† धैर्येण इति पाठान्तरम् ।

राम.। किमन्यद् ब्रवीतु। (ढ)

भागी। शान्तम्! अविलीना संवत्सरसहस्रं भूयाः। (ण)

पृथ्वी। वत्से! अवेक्खणीयौ ते पुत्रकौ? (त)

सीता। अणाधाम्हि, किं एदेहिं। (थ)

[(थ) अनाथास्मि, किम् एताभ्याम्? इति छाया।]

राम हृदय! वज्रमयमसि। (द)

भागी। कथं त्वं सनाथाप्यनाथा? (ध)

मुद्रा चिरं देव-प्रसादिनी'ति आगम। आत्मन अङ्गेषु स्वस्याः मन्मयेषु देहेषु विलयम् अदर्शनं नयतु प्रापयतु। देहयो पुनर्नाहं जीवितुमुत्सहे इति भाव।

(ढ) किमिति। अन्यत् उक्तवचनादपरं किं ब्रवीतु कथयतु। अत्यन्तदुःखाकुलः जन जीवने मन्दादरो भवत्येवेति भाव।

(ण) शान्तमिति। शान्तमित्यव्ययं निषेधे वर्तते। एतन्न भूयात् इत्यर्थः। संवत्सर-सहस्राणि संवत्सराणां बहवो सहस्राणि अनेकाः समा व्याप्य, 'सहस्रशब्दोऽत्र अनन्तवाची तेनैव विस्तारा. सदैकत्वे इति नियमस्याव्यभिचार, प्रकृते गुरुजनप्रदत्ताशीर्वादस्य प्रसङ्गेन। अत्यन्तसंयोगे द्वितीया। अविलीना भूयाः जीविता स्थेयाः, न कदापि ते विलयो भूयादित्यर्थः। आशिषि लिङ्।

(त) वत्से इति। पुत्रकौ अर्भकौ एतौ अवेक्षणीयौ परिपालनीयौ, तदर्थमेव त्वया स्थातव्यमिति भावः।

(थ) अणाधेति। अनाथास्मि नास्ति नाथः रक्षकः यस्याः तथोक्ता अस्मि भवामि। एताभ्यां पुत्रकाभ्यां किं न किमपि प्रयोजनमित्यर्थः। नारीणामेकं प्रकृष्टं वस्तु पतिरेव, अतः तस्मात् तस्य अनन्तविरहे पुत्रलाभमपि न मे काम्यम्। अथवा अनाथाहं कथमनयोः परिपालने क्षमा भवामीति भाव।

(द) हृदयेति। हे हृदय चित्त। वज्रमयम् असि वज्रवदतिदृढमसि अन्यथा सीताया. एतत् 'अनाथास्मी'ति वचनं श्रुत्वापि कथं न विदीर्यसे। अहो महाराजो मम पत्नी अनाथा एतदपि श्रोतव्यमित्यर्थः। अपि च या हि मदीयमतिकठोरमत्याचारं सहमानापि मद्विरहेणैव पुत्रकयोरपि निस्पृहीजनकता जानाति, तां निर्वास्य अपि रामस्य मम जीवनादौ समुपयुज्यसे, न तु विदीर्यसे इति भावः।

(ध) कथमिति। कथं केन प्रकारेण सनाथा अपि नाथवती अपि विद्यमानभर्तृका

सीता। कीदिसं मम मन्दभाइणीए सणाधत्तणं ? (न)

[(न) कीदृशं मम मन्दभागिन्याः सनाथत्वम् ? इति सम् ।]

देव्यौ। जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ।
आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते ॥ ८ ॥

[८। त्वं जगन्मङ्गलम आत्मान कथम अवमन्यसे, यत्सङ्गात् आवयो अपि पवित्रत्व प्रकृष्यते। इत्यन्वय ।]

लक्ष्मण । आर्य्ये ! श्रूयताम् । (प)

राम । शृणोतु लोकः । (फ)

अवीत्यर्थ । अनाथा अशरणा असि त्वमिति भाव । जगता नाथो यस्मात् नाथ, तस्या अपि अनाथत्वे जगन्ति अनाथानि भवेयुरिति भाव ।

(न) कीदिसमिति। अभाग्याया अकुशलाया। दुर्भाग्याया अकारणकलङ्का-रोपेण निर्वासनात् असीमदुःखसागरमग्नाया इत्यर्थ । म मम सनाथत्वं नाथेन सह वर्त्तमाना तथोक्ता सनाथा तस्या भाव. तत्त्व [illegible] कीदृश किम्प्र तम, या खलु भर्त्रैव निर्वासिता तस्या नाथवत्त्वं किम्प्रकारं तद्वर्ण्यतामित्यर्थ । [illegible] मे सनाथत्वम अकिञ्चित्करमिति भाव ।

(८) जगदिति। [illegible] त्व जगन्मङ्गलं त्रिभुवनकल्याणकरं जगता मङ्गलं यस्मादिति बहुव्रीहि । अनेन मङ्गलदेवतेति समाख्या ख्यापिता। अथवा जगतां मङ्गलं मङ्गलस्वरूपं त्रिभुवनस्य मूर्त्तिमत् शुभमिव इत्यर्थ । एतस्मिन् मङ्गलजनकेऽपि सीतात्मनि मङ्गलत्वसम्भावनादुत्प्रेक्षा। विशेषण निश्चयमते तु अभिधारेतु:। आत्मानं देहम अवमन्यसे अवजानासि अनाथास्मीत्यादिनिर्वेदसूचकवचना निन्दसीत्यथ । तत्सङ्गात् यस्य त्वदात्मन सङ्गात् सम्पर्कात् आवयोरपि जगत्पावनत्वेन प्रसिद्धयो पृथ्वीभागीरथ्योरपि का कथा अन्येषामित्यपेरर्थ । पवित्रत्व पावनत्व स्वसम्बन्धादन्येषामपि दोषापनोदकत्वम् इति वा अप्यर्थ:। प्रकृष्यते पूर्वापेक्षया अतिशयितं भवति। एतेन त्वमनन्यसाधारणा पतिव्रतासीति सूच्यते। अतो नात्मा अवज्ञेय इति भाव । एतदर्थे दण्डापूपिकान्यायेन अन्यदीयपावनत्वप्रतीतिरर्थापत्तिरलङ्कार.। सीतासङ्गेन पृथ्वीभागीरथ्यो पवित्रत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरति-शयोक्ति., तथा च सीताया पृथ्वीभागीरथ्यपेक्षया प्रकर्षप्रतीतिरूपो व्यतिरेको व्यज्यते ।

(प) आर्य्येति। श्रूयतां भवता आकर्ण्यतां पृथिवीगङ्गयोर्वचनम् [illegible] शेष । कीदृशी साध्वी सीता इति एतद्वचनेनानुभूयतामित्यर्थ ।

(फ) शृणोत्विति। लोकः भुवन तत्र स्थिता जना इति [illegible] गेहादिमध्यस्य तस्य अचेतनतया श्रवणासम्भवात्, तत्रत्यसकलजनानां विशेषेण [illegible] स्वरूपेणातिविक

[नेपथ्ये कलकलः] (व)

राम । अद्भुततरं किमपि । (भ)

सीता । किंत्ति सग्गलं अन्तरिक्खं पज्जलदि । (म)

[(म) किमिति सकलम् अन्तरीक्षं प्रज्वलति इति सम ।]

दयौ । ज्ञातम् । (य)

कृशाश्वः कौशिको राम इति येषां गुरुक्रमः ।

आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः ॥ ८ ॥

[८ । कृशाश्व कौशिक राम इति येषां गुरुक्रम तान्येव शस्त्राणि जृम्भकैः सह आविर्भवन्ति । इत्यन्वय]

[नेपथ्ये

देवि सीते नमस्तेऽस्तु गतिर्नः पुत्रको हि ते ।

आलेख्यदर्शने देवो यदाह „ रघुनन्दनः ॥ १० ॥

फलेनाव उपचारो न दोषाय । अथवा लोके सकला प्रजा ज्ञातावकलम् । एषान् आकर्णयतु । यथा हि सीताया गङ्गता ज्ञातैव, न पुन पृथ्वीगङ्गावाक्य श्रुत्वा सीताया निर्दोषितावगम्यते, य पुन कालोनवादिनस्त मुग्धन्त जानन्तु च सीताया पातिव्रत्यमित्यर्थ ।

(व) नेपथ्ये प्रसाधनभूमौ । कलकल कोलाहल भवतीति शेष । जृम्भका स्त्राणां मन्त्रामन्त्रिततत्त्वोमयतया तत्प्रयोगस्य साधारणपात्रज्ञानायोग्यत्वेन तदागमसूचनाय नेपथ्ये इत्युक्तम् ।

(भ) अद्भुततरमिति । किमपि अपर किञ्चिदपि अद्भुत विशेषेणाश्चर्य्यजनकं किमपि दृश्य भवेत् अन्यथा कथ कोलाहल इति ।

(म) किमिति । अन्तरिक्ष गगनमण्डल किमिति कथमेव प्रज्वलति प्रदीप्त भवति ।

(य) ज्ञातमिति । अन्तरीक्षप्रदीपनहेतुर्विदित इत्यथ ।

(८) ज्ञानप्रकार दर्शयति—कृशाश्व इति । कृशाश्व तन्नामा मुनि कौशिक कुशिक नन्दन विश्वामित्र राम दात एष येषाम् अस्त्राणां गुरुक्रम आचार्य्यानुपूर्वी उपदेष्टृपर-म्परेति यावत् । कृशाश्वात् विश्वामित्र तस्माच्च राम यानि अस्त्राणि प्राप्तवान् इत्यर्थ । तानि एव उक्तगुरुक्रमवन्ति एव शस्त्राणि वारुणादीनि जृम्भकै सह आविर्भवन्ति प्रकटी-भवन्ति प्रकाशन्ते । अतएव कोलाहल भवति अन्तरीक्ष च ज्वलतीति भाव ।

* वदाह इति क्वचित् पाठ ।

[१० । देवि सीते ! ते मम वत्सौ, देवः रघुनन्दनः आलेख्यदर्शने यत् आह, ते पुत्रकौ नः गतिः हि । इत्यन्वयः ।]

सीता । दिष्ट्या अत्यद्देवताः परिस्फुरन्ति । (र)

[(र) दिष्ट्या अस्त्रदेवताः परिस्फुरन्ति । इति अन्वयः ।]

लक्ष्मणः । उक्तमासीदार्य्येण—सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति । (ल)

रामः । नमो वः परमास्त्रेभ्यो धन्याः स्मो वः परिग्रहात् ।
अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु वः ॥ ११ ॥

[११ । परमास्त्रेभ्यः वः नमः अस्तु, वः परिग्रहात् धन्याः स्मः । अनुध्यातैः वत्सयोः उपेतव्यं, वः भद्रम् अस्तु । इत्यन्वयः ।]

(१०) आलेख्यदर्शनाभ्यनुज्ञातानि कानि जृम्भकास्त्राणि कुशलवौ सकामन्तीति स्वाधारवाविदनार्थं नेपथ्यात् प्रयुज्यते—देवीति । अयि सीते देवि ! ते तथ्यं मम वत्से त्वां प्रणमाम । हि यतः ते तव पुत्रकौ नवजातौ बालौ सुतौ नोऽस्माकं गतिः आश्रयः प्राप्यौ वा । आलेख्यदर्शने तव चित्तविनोदनाय चित्रदर्शनसमये देवः रघुनन्दनः रामः यत् आह ब्रवीति स्म "देवि ! वन्दस्व तानि दिव्यास्त्राणि" "सर्वथा इदानीं त्वत्प्रसूतिमुपस्थास्यन्ति" इत्याशीर्वचनं तथ्यं प्रयुक्तमित्यर्थः । तस्मादेव, तस्याशीर्वचनादेव, वयं तव पुत्रकौ प्राप्तुमः इत्यर्थः ।

(र) दिष्ट्येति । अहो भाग्यम् अस्त्रदेवताः अस्त्राणां जृम्भकाणां देवताः अधिष्ठात्र्यो देवताः परिस्फुरन्ति प्रकाशन्ते । अत एव परमं सौभाग्यम् ।

(ल) उक्तमिति । आर्य्येण मान्येन भवता उक्तमासीत् प्रथमाङ्के आलेख्यदर्शनकाले "सर्वथा इदानीं त्वत्प्रसूतिमुपस्थास्यन्ती"ति एतत् वाक्यं सीतां प्रति कथितम् अभूत् । तदेव परिणाम एव इति सम्भावयामि इति भावः ।

(११) नम इति । परमास्त्रेभ्यः उत्कृष्टायुधेभ्यः वः युष्मभ्यं जृम्भकाधिष्ठातृभ्यः नमः अस्तु युष्मान् प्रणमामीत्यर्थः । नमः स्वस्तीत्यादिना चतुर्थी । वयं युष्माकं परिग्रहात् युष्मत्कर्त्तृकस्वीकारात् युष्माकं लाभाद्वा धन्याः स्म समभवन्तो भवामः सफलकामा जाता इत्यर्थः । अनुध्यातैः स्मृतैः सद्भिः भवद्भिरिति शेषः । वत्सयोर्मम पुत्रयोः [illegible] इति शेषः । उपेतव्यम् उपस्थेयम् । युद्धादिसमये मम पुत्राभ्यां चिन्तितैर्युष्माभिः [illegible] इत्यर्थः । वः युष्माकं भद्रं मङ्गलम् अस्तु भवतु ।

क्षुभिताः कामपि दशां कुर्वन्ति मम साम्प्रतम्।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥ ११ ॥

[११। साम्प्रतं विस्मयानन्दसन्दर्भजर्जराः क्षुभिताः करुणोर्मयः मम कामपि दशां कुर्वन्ति। इत्यन्वयः।]

देव्यौ। मोदस्व वत्से। मोदस्व, रामभद्रतुल्यौ इदाणीं दे पुत्तओ संवुत्तौ। (च)

सीता। भअवदीओ! को एदाणं खत्तिओचिदं कम्म करिस्सदि त्ति? (छ)

[(छ) भगवत्यौ! क एतयोः क्षत्रियोचितं कर्म कारयिष्यतीति? इति छाया।]

राम। एषा वसिष्ठगुरुमान्या रघूणां वंशवर्द्धिनी।
कष्टं सीतापि सुतयोः संस्कर्त्तारं न विन्दति ॥ १२ ॥

[१२। वसिष्ठगुरुमान्या रघूणां वंशवर्द्धिनी एषा सीता अपि सुतयोः संस्कर्त्तारं न विन्दति कष्टम्। इत्यन्वयः।]

---

(११) क्षुभितेत्यादि। साम्प्रतमधुना विस्मयानन्दसन्दर्भजर्जराः। विस्मयः अपूर्ववस्तुदर्शनजन्यान्तःकरणविकारविशेषः, स चात्र गङ्गापतनसमकालप्रसवजृम्भकास्त्रप्राप्त्यादिमूलकः। आनन्दः अपत्यस्नेहभावनाहेतुकप्रीतिविशेषः पुत्रद्वयदर्शनजन्यहर्षः इति यावत्। तयोः सन्दर्भः सङ्घटनम् एकत्र समावेशः तेन जर्जराः व्याकुलिताः शीर्णाः इति यावत्, करुणोर्मयः करुणस्य सीताविरहजन्यदुःखातिशयस्य ऊर्मयः तरङ्गाः क्षुभिताः उद्वेलिताः अपरिच्छेद्याः सन्तः मम कामपि अनिर्वाच्यां दशाम् अवस्थां कुर्वन्ति। ऊर्मिपदेन करुणस्य समुद्रत्वं व्यज्यते। गङ्गापृथिव्योरनुपदरूपालौकिकव्यापारावलोकनात् विस्मयेन सुतलाभजन्येन हर्षेण प्रियतमधर्मिणीवियोगजेन नवीनतामापन्नेन शोकेन च अहमधुना व्याकुलो भवामीत्यर्थः। अत्र करुणरसस्य विस्मयादिभावाङ्गतया प्राधान्येन रसवदलङ्कारः।

(च) मोदस्वेति। मोदस्व आनन्दिता भव, हर्षं विन्द। इदानीम् अधुना ते तव पुत्रकौ बालकौ रामभद्रतुल्यौ रामचन्द्रसदृशपराक्रमौ संवृत्तौ जातौ जृम्भकास्त्रलाभादिति भावः।

(छ) भगवतीति। इदानीम् अधुना कः कोऽपि जनः एतयोः पुत्रयोः क्षत्रियोचितं क्षत्रियजात्यनुरूपं कर्म विधिं जातकर्मसंस्कारादिक्रियाकलापानुष्ठानरूपमित्यर्थः। करिष्यति सम्पादयिष्यति।

(१२) एषेति। वसिष्ठगुरुमान्या वसिष्ठेन ब्रह्मपुत्रेण तपोनिधिना गुरुणा मानिता

भागी। पुत्रि! किं तवानया चिन्तया? एतौ हि वत्सौ स्तन्यत्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यामि, स एतयोः क्षत्रकृत्यं करिष्यति। (च)

यथा वसिष्ठाङ्गिरसावृषी प्राचेतसस्तथा।
रघूणां जनकानाञ्च वंशयोरुभयोर्गुरुः॥

[२४। वसिष्ठाङ्गिरसौ यथा रघूणां जनकानाञ्च गुरू तथा प्राचेतसः उभयोः वंशयोः गुरुः। इत्यन्वयः]

राम। सुविचिन्तितं भगवत्या। (छ)

तत्कालसंस्कारविनष्टापदामित्यर्थः रघूणां रघुवंश्यानां वंशवर्द्धिनौ एतत्प्रसवस्य कल्याणकारिणौ एवं सीता च पत्नी तावदन्या सकलमनुष्याप्राप्तौ समुत्पन्नौ जानकी अपि सुतयोः नवजातयोः कुमारयोः संस्कारं कार्ययोचितजातकर्मादिसम्पादयितारम् आचार्यं न विन्दति न लभते अहो कष्टम्। जीवति विकालकः रघूणां कुलगुरौ वसिष्ठे रघुकुलवधूः सीतापि पुत्रयोः संस्कारं न प्राप्नोतीति महत् इयापत्पाक इति भावः।

(च) पुत्रीति। अयि पुत्रि जानकि तव अनया चिन्तया एतया भावनया किं किं प्रयोजनम्। क अनया संस्कारकारयितृचिन्तया त्वया न कार्यमित्यर्थः। हि यतः एतौ पुत्रौ स्तन्यत्यागात् परेण स्तनं भवं स्तन्यं तस्य त्यागः तस्मात् स्तन्यपानत्यागादित्यर्थः पर भगवतो वाल्मीकेः दिनितरन्तं इत्यादिना पञ्चमी स्तन्यत्यागकालप्राप्त्यनन्तरं इत्यर्थः। वाल्मीकेः तत्समीपे इत्यर्थं, सम्प्रदानसामान्ये षष्ठी अर्पयिष्यामि। एतेन द्वितीयाङ्कविष्कम्भकस्य ‘केनापि देवताविशेषेण’ति वाक्यं व्याख्यातम्। स एव वाल्मीकिरेव एतयोः कुमारयोः क्षत्रकृत्यं क्षत्रजात्युचितं संस्कारं करिष्यति विधास्यति, अतो नास्ति ते चिन्तेति भावः।

(२४) कुलगुरुत्वागमने निदर्शयति—यथेति। वसिष्ठाङ्गिरसौ वसिष्ठश्च अङ्गिराश्च अङ्गिरसः अपत्यम् इति आङ्गिरसः शतानन्दः गौतमश्च तौ तथोक्तौ ऋषी यथा येन प्रकारेण रघूणां रघुवंश्यानां जनकानां जनकवंश्यानाञ्च गुरू आचार्यौ तथा प्राचेतसः वाल्मीकिः उभयोः रघुजनकवंशीययोः कुलयोः गुरुः आचार्यः। यथा रघुवंशाचार्यः वसिष्ठः जनकवंशस्य शतानन्दः तथा वाल्मीकिः उभयोरपि वंशयोः गुरुरिति, सोऽपि तव पुत्रयोः जातकर्मसंस्कारादि कर्तुमर्हतीति ते चिन्ताया अनवकाशः। न चानयोः वसिष्ठप्राचेतसयोरेकतरस्य गौरवं लाघवं वा मन्तव्यमिति भावः।

(छ) सुचीति। भगवतीभ्यां पृथ्वीभागीरथीभ्यां ... नम

लक्ष्मण । आर्य्य ! सत्यं विज्ञापयामि नैस्त्रैरुपायैरेतौ कुशलवौ उत्प्रेक्षे । (ङ)

एतौ हि जन्मसिद्धास्त्रावुभौ प्राचेतसान्मुनेः । †
वीरौ सम्प्राप्तसंस्कारौ वयसा द्वादशाब्दिकौ ॥ १५ ॥

[१५ । हि एतौ उभौ जन्मसिद्धास्त्रौ मुनेः प्राचेतसात् सम्प्राप्तसंस्कारौ वीरौ वयसा द्वादशाब्दिकौ । इत्यन्वयः]

राम । वत्स ! इत्येवाहं परिप्लवमानहृदयः प्रमुग्धोऽस्मि । (च)

पृथ्वी । एहि वत्से ! पवित्रीकुरु रसातलम् । (छ)

राम । हा प्रिये ! लोकान्तरं गतासि । (ज)

सम्यगवधारितम् । अनयो सत्कथा वाल्मीकिरिति यत् आभ्यामवधार्य्यते तत् साधु कृतमिति भावः ।

(ङ) आर्य्येति । आर्य्य पूज्य अग्रज । सत्य विज्ञापयामि निवेदयामि, तैः एभिः इतैरपि वत्सौ कुशलवौ उत्प्रेक्षे वत्सकुशलवत्वेन अभिनेतृशिशुद्वयं सम्भावयामि, एतौ सीतागर्भजौ तव पुत्रौ कुशलवौ नूनमनुमिनोमीत्यर्थः ।

(१५) एताविति । हि यस्मात् एतौ उभौ कुमारौ जन्मसिद्धास्त्रौ जन्मतः आरभ्य सिद्धानि प्राप्तानि अस्त्राणि जृम्भकाख्यानि आयुधानि ययो तौ तथोक्तौ मुनेः महर्षेः प्राचेतसात् वाल्मीकेः सकाशात् प्राप्तसंस्कारौ प्राप्तः लब्धः संस्कारः जातकर्मोपनयनादिः याभ्यां तौ वीरौ शूरौ त्वत्तुल्यविक्रमौ इत्यर्थः वयसा जीवनकालेन द्वादशाब्दिकौ द्वादशाब्दिका इव इति द्वादश ते च ते अब्दाः वत्सराः तान् व्याप्य भवतः इति ठञ्प्रत्ययः । तौ तथोक्तौ द्वादशवत्सरवयस्कौ । अभिनयसीतापुत्रयोर्विदानीमेव जृम्भकास्त्रलाभः प्रदर्शितः तौ कुशलवावपि आजन्मसिद्धास्त्रौ, अधुना वयसा च द्वादशसङ्ख्यकौ तौ भवेताम् । अभिनेतृकुमारयोस्तु अभिनयकालापेक्षया द्वादशाब्दत्वं बोध्यम् ।

(च) वत्सेति । इति अस्मात् एव सीतानयत्वेनानुमानवशादेव । अहं परिप्लवमानहृदय चञ्चलचित्त प्रमुग्ध प्रमूढः अस्मि भवामीत्यर्थः ।

(छ) एहीति । रसातलं अधोभुवनं पवित्रीकुरु पुण्यवत्यास्तवावस्थानेन पुनीहि, एतयो सन्तत्यागमनम् यावत् तत्र तिष्ठ तदेहि मया सहागच्छ ।

† जातौ प्राचेतसादिति ; प्राप्तप्राचेतसावुभौ । आर्य्यतुल्यावुभौ वीरौ, वयसा द्वादशाब्दिकौ इति च पाठभेदः ।

सीता। णेदु मं अत्तणो अङ्गेसु विलअं अम्बा, ण सक्कणोमि ईदिसं जीअलोअपरिवत्तं अणुहविदुम्। (ग)

[(ग) नयतु मामात्मनोऽङ्गेषु विलयमम्बा, न शक्नोमि ईदृशं जीवलोकपरिवर्त्तनम् अनुभवितुम्। इति छाया।]

राम। किमुत्तरं स्यात्? (घ)

पृथ्वी। वत्से! स्तन्यत्यागं यावन्मद्वियोगतः पुत्रकयोरपेक्षस्व, परेण ते यथा रोचते तथा करिष्यसि। (ङ)

(ख) इति इति उद्दिश्यायम् लोकान्तरं अन्यं लोकं लोकान्तरं पातालं गतासि ह्यासि, अहो दैवम्, इत्यावस्थाने दैवाद्दर्शनादि सम्भव आसीत्, तदपि मे विनष्टमिति भाव। अत्र लोकान्तरं गतेत्यनेन सीताया मरणं नावगन्तव्यं मर्त्यलोकादन्यत् पातालं गतेत्येव बोध्यम्। अथवा अनेनाय भाव प्रकाश्यते—यत्, यथा मृतानां दर्शनं तत्स्वजना न लभन्ते तथैव तव पातालं गताया मत्कर्तृकदर्शनलाभोऽसम्भव। अधुना च मृतस्वजनार्थमिव मया मनुष्ये केवलं नेत्रास्रुमोचनमेव साध्यं न तु कथमपि दर्शनं लभ्यमिति। अतिकष्टोऽयमे दशापरिणाम इति।

(ग) नेत। अम्बा मातः भूतधात्री आत्मन स्वस्य अङ्गेषु देहेषु मां विलयम् अदर्शनम् नयतु प्रापयतु। ईदृशम् एवंविधं दुःसहमित्यर्थः जीवलोकस्य भुवनस्य मर्त्यलोकस्य परिवर्त्तं परिवर्त्तनम् अन्यथाभावम् अनुभवितुं सोढुमित्यर्थः। न शक्ता अस्मि नाहं शक्ते। मर्त्यलोकवासिनो अहं च पातालवासिनी च भविष्यामीति तथापि तु सोपशमो न स्यात्, तत् मम मृत्युरेव श्रेयानिति भाव। अत्रायमपि गूढार्थः सीताचित्तगतो व्यज्यते—यत् पतिव्रता हि कामिनी स्वामिजनाधीने गृहादावेव रमते, कष्टातिशयमापन्नापि न स्वामिगृहं परित्यजति तथापि अहं जीवलोकप्रविष्टव्यवहारविरहव्यापविद्धम् मामनुमन्यसे तदाह जीवलोकप्रदा, कथं चित् मर्त्यभुवनविचित्रव्यवस्था एव स्वामिगृहनिवासलक्षणात्, श्रीरामचन्द्रस्य साम्राज्याधिष्ठानेन सकलस्यैव मर्त्यभुवनस्य तदधीनत्वात् इति।

(घ) किमिति। किं कीदृशम् उत्तरं सीतावाक्यस्य प्रतिवचनं स्यात् भवेत्। पृथिवी अम्बा: सीताया वचनस्य किमुत्तरं दास्यतीति तत् श्रोतुं पर्याकुलोऽस्मीति भाव।

(ङ) वत्से इति। पुत्रकयो तनययो कुमारयो स्तन्यत्यागं यावत् स्तन्यपान त्यागकालपर्यन्तं मद्वियोगत मदाश्रयत्वात्, दैवी पक्षयो। मदाश्रय   स्तन्यं त्यज बोधि पक्षयो वा, अपेक्षस्व विचारय, तावत्कालं मदाश्रयेण वा   । परेण स्तन्यत्यागात् परकाले ते तुभ्यं यथा रोचते यादृशी रुचिर्भविष्यति   तादृशीमर्थ।

भागी। एवं नाम। (च)

[ततो निष्क्रान्ता गङ्गापृथ्वीसीता। (छ)]

राम.। कथं विलय एव वैदेह्याः सम्पन्नः! हा देवि! दण्डकारण्यवासप्रियसखि! हा चारित्रदेवते! लोकान्तरं पर्य्यवसितासि।

इति मूर्च्छति।] (ज)

लक्ष्मणः। भगवन् वाल्मीके! परित्रायस्व, एष किं ते काव्यार्थः? (झ)

[नेपथ्ये] अपनीयतामातोद्यकम्। भो भोः सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः! पश्यत,—भगवता वाल्मीकिना अनुज्ञातं पवित्रमाश्चर्य्यम्। (ञ)

अवेक्षस्व इत्यत्र अवेक्षस्व त्वपि पाठो दृश्यते, तत्रायमर्थः—अवेक्षस्व पर्य्यवेक्षस्व प्रतिपालय इत्यर्थः। पुत्रकयोरित्यत्र च सम्बन्धविवक्षया षष्ठी। अथवा तयोः शुभाशुभे पर्य्यवेक्षस्वेत्यर्थः।

(च) एवमिति। एवं त्वया यदुक्तं तदेव भवतु पृथिव्युक्तप्रकारं कुरु इत्यर्थः।

(छ) तत इति। तत तस्मात् परं निष्क्रान्ता रङ्गालयादिति शेषः।

(ज) कथमिति। कथं किं वैदेह्याः सीतायाः विलयः तिरोधानं लोकान्तरगतिः एव सम्पन्नः जातः। सम्बन्धागात परत्र रसातलगमनस्य पृथिव्याभ्यनुज्ञातत्वात् द्वादशानां वत्सराणामतीतत्वाच्च लोकान्तरं गतासीत्येतावन्निश्चितमिति भावः। हा देवि महिषि सीते दण्डकारण्यवासप्रियसखि। दण्डकारण्ये तव वासः चतुर्द्दश वत्सरान् व्याप्यावस्थानं तस्मिन् प्रियसखी दयितसहचरी तस्याः सम्बोधनम्। हा चारित्रदेवते! चरित्रम् एव चारित्रं तद्देवता यस्याः चारित्र साध्वाचरणे देवता इव वा, सा तथोक्ता तत्सम्बोधनम्। लोकान्तरम् अन्यः लोकः इति लोकान्तरं मर्त्यलोकादन्य लोकं पातालमित्यर्थः। पर्य्यवसितासि प्रस्थिता भवसि। पर्य्यवपूर्व्वात् स्यतेः गत्यर्थत्वात कर्त्तरि क्तप्रत्ययः। इति मूर्च्छति मोहं प्राप्नोति राम इति शेषः।

(झ) भगवन्निति। भगवन् ऐश्वर्य्यशालिन् प्राचेतस वाल्मीके! परित्रायस्व रक्ष आर्य्यरामस्य मोहमपनमय्य जीवनदानेन अस्मान् रक्ष। एष एवम्प्रकारः रामस्य शोकापनयनजनकः ते तव काव्यार्थः काव्यस्य दृश्यकाव्यस्य भरतोपनिबद्धस्य नाटकस्य तदभिनयस्येत्यर्थः। अर्थः प्रयोजनं किम् एतन्नाटकाभिनयेन किमस्माकं विपत्तिरेव ते साधनीया? भगवन् न भवादृशस्य कर्त्तव्यमेतदिति भावः।

(ञ) नेपथ्य इति। आतोद्यकं चतुर्विधं वाद्यम्। अस्यापि अवयवस्तत्रम्। अपनीयताम्

लक्ष्मणः । [विलोक्य]

मन्थादिव क्षुभ्यति गाङ्गमम्भो
व्याप्तं च देवर्षिभिरन्तरीक्षम् ।
आश्चर्यमार्या सह देवताभ्यां
गङ्गामहीभ्यां सलिलादुदेति ॥ १६ ॥

[१७ । गाङ्गम् अम्भः मन्थादिव क्षुभ्यति, देवर्षिभिः अन्तरीक्षं व्याप्तं च आश्चर्यम् आर्या गङ्गामहीभ्यां सह सलिलात् उदेति इत्यन्वयः]

श्रुयतामित्युचिताम् । नाटका वीणादिवाद्यनाट्यादिकमालम्बनम् अभिनयेत् वीणादिवाद्य अविद्यमान अद्भुताभिनयस्य दर्शनेऽन्तराय स्यात्, वीणादिनिनादानां दृशकचित्ताकर्षकतया एकदा विषयद्वय-ग्रहणस्याभावाद्‌भूतरसविज्ञानाभावादिति हृदयम् । भो भोः इति सम्भ्रमे द्वित्वम् । स्थावरजङ्गमा समस्तलोका पशुपक्ष्यादयः स्थावराः तिष्ठन्ति पर्वतादयः तैः सह वर्तमाना लोकाः। मर्त्यामर्त्या मर्त्या मरणधर्माणः मानवादयः अमर्त्या अविनश्वराः अमरादयः । प्राचेतस प्राचेतसः प्रचेतः पुत्रवाल्मीकिनाम प्राचेतसत्वात् स्थावराणामपि मर्त्यामर्त्यानां प्राचेतस इति विशेषणमविरुद्धम् । यत् भगवता महता इत्यमलालिना महर्षिणा ऋषिप्रवरेण वाल्मीकिना प्राचेतसेन अनुज्ञातम् आदिष्टम् पवित्रं निर्दोषम् आश्चर्यं च विस्मयकरं पश्यत किञ्चित् अवलोकयत । सूत्रधारेण नेपथ्यादिदमुक्तं एव सन्दर्भं चलितेति गर्भाङ्कस्यार्थोपक्षेपविशेष "अन्तर्यवनिकासंस्थैः सूचनार्थस्य चूलिका" इति साहित्यदर्पणोक्तलक्षणात् ।

(१८) अथ गङ्गायामभिनयप्रदर्शनेऽपि लक्ष्मणः प्रार्थितमनिर्देशानन्तरं तीर्थपितृ विरामि हर्षे गङ्गागर्भे निपात्य गङ्गया पृथ्वीदेव्या च सह सा या गङ्गागर्भादुत्थानेन जलक्षोभ मवलोक्य, जलक्षोभं, नभसि देवसम्मिलनं, मातायामभ्युत्थानमपि, क्रमेण साधारणात् विस्मयति—मन्थादिवेत्यादिना । गाङ्गं गङ्गाया इदं गाङ्गम् अम्भः सलिलं मन्थात् मन्थनात् आलोडनात् इव क्षुभ्यति चञ्चलीभवति देवर्षिभिः देवाश्च अमराः ऋषयः मुनयश्च तैः अन्तरीक्षं आकाशं व्याप्तं च आक्रान्तं च । आश्चर्योदर्शनकौतुकाद्धि वा ऋषयः आकाशगताः समवेताः इत्यर्थः । आश्चर्यम् अहो अद्भुतम् । आर्या सीता देवताभ्यां गङ्गामहीभ्यां जाह्नवी पृथिवीभ्यां सह सार्धं सलिलात् गङ्गायाः जलात् उदेति उद्गच्छति । तथाश्चर्यमिति भाव. । अत्र मन्थादिवेति भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः । अपरकलना दोषः । इन्द्रवज्रा नाम ।

[पुनर्नेपथ्ये] (ट)

अरुन्धति जगद्वन्द्ये गङ्गापृथ्व्यौ भजस्व नौ।
अर्पितेयं तवाभ्याशे सीता पुण्यव्रता वधूः॥ १७॥

[१७। अयि जगद्वन्द्ये अरुन्धति गङ्गापृथ्व्यौ नौ भजस्व पुण्यव्रता इयं वधूः सीता तव अभ्याशे अर्पिता इत्यन्वयः]

लक्ष्मणः अहो आश्चर्यमाश्चर्यम्! आर्य! पश्य पश्य, कष्ट-मद्यापि नोच्छ्वसिति आर्यः। (ठ)

[ततः प्रविशतः अरुन्धती सीता च]

अरु० त्वरस्व वत्से वैदेहि मुञ्च शालीनशीलताम्।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना॥ १८॥

[१८। वत्से वैदेहि! त्वरस्व एहि शालीनशीलतां मुञ्च प्रियस्पर्शेन पाणिना मे वत्सं जीवय इत्यन्वयः।]

(ट) पुनरिति नेपथ्ये वक्ष्यमाणमाह इति शेषः

(१७) किमाहेत्याह—अरुन्धतीति हे जगद्वन्द्ये जगतां भुवनानां वन्द्ये पातिव्रत्येन पूजनीये अरुन्धति वशिष्ठपत्नि नौ आवां गङ्गापृथ्व्यौ भागीरथीपृथिव्यौ भजस्व सुवस्त्व आवयोर्वाक्यं प्रतिपालय पुण्यव्रता पुण्यं पावनं व्रतम् आचारः यस्याः सा तथोक्ता पतिव्रतानुष्ठानरता साधुशीलेत्यर्थः वधूः तव स्नुषा इयं सीता तव भवत्याः अभ्याशे निकटे अर्पिता आवाभ्यां निहिता दत्तेति यावत्। समीपे निकटासन्नसन्निकृष्टसनीडवत्। सदेशाभ्याससविधसमर्यादसवेशवत्। उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्' इत्यमरः। अस्याः यथोचितसंरक्षणेनास्याः प्रीतिमुत्पादय इति भावः

(ठ) दिष्ट्येति। दिष्ट्या महानन्दजनकमित्यर्थः आश्चर्यमत्यद्भुतकरम्। विस्मयाति-शये द्विरुक्तिः आर्य पूज्य अग्रज राम पश्य पश्य हर्षे द्वित्वम् एतदत्याश्चर्यजनकं गङ्गा-पृथ्वीभ्यां महाप्रभ्यां गङ्गाजलादुद्गमनव्यापारं त्वमवलोकयेत्यर्थः। आर्य पश्य पश्यति रामं सम्बोध्य निश्चेष्टतामवलोक्य लक्ष्मणः सकातरमाह—हा कष्टमिति आर्यः रामचन्द्रः अद्यापि अधुनापि बहुक्षणापगमेऽपीति यावत् न उच्छ्वसिति न संज्ञां प्राप्नोति, अहो कष्टमेतदिति भावः

(१८) त्वरस्वेति। हे वत्से पुत्रि वैदेहि विदेहराजकुमारि सीते। त्वरस्व त्वरान्विता भव। शालीनशीलतां शालीनं लज्जायुक्तं शीलं स्वभावः यस्याः सा तथोक्ता तस्याः भावः तत्ता लज्जाशीलता मुञ्च त्यज विपदामस्मिन् लज्जायाः अनवसरत्वादित्यर्थः। एहि आगच्छ

सीता। [ससम्भ्रमम् उपसृत्य रामं स्पृशन्ती] समस्ससिदु अज्जउत्त। (ड)

[(ड) समाश्वसितु आर्य्यपुत्र। इति छाया।]

राम। [समाश्वस्य सानन्दम्] भोः किमेतत्। [दृष्ट्वा सहर्षाद्भुतम्] कथं देवी! [सलज्जम्] अये, अम्बा अरुन्धती सर्वे च प्रहृष्टाः ऋष्यशृङ्गशान्तासमेता गुरवः! (ढ)

अरु। वत्स! एषा भगवती भगीरथगृहदेवता सुप्रसन्ना गङ्गा। (ण)

[नेपथ्ये]

गङ्गा। जगत्पते रामभद्र! स्मर्य्यतामालेख्यदर्शने मां प्रति आत्मनो वचनम्, यथा,—'सा त्वमम्ब! स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भवे'ति; तत्रानृणास्मि जाता। (त)

प्रियस्पर्शेन प्रियं प्रीतिकरः स्पर्शो यस्य तादृशेन तव पाणिना करेण मे मम वक्षः ... रामभद्रं जीवय सजीवं कुरु।

(ड) तथा प्रियतमस्य भर्त्तुः सहसा सञ्जातस्य मोहस्य अपनयनाय उत्सुका, ... निर्देशेन अर्भं ... जीवयन्ती ... रामदेहं स्पृशन्ती।

(ढ) समाश्वस्येति। सीतापाणिस्पर्शात् रामः संज्ञां लब्ध्वा सानन्दं सहर्षं यथा तथा आह। भोः किमेतत् एतत् सीतापाणिस्पर्शनं किंहेतुकमित्यर्थः। दृष्ट्वा सीतामवलोक्य गतां सीतां पुनरालोक्य सहर्षाद्भुतं सीतालाभात् हर्षं आनन्दः सुदुर्लभाया पुनर्लाभात् अद्भुतं विस्मयः ताभ्यां सह वर्त्तमानं यथोक्तम्। कथं, विस्मयद्योतकं कथमव्ययोऽत्र बोध्यं। देवी सीता उपस्थितेति शेषः। सलज्जम्। लज्जाया अरुन्धतीप्रभृति-दर्शनात्। सा च मम सहायभूतेति। अये अम्बा माता अरुन्धती अस्मत्कुलगुरोर्वसिष्ठस्य धर्मपत्नी। ऋष्यशृङ्गशान्तासमेता ऋष्यशृङ्गः तदाख्यः मुनिः अस्य पतिः शान्ता तदाख्या भगिनी ताभ्यां समेता सहिता प्रहृष्टाः आनन्दिताः सर्वे गुरवः पूजनीयवर्गाः उपस्थिता इति शेषः।

(ण) वत्सेति वत्स कल्याणभाजन, सम्बोधनमिदं रामस्य। एषा इयं भगीरथे ... भगीरथगृहदेवता भगीरथवंशस्याद्या देवता ... गङ्गा सुप्रसन्ना युष्मान् प्रति अनुग्रहं कृतवतीत्यर्थः।

(त) जगत्पत इति। जगत्पते। जगतां भुवनानां पतिः पालक ... । आत्म-

सीता। दृश्यतामसूर्भगवती वसुन्धरा। (ब)

[नेपथ्ये]

पृथ्वी। उक्तञ्च पूर्वमायुष्मता वत्सात्यागे—यथा, 'भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकी'मिति। तदधुना कृतवचनास्मि प्रभो-र्वत्सस्य चेति। (द)

रामः। कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः! प्रण-मामि वः। (ध)

यथावतारत्वादस्य जगत्पतित्वमिति व्याख्यातम्। आलेख्यदर्शने चित्रदर्शनवेलायां मां गर्भं प्रति आत्मनः स्वस्य वचनं 'सा त्वमम्ब! स्नुषायाम्'इत्यादिवाक्यम्। अभ्यर्थनाम् अनुध्यायन्ताम्। तत्र तत्र प्रार्थितविषये अन्यथा नास्ति कृत यस्याः सा तथोक्ता निर्व्वाहितपर्य्युदस्तनास्मि कृतवचना भवामीति यावत्। कथं त्वमन्यं प्रतिविधेयमित्यनुसृतामिति भावः।

(ब) दृश्यमिति। प्रसूः प्रसूरस्य पत्नी वसुन्धरा रत्नगर्भा पृथिवी। यथाच सीतायाः सतीकुलशिरोरत्नतया स्वस्य च वसुधारणधर्म्मतया एव धर्मो सीता गर्भं दधार, तथा च परि-त्यक्तामभ्युपपन्ना इत्यनुषङ्गेण सीताया गौरवातिशयः सूच्यते।

(द) नेपथ्ये। उक्तञ्चेति। वत्सायाः सीतायाः परित्यागं निर्वासनकाले आयुष्मता दीर्घायुषा उक्तमासीत् त्वं मां प्रति कथितवानसि इत्यर्थः, यत्—भगवति वसुन्धरे रत्नगर्भे! श्लाघ्यां सकलप्रशस्यां दुहितरं कन्यां गर्भजां जानकीं जनकस्य राजर्षेः कन्यकाम् अति-पवित्रामित्यर्थः। अवेक्षस्व पर्य्यवेक्षस्व। अत्र वसुन्धरेति विशेषणादयमर्थः प्रतिभासते—यत् सीता रत्नभूता त्वञ्च रत्नधारिणीति युज्यत एव ते तस्याः पर्य्यवेक्षणं न तु केवलं तस्याः दुहितृत्वेन पवित्रत्वेन वा, तत् अतः दुहितरमित्यादिवाक्यमित्यर्थः। तत् तस्मात् अधुना अद्य वत्सस्य मे आयुष्मतः जामातुः प्रभोः भूपतित्वात् स्वामिनः अधीश्वरस्येत्यर्थः। कृतवचनास्मि उक्तमेव पूर्ववचनम् इत्यर्थः: कृतम् अनुष्ठितं वचनं यया सा प्रतिपालितोक्तार्था अस्मि भवामि तव वचनं कर्णे कृत्वा तवाज्ञया जाताऽस्मीत्यर्थः।

(ध) कथमिति। कृतमहापराधः कृतः महान् अपराधः अकारणसीतानिर्व्वासन-रूपः येन तथोक्तः अहम्। कथं सम्भावनायाम्। भगवतीभ्यां पृथ्वीभागीरथीभ्याम् अनुकम्पितः अनुगृहीतः अतिवृद्धेऽपि मयि अनयोरनुग्रहः इति भावः। वः युष्मान् गौरवे बहुवचनम्। प्रणमामि नत्वा तामनुकम्प्याम् अभ्यर्थयामीत्यर्थः। अथवा कथं केन प्रकारेणाहं कृत-महापराधोऽपि युष्माभिरनुकम्पितो युष्मान् प्रणमामि, तथापि अतितरां वन्दे, इत्य-

अरु । भो भोः पौरजानपदाः ! भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता, पूर्वञ्च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सब्रह्मकैश्च देवैः संस्तुता, सवितृकुलवधूर्देवयजनसम्भवा सीतादेवी परिगृह्यत इति कथं भवन्तो मन्यन्ते ? (न)

लक्ष्मण । एवमार्ययारुन्धत्या निर्भर्त्सिताः प्रजाः कृत्स्नश्च भूतग्राम आर्यां नमस्करोति, लोकपालाश्च सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते । (प)

महाराजस्य वत्सायामपि सीतारूपेण स्वजनेन दृष्टत्वात् हितसमाचरणात् अत्र केचित् "लात-महापराधोऽपि भगवति ! त्वया अनुकम्पनीयतमो राम प्रजानामी"ति पठन्ति, तत्रायमर्थः—तथा भर्त्तुरपि अपराधकारिणोऽपि युष्माकं प्रति करुणातिशयस्थैर्यसम्पादनाय प्रणाम करोमीत्यर्थः ।

(न) भो इति । भगवतीभ्यां परमैश्वर्यशालिनीभ्यां जाह्नवीवसुन्धराभ्यां गङ्गापृथिवीभ्यां देवताभ्याम् एवं प्रशस्यमाना इत्थं "आदावपि यतस्तया पवित्रत्वं प्रकाशितं" इत्यादिना संस्तूयमाना अरुन्धत्याः मम समीपे इति शेषः । समर्पिता न्यस्ता । पूर्वञ्च निर्णीति-चार्यं । पूर्वं पुरा रावणवधादनन्तरसमये वैश्वानरेण अग्निना निर्णीतपुण्यचारित्रा निर्णीतं निश्चितं पुण्यं निर्दुष्टत्वात् पवित्रं चारित्रम् आचरणं यस्याः सा तथोक्ता, निर्दोषितत्वादधार्य प्रख्यापितसाधुशीला इत्यर्थः । प्रथमतस्तावत् गङ्गापृथ्वीप्रशंसिताया पातिव्रत्यम् अग्न्याहृतं न केवलं तथाविधं दैवतं विनयभाषिण्यी इति भावः । परन्तु वह्निपरीक्षाप्यस्या अलौकिकी विशुद्धिं प्रकटयतीति भावः । सब्रह्मकैः ब्रह्मणा प्रजापतिना सह वर्त्तमानैः देवैः इन्द्रवरुणप्रभृतिभि-र्देवैः सुरश्रेष्ठैः संस्तुता पतिव्रतात्वगण्यतया परिचिता 'संस्तवः स्यात् परिचयः' इति [illegible] । संस्तुता सम्यक् स्तुता प्रशंसिता वा, सवितृकुलवधूः सविता सूर्यस्य वंश सावित्र तस्य वंशं कुलं यस्य वधूः सूर्यवंशस्य वा देवयजनसम्भवा यज्ञभूमिसमुत्पन्ना देवी कान्तिमती दीप्तिमती वा सीता जानकी परिगृह्यतां रामेण राज्ञा स्वीक्रियताम् इति अत्र विषये भवन्तः पौरजानपदाः कथं किं मन्यन्ते युष्माकं किमभिमतमित्यर्थः । एतादृशी पृथ्वी-गङ्गाभ्यां संस्तुता वह्निनापि प्रकटितशुद्धिता, जगदेकपतिव्रतया अरुन्धत्या समाहृता सीता [illegible] इति [illegible], किन्तु यदेषा पौरजानपदानुमतिप्रार्थना [illegible] [illegible] निर्भर्त्सनार्थमिति भावः ।

(प) एवमिति । निर्भर्त्सिता अतिपवित्राया अस्या राज्ञ्या [illegible] प्रजानि-प्राधिना [illegible] प्रजा प्रकृतिपुञ्जाः, कृत्स्न निखिल [illegible]

पद। जगत्पते रामचन्द्र! (फ)

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम्।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे॥ १९॥

[१९। त्वम् हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिं प्रियाम् अध्वरे धर्मचारिणीं यथाधर्मं नियोजय। इत्यन्वयः।]

सीता। [स्वगतम्] जाणादि 'अज्जउत्तो सीदादुक्खं पमज्जिदुं'। (ब)

[ब] जानाति आर्यपुत्र सीतादुःखं प्रमार्ष्टुम्। इति छाया।]

गोबलीबर्दन्यायेन पौरजानपदातिरिक्तो ग्राह्यः। आर्या सीता नमस्करोति, 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति न्यायादत्र नमःशब्दयोगे चतुर्थी न स्यात्। नमस्करोति प्रणमति निजचरितया कृतापवादा. प्रजा चरितावमानिता लज्जिताय जाता इति भावः। एतेन सीतायाः राज्ञीत्वे न स्वीकारे नास्ति कापि असम्मतिरिति व्यज्यते। तथा लोकपालाश्च इन्द्रादयो दिक्पालाश्च सप्तर्षयः सप्त च स्वयमागत न तथोक्ताः मरीच्यादयः, "सप्तर्षयो मरीच्यादि-मुखाः" इत्यमरः। पुष्पवृष्टिभिः सुरतरुकुसुमवर्षणैः उपतिष्ठन्ते पूजयन्ति, देवपूजार्थे उपपूर्वात्तिष्ठतेरात्मनेपदम्। आर्यामित्यनुषङ्गः। सकलसुरनिकायाभिवन्दितायाः भागीरथ्याः-प्रमुखाभिर्देवीभिश्च प्रशंसितायाः अस्याः सीतायाः देवतात्वम् अध्याहृतमिति भावः।

(फ) जगदिति। जगत्पते। जगतां त्रिभुवनानां पतिः पालकः तत्सम्बोधनम्। रामस्याविभक्तांशस्य नारायणावतारत्वादिति बोध्यम्। अथवा जगतां मर्त्यजगतां पतिरिति तत्सम्बोधनं श्रीरामस्य साम्राज्याभिषेकात् प्रकृतार्थसिद्धिरिति।

(१९) नियोजयेति। हे रामचन्द्र। त्वं हिरण्मय्याः सुवर्णनिर्मितायाः प्रतिकृतेः प्रतिमायाः पुण्यां पवित्रां पतिव्रतायत्नत्वेन सुवर्णप्रतिमायाः शुद्धिमत्तरामित्यर्थः। प्रकृतिं मूलरूपां प्रियां भार्यां त्वद्विषयकप्रीतियुक्तामित्यर्थः। धर्मपत्नीं सीताम् अध्वरे यज्ञे अश्वमेधे इत्यर्थः, आरब्धे कार्ये धर्मचारिणीं धर्मानुष्ठानशीलां यथाधर्मं स्वधर्मानुसारेण नियोजय आज्ञापय स्थापय इत्यर्थः। सुवर्णप्रतिमामिव सहचारिणीं कृत्वा अश्वमेधयागं सम्पादय, सुवर्णमयी प्रतिनिधिः प्रायश्चित्तत्वात्। अत्र पुण्यामित्यनेन 'यस्य भार्या विदूरस्था पतिता दूषिताथवा। अनिच्छुः प्रतिकूला वा' इत्याद्युद्धृतम्।

(ब) जानादीति। आर्यपुत्रः श्रीरामः सीतादुःखं सीतायाः मम क्लेशं प्रमार्ष्टुं अपनयितुं जानाति, अत्रापत्निवास्तनन्तकनिवसनसपत्न्यादिनिन्दनम् अहंत्वेव इत्यर्थः। मां पुनः स्वीकरिष्यतीति भावः।

राम। यथा भगवती आदिशति। (भ)

लक्ष्मण.। कृतार्थोऽस्मि। (म)

सीता। जीविदह्मि। (य)

[(य) जीवितास्मि। इति सम्।]

लक्ष्मण। आर्य्ये! एष निर्लज्जो लक्ष्मणः प्रणमति। (र)

सीता। वच्छ, ईदिसो चिरं जीव। (ल)

[(ल) वत्स! ईदृश चिरं जीव। इति सम्।]

अरु। भगवन् वाल्मीके! उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य पुत्रकौ कुशलवौ। [इति निष्क्रान्ता।] (व)

(भ) यथेति। भगवती माहात्म्यवती अरुन्धती यथा यत्प्रकारम् आदिशति अनुजानाति तथा अस्तु, अथवा तथा करोमीति वाक्यशेषः।

(म) कृतेति। कृतार्थः कृतः सम्पन्नः अर्थः प्रयोजनं यस्य स तथोक्तः अस्मि, सीतारामयोः समागमरूपप्रयोजनसिद्धिमान् भवामि।

(य) जीवेति। जीवितास्मि प्राणधारिणी रामेण सह पुनः समागमात् तद्वियोगेन मृतप्राया अहं लब्धप्राणा भवामीत्यर्थः। यद्वा "यथा सह स स्वर्गः" इत्युक्तरामसमागमाल्लब्धपुनरुज्जीवनवती कृतास्मीति भावः।

(र) आर्य्ये इति। निर्लज्जः निर्गता लज्जा यस्य स तथोक्तः लक्ष्मणः आत्मनिर्देशोऽयम्। प्रणमति भवतीं नमस्करोति। यः खलु आर्यादेशेन निविड़ारण्ये एकाकिनीं भवतीं परित्यज्य त्वां निर्वासितवान्, स इदानीं तव दर्शनानन्दं लब्धवान्, लक्ष्मणोऽपि पुनरपि सम्मुखं मुखं दर्शयतीत्यहो निर्लज्जता तस्य इति भावः।

(ल) वत्स इति। ईदृशोऽपि एवं निर्लज्जोऽपि सन् अपि चिरं दीर्घकालं जीव प्राणिहि। यद्वा ईदृशः अग्रजनिर्देशवर्ती सन् अपि एवमेव, चिरं जीवेति। आर्य्यपुत्रादेशेनैव त्वं मां निर्वासितवान् नात्र ते कोऽप्यपराधः न वा लज्जाकारणं, परं भ्रातृनिदेशपालनधर्मानुष्ठानात्त्वं विशेषतः प्रियोऽसीति भावः।

(व) भगेति। इमौ दृश्यमानौ सीतागर्भसम्भूतौ जानकीगर्भजातौ कुशलवौ तन्नामधेयौ पुत्रकौ प्रिय रामभद्रस्य समीपे इत्यर्थः। उपनीयेतां प्राप्येताम् रामसमीपे आनयनार्थं आज्ञाप्यतामित्यर्थः। इति निष्क्रान्तेति इति उक्त्वा निष्क्रान्ता [illegible] अरुन्धतीति शेषः। अत्रैव प्रस्तुतनाटकीयगर्भाङ्कस्य परिसमाप्तिर्मन्तव्या [illegible] अतोऽत्र-

रामलक्ष्मणौ। दिष्ट्या तथैव तत्। (ञ)

सीता। [सबाष्पाकूतम्।] कहिं ते पुत्तका मे ? (ट)

[(ट) कुत्र तौ पुत्रकौ मे ? इति सम्।]

[ततः प्रविशति वाल्मीकिः कुशलवौ च।]

वाल्मीकिः। वत्सौ कुशलवौ ! एष रघुपतिः पिता युवयोः, लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः। (ठ)

सीता। [सहर्षकरुणाद्भुतं विलोक्य।] कहं तादो ! (ड)

[(ड) कथं तात ! इति सम।]

प्रविष्टो यो रङ्गद्वारामुखादिमान्। अङ्गोऽपरः स गर्भाङ्कः सबीजः फलवानपी"ति दर्पणे। अत्र च तल्लक्षणसङ्गतिरित्थं तथाहि—"दाव मन्दभाइणी भाइरहीए जत्ताणं णिक्खिवेमि" इति बीजं, यतस्तदेव स्वल्पतया समुद्दिष्टविषयीभूतम् अरुन्धतीसाध्यसीतारामसमागमरूपं फलं प्रति निदानं सीतारामसमागमरूपस्य फलं, रङ्गद्वारामुखादिकञ्च—"प्रविश्य सूत्रधारः" इत्यारभ्य "विश्वम्भरा भगवती" इत्यादि श्लोकावसानं यावत्। सप्तमाङ्कस्य प्रस्तुतस्य च गर्भप्रविष्टोऽयमपरः अङ्कः इति प्रकल्पनप्रयोजनत्वात् समाप्तिविच्छिन्नत्वाच्च गर्भाङ्कभावस्य। अरुन्धती गङ्गाप्रभृतिभिः समाप्तिर्निर्वापिता कविना। अत्र सीताया अरुन्धत्याश्च वचनप्रतिवचनजातं प्रकृतगर्भाङ्कघटकम्। रामलक्ष्मणादीनान्तु न तथा, तेषामाधुनिकजनानामिव नाटकाभिनयसभासभ्यानां तदानीन्तन-गर्भाङ्काभिनयदर्शनार्थमिव तत्तन्मनोभावावेदकवाक्यप्रयोगात्। किन्तु तेषां वचनप्रतिवचनानि नाटकीयसप्तमाङ्कशरीराण्येव सप्तमाङ्कस्य तत्तत्पात्रविशेषाणामुक्तिप्रत्युक्तिघटितत्वात्। सीता-कुशलवाश्च अङ्कगर्भाङ्कोभयपात्रतामेव समवलम्बन्ते इति कविहृदयम्।

(ञ) दिष्ट्येति। आनन्देन तथैव तत्तत्कुशलवोत्पत्त्यादिकं विवरणं तथैव वाल्मीकि-चित्रितप्रकारेणैव आसीदिति शेषः।

(ट) सबाष्पेति। सबाष्पाकूतं सानन्दौत्कण्ठ्यं यथा तथा आहेति शेषः। तौ वात्सल्यातिशयेन पोषितौ पुत्रकौ बालकौ कुत्र वर्त्तेते, तयोर्दिदृक्षा मामतीव व्याकुलीकरोतीति भावः।

(ठ) वत्साविति। एष रघुपतिः रामचन्द्रः युवयोः पिता जनकः, लक्ष्मणः कनिष्ठतातः कनिष्ठश्चासौ तातश्चेति अल्पाच्तरादिसमासे कनादेशः। पितृव्य इत्यर्थः। सीता-देवी इयं देवी जानकी जननी माता, एष राजर्षिः जनकः विदेहेश्वरः मातामहः मातुः पिता इति मातृपितृभ्यां डामहच्। सर्वत्र युवयोरिति सम्बन्धः। जनकस्यागमनन्तु वाल्मीकि-कृतामन्त्रणादिति मन्तव्यम्।

कुशलवौ। हा तात! हा अम्ब! हा मातामह! (ञ)

रामः। [सहर्षमालिङ्ग्य।] ननु वत्सौ! पुण्यैः प्राप्तौ स्थः। (क)

सीता। एहि जाद कुस! एहि जाद लव! चिरस्स परिस्सजध पुणो जम्मन्तरगदं जणणीं *। (ख)

[(ख) एहि जात कुश। एहि जात लव। चिरस्य परिष्वजेथां पुनर्जन्मान्तरगतां जननीम्। इति छाया।]

कुमारौ। [तथा कृत्वा।] धन्यौ स्वः। (ग)

सीता। भअवं! पणमामि। (घ)

[(घ) भगवन्! प्रणमामि। इति छाया।]

(झ) सहर्षेति। सहर्षकरुणाद्भुतमानन्दशोकाश्चर्य्यं यथा स्यात्तथा विलोक्य निर्व्वर्ण्य पितरमिति शेषः पितृसाक्षात्कारात् हर्षः, आत्मनः दुःखस्मरणात् करुणः, अतर्कितागमनात् आश्चर्य्यञ्च इति ज्ञेयम्

(ञ) हा तातेति। सर्व्वत्र हाशब्दः हर्षद्योतकः। एतेषां युगपद्दर्शनात् कुशलवयोः हर्ष इति। यद्वा "हा विषादशुगार्त्तिषु" इत्यमरवचनात् विषादबोधकोऽयं हाशब्दः। विषादश्चात्र जन्मावधिपितृपरिज्ञानाभावविज्ञानात्। राजकुमारावपि आवाम् एतावन्तं कालं यावत् रामेण न जिज्ञासितवन्तौ इति भावः।

(क) सहर्षेति। ननु भोः वत्सौ प्रमोदास्पदभूतौ पुण्यैः प्राक्तनैः सुकृतैः प्राप्तौ स्थः युवामिति शेषः। पूर्व्वकृतपुण्यमन्तरेण न मया युवयोः प्राप्तिसम्भावनेति भावः।

(ख) एहीति। चिरस्य परिष्वजेथां बहुकालमालिङ्गतम्, अल्पक्षणयाऽऽलिङ्गने न तथा तृप्तिरिति भावः। पुनर्जन्मान्तरगताम् जननीम् अन्यत् शेषम् इति जन्मान्तरं गतवती ता पातालोदरात् पुनरुद्गता पुनर्जन्मान्तरप्राप्तामिव अथवा पूर्व्वानुभूतदुःखस्य कठोरतया मुमूर्षुतदुपगमात् अनुभूतजन्मान्तरभावामिवेत्यर्थः। तथाच अहं मन्ये, यत् नूनं मे जन्मान्तरीयकृता सम्पत्तिः, कथमन्यथा अल्पमात्रेणैव तथाभूतदुःखसम्बन्धविश्रान्तिः, इदानीं सर्व्वमेव जन्मदुःखं नूतनं पर्य्यवसितं इति गूढार्थः। मा चिरमालिङ्गत गावमिति कुशलमित्यर्थः।

(ग) तथेति। कुमारौ कुशलवौ तथा कृत्वा जननीं परिष्वज्येत्यर्थः। धन्यौ स्व जननीसम्मिलनात् श्लाघ्यजीवनौ भवाव।

(घ) भगवन्निति। हे भगवन् माहात्म्यशालिन्! त्वदीयैरेव न चिरं दु ख

* मं परिस्सजह ओअन्दरादो आअदं इति पाठान्तरम्

वाल्मीकिः । वत्से ! ईदृश्येव चिरं भूयाः । (ङ)

सीता । अम्महे ! तादो, कुलगुरू, अज्जाअणो, ससत्तुआ अज्जा सन्तादेई, सलक्खणा सुप्पसण्णा अज्जउत्तचलणा समं कुसलवाणि दीसन्ति, ता णिब्भरम्हि आणन्देण । [च]

[(च) आश्चर्यम् ! तात, कुलगुरु, आर्य्याजन, सभर्तृकार्य्या शान्तादेवी, सलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्रचरणाः समं कुशलवावपि दृश्यन्ते, तन्निर्भरास्मि आनन्देन । इति मम ।]

[नेपथ्ये कलकलः]

वाल्मीकिः । [उत्थायावलोक्य च ।] उत्खातलवणो मधुरेश्वरः* प्राप्तः । [छ]

सन्तोषपरिप्लवात् स्वामिचरणसन्दर्शनेन सीतेव त्वां भवामि, कथमन्यथा तत्सम्भावनमपि वोढ़ीति इति तात्पर्य्यम् । महर्षे ! प्रणमामि भवन्तम् अभिवादये ।

(ङ) वत्से इति । ईदृशी एव एवं पत्यपत्यसङ्गता एव चिरं भूयाः । न पुनस्तद्विरहिते-त्यर्थः । त्वं चिरं पत्या पुत्राभ्याञ्च अविरहिता भूयाः इत्यर्थः ।

(च) अम्महे इति । अहो आश्चर्य्यं तात पिता राजर्षिर्जनकः, कुलगुरु, कुलस्य वंशस्य गुरुः आचार्य्यः वशिष्ठः, आर्य्याजन कौशल्याप्रभृतयः पूज्या श्वश्रूजना इत्यर्थः । सभर्तृका ऋष्यशृङ्गसमन्विता आर्य्या मान्या शान्ता देवी ननान्दा शान्ता, सलक्ष्मणा सौमित्रि-सहिता सुप्रसन्ना आनन्दपूर्णा नतु पूर्व्ववत् शोककालुष्ययुक्ता सौम्याकारा इति यावत्, आर्य्यपुत्रचरणा आर्य्यपुत्रो रामचन्द्र इत्यर्थः । महागुरुत्वात्पत्युश्चरणपदोपन्यासः । अपिशब्दार्थे । अथवा सलक्ष्मणा लक्ष्मणेनोपास्यमानतया तद्युक्ता सुप्रसन्ना प्रसादकारिणः तत्र नतानाम् अनुग्रहकारित्वादित्यर्थः । चरणास्तु स्वरूपेण पादा एव इति । कुशलवावपि कुशलवौ च समम् एकदा दृश्यन्ते एते सर्व्वेऽपि युगपदेव मयावलोक्यन्ते । तत् तस्मात् सकलानामेकदा दर्शनाद्धेतोः । आनन्देन आह्लादेन निर्भरा व्याप्ता परिपूर्णा अस्मि अहं भवामि । इतः पश्चात् पूर्व्वं न अहं स्वप्नविषये स्वप्नेऽपि सम्भावनाहं विदितवती, तदयमाकस्मिको मे निरतिशयलौ-किकानन्दहेतुः सम्प्राप्त इति भावः ।

(छ) उदिति । उत्खातः विनाशितः लवणः मधुदैत्यात्मजः येन स तथोक्तः । मधुरेश्वरः मधुरानामजनपदस्याधिपतिः शत्रुघ्नः प्राप्तः अस्यापि प्रथमाङ्के रामप्रदर्शित-त्वात्प्रवर्त्तने निवेशनम् । इह उपस्थितः । तस्यैव सैन्यसमूहस्यायं कोलाहल इति । सर्व्व-वृत्तान्तं तत्प्रभावेण पूर्व्वमेव वाल्मीकिना विदितम् इति ज्ञेयम् । कुशीलवसंसर्गेण

* मधुरेश्वर इत्यपि पाठान्तरम् ।

लक्ष्मणः । सानुषङ्गाणि कल्याणानि । [ज]

रामः । सर्वमिदमनुभवन्नपि न प्रत्येमि, यद्वा प्रकृतिरियमभ्युदयानाम् । [झ]

वाल्मीकिः । रामभद्र ! उच्यताम्, किन्ते भूयः प्रियमुपहरामि ? [ञ]

रामः । अतः परमपि प्रियमस्ति ? तथापीदमस्तु—[ट]

मधुदैत्यापत्येन लवणेन विवासितैर्यमुनातीरोपान्तवर्त्तिभिर्मुनिभिरतिभीत्या क्रोशितेन श्रीरामचन्द्रं च लवणविध्वंसं संसाध्य तपोविघ्नव्यपोहनाय नियुक्त शत्रुघ्न श्रीरामसमादिष्टं यथायथं सम्पाद्य तेनैवादिष्टो मधुदैत्याधिकृतं मथुराराज्यं स्वं राजत्वं पर्य्यकल्पयदिति पौराणिकी वार्त्ता समनुसन्धेया ।

(ज) सानुषङ्गाणीति । सानुषङ्गाणि अनुषज्यन्ते अनुसम्बध्यन्ते यानि इत्यनुषङ्गाणि कर्म्मणि अनुप्रत्ययः । सम्बन्धमनुवर्त्तिष्यत इत्याचार्य्यभगवत्पतञ्जलिप्रयोगोऽपि ननु सकलम् । कल्याणानि कलत्रपुत्रादिसमागमरूपश्रेयांसि सानुषङ्गाणि सानुगानि सहचराणीति यावत् । कलत्रपुत्रसमागमरूपाणि कल्याणानि अनुप्रागमनरूपेण कल्याणान्तरेण सम्बद्धानीत्यर्थः । सम्पत् सम्पदमनुबध्नाति विपद्विपदमिति वचनम् अवितथमिति भावः ।

(झ) सर्वमिति । इदं सर्वं पुत्रकलत्रादिसमागमरूप सुखमित्यर्थात् । अनुभवन् अपि साक्षात् कुर्व्वन् सन्नपि न प्रत्येमि निश्चिततया न विश्वसिमि, अत्यन्तदुःखदग्धशालिनो मयैतत्सुखसमवायलाभस्यासम्भाव्यत्वादिति भाव । ननु पित्तदूरत्वादिदोषाधीनमेव ज्ञानं भ्रम इति तत् प्रकृते तव कोऽपि तादृशो दोषो नास्तीत्यं तावतापि कथ न प्रत्येषीत्यत आह—यद्वेति । अथवा अभ्युदयानां श्रेयसाम् इयम् ईदृशी युगपत्समागमरूपा प्रकृतिः स्वभावः । मङ्गलानाम् अयमेव स्वभाव यत् साहित्यं नापततीति प्रत्ययमीश्वमप्येतन भवितुमर्हतीति भावः ।

(ञ) रामेति । ते तव भूयः पुनरपि पुत्रकलत्रादिसमर्पणादन्यदपि किं कीदृशम् प्रियम् इष्टम् उपहरामि उपहारीकरोमि तदुच्यताम् । मया एतस्मादन्यत् किं प्रीतिकरं कार्य्यं मे क्रियता तद्वदेत्यर्थः । इत एव सर्वथा त्वदर्थ कर्यो विधास्यामीति प्रथमादार्थः सूचितः ।

(ट) अत इति । अतःपरं पुत्रकलत्रादिसमागमादधिकमपि प्रियं किम् अस्ति अपि नेत्यर्थः । तथापि इतोऽधिकप्रीतिकरकार्य्याभावेऽपि इदं भरतवाक्यं अस्तु । यद्वा अतःपरं पुत्रकलत्रलाभादन्यदपि प्रियं प्रीतिदायकं वस्तु अस्ति तत्र किं निरतिशयाविनश्वरानन्दलाभात् सर्व्वविधसुखसम्पत्तः कैवल्यं गरीयः इत्यर्थं ... ैवलक्ष सर्वविधवस्तुसमागमकाले सत्यपि संसारसुखेषु अतीतस्पृहतया नाधुना ... अतः इदं वक्ष्यमाणं भरतवाक्यरूपम् अस्तु भवतु ।

पाप्मभ्यश्च पुनातु वर्द्धयतु च श्रेयांसि सेयं कथा*
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च।
तामेतां † परिभावयन्त्वभिनयैर्विन्यस्तरूपां ‡ बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥ २०॥

[२०। माता इव गङ्गा इव च जगतः मङ्गल्या च मनोहरा च सा इयं कथा पाप्मभ्यः पुनातु च श्रेयांसि वर्द्धयतु च तु अभिनयैः विन्यस्तरूपां ताम् एतां शब्दब्रह्मविदः परिणतप्रज्ञस्य कवेः इमां वाणीं बुधाः परिभावयन्तु। इत्यन्वयः।]

[इति निष्क्रान्ताः सर्वे।]

इति सम्मेलनं नाम सप्तमोऽङ्कः।

समाप्तमिदं महाकविभवभूतिविरचितमुत्तररामचरितं नाम नाटकम्।

---

(२०) तदेव भरतवाक्यं प्रस्तौति—पाप्मभ्य इत्यादि। माता जननीव, माता हि दुःखविध्वारयित्री सुखदा च भवति। गङ्गा जाह्नवीव, गङ्गा च पापनाशिनी मोक्षदा च भवति। तद्वद्रामायणकथा चेति भावः। जगतः लोकस्य मङ्गल्या कल्याणकरी मनोहरा मनोज्ञा आह्लादजनिकेति यावत्। सा इयं प्रसिद्धा इयं बुद्धिस्था कथा, रामायणात्मकवाक्यप्रबन्धरूपा। सा च वाल्मीकीयचतुर्विंशतिसाहस्रिका। पाप्मभ्यः कल्मषेभ्यः जगत भुवनं पुनातु पवित्रीकरोतु। जगत इति षष्ठ्यन्तं विपरिणम्य योजनीयम्। तथा श्रेयांसि ऐहिकपारत्रिकाणि मङ्गलानि वर्द्धयतु पुत्रपौत्रादीनि मोक्षावसानानि कल्याणानि उपचिनोतु इत्यर्थः। प्रजानां क्षेमवत्त्वे अकल्मषत्वे च राज्ञोऽपि तथात्वमिति, भवत्त्विदमर्थ्ये इति भावः। तथा तां प्रसिद्धाम् एतां रामायणीं कथाम् अभिनयैः आङ्गिकादिभिश्चतुर्विधैः अवस्थानुकारैः 'भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथे'ति साहित्यदर्पणः। विन्यस्तरूपा विन्यस्तं विशेषेण न्यस्तं निहितं रूपं शरीरं यस्याः सा तथोक्ता ताम्। यद्वा अभिनयैरितीत्थम्भूतलक्षणे तृतीया। तेन अभिनयविशिष्टो यो विन्यासः रचना वैशिष्ट्यं च प्रतिपादकत्वस्वरूप विन्यस्तं विन्यासेन निष्पन्नं रूपं शरीरम् आनुपूर्व्यर्थः, यस्याः सा ताम्।

---

* पुनाति वर्द्धयति च श्रेयांसि इति पाठान्तरम्।

† वाल्मीकेः परिभावयन्तु इति विद्यासागरधृतः पाठः।

‡ विन्यस्तरूपा. इति क्वचित् पाठः।

रामायणकथायाः किञ्चित् परिवर्तनपरिवर्द्धनादिभिः अभिनययोग्यतयोपनिबद्धां नाटकाकृतिमित्यर्थः । तां प्रसिद्धाम् एताम् इदानीम् अभिनीताम् इमां सचराचरात्मभूतयामि प्रत्यक्षीकृतामित्यर्थः । शब्दब्रह्मविदः शब्द एव ब्रह्म तद्वेत्तीति तस्य परिच्छिन्नत्वापरिच्छिन्नत्वाभ्यां परब्रह्मसाम्याद्रूपणम् । शब्दार्थतत्त्वज्ञस्येत्यर्थः । परिणतप्रज्ञस्य परिणता परिपाकं प्राप्ता लोकातिशायिनीति यावत्, प्रज्ञा बुद्धिः यस्य स तथोक्तस्तस्य अलौकिकमनीषासम्पन्नस्येत्यर्थः । अन्यथेदृशी रसभावचमत्कारिणी रचनाचातुरी न स्यादिति भावः । कवेः सर्वज्ञशिरोमणेः वाल्मीकेः, भवभूतिकवेश्चेति ध्वन्यते । इमां वाणीं भरताभिनेयार्थरामायणप्रबन्धरूपां वाचं भवभूतिरचितोत्तररामचरितनाटकरूपामिति च ध्वन्यते । बुधाः पण्डिताः सहृदयाः । शब्दब्रह्मविद इति विशेषणं बुधानामपि केचिद् योजयन्ति । परिभावयन्तु पर्यालोचयन्तु परिचिन्तयन्तु । "भू अवकल्कने" अवकल्कनं मिश्रीकरणमित्येके । परिपूर्वकस्य भू सत्तायामित्यस्यावधानार्थकत्वाच्चास्याः प्रसक्तिः । वाल्मीकिवागेव भवभूतिवागात्मना परिणता सती पापमस्य जगत् पुनातु श्रेयांसि वर्द्धयतु च तामतो बुधाः परिभावयन्त्विति केचित् । एतेनोत्तररामचरितस्य गाम्भीर्यमाधुर्ये लभ्येते । अत्र कथायां मातुः गङ्गायाश्च साम्यात् शब्दत एवावगमात् पूर्णोपमालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

इतीति । सम्मेलनं नाम सम्मेलननिमित्तः प्रसिद्धः रामसीतालवकुशादीनां परस्परमेलनात्मक इत्यर्थः । सप्तमोऽङ्कः सप्तमोऽध्याय इति समाप्त इत्यर्थः ।

दृष्टावष्टम्भहेतुः क्षितिरतिमहती यावदापो रसज्ञा
चक्षुस्तेजः समस्तं समुदितमरुतो यस्य नित्यं श्वासभूताः ।
व्योम व्याकीर्णरूपं श्रुतिततटपटहा दीप्तरूपोऽपरूप-
स्तादृग्विश्वोभयश्रीर्जगदुपकृतये जायतां भूतदेवः ॥

इति श्रीमन्महाकविभवभूतिकृतोत्तररामचरिते श्रीगुरुनाथविद्यानिधि-
भट्टाचार्यविरचिता नवदीपिकाटीका समाप्ता ॥

॥ ॐ तत्सत् — ॐ तत्सत् - ॐ तत्सत् ॥

गभर्णमेण्टपरिगृहीतकाव्यद्वितीयपरीक्षापाठ्यरूपेण
निर्वाचितस्योत्तररामचरितस्य
प्रश्नमाला।

१८९७—१। सुविचिन्तितं भगवत्या राजधानीस्थितस्य खलु तैस्तैर्जगतामाभ्युदयिकै रामभद्रस्य नियता चित्तविक्षेपाः पर्यायस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ इति।

(क) व्याख्यायतामयं सन्दर्भः। (ख) भगवत्या इति पदेनात्र का परामृश्यते?

२। सीता। (स्वगतम्) अम्महे जवसेण एद्दहेण पमादेण लज्जाविदह्मि *** आवज्जेमि।

(ग) संस्कृतेनानूद्यतामयं सन्दर्भः।

३। 'कष्टं जनः कुलधनै'रित्यादि। व्याख्यायतामयं श्लोकः। प्रदर्श्यतां च पूर्वार्द्धेन सह परार्द्धस्य सङ्गतिः।

४। कतमया प्रस्तावनया उत्तरचरिते पात्रप्रवेशः कृतः? लक्षणमुल्लिख्य समर्थ्यताम्।

१८९८—१ (क) न हि लक्ष्मण एष ते गुरुर्नो राजा रामः समाज्ञापयति।

(ख) हन्त विपर्यस्तः सम्प्रति जीवलोकः।

(ग) देवि! देवि! अयं पश्चिमस्ते रामस्य शिरसा पादपङ्कजस्पर्शः।

उद्धृतेषु वाक्येषु वक्ता कुत्र कीदृशश्च—व्याख्यया विशदीक्रियताम्।

४। धन्ना सा जा वज्जवसेण * * जीवलोअस्स। संस्कृतेनानूद्य व्याख्यायतामेष सन्दर्भः।

२। 'अयि कठोर यशः किल ते प्रिय'मित्यादि श्लोको व्याख्यायताम्।

१८९९—१। (क) एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विक्लवयति।

(ख) किमत्रोच्यते? प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य परमं चैतदन्योन्यसंश्लेषणं पित्रोः।

(ग) सखि वासन्ति! आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि, तत् त्वं तावदेनां धारय।—उद्धृतेषु वक्ता कुत्र कीदृशश्च? व्याख्यया विशदीक्रियताम्।

२। 'हा हा देवि स्फुटति हृदय'मित्यादि श्लोको व्याख्यायताम्।

१९००—१। पश्यत्वं मे आकारानुभवगाम्भीर्यसम्भाव्यमानविविधलोकोत्तरचरितातिशयमार्यो महापुरुषम्। उद्धृतेऽस्मिन् वाक्ये समस्तपदस्य समासविग्रहो लिख्यताम्, निर्दिश्यतां च एनं महापुरुषम् इत्यनेन कः परामृश्यते?

२। (क) अपि खलु स्वप्न एव? न चास्मि सुप्तः *** पुनः पुनरनुबध्नाति माम्।

(ख) सम्भावनीयो राजन्येऽपि प्रभवः।

चतुर्थेषु वाक्येषु वक्ता: कुत्र कीदृगाशय: ? व्याख्यया विशदीक्रियताम्।

(ख) 'इह हि नित्यानुषक्तेन' इत्यादि श्लोकस्य 'आसीदियं दशरथस्य गृहे' इत्यादि श्लोकस्य च व्याख्या कार्या।

१९०१—(क) हहो हहो भद्र वि अथवा त्वयिदत्तमिदमूढचु सन्तपतर्षीपञ्चपत्यावेदि सत्तापथ। संस्कृतेनानूद्य व्याख्यायताम्।

१। 'एतदेवमतघोरवज्रपतनं' इत्यादि श्लोक:।

कौशल्या। भगवति! परित्रायस्व परित्रायस्व प्रमादय कथितं राजर्षिम्

अरुन्धती। 'एतद्धि परिभूतानां' इत्यादि श्लोक.।

जनक:। 'शान्तं वा रघुनन्दने' इत्यादि श्लोक।

(क) व्याख्यया विशदीक्रियतामयं सन्दर्भ।

(ख) "कथितं" "शान्तं" "भूयिष्ठं" "मौग" पदान्येतानि साध्यानि। किन्नावत् प्रथमपद-
स्यास्य रूपान्तरम् ?

१९०२—जानासि वत्स, दुर्मनायमाना देवी विनोदयितुम्, तत् कियन्तमवधिं यावत् ?

तदिदमन्यमन्तरपुराणप्रशंसाद्यं ततभवतस्तातजटायुषश्चरितविक्रमोदाहरणं।

अन्धतामिस्रा ह्यसूर्या नाम ते लोका तेभ्य: प्रतिविधीयन्ते ये आत्मघातिन इत्येवमृषयो मन्यन्ते।

(क) व्याख्यया विशदीक्रियन्तामिमे सन्दर्भा। तत्र च रेखाङ्कितपदानां वैयाकरणविधि-
रप्युल्लेख्य.।

(ख) "प्रतिविधीयन्ते" "आत्मघातिन" "मन्यन्ते"—प्रकृतिभूतानामेषां धातूनां लोट्-लृङ्-
विभक्तौ कर्त्तरि कर्मणि च प्रथमपुरुषैकवचनं कीदृशानि रूपाणि ?

(ग) कथमाद्यनुत्पन्नस्योऽयं मन्वन्तरपुराणान्धतामिस्रशब्दयो: ?

१। अथवादि समसि तदा निष्कारणपरित्यागिणो...पापामि।—संस्कृतेनानूद्यतामयं प्रबन्ध:।

'उपायानां भावादविरतविनोदव्यतिकरै'रित्यादि श्लोकस्य व्याख्या कार्या।

१९०३—'दत्ताभये त्वयि यमादपि दण्डधारे' इत्यादि श्लोक।

(क) "यमात्" इत्यत्र कथं पञ्चमी ? केन पदेन चास्यान्वय.? चरमौ इत्यत्र का विभक्ति: ?
कथं वा ? "दण्डधार"-पदस्य कीदृशी व्युत्पत्ति ? "इदं कहि:" इत्यस्य कीदृशी कहि:
वक्तुरभिप्रेता ? तस्यात्र लाभसम्बन्धी वृत्तान्त आमूलं संक्षेपेण वर्णनीय:।
पद्यमिदं केन छन्दसा निबद्धम् ?

१। सम्प्रति तु परिसमाप्त तत् द्वादशवार्षिकं सत्रं ऋष्यशृङ्गेण विसर्ज्जि रघ:।

२। अर्थैतज्जन्मपारायणोपनिषदं भगवान् कृशाश्व: पर:सहस्रपरिवत्सर। ।अयमाय
विश्वामित्राय प्रोवाच। (१) अपि नटस्थित इव आलाप:, ज्ञातं प्रश्न न ?

४। मिथिलगमनसंचिन्ता क्रतु दुखं सम्भवेनयं कीदि। (ख) पञ्चपोषव्यवहारभाजि निर्दिष्ट इति गद्यांश व्याख्यायन्ताम्। (ग) "कण्वमङ्गेन......गुरव:" इत्यंशो वाच्यान्तरे परिणम्यताम्। (घ) "विश्वामित्राय" इत्यत्र कथं चतुर्थी? "प्रश्नेन" इत्यत्र कथं तृतीया? (ङ) "पर:सहस्र" "विश्वामित्र" "कण्वमत" इत्येतेषां समासवाक्यानि लिख्यन्ताम्?

१९०४—१। 'परिपाण्डु दुर्बलकपोल-सुन्दरं' इत्यादि। (उत्तर)

'वसने परिधूसरे वसाना' इत्यादि। (शकु)

व्यस्य तावत् समस्तपदजातं विशद्यतामिदं श्लोकद्वयम्। आभ्यां प्रत्यक्षात् प्रतिभासितयो: सीताशकुन्तलयो: कतरा तावत् कविसंश्रये कथं प्रकृतानुकूला मनोहरा च? विदग्धवर्णने चात्र भवभूतिकालिदासयो: कस्य शक्तिर्गरीयस्त्वेन रोचते श्रीमद्भ्य:?

'चिरं ध्यात्वा ध्यात्वा निहित इव'—इत्यादि श्लोक:।

(क) तात्पर्यमस्य संस्कृतेन स्फुटीक्रियताम्। प्रथमचरणे किं तावत् प्रस्तुतानुकूलं वर्णेन समुपलभ्यते? द्वितीयचरणे पविकारस्य कोऽर्थ:? कियदर्थको वा स:? तृतीयचरणे जगती जीर्णारण्यत्वं कीदृशं? कथं वा तत् सङ्गच्छते? चरणस्य जीर्णत्वविशेषणपरिहारे का क्षति? "तदनु" इत्यत्र यदि समास: स्यात् तर्हि नाम्नोऽस्य: कार्यं व्यासवाक्यप्रदर्शनञ्च कर्तव्यम्। "पच्यत" इति पदं परिशील्यताम्। कदा कुत्र कस्येयमुक्ति:? 'प्रमाद्यु शिशिरीभव'इत्यादि पद्यं प्रकृतोऽस्य प्रकरणवर्णनपुर:सरं समस्तपदानि विग्रह्य व्याख्येयम्। "पात्र" इत्यत्र कोऽर्थ:? किमत्र हृतम्, किं वा तस्य लक्षणम्?

१९०५—१। उत्तरचरितस्य प्रथमेऽङ्के कथं चालेख्यदर्शनं उपन्यस्तम्? कथं वा मिथिलागमनं न प्रदर्शितम्? २। "अशिस्रेव लताग्रहे" इत्यादि श्लोकस्य मल्लिनाथरीत्या व्याख्या कार्या। (ख) "इयं गेहे लक्ष्मी"रित्यादि श्लोकस्य सरलसंस्कृतेन तात्पर्यं प्रकाश्यम्। (ग) "अशिस्रेव लताग्रहे" इति कल्पिता किमुद्दिश्य कथिता? तत्र क्लिष्टं न वा?

१९०६—१। उत्तरचरितमिति नाम: किं तावत् सार्थकम्? कथा द्विधा वा कथमेव नाम्ना नाटकं प्रतिपद्यते? २। उत्तरचरितस्य प्रथमेऽङ्के चालेख्यदर्शनस्य किं कार्योपयोगित्वम्? ३। तात्पर्यप्रकाशपुर:सरं सरलसंस्कृतेन व्याख्यायताम् श्लोकद्वयम्—"स्तैव कौतुकवता अपि" इत्यादि। "चिरं ध्यात्वा ध्यात्वा" इत्यादि च। (ख) 'स्तैव कौतुकवता' इत्यादि श्लोके किं छन्दं, किंवा तस्य लक्षणम्? (ग) व्याकरणानि पदानां समासनामोल्लेख: क्रियताम्—अदीर्घवृत्ता, देया, कुसुमकवलितलक्षण इति पदानां।

१९०७।—उत्तरचरितस्य चतुर्थे अभिज्ञानशकुन्तलस्य तृतीये च विष्कम्भकाख्या नाटकीयस्य वस्तुनः किमुपक्रान्तम्? २। व्यासवाक्यप्रदर्शनपूर्वकं वक्तृबोद्धव्य-निर्देशसहितं व्याख्यायताम् —"प्रथमविरलालीकवक्र-निबद्ध-निरन्तर ..गिरि प्रसवस ।" भूयसा जीविधर्म, एव ..प्रेमाणमामनन्ति।" "एवमितत्। एते हि हृदयमर्म-च्छिदः...मनीषिणः।"

(क) "एवमितत्" किम्? "एते हि" एते के?

३। विवृयताम्—

'न किल भवतां स्थानं' इत्यादि श्लोकः।

'चूडामण्डनबन्धनं तरलयत्याकृतजो वेपथुः' इत्यादि च श्लोकः।

१९०८—'यद्दीतो वः पुः परिणयविधौ' इत्यादि (क)। 'जातस्य ते पितुरपीन्द्रजितो' इत्यादि च।

(ख) अनयोः श्लोकयोरेकतर एव वक्तृबोद्धव्यनिर्देशपुरःसरं व्याख्यायताम्। (ख) द्वितीयः श्लोकः केन छन्दसा निबद्धः? किं वा तस्य लक्षणम्? (ग) "क" चिह्नितस्य चतुर्थपादे 'ख' चिह्नितस्य च तृतीयपादे यदि कश्चिद्दोषः प्रतीयते स सस्वरूपतो नामतश्च निर्दिश्यताम्। ४। उत्तरचरितस्य प्रथमाङ्के अष्टावक्रमुखेन वशिष्ठ-सन्देशनिवेदनम् चालेख्यदर्शनञ्च कथं नाटकीयवस्तु प्रकृतम्?

१९०९—१। (क) 'पुरा यत्र स्रोतः पुलिनमधुना' इत्यादि। (ख) 'कूजत्कुञ्जकुटीर कौशिक' इत्यादि च। (क) वक्तृबोद्धव्यप्रतिवचननिर्देशपूर्वकं व्याख्यायताम्। त्रिपदसंविजिति यस्य धातोरूपं तस्य लुङि कतिपयरूपाणि प्रदर्शय।

(क) जाइ की दर्शितं एषो ·विमाण चोदराविदि। संस्कृतेन परिवर्त्तय।

१९१०—(ख) 'अपत्ये यत्तादृग् दुरितमभवत्तेन' इत्यादि श्लोको व्याख्यायताम्।

१९११—१ उत्तरचरिते आलेख्यदर्शनमुपन्यस्तम्? कियदुपकृतमनेन नाटकीयं वस्तु?

(ख) 'सर्वथा व्यवहर्त्तव्ये कुतो ह्यवचनीयता'—इत्यादि। सरलसंस्कृतभाषया छन्दोनिर्देशपूर्वकं तात्पर्य्यं लेखनीयम्।

१९१२—१। कीदृशी खलु प्रस्तावना उत्तरचरिते? लक्षणमुल्लिख्य समर्थ्यताम्।

२। सीता—"जानामि अज्जउत्त किन्तु सन्तावआरिणो बन्धुअणविप्पओआ होन्ति।"

रामः। "एवमेतत्। एते हि हृदयमर्मच्छिदः संसारभावाः, येभ्यो बीभत्समानाः सन्त्यज्य सर्वान् कामान् अरण्ये विश्राम्यन्ति मनीषिणः।" (क) प्रकरणसङ्गतिपुरःसरं व्याख्यायितामुल्लिखितौ अंशौ। (ख) सीतासमाश्वासनसमये कथं न रामेण वैराग्यकरं वचनमुक्तम्? कविना किमर्थमिदमुपन्यस्तम्? ।दिया जायति"—केषुचित् पुस्तकेषु "अदिया"—स्थाने "सर्वा पा" नास्ति।

कतरस्मात्कारणात् भीमस्य वधं रोचयते ? (घ) "पाञ्चालदर्शनं" यदि परित्यक्तं भवेत् तदा का क्षति नाटकीयवस्तुन ? गृहीते च तस्मिन् को वा उपकारः ? 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥" व्याख्यायतामयं श्लोकः । (क) न केवलं इदमुक्तम्, अन्यत्रापि ? किमर्थं कस्याव चापिकार । (ख) किमर्थं शोभन तावत् रामस्य पुरतः आयामध्या सीतायाः समुपस्थापनम ? कतिचित् स्थलान्युद्धृत्य समालोच्यतां तावत् उत्तरचरितमभिज्ञानशकुन्तलं च ।

१८१३—"अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् । आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥" (ख) अस्य श्लोकस्य तात्पर्यं विवृणु । कं कं ग्रन्थांशमाश्रित्य कं कं प्रबन्धः किमन्यथान्तरं सूचयति न वा ? सूचयति चेत् कीदृक् ? "अथ कोऽयमिन्द्रमणिशिलाच्छवि" इत्यादि । (ग) समस्तपदानां व्यस्तवाक्यनिर्देशेन व्याख्यायताम् ।

२ । (अ) सीता । (ससाध्वसकम्पं किञ्चिदपसृत्य) ऐहिकं इदं क्रीडनं सहचर ।

(आ) सीता । (सभयगद्गदम्) अज्जउत्त, परित्ताअहि एदं ... ।

(क) उक्तसन्दर्भयोः तात्पर्यं विवृणु ।

१८१४—(१) 'किन्त्वनुष्ठाननित्यत्वात्' इत्यादि (२) "अकिञ्चिदपि कुर्वाण ..." इत्यादि । (३) 'त्वाद्दृशमथभिधान' इत्यादि ।—१, २, ३—श्लोका व्याख्यायताम् । १मश्लोके 'अनुष्ठाननित्यत्वात्' 'अनुष्ठाननित्यत्वं' इति पाठान्तरं वर्तते, तयोः कतरः पाठः समीचीनः ? युक्तिं प्रदर्शय । आ ... ? 'अन्वाहित' इति युक्तः प्रयोगो वा ? मतमुल्लिख्य निजमतं समर्थयस्व । ३—श्लोके तत्पदस्य कथं क्लीवत्वम् ?

१८१५—१ । 'सत्यातीतेति रदनुरगस्यन्दनस्थौ' इत्यादि । व्याख्यायतां पद्यमिदम् । कोऽत्र अलङ्कारः ? तस्य च लक्षणमुद्धियताम् । २ । 'चोदयितु' इत्यादि एतदुक्तश्च चिरसम्भावसान्निध्योपनीतेन पञ्चतत्त्वपर्यन्तेन दोहदाय वि सन्दायं ... इवन्तेन ... विष न दृष्टो । ३ । ... न केवलं मृगविषय... दैवयन्थ, कर्णोदारविन्द... केन सविस्तारदोहददोहदैरेव च ... । (ख) एषु ... प्राकृतपद्यानि निर्दिश्यताम् । (क) 'न किल भवतां स्थानं' इत्यादि । (ख) '...' इत्यादि १ । 'क' चिह्नितस्योत्तरांशस्य वाच्यपरिवर्तनं विधेयम् । २ । एतस्य पद्यद्वयस्य चतुर्थपादयोरन्यतर का ... दोषः ... ... वा ... निर्दिश्यताम् ।

१९१६—पाप्मभ्यश्च पुनातु वर्द्धयतु च...इत्यादि। इदं रामवाक्यं भरतवाक्यं कविवाक्यञ्चेति त्रीणेव पक्षानाश्रित्य व्याख्यायतामयं श्लोकः। भवभूतेः शब्दब्रह्मविद् इति विशेषणं युज्यते नवा? उत्तरचरिते तस्य वेदाभिज्ञतानिदर्शनानि कानिचिन्निर्दिश्यन्ताम्।

(४) भाण्डायन—समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः। तं हि धर्मसूत्रकाराः समामनन्ति। सौधातकि—भो निगृहीतोऽसि।

भाण्डा—कथमिव? सौधा—येन आगतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता।

प्राकृतांशं संस्कृतेन परिणमय्य व्याख्यायतामद्भुतः सन्दर्भः।

१९१७—(क) 'अकिञ्चिदपि कुर्वाणः ' इत्यादि। (ख) 'प्रत्युप्तस्येव दयिते ..' इत्यादि च। क—श्लोकस्य व्याख्या कार्या। ख—श्लोके "तृषादीर्घस्य" इत्यत्र दीर्घपदस्य कोऽर्थः सङ्गच्छते? केन वा चक्षुष दीर्घत्वम्?

३। अपि जानाति श्रीमान् कथं चालेख्यदर्शनं भवभूतिना उपन्यस्तम्? कथं वा छाया?

४। 'कष्टो जनः कुलधर्मे'त्यादि। अस्मिन् 'तस्य'इत्यत्र का विभक्तिः? कष्ट इति पदस्य कोऽर्थः? विशदयतामयं श्लोकः

१९१८—'चिरं ध्यात्वा ध्यात्वा...' इत्यादि। '(२) अकिञ्चिदपि कुर्वाणः' इत्यादि। अलङ्कार निर्देशपूर्वकं व्याख्या कार्या। उत्तरचरितस्य कवयश्च अत्युत्तमाः श्लोकाः उद्धृयन्ताम्।

१९१९—उत्तरचरिते कथमालेख्यदर्शनं परिकल्पितम्? कथं वा छाया?

(क) 'सर्वथा व्यवहर्तव्ये...' इत्यादि (ख) 'पुरा यत्र स्रोतः...' इत्यादि च। स्वस्व-मातृभाषया व्याख्या कार्या अनयोः श्लोकयोः।

उत्तर-राम-चरितम्

(सार-सङ्कलन)

प्रथम अङ्क ।

सबसे पहले कविने पूर्ववर्त्ती कवियोंको नमस्कारकर परमात्माकी अंशभूता सरस्वतीकी कृपा लाभ करनेकी कामना की है। मङ्गलाचरणके बाद सूत्रधार और नटने आकर नाटककी प्रस्तावना की है और तब पहला दृश्य दिखलाई देता है। इस दृश्यमें राम सिंहासनपर बैठे दिखाई देते हैं। इतनेहीमें भगवती सीता आ पहुंचती हैं।

रामचन्द्रके बहनोई, उनकी बहन शान्तादेवीके पति, ऋष्यशृङ्गने एक यज्ञका आयोजन किया है, उसीके निमन्त्रणमें सीताकी सब सासुएं चली गयी हैं, अतएव अकेली होनेके कारण सीताका मन नहीं लगता। रामचन्द्र तरह-तरहसे उनका मन बहलाया करते हैं। दोनों पति-पत्नीमें बातें हो ही रही थीं, कि कञ्चुकीने आकर संवाद दिया, कि ऋष्यशृङ्गके आश्रमसे अष्टावक्र नामक मुनि आये हैं। रामचन्द्रने सीताके कहनेपर उन्हें झटपट अपने पास बुला लिया। आते ही ऋषिने उन्हें आशीर्वाद दिया। राम और सीताने भक्तिभावसे ऋषिको प्रणाम किया। तदनन्तर राम और सीताने माता कौशल्या, सुमित्रा, कैकेयी, वशिष्ठ, शान्तादेवी तथा ऋष्यशृङ्ग आदिकी कुशल पूछी, जिसके उत्तरमें अष्टावक्रने कहा,—"महाराज! सब लोग सदा आपको याद करते रहते हैं। आपके कुलगुरु वशिष्ठने भगवती सीताको वीर-प्रसविनी होनेका आशीर्वाद दिया है।" यह सुन रामने गुरुका अपने ऊपर अपार अनुग्रह माना और मन-ही-मन बड़े ही प्रसन्न हुए।

तदनन्तर अष्टावक्रने कहा,—"महाराज! भगवती अरुन्धती, तथा रानियों और शान्तादेवीने आपसे बार-बार अनुरोध किया है, कि जानकी गर्भवती हैं, इसलिये उनके मनमें जो कुछ अभिलाष उत्पन्न हो, वह तत्काल पूरा किया जाना चाहिये।"

इसके उत्तरमें रामने कहा, कि ये अब जो कुछ कहती हैं, वह तभी कर दिया जाता है।

इसपर अष्टावक्रने कहा,—"और भगवती सीताजीसे अरुन्धती ऋष्यशृङ्गने कहा है, कि इस समय आप गर्भवती हैं, इसी लिये यज्ञमें नहीं बुलायी गयी हैं और भगवान् रामचन्द्रको भी आपका दिल बहलानेके ही लिये अयोध्यामें रख छोड़ा गया है। अब वे आपकी गोद भर जानेपर अवश्य आपको देखने आयेंगे।"

यह सुन, रामने मुस्कराकर कहा, कि अच्छी बात है। अब यह तो कहिये, कि हमारे गुरु वसिष्ठने हमारे लिये कुछ आदेश किया है या नहीं? अष्टावक्रने कहा,—"हाँ, उन्होंने कहा है, कि तुम अभी तरुण हो, नये-नये राजा हुए हो, इस लिये प्रजाका मन रखनेकी सदा चेष्टा करते रहना। यश ही तुम्हारे लिये बड़ा भारी धन है। प्रजाका ठीक-ठीक पालनकर तुम बड़ी यश लाभ करो।"

इसके उत्तरमें रामने बड़े जोशके साथ कहा,—"गुरुजीका आदेश मेरी सिर-आँखोंपर है। प्रजाके रञ्जनके लिये स्नेह, दया, सुख, यहाँतक कि जानकीको भी छोड़ देते हुए मुझे कोई क्लेश न होगा।"

रामचन्द्रकी यह उदार वाणी सुनकर सीता [illegible] उठीं,—"इसीलिये तो लोग आर्यपुत्रको रघुवंशका भूषण कहते हैं।" इसके बाद अष्टावक्रके विश्रामकी व्यवस्था की गयी। वे आराम करने चले गये और लक्ष्मणजी आ पहुँचे। आते ही लक्ष्मणने कहा,—"महाराजकी जय हो। आर्य! उस चित्रकारने हमलोगोंकी आज्ञानुसार इस पटपर आपका जो चरित्र अङ्कित किया है, उसे देखिये।" रामने कहा,—"प्यारे भाई! जिस तरह देवीका जी बहलेगा, यह तुम भली भाँति जानते हो। अच्छा, यह तो कहो, कि उसने कहाँ तकके चित्र बनाये हैं?"

लक्ष्मणने कहा,—"आर्याकी अग्निपरीक्षा तक अङ्कित कर चुका है।

रामने कहा,—"जो जन्महीसे पवित्र हैं, उनकी शुद्धिके लिये और किसी पावन पदार्थका प्रयोजन ही क्या है? तीर्थके जल और अग्निको शुद्ध करनेके लिये और कुछ नहीं चाहिये —वे आपही शुद्ध हैं। देवि! तुम्हारी यह कीर्ति सदा बनी रहेगी। कुलकी कीर्तिकी रक्षा करना और प्रजाका मन रखना, बड़ा ही कठिन काम है। इसलिये उस समय (अग्नि-परीक्षाके अवसरपर) मैंने जो तुम्हें अप्रिय वचन कहे थे, वे तुम्हारे योग्य न होनेपर भी उसी लिहाजसे मैंने कहे थे—क्षमा करना। सुन्दर सुगन्धित फूल सिरपर ही शोभा पाते हैं, वे पैरोंसे कुचल डालनेकी वस्तु नहीं हैं।"

सीताने कहा,—"आर्यपुत्र! जाने दीजिये इन बातोंको। आइये, हमलोग आपके चरित्रोंके आधारपर बने हुए चित्रोंको देखें।"

यह सुनते ही लक्ष्मणने वह चित्रपट लेकर दिखलाना आरम्भ किया। विश्वामित्रके दिये हुए प्रयोग-संहार-मन्त्रयुक्त जृम्भकास्त्रोंको दिखलानेके अनन्तर लक्ष्मणने जनकपुरकी लीलाएं दिखलानी आरम्भ कीं। विवाहके समयके चित्र देख, वे लोग बड़े प्रसन्न हुए और उन्हें ऐसा मालूम होने लगा, मानों वे उसी समय और उसी स्थानमें अवस्थान कर रहे हों। चारों भाइयोंके साथ साथ चारों बहुओंके चित्र भी बड़ी सुन्दरतासे अङ्कित किये गये थे। लक्ष्मणने सबको तो नाम लेकर बतलाया, पर अपनी स्त्री उर्म्मिलाका चित्र छोड़ दिया। यह देख सीताने मुस्कराकर पूछा,—"और यह कौन है ?

लज्जाके साथ धीरेसे मुस्कराकर लक्ष्मणने मन ही मन कहा,—"भाभी उर्मिलाका हाल पूछ रही हैं। अच्छा, अब दूसरी ओर देखिये। (प्रकट) भाभी ! यह देखिये——देखने ही योग्य है। यही भगवान् भार्गव हैं।"

परशुरामजीकी क्रोधभरी मूर्त्ति देखते ही सीताने कहा, कि 'दूसरा चित्र दिखलाओ। मैं इस चित्रको देख डरके मारे काप रही हूं।' रामने भी ऋषिको प्रणाम कर, सीताको डरते देख, दूसरा चित्र दिखलानेके लिये कहा। तब लक्ष्मणने बरात लौट आनेपर अयोध्याका दृश्य दिखलाया। फिर मन्थरा दिखाई दी। रामने उस ओरसे मुंह फेरकर शृङ्गवेर-पुरमें इङ्गुदी-वृक्षके नीचे निषादराज गुहसे भेंट होना और जटाधारण करना—यह सब चित्र देखना और सीताको दिखलाना आरम्भ किया। इसपर लक्ष्मणने मन ही मन सोचा, कि 'भैया मंझली माताके आचरणपर परदा डाल रहे हैं।' फिर गङ्गा दिखलाई पड़ीं। उन्हें प्रणामकर रामने कहा, कि 'देवि ! आप भगवती अरुन्धतीकी भांति अपनी बहू सीतापर दया रखें।'

इसके बाद लक्ष्मणने भरद्वाज मुनिके बतलाये हुए चित्रकूटके-पथमें स्थित यमुनाके तीरपर-वाले 'श्याम' नामक वट-वृक्षकी तसवीर दिखलाई। उसे देख, सीताने पूछा,—"आर्य ! क्या आपको इस प्रदेश की याद आती है ?" यह सुन रामने कहा,—"भला मैं इस प्रदेशकी बात कैसे भूल सकता हूं ? यहीं तो तुम राह चलते-चलते थककर आलस्यके मारे मेरी गोदमें सिर रखकर सो गयी थीं ?"

इसके बाद लक्ष्मणने विन्ध्य-वनमें प्रवेश करते समय विराधके राह रोकनेवाली घटनाका चित्र दिखलाया। उस घटनाकी ओरसे मुंह फेरकर सीताने कहा, कि 'इन सब घटनाओंको छोड़कर उन सब घटनाओंको दिखलाओ, जो हमारे दक्षिणारण्यमें प्रवेश करते समय हुई थीं और मेरे प्राणनाथ तापसजनका आतिथ्य मेरे सिरपर बनाये आरहे थे।'

तदनुसार लक्ष्मण झरनोंके समीप बने हुए तपोवनोंको दिखलाते हुए प्रस्रवण-गिरिके

चित्रकी-पास चली आयी। पासही गोदावरीका चित्र देख रामको वनवासके सुखमय दिन स्मरण हो आये। दिखलाते-दिखलाते लक्ष्मणने पञ्चवटीमें शूर्पणखाके आनेका चित्र दिखलाया। उसे देखते ही सीताने दुःखसे अधीर हो, कांपते हुए, कहा,—"आर्य्यपुत्र! बस यहीं हमारी-आपकी अन्तिम देखादेखी हुई थी!" उस समय ऐसा मालूम होता था, मानों सीता सचमुच रामसे बिछुड़ रही हैं। यह देख, रामने कहा,—"विरहसे डरनेवाली! इस प्रकार न डरो! यह तो केवल चित्र-मात्र है।"

सीताने कहा,—"जो हो, बुरेसे बुरेकी ही कल्पना होती है।" रामने कहा,—"अहा, इस समय इन चित्रोंको देखनेसे जनस्थानकी घटनाएं आंखोंके सामने नाच रही हैं।"

इसपर लक्ष्मणने कहा,—"यहांपर राक्षसोंने जो सुनहले मृगकी माया रचकर भाभीको हर लिया था, उससे दुःखी हो भैया रामचन्द्रने जो विलाप किया था, उसको देख-सुनकर पत्थर भी पिघलकर पानी हो जाता था।" यह सुन, सीताने एक लम्बी सांस ली और कहा, कि 'आह! मेरेही लिये रघुकुलालङ्कारको इतना क्लेश उठाना पड़ा था!' यह कहते-कहते सीताकी आंखें भर आयीं। रामके भी नेत्र नीर-पूर्ण हो गये।

यह देख, लक्ष्मणने उन लोगोंका मन फेरनेके अभिप्रायसे गृध्रराज जटायुका चित्र दिखलाया। उसे देख सीता और रामको उस पक्षीके उपकार याद हो आये। इसी प्रकार क्रमशः शबरी-आश्रम, पम्पासरोवर, माल्यवान् पर्वत, हनुमान् आदिके चित्र लक्ष्मणने दम्पतीको दिखलाये। यह सब देखते देखते सीताने कहा,—"आर्य्य-पुत्र! मेरी इच्छा होती है, कि एकबार फिर फूले-फले सुहावने वनोंमें भ्रमण करती हुई शीतल जलवाली गङ्गामें नहाऊं।"

यह सुन रामने लक्ष्मणसे कहा, कि इस समय इनकी जितनी इच्छाएं तत्काल पूरी की जानी चाहियें, ऐसा गुरुजनोंका आदेश है, अतएव तुम शीघ्रही इन्हें जङ्गलकी सैर करानेके लिये रथ ले आओ। तब सीताने रामको भी साथ चलनेका अनुरोध किया, जिसे उन्होंने सहर्ष मान लिया। लक्ष्मण भी रामकी आज्ञा स्वीकार कर वहांसे बाहर चले गये और सीता रामकी गोदमें सो रहीं। राम, एकटक लोचनोंसे सीताका वह मुख-सौन्दर्य देखने लगे। इतनेमें पहरेदारने आकर खबर दी, कि महाराजका प्रिय गुप्तचर दुर्मुख द्वारपर खड़ा है। चूंकि दुर्मुखका उस समय, सब जगह प्रवेश था, इसीलिये रामने द्वारपालको झटपट उसे बुला लानेकी आज्ञा दे दी।

थोड़ीही देरमें दुर्मुख आ पहुंचा। आतेही उसने आपही-आप कहा "हाय! मैं किस प्रकार महारानी सीताके सम्बन्धमें बुरी खबर कह सुनाऊंगा?"

इतनेमें रातें वह मन-ही-मन सोच ही रहा था, कि इतनेमें सीतादेवीने न जाने कैसा बुरा सपना देखा, कि सोयी ही सोयी बरौं उठीं,—"हा, आर्य्यपुत्र! आप कहाँ गये?"

रामने सोचा था, कि चित्र देखते समय देवी सीताके मनमें जो विरह पैदा हुआ था, वही सपनेमें भी उन्हें सता रहा है। यही सोचते हुए वे सीताकी देहपर हाथ फेरने लगे।

दुर्मुखने पास आकर कहा,—"महाराजकी जय हो।"

इसपर जब रामने उससे पूछा, कि 'कहो, मेरे विषयमें प्रजा क्या कहती है,' तब वह बार-बार टालमटोल करता हुआ बोला, कि 'पर-गृहमें निवास करनेके कारण प्रजाके कुछ लोग वैदेहीपर अपवाद लगाते हैं।'

यह सुन राम बारबार अपनेको धिक्कार देते हुए कहने लगे, कि इस समय सीताको परित्याग करनेके सिवा और कोई उपाय नहीं है। यही सोचकर उन्होंने दुर्मुखसे कहा, कि 'झटपट लक्ष्मणको बुला लाओ।' हाहाकार करता हुआ दुर्मुख चला गया। राम पुनः अपनेको धिक्कार देने और भाग्यको कोसने लगे। इसी समय बाहरसे आवाज आयी,—"ब्राह्मणोंपर बड़ी विपत्ति आ पड़ी है। यमुना-तीरपर रहनेवाले कठोर तपस्यामें लगे हुए महर्षियोंपर लवणनामक राक्षस बड़ा अत्याचार कर रहा है। इसीसे वे लोग आपके पास आये हैं।"

यह सुन, रामने सोचा, कि 'इतने राक्षसोंका वध हो चुका, तो भी यह दुष्ट महर्षियोंको सताही रहा है? अच्छा, इसके सर्वनाशके लिये मैं अभी शत्रुघ्नको भेजता हूँ।' यह विचार कर वे कुछ पग आगे बढ़े ही थे, कि फिर लौट आये और सीताकी ओर देखकर कहने लगे,—"हा देवि!. तुम इस गर्भावस्थामें कैसे वनको जाओगी? भगवती वसुन्धरे! तुम्हीं अपनी प्यारी पुत्री जानकीकी रक्षा करना।" यही कहकर वे झट बाहर चले आये।

उनके जातेही सीताकी नींद खुल गयी और वे आपही-आप कहने लगीं,—"हा, सौम्य-मूर्त्ति आर्य्यपुत्र! आप कहाँ गये? मुझे अकेली सोती छोड़ आप किधर चल दिये? अच्छा, रहो, मैं उनसे रूठ जाती हूँ, पर उन्हें देखकर रूठना कहाँ रहेगा? कोई है?"

इतनेमें दुर्मुखने आकर कहा, कि 'दरवाजेपर कुमार लक्ष्मण रथ लिये खड़े हैं।'

यह सुनतेही सीता, देवताओंको प्रणामकर, स्वामीका नाम लेते हुए रथपर सवार होने चलीं।



द्वितीय अङ्क।

तपस्विनी आत्रेयी और वनदेवतामें बातें हो रही हैं। वनदेवताने पूछा, कि "तुम महर्षि वाल्मीकिके निकटसे यहाँ क्यों चली आयीं? वे तो तुम्हें भली भाँति वेदान्त-विद्याकी शिक्षा दे सकते थे।" इसके उत्तरमें उन्होंने कहा,—"वहाँ आजकल एक विघ्न उपस्थित हो गया है। दो देवताके समान लड़के, जिनके नाम कुश और लव हैं, ऋषियोंके मन मोहित किये हुए हैं। अत्यन्त आश्चर्यकी बात तो यह है, कि जन्मसे ही उन्हें समस्त जृम्भकास्त्रका प्रयोग सिद्ध है। भगवान् वाल्मीकिने उन्हें अन्य सब तरहकी शिक्षा दी है। उन्हें यज्ञोपवीत क्षत्रियोंकी भाँति दिया गया है और वे वेदोंका अध्ययन कर रहे हैं। उन प्रतिभाशाली लड़कोंके साथ हमलोगोंका पढ़ना नहीं हो सकता; क्योंकि गुरु बुद्धिमान् शिष्योंको जिस प्रेमसे विद्या दान करते हैं, उस तरह अबोधोंको नहीं।"

वनदेवताने कहा—,—"तो क्या यही एक विघ्न तुम्हारे वहाँ पढ़नेमें है?"

आत्रेयीने कहा—"नहीं, और भी है। एक दिन तमसा-नदीके तीरपर भ्रमण करने जाकर हमारे गुरुने मैथुन-संलग्न क्रौञ्च-पक्षीके जोड़ेमेंसे एकको एक व्याधके तीरका निशाना होते देखा। उससे उन्हें बड़ा दुःख हुआ और वे अनायास श्लोकहीमें कह उठे,—कि "रे व्याध! चूँकि तूने कामसे मोहित इस पक्षीके जोड़ेमेंसे एकको मार डाला है, अतएव दीर्घकालतक तुम्हें प्रतिष्ठा नहीं मिलनेकी, यह श्लोक अनुष्टुप छन्दमें है।"

वनदेवता—"यह तो वेदोंसे बाहर बिलकुल नया ही छन्द निकला।"

आत्रेयी—"उसी समय ब्रह्माने वाल्मीकिके पास आकर कहा,—कि आप इसी तरहके छन्दोंमें रामचरित्रका वर्णन कीजिये। आपकी प्रतिभा आपसे आप फूट पड़ेगी। आप सब कुछ जान सकेंगे। आपही आदि-कवि होंगे। यह कह वे अन्तर्धान हो गये। तब गुरुने रामायणकी रचना की। यही एक और भी पढ़नेमें विघ्न हुआ।"

इसके बाद आत्रेयीने अगस्त्य-महर्षिके आश्रममें जानेका रास्ता पूछा। वनदेवताने पञ्चवटीकी ओर जाकर गोदावरीके किनारे किनारे अगस्त्य ऋषिके आश्रममें जानेकी राह बतला दी। पञ्चवटी और गोदावरीके नाम सुनते ही आत्रेयीको जानकीकी याद आ गयी और उनके मुँहसे एक लम्बी आह निकल पड़ी। यह सुन, वनदेवताने 'क्या सीता-का कोई अनिष्ट हो गया है?" इसके उत्तरमें आत्रेयीने सारा हाल सुनकर जनस्थानके वनकी सीताकी सखी, वनदेवता वासन्ती बहुत ही [illegible]

[illegible] जब आत्रेयीने कहा, कि महाराज रामचन्द्र आजकल अश्वमेध यज्ञका अनुष्ठान करने जा रहे हैं, तब वासन्तीने घबराकर पूछा, कि क्या उन्होंने दूसरा विवाह भी किया है?

इसके उत्तरमें आत्रेयीने कहा,—“नहीं। सीताकी सोनेकी प्रतिमा ही उनकी सहधर्म्मिणीका काम करेगी।”

यह सुन परम प्रसन्न हो वनदेवता वासन्तीने कहा,—“वाह! लोकातीत महापुरुषोंका हृदय वज्रसे भी कठोर और कुसुमसे भी कोमल होता है, उनके हृदयकी थाह भला कौन पा सकता है?”

तब आत्रेयीने कहा,—“ब्राह्मणोंके द्वारा मन्त्रसे पवित्र किया हुआ घोड़ा छोड़ा गया है। उसके रक्षक भी मुकर्रर हो चुके हैं। लक्ष्मणके पुत्र चन्द्रकेतु रक्षकोंके सरदार नियत हुए हैं। एकाएक कोई ब्राह्मण अपने मरे बेटेको लिये हुए छाती पीट पीट कर रोता हुआ राजद्वारपर आकर कहने लगा—“मेरा सर्वनाश हुआ! सर्वनाश!!” इसी समय आकाशवाणी हुई, कि शम्बूक नामक शूद्र तपस्या कर रहा है। उसे मारकर तुम ब्राह्मणके पुत्रको जिला दो।” यह सुन रामने पुष्पक-विमानपर सवार हो शूद्रको मारनेके लिये यात्रा कर दी है।”

वनदेवता बोल उठी,—“ओह! शम्बूक तो इसी जनस्थानमें तपस्या कर रहा है। तो क्या रामचन्द्र फिर यहाँ आकर इस वनको अलङ्कृत करेंगे?”

इतनी बातें होनेके अनन्तर आत्रेयी वनदेवतासे विदा माँग चली गयी और वासन्ती भी मनही मन कुछ भुनभुनाती हुई दूसरी ओर चली।

इसके बाद ही हाथमें खड्ग लिये रामचन्द्र आ पहुँचे। शम्बूक उनके आनेका हाल सुन उनके पास चला आया और बोला, कि महाराज! सज्जनोंके हाथसे मरना भी अच्छा ही है। अतएव आप मुझे मारकर ब्राह्मणके बेटेको जिला दीजिये।

यह सुन, रामने कहा,—“अच्छा, तुम मेरे हाथोंसे मरकर अपनी उग्र तपस्याओंके कारण उन अविनश्वर लोकोंमें चले जाओ, जहाँ आनन्द, प्रमोद और पुण्यकी सम्पदा सदा सञ्चित रहती है।”

इसके बाद उसके मुँहसे यह सुनकर, कि यह केवल दण्डकारण्य ही नहीं है, बल्कि यहीं जनस्थान और पञ्चवटी भी है, रामचन्द्र पुरानी बातोंको याद कर-करके बहुत ही शोकाकुल हुए। इसके अनन्तर उन्होंने कहा, कि ‘शम्बूक! तुम अभी विमानपर चढ़कर पुण्यलोकमें चले जाओ। तुम्हारे पथमें कोई बाधा न होने पावेगी।’

इसके उत्तरमें शम्बूकने कहा, कि ‘मैं पहले महर्षि अगस्त्यके पास जा, उन्हें प्रणाम करके तब शाश्वत ब्रह्मलोकको चला जाऊँगा।’ यह कह वह चला गया।

इसके अनन्तर राम, भिन्न-भिन्न स्थानोंको देखकर शोकाकुल होने और दुःख प्रकट करने लगे। जिन-जिन स्थानोंमें सीताके साथ रहकर उन्होंने अपने वनवासके दिन सुखसे बिताये थे, उन सब स्थानोंको देख-देखकर उनकी आँखें भर आती थीं। इतनेहीमें शम्बूक पुनः आ पहुँचा। उसने आतेही कहा—"महाराजकी जय हो। मुझसे आपके यहाँ आनेकी बात सुना महर्षि अगस्त्यने आपको कहला भेजा है, कि स्नेहमयी लोपामुद्रा देवी पुष्पकके नीचे उतरनेकी आशासे माङ्गलिक द्रव्य सञ्चित किये आपके आनेकी प्रतीक्षामें बैठी हैं।* अन्यान्य महर्षिगण भी आपकी राह देख रहे हैं। आप वहाँ चलकर उन लोगोंको कृतार्थ कीजिये। इसके बाद शीघ्र उड़नेवाले पुष्पक-विमानपर चढ़कर आप अश्वमेध-यज्ञको पूरा करनेके लिये चले जाइयेगा।"

यह सुन, रामने कहा, कि 'भगवान् अगस्त्यने मुझे जो आज्ञा दी है, उसका मैं अवश्यही पालन करूँगा।' तदनन्तर राम पञ्चवटीमें इधर उधर जानेके लिये उस पवित्र वनस्थलीसे बिदा माँगकर शम्बूकके बतलाये हुए रास्तेसे चल पड़े।

तृतीय अङ्क।

आरम्भमें तमसा और मुरला नामक दो नदियाँ आती हैं। मुरलाने कहा,—"भगवति तमसे! महर्षि अगस्त्यकी सहधर्मिणी लोपामुद्राने मुझे गोदावरीके पास यह कहनेके लिये भेजा है, कि इधर रामचन्द्र आनेवाले हैं। उन्होंने जबसे सीताको त्याग किया है, तबसे बड़े शोकमें पड़े रहते हैं, अतएव तुम ऐसी सावधानी रखना, जिसमें वे धीरज न खोने पावें। यदि कदाचित् वे मूर्च्छित हो पड़ें, तो उसी समय जलके ठण्ढे छींटे देना।"

इसपर तमसाने कहा, कि रामचन्द्रके चैतन्यका मूल उपाय सीता भी तो इन दिनों यहीं है। सीताको जब लक्ष्मण वाल्मीकिके तपोवनमें छोड़ गये, तब उन्हें प्रसव-वेदना सताने लगी, जिससे घबराकर वे गङ्गामें कूद पड़ीं। उसी समय उन्हें दो पुत्र पैदा हुए। पृथ्वी और भागीरथी, दोनों मिलकर उन्हें रसातलमें ले गयीं। जब बच्चोंने माँका दूध पीना छोड़ दिया, तब स्वयं गङ्गा जाकर उन बालकोंको वाल्मीकिके हाथोंमें सौंप गयीं। आज सरयूनदीके सुन्दर तट पर अश्वमेधके लिये रामके इधर आनेका वृत्तान्त भागीरथीके कानों-भी वैसी कथा हुई, जो देवी लोपामुद्राको हुई थी। इसीसे वे मनाने, सीताकी साथ ले, गोदावरीको देखने आयी हैं।"

मुरलाने कहा,—"यह तो उन्होंने अच्छा सोचा क्योंकि वहां राज्यके अञ्झटोंमें तो रामचन्द्र सीताका शोक बहुत कुछ भूल जाते होंगे, परन्तु यहां आनेपर तो पञ्चवटीको देख, पुरानी बातोंकी याद उनको तड़पा देगी। अच्छा, सीता किस तरह रामचन्द्रको धीरज बन्धायेंगी?"

तमसा,—"भगवती भागीरथीने सीतासे कहा है कि लवकुशकी आज बारहवीं बरस गांठ है, इसलिये उनके हाथके बन्धनसूत्रमें सम्यामङ्गलको गांठ देनी होगी। इसलिये आज अपने श्वशुरकुलके आदि पुरुष सूर्यदेवकी पूजा करनी पड़ेगी। मनुष्योंकी तो बात ही क्या है, आज हमारे प्रभावसे वनके देवता भी तुम्हें न देख सकेंगे। औरःमुझसे उन्होंने कहा है कि, तुम्हें जानकी बहुत मानती है, इसलिये आज तुम्ही इसकी सहचरी बन। इसलिये मैं तो अब उनकी आज्ञा पालन करने जारही हूं।"

मुरला,—"मैं चलकर लोपामुद्रा देवीसे यह हाल कहती हूं। मुझे तो ऐसा मालूम होता है, कि अबतक श्रीरामचन्द्र आ पहुंचे होंगे।"

तमसा,—"वह देखो—सीता गोदावरीके जलसे बाहर निकल रही हैं। उन्हें देख ऐसा मालूम हो रहा है—मानों शोक और विरहने साक्षात मूर्त्ति धारण कर ली है।"

इसी तरह बातें करती दोनों दो तरफ चली गयीं।

नेपथ्यमें "सर्वनाश हुआ! सर्वनाश!" सर्वनाश की फुकार सुन, उत्कण्ठित और शोकाकुल चित्तसे फूलचुनती हुई सीता आती हैं।

आते ही उन्होंने कहा,—"अच्छा! यह तो मालूम होता है, मानों मेरी प्रियसखी वासन्ती बातें कर रही है।"

इसी समय फिर नेपथ्यमें शब्द हुआ, कि "पहले सीतादेवीने अपने पास पेड़ोंके कोमल पत्ते खानेके लिये आये हुए हाथीके बच्चेको अपने हाथों सल्लकीके कोमल पत्ते खिला-खिलाकर पोसा था, उसीको करिणीके साथ जल-क्रीड़ा करते समय एक हाथियोंके सर-दारने मार भगाया।"

यह सुनते ही सीता, 'आर्यपुत्र! बचाओ!' कहकर चिल्ला उठी; क्योंकि वे उस हाथीके बच्चेको लड़केकी तरह मानती थीं। पर आर्यपुत्रको याद और वनवासके दिनोंका स्मरण होते मूर्च्छित हो गिर पड़ीं।

तमसाने आकर सीताको चेत करानेकी चेष्टा की। इधर नेपथ्यमें सुनाई दिया,—'विमानराज! यहीं ठहरो।'

यह सुनते ही सीता उठ बैठीं और उत्कण्ठित हो बोलीं,—"अहा! यह किसका स्वर

है। इसे सुनतेही मेरा मन मोर मस्त होकर नाच उठा। यह तो आर्य्यपुत्रका स्वर मालूम पड़ता है।"

यह सुन तमसाने कहा, "कि मैंने सुना है, राजा शम्बूकको दण्ड देनेके लिये जनस्थानमें आये हुए हैं।"

सीता कह उठीं,—"बड़े सौभाग्यकी बात है कि वे अपने राजधर्मका पालनकर रहे हैं।" इतनेमें नेपथ्यमें फिर वैसा ही स्वर सुनाई दिया। इतनेमें रामको देख, सीताने कहा,—"ओह! इनकी देह सुबहके चन्द्रमाकी तरह पीली और दुर्बल हो रही है—केवल सौम्य और गम्भीर मूर्त्ति देखकर ही मैं पहचान रही हूँ, कि ये आर्य्यपुत्र हैं। देखना, मैं मूर्च्छित हुई जाती हूँ।"

यह कह, वे मूर्च्छित हो गयीं। तमसाने उन्हें गिरनेसे बचा लिया और धीरज बन्धाती हुई होशमें ले आयी।

उधर रामचन्द्र भी प्राचीन स्मृतियोंके जग आनेसे 'हा जानकी! हा जानकी!' करते हुए मूर्च्छित हो गिर पड़े। तमसाने यह देखकर मन ही मन कहा,—"जो बड़े लोग जिस बातके लिये डर रहे थे, वही हुई।"

सीताने होश आकर रामकी जो अवस्था देखी, उससे वे और भी दुःखित हुईं तथा रोते रोते तमसाके पैरोंपर गिर पड़ीं।

उन्हें उठाकर तमसाने कहा,—"चलो, चलो, रामको स्पर्श कर दो, जिसमें वे होशमें आकर उठ बैठें नहीं तो बड़ा अनर्थ हो जायेगा।"

यह सुन सीता घबरायी हुई रामके पास आयीं और उनकी देह सहलाने लगीं। थोड़ी ही देरमें राम जागे और कहने लगे,—"ओह! बड़े आश्चर्यकी बात है—मालूम होता है, कि आज किसीने हरिचन्दनके पत्तोंका रस मेरी देहपर टपका दिया, अथवा, किसीने चन्द्रमाकी किरणोंको निचोड़कर उनका सारा रस मेरे ऊपर डाल दिया, अथवा किसीने जलता जीवन और चित्तको दग्ध करनेवाली सञ्जीवनी मेरे हृदयमें लाकर घुला दी। ओह! यह स्पर्श तो पूर्व-परिचित सा मालूम पड़ता है जो सन्तापजात मूर्च्छाको दूरकर आनन्दकी अधिकताके कारण पुनर्वार विकलता उत्पन्न कर रहा है।"

सीता, "अभी इतना सौभाग्य इस समय बहुत है" यह कह दूर हट गयीं।

इतनेमें रामने कहा,—"क्या स्नेहमयी सीतादेवी मेरे ऊपर दया गी?" यह सुन सीताने सोचा, कि "अहा! आर्य्यपुत्र मुझे ढूँढ रहे हैं।" । उन्होंने तमसासे कहा, "कि अभी हमलोग दूर हट चलें, क्योंकि मुझे देखकर । आज्ञाके

उनके पास जानेके लिये व्यग्र हो सकते हैं।" तमसाने उन्हें बतलाया, कि "घबरानेका कोई काम नहीं है, भागीरथीके वरके प्रभावसे, तुम्हें वनके देवता भी नहीं देख सकते।" तब सीताको भी यह बात याद हो आयी। इधर रामचन्द्र सीताको इधर-उधर ढूंढ़ते हुए अपना हार्दिक दुःख प्रकट कर रहे थे। यह देख, सीता मन ही मन शोक प्रकाश करने लगीं। इतनेहीमें नेपथ्यमें कितने ही शब्द सुनायी दिया—'पहले सीताके पास पेड़ोंके कोमल पत्ते खानेके लिये हुए हाथीके बच्चेको अपने हाथोंसे सल्लकीके कोमल पत्ते खिला-खिला कर पोसा था, उसीको करिणीके साथ जलक्रीड़ा करते समय एक दूसरे हाथीके सरदारने मार भगाया।"

यह सुन सीता कह उठीं,—"हा! इस समय कौन उस दुष्ट गजयूथपतिको मारकर भगा देगा?"

रामने भी वह शब्द सुन कहा,—"अच्छा, जल विहार करते हुए उस हाथीके बच्चेको जिसे देवी अपने पुत्रकी भांति मानती थीं, कौन दुरात्मा तङ्ग कर रहा है?" यह कहते हुए वे आगे बढ़े। इतनेमें सीताकी सखी वासन्तीदेवी आ पहुंची। उसने बड़े आदरसे कहा,—"यह क्या यहां रघुपति रामचन्द्र कैसे आये?"

सीताने सखीको देखकर कहा,—"अहा! मेरी प्यारी सखी वासन्ती आ पहुंची?"

रामने उसे देख कहा,—"अहा, ये मेरी प्यारी पत्नीकी सखी वासन्ती देवी हैं।"

रामको देख, वासन्ती देवीने कहा,—"महाराज! चलिये। आपकी सियाके पालित पुत्रको एक हाथियोंके सरदारने बड़ा तङ्ग कर रखा है। चलकर उसे बचाइये।"

इस प्रकार बातें करते हुए दोनों आगे बढ़े, गङ्गाजीके वरदानके प्रभावसे सीताको इनमेंसे कोई न देख सका, सीता और तमसा—दोनों चुपचाप इन दोनोंके पीछे चलीं।

कुछ ही दूर आगे जाकर सबने उस हाथीके बच्चेको,—जो अब बिलकुल बच्चा न था, जवान हो गया था, विजयी होकर अपनी प्यारी करिणीके साथ आते देखा। इस पर सबने बड़ी प्रसन्नता प्रकट की। सीताने कहा,—"भगवती तमसे! यह करि-शावक तो बढ़कर इतना बड़ा हो गया। न मालूम कुश और लव कितने बड़े हुए होंगे।"

यह सुन तमसाने कहा,—"इतनेही बड़े हुए होंगे, और क्या?"

सीताने शोकके साथ कहा,—"ओह! मैं कैसी अभागिनी हूं, जो न केवल पतिसेही, परन्तु अपने बच्चोंसे भी बिछुड़ी हुई हूं। मैंने बेटावाली होकर ही क्या किया?"

तमसाने धैर्य देते हुए कहा,—"यह सब होनहारके हाथ है। घबराओ मत, फिर आपकी गोदमें वे होंगे।

इधर राम, अपने वनवासके दिनोंकी वस्तुओंको पहचानकर, उदास होने, और उधर, सीता उनकी बातें सुन-सुनकर रोने लगीं। शोक प्रकट-करते करते राम एक ओर बैठ तमसा सीताके पास आकर बोलीं—"लो, आँखें भरकर स्वामीको देख लो।" वासन्ती रामको धीरज धराने और सीता उनकी वह अवस्था देखने लगीं। वासन्ती और राममें बहुत बातें हुईं। वासन्तीने बातें करते-करते रामको इस बातके लिये कोसना शुरू किया, "कि क्यों आपने उस सरल-प्राणा सीताको किस कलेजेसे घरसे निकाल बाहर कर दिया, जिसे आप द्वितीय हृदय, नेत्र-कौमुदी, शरीरकी अमृतधारा और न जाने क्या-क्या कहा करते थे।" यह कहते-कहते वह मूर्च्छित हो गयी। रामने उसे चेत कराकर कहा,—"मैंने लोगोंका मुँह बन्द करनेके लिये ऐसा किया।" इसपर वासन्ती बोली,—"तब आपने लोगोंके ही दण्ड क्यों नहीं दिया?"

वासन्तीको इसप्रकार रामको कोसते देख सीताने मनही मन कहा,—वासन्ती! तू बड़ी निठुर है, तभी दु:खमें पड़े हुए आर्यपुत्रको और भी जला रही है।"

वासन्तीकी बातें सुन रामने कहा,—"मालूम होता है, हरिनके बच्चेकी तरह आँखों-वाली सीताको कोई खूनका क्या प्यासा जानवर खा गया! हा प्रिये। तुम कहाँ हो?"

सीताने कहा,—"आर्यपुत्र! मैं मरी नहीं, जीती हूँ।" पर यह बोली राम न सुन सके, और सीताको देख भी न सके। रामको लगातार अधिकाधिक शोक-क्षुब्ध होते देख सीता मनही मन अपने सौभाग्यको सराहने लगीं। साथ ही वे यह कहकर अपने भाग्य को कोसने भी लगीं, "कि मेरे ही कारण आर्यपुत्र आज भी दु:ख उठा रहे हैं।"

रामको बहुत शोकातुर होते देख, वासन्तीने उनका मन फेरना चाहा। वह उन्हें जनस्थानके चिरपरिचित स्थानोंको दिखलानेके लिये ले चली। यह देख सीताने सोचा— "कि इससे तो दु:ख घटनेके बदले बढ़ेगा!"

इधर-उधर देखते-देखते राम जा रहे थे, बातेंही करते-करते वे फिर मूर्च्छित हो गिर पड़े। यह देख देख सीता भी बेहोश हो गिर पड़ीं।

तमसाने किसी किसी तरह सीताको होश कराया था, पर वासन्तीके लाख चिट मारनेपर भी जब राम होशमें न आये, तब उसने ऊँचे स्वरसे पुकारा,—"सखी सीते! जल्दी आकर अपने प्राणेश्वरकी प्राण रक्षा करो।"

यह सुन सीता झपटी हुई रामचन्द्रके पास चली आयीं, और उनके हृदय और ललाट पर हाथ फेरने लगीं। रामचन्द्र उठ बैठे और सीताको देख, अपने भाग्यकी बड़ाई करने लगे। फिर तो दोही चार बातोंमें दम्पतीके हृदयका द्वार खुल गया रामने

सीताका हाथ थाम लिया पर वास्तवमें राम सीताको देख नहीं सकते थे। वे उसकी छाया मात्र देख रहे थे। थोड़ी ही देरमें उन्हें ऐसा मालूम हुआ—मानों सीताका हाथ उनके हाथसे छूट गया। तब तो वे बहुत विलाप करने लगे। सीता भी पगलीकी सी हो गयीं। अन्तमें रामने कहा,—"देवि। वासन्ती! अरी सीता यहां नहीं है। मुझे यज्ञ करना है। अब मैं देर नहीं कर सकता, सहधर्मिणीका कार्य निर्वाह करनेके लिये तो सीताकी सुवर्ण-मयी प्रतिमा है हो।'

यह सुन सीताका क्षोभ वाम हर्षसे खिल गया। उनके जीसे निर्वासनका दुःख दूर सा हो गया। फिर तो राम विमानपर सवार हो चले गये, और सीता भी तमसाके साथ दुःखित हृदयसे आश्रममें चली आयीं।

चतुर्थ अङ्क।

आरम्भमें वाल्मीकि-मुनिके दो शिष्योंका आना दिखलाया गया है। मुनिके यहां राजा जनक अतिथि होकर आये हैं, साथ ही वशिष्ठ मुनि ऋष्यशृङ्गके आश्रमसे लौटते हुए देवी अरुन्धती और दशरथकी कौशल्या आदि रानियोंको साथ लिये हुए आये हैं। इसीलिये वे खुशी मना रहे हैं। इनके चले जानेपर राजा जनक आते हैं।

वे मनही मन अपनी कन्याके दुर्भाग्यपर विलाप कर रहे थे, कि इतनेमें कञ्चुकीके साथ कौशल्या और अरुन्धती आती देख पड़ीं। जनक, उनकी दशा देख दुःखी हुए, और वे भी यह सोच दुःखी हुईं,—"कि सीताका वैसा सर्वनाश होनेके बाद मैं राजा जनकको कैसे मुंह दिखाऊंगी?"

